Barcode : 99999990077592
Title - The Nirukta of Yaska Vol.-I
Author - Bhadkamkar, H. M.
Language - sanskrit
Pages - 282
Publication Year - 1918
Barcode EAN.UCC-13

DUE DATESLIP

GOVT. COLLEGE, LIBRARY

KOTA (Raj.)

Students can retain library books only for two weeks at the most.

BORROWER'S No.	DUE DTATE	SIGNATURE

अथ

श्रीयास्काचार्यमणीतं

निरुक्तं

निघण्टुपाठसमुपेतं

दुर्गाचार्यकृत-ऋजर्थाख्यवृत्त्या समेतम् ।



विल्सनकालेजस्थसंस्कृतप्रधानाध्यापकेन

भडकमकरोपाभिधेन

महादेवसूनुना हरिणा

टिप्पण्यादिभिर्मण्डितम् ।

सदेव

तन्त्रान्त्रीयेण गोविन्दात्मजेन रामकृष्णेन

संशोधितम् ।

तथ

मुम्बापुरीस्थराजकीयग्रन्थशालाधिकारिणा

साक्षरत्वं नीतम् ।

प्रथमो भागः ।

शकाब्दाः १८३९] [खिस्ताब्दाः १९१८

मूल्यं सार्धनव रूप्यकाः ।

The Department of Public Instruction, Bombay.

THE NIRUKTA

OF

YÂSKA

(WITH NIGHAṆṬU)

EDITED WITH DURGA'S COMMENTARY

BY

H. M. BHADKAMKAR, B. A.,

Late Professor of Sanskrit, Wilson College, Bombay.

ASSISTED BY

R. G. BHADKAMKAR, M. A.,

Acting Professor of Sanskrit, Elphinstone College, Bombay.

Vol. I.

First Edition, 500 Copies

1918.

[All Rights Reserved]

Price Rs 9, as. 8.

BOMBAY SANSKRIT AND PRAKRIT SERIES. NO. LXXIII

Printed by
Bhivaji Hari Shinde at the "Tattva-vivechaka" Press
Nos. 1-2-3, Khetwadi Back Road, Bombay;
and Published by
The Government Central Press, Bombay.

FOREWORD.

The sad and unexpected death of Professor H. M. Bhadkamkar on the 26th of May, 1915, and all in the midst of his literary labours raised anxious doubts in the minds of many as to whether this edition of the Nirukta, on the completion of which he had set so much heart, would at all be carried to the end. But Mr. R. G. Bhadkamkar, the nephew of the departed Professor and who in fact had been his uncle's amanuensis throughout this work, cheerfully undertook to do what remained of the work and see it through the Press and so pay his humble tribute of respect and gratitute to that noble soul whose memory he so dearly cherishes. The Government of Bombay approved of the proposed transfer of the work and thus it is that the First Volume of the edition which has been with the Press since the end of 1910 is now at last seeing the light of the day. It is hoped that the Second Volume will follow before long. Professor H. M. Bhadkamkar contemplated giving a Third Volume of Notes, but no definite assurance can be given to the public about it until the Text and the Commentary have been edited to the end.

The Press-copy of this volume was all prepared by the late Professor H. M. Bhadkamkar who had even examined the Proofs of the first 192 pages. The work of seeing the rest of the volume through the Press, of putting in the needful references etc., wanting in the Press-copy, and of preparing the Critical Note about the Mss. was entrusted to Mr. R. G. Bhadkamkar, who has, it is due to him to say, discharged his duty in a thoroughly conscientious manner.

DECCAN COLLEGE, POONA,
15th February, 1918.

S. K. B.

TABLE OF CONTENTS.

Vol. I.

		Page.
1.	Foreward	vii
2.	Critical Note	ix
3.	Abbreviations	xv
4.	Nighaṇṭu, Chapter 1	1
5.	Nighaṇṭu, Chapter 2	7
6.	Nighaṇṭu, Chapter 3	13
7.	Nighaṇṭu, Chapter 4	18
8.	Nighaṇṭu, Chapter 5	21
9.	Nirukta, Chapter 1	23
10.	Nirukta, Chapter 2	154
11.	Nirukta, Chapter 3	246
12.	Nirukta, Chapter 4	347
13.	Nirukta, Chapter 5	451
14.	Nirukta, Chapter 6	573
15.	Nirukta, Chapter 7	715

CRITICAL NOTE.

The Mss. and the printed editions, on which the following edition of YĀSKA's *Nirukta* with the commentary of DURGA is based, may be briefly described as follows :—

For the *text* the materials used were :—

A. A Ms. of the text of *Nirukta* to the end of the *Pūrva-shatka* (the first six adhyayas), kindly lent to my revered uncle, PROF H. M. BHADKAMKAR, by his friend DR. STRATTON, the Registrar of the University of the Punjab, 1900 This Ms. had the merit of being old but was not very carefully written

B. A second Ms. of the text of *Nirukta*, Pūrva-shatka, also lent by DR. STRATTON This was a modern but careful transcript written in fine small letters.

C. A Ms. of the whole of the *Nirukta* text, lent to the professor by his dear friend, MR. NARAYANRAO TATKE, Head clerk, Archæological Department, Poona Circle. The text as given in C. is carefully written but exhibits a number of errors. It agrees almost invariably with D. The colophon at the end of the *Pūrva-Shatka* giving the date runs as follows :—इति नैरुक्ते पूर्वषट्के षष्ठोध्यायः ॥ राम् ॥ छ ॥ शके सोळाशे १५ आश्विन शुक्र विजा (जया) दशमी मंदवासरे तद्दीने इदं पुस्तकं समाप्तं ॥ ६ ॥ खंडकरस्य महादेवेन लिखितं चिपोळनकरस्य जगंनाथेन तांबे इत्युपनामक बाबास्य दत्तं दीक्षितस्य पुस्तकं. Thus this Ms. is about a hundred and forty-four years old. Pp. 95+56.

D. A Ms. of the text of *Nirukta* belonging to the Deccan college collection (No. 49 of A 1881–82). It is complete, mostly correct and dated S'ake 1729 = 1807 A. D.

R. Roth's *editio princeps*. Gottingen, 1847–49.

Bi. Bibliotheca Indica Edition, edited with commentaries, by S. Sāmas'rami, Calcutta, 1882–86.

J. *Jivānand's second edition*. Calcutta, 1891.

For the *commentary* of DURGA, my uncle had the following Mss. and editions :—

a. This was kindly procured from a Gujarati Agnihotri of AHMEDABAD, by my uncle's friend, SHASTRI VYANKATACHARYA of Baroda College, who also lent to him Mss. *b.* and *m.* It is complete and contains all the twelve adhyayas. The transcript is carefully made and is in a bold legible hand, the writer several times using *prishthamâtrâ* letters which he often miscopied from the original, which too must have exhibited the same peculiarity of writing.

b This was a very legibly written copy belonging to one Mr. Bedekar. It was incomplete, covering only the first two adhyâyas and a portion of the third. It appears to be independent of *a.* in the *1st* and the *2nd* adhyayas, but the portion of the third looks like a later copy of *a*, as here it shows no differences of reading, whereas in the previous adhyayas it has shown many.

d. A Deccan College Ms. (No. 11, *a* and *b* of 1879–80), complete to the end of the *parishishtas*. Written very carefully, but with several mistakes; and dated Samvat 1802.

m. A Ms. belonging to Sidhbhat Mate of Satara, very carefully written in small legible hand. It shows somewhat an independent source from *a*. It is recently copied and is complete to the end of the 12th adhyaya

bi. and *j.* Bibliotheca Indica edition and Jivanand's printed copy of the book, which agree mostly, even in imitating the mistakes. They represent the Calcutta text. As Bi. and J. invariably agree, J. is not often mentioned separately: seldom so while giving the readings in the commentary.

For this edition all the Mss. and the printed editions referred to above have been collated throughout, except *b.*, which was used only upto the beginning of the third adhyâya for the reason stated above. Although in a way the Mss. of the com-

mentary may be suspected to have the same source, yet a comparison of the readings they offer with those of the Bibliotheca edition will make it clear that to a large extent the Mss. *a. d. m.* are typical in themselves. None of the Mss. is quite satisfactory, yet they are allowed to remain as they stand. Generally the reading of the majority has been adopted. But in several places in the commentary the reading as given in all the Mss. is very corrupt and the printed editions too make no sense. In such cases an attempt has been made, in view of the material available, to put together a text (see pages 53, 101, 280 etc.) which made some sense. But in a very few cases (vide p. 69), for want of better material, there had to be retained a text which is not intelligible in itself, as the idea of restoring the text by making free conjectures is of doubtful propriety. Of course, where conjectural emendations could be offered they have been suggesed in the foot-notes, as is done on pp. 107, 43, 185 etc. These are the principles generally observed in this edition and in no case is any liberty taken with the text. But in some rare cases, where the conjecture carried conviction with it the text has been very slightly meddled with, as in l. 1, p. 32, where have been added two words which are rendered highly probable by the whole context and the sequel, and in the absence of which the sentence and the sense would remain incomplete.

Division of the text into Adhyāyas and Sections.

The Chapters (अध्याय) of the text are divided in this edition, after the manner of B. C. D. and R., into sections, in pursuance of the usual practice of current recitation. This arrangement of the text agrees with the chain of the initial words of the sections, added at the end of each chapter and found in all the Mss., and printed also in Bi. and J. The other kind of division–the division into पाद्स and खण्ड्स–found in Bi and J. and in most of the Mss. of the commentary has been dispeused with. And this for a twofold reason: first because the latter is unhistorical and not found in B. C. D. R. and secondly because all Mss. do not agree in closing the पाद्स uniformly

in the same place. But although omitted in the body of the book, this division is referred to while giving the readings and also in the corner-citations at the top of the left-hand page. The *pāda-division* given is however, accordig to A. Bi. and J. only, as it was not possible to give this division for every Ms, since, as remarked above, all Mss. do not mark the पाद्स uniformly.

Paragraphs and sentences.

The Mss. as a rule do not arrange either the text or the commentary into paragraphs. The paras in the Sections are made only as found convenient. Generally a change from one point to an altogether new one is indicted by a double stop-line. Otherwise the stops are marked by a single vertical line. The commentary is divided into sentences and paragraphs as suited the sense.

Orthography.

A word perhaps is necessary here in connection with the writing of the *anusvāra* in place of म्. The system followed is that म् at the end of a distinct unitary word is uniformly changed into an *anusvāra* and not into the nasal of the class to which the following letter belongs. This is grammatical and perhaps convenient, as otherwise it would be difficult to distingnish the पद्स in cases like सन्निह which can be analysed into both सम्+निह and सन्+निह.

As to the *Sandhis* in the body of a word, they are uniformly followed; but between two separate complete words sometimes the rule of option (विकल्प) is availed of where that was thought to be more helpful for understanding the construction of the text. Especially so is the case in the commentary where words of the Vedas are paraphrased by their synonyms. The observance of the Sandhi rules here would have made the construction difficult to follow in certain cases. Everywhere the synonyms are separated by small hyphens from the words for which they stand as explanations.

Great variations are seen in reading the प्रतीकs from the text in the commentary. An attempt is made to follow what suited each place best and the variations in the readings are not therefore noted, they being not very important. Some Mss., notably *b*., read इति almost always after a प्रतीक and after a quotation from the Veda. This has been omitted following the majority.

The Pratikas.

For remarks on accents, found in Bi. and J. and also in A. with some variation at the end of a section or a sentence and in other portions of the text which are not quotations from the Rigveda, the reader is referred to the note on p. 62.

Accents.

Every effort has been made to trace the quotations in the text and the commentary to their original sources. Yet many of them have baffled the attempt. It is hoped that at least some more will be traced by the time the second volume is in print.

Quotations.

Thakurdwar,
Bombay,
February 1, 1918.

R. G. Bhadkamkar.

ABBREVIATIONS.

AB. = Ârsheya Brîhmaṇa.
Ait. Âr. = Aitareya Âraṇyaka.
Ait. Br. = Aitareya Brîhmaṇa.
Ait. Up. = Aitareya Upanishad.
Amara = Amarakosha.
Âpastamba S'r. Sû. = Âpastamba-S'rauta-Sûtra.
Âs. Gr. Sû. = Âs'valâyana-Grihya-Sûtra.
Âs. S'r. Sû. = „ -S'rauta-Sûtra.
AS. or Ath. Saṁh. = Atharvaveda-Saṁhitâ.
Atharva Mânava S'r. Sû. = Atharva Mânava S'rauta-Sûtra.
Bhag. Gîtâ = Bhagvadgîtâ.
Bṛih. or Brihadâr. Up. = Brihadâraṇyakopanishad.
Bṛihad. = Bṛihaddevatâ.
B. S. S. = Bombay Sanskrit Series.
Chh. Âr. = Chhândogyâraṇyaka.
Chh. Up. = Chhândogyopanishad.
Chh. Sû. = Chhandas-Sûtra of Piṅgala.
धा० पा० = Dhâtu-pâtha in Siddhânta-Kaumudi.
Gobhila Gr. Sû. = Gobhila-Gṛihya-Sûtra.
Jai. Sû. = Sûtras of Jaimini.
Kât. S'r. Sû. = Kâtyâyana-S'rauta-Sûtra.
KS. or Kâth. Saṁh. = Kâthaka-Saṁhitâ.
का० सू० = Kâmandakîya-Sûtra.
Mahâbhâshya = Vyâkaraṇa-Mahâbhâshya of Patañjali.
MS. or Mait. Saṁh. = Maitrâyaṇîya-Saṁhitâ.
Manu = Manusmṛiti.
Nigh. = Nighaṇṭu.
Nir. = Nirukta.
Nir. Pari. = Nirukta-pariśishṭa.
Pâṇ. or Pâṇi. = Pâṇini's Ashṭâdhyâyî.
Pâraskara Gr. = Pâraskara-Gṛihya-Sûtra.
Ṛik. Prât. = Ṛik-Prâtis'âkhya.
RS. = Rigveda-Saṁhitâ.

RS. Kh. = Khila Sûktas of the Riksamhitâ.
S'B. or S'atapatha Br. = S'atapatha-Brâhmana.
S'ânkh. S'r. S'û. = S'ânkhâyana-S'rauta-Sûtra.
Sâma-Veda-Chhând. Âran. = Sâmavedi-Chhândogya Âranyaka.
Sarvânukramanî = Sarvânukramanî of Kâtyâyana.
Sidd Kau = Siddhânta-Kaumudî.
SS. or SV. or Sâm. Sam. = Sâmavedi-Samhitâ.
S'vetâs'vatara = S'vetâs'vataropanishad.
Tait. Âr. = Taittiriya-Âranyka.
Tait. Br. = ,, Brâhmana.
TS. or Tait. Sam = Taittiriya Samhitâ (Weber's edition).
Tait Up. = Taittiriya Upanishad.
VS. or Vâj Sam. or Yaj. Vâj. Sam. = Yajurveda-Vâjasaneyi-Samhitâ.
Vâr. = Vârtika of Kâtyâyana on Pânini's sûtras.

६ घ्रंसः । ७ घर्मः । ८ घृणः । ९ दिनम् । १० दिवा । ११ दिवेदिवे ।
११ इत्यविद्यवीति द्वादशाहर्नामानि ॥ ९ ॥

१ अद्रिः । २ गिरा । ३ गोत्रः । ४ वलः । ५ अभ्रं । ६ पुरुभोजाः ।
७ वलिशानः । ८ अश्मा । ९ पर्वतः । १० गिरिः । ११ व्रजः । १२ चरुः ।
१३ वराहः । १४ शम्बरः । १५ रौहिणः । १६ रैवतः । १७ फलिगः ।
१८ उपरः । १९ उपलः । २० चमसः । २१ अहिः । २२ अभ्रम् ।
२३ बलाहकः । २४ मेघः । २५ हतिः । २६ ओदनः । २७ वृषन्धिः ।
२८ वृत्रः । २९ असुरः । ३० कोश इति त्रिंशन्मेघनामानि ॥ १० ॥

१ श्लोकः । २ धारा । ३ इळा । ४ गौः । ५ गौरी । ६ गान्धर्वी ।
७ गभीरा । ८ गम्भीरा । ९ मन्द्रा । १० मन्द्राजनी । ११ वाशी ।
१२ वाणी । १३ वाणीवी । १४ वाणः । १५ पविः । १६ भारती ।
१७ घमनिः । १८ नाळीः । १९ मेळिः । २० मेना । २१ सूर्या ।
२२ सरस्वती । २३ निवित् । २४ स्वाहा । २५ वभ्रुः । २६ उपब्दिः ।
२७ भाषुः । २८ काकुत् । २९ जिह्वा । ३० घोषः । ३१ स्वरः । ३२ शब्दः ।
३३ स्वनः । ३४ ऋक् । ३५ होत्रा । ३६ गीः । ३७ गाथा । ३८ गणः ।
३९ धेना । ४० आः । ४१ विपा । ४२ नना । ४३ कशा । ४४ धिषणा ।
४५ नौः । ४६ अक्षरम् । ४७ मही । ४८ अदितिः । ४९ शची । ५० वाक् ।
५१ अनुष्टुप् । ५२ धेनुः । ५३ वल्गुः । ५४ गल्दा । ५५ सरः । ५६ सुपर्णी । ५७ वेकुरेति सप्तपञ्चाशद्वाङ्नामानि ॥ ११ ॥

IX. For 8, three Mss. of R. read घृणि.

X. For 7, two Mss. of R. read पर्वानि which is supported by quotations from RS. The reading above given, though uniformly found in all the printed editions and is the more usual reading of the Mss., is not supported by any quotation.

For 27, Devarâja notices विषन्धि also as a rare reading. Though etymologically allowable it does not occur in RS. at least.

XI. For 49, Devarâja reads नम्ना and notices नना as a rare reading. In these parts, however, the latter seems to be the more usual reading. Devarâja questions its occurrence, but *vide* RS. IX. 112. 3. The word

१ अर्णः। २ क्षोदः। ३ क्षद्म। ४ नभः। ५ अम्भः। ६ कबन्धम्। ७ सलिलम्। ८ वाः। ९ वर्षम्। १० घृतम्। ११ मधु। १२ पुरीषम्। १३ पिप्पलम्। १४ क्षीरम्। १५ विषम्। १६ रेतः। १७ कशः। १८ जन्म। १९ चुबुकम्। २० वुसम्। २१ तुग्र्या। २२ बर्बुरम्। २३ सुक्षेम। २४ धरुणम्। २५ सिरा। २६ अरविन्दानि। २७ ध्वस्मन्वत्। २८ जामि। २९ आयुधानि। ३० क्षपः। ३१ अह्निः। ३२ अक्षरम्। ३३ स्रोतः। ३४ तृप्तिः। ३५ रसः। ३६ उदकम्। ३७ पयः। ३८ सरः। ३९ भेषजम्। ४० सहः। ४१ शवः। ४२ यहः। ४३ ओजः। ४४ सुखम्। ४५ क्षत्रम्। ४६ आवयाः। ४७ शुभम्। ४८ यादुः। ४९ भूतम्। ५० भुवनम्। ५१ भविष्यत्। ५२ आपः। ५३ महत्। ५४ व्योम। ५५ यशः। ५६ महः। ५७ सर्णीकम्। ५८ स्वृतीकम्। ५९ सतीनम्। ६० गहनम्। ६१ गभीरम्। ६२ गम्भरम्। ६३ ईम्। ६४ अन्नम्। ६५ हविः। ७६ सत्रे। ६७ सदनम्। ६८ ऋतम्। ६९ योनिः।

---

means there a *woman*, a *spinster*, but other words also, signifying a *woman*, are included in the synonyms of *Vāl*.

XII. For 22, Devarāja reads वुंत Neither variant occurs in RS.

We read 25 on the authority of Devarāja supported by its occurrence in RS. Other variants are सुरा or सुरा The latter is very common, but is not supported by any quotation.

For 32, three Mss of R. read अक्षरा. RS. shows two words as अक्षरा (I. 34 4, VII. 1 14) and अक्षत (VII 15. 9, and 36. 7.) The latter clearly means वक्. Sāyaṇa explains the former in I. 34 4 as *water* with the remark अक्षरा स्रोतस्विनीति तन्नामसु पाठात्. But he explains the same word in VII. 1. 14 as instrumental case equivalent to स्रोतेन. The former sense could, however, possibly apply even here It is rather wonderful that neither a variant nor a separate word as अक्षरा should occur in the last section.

For 37, Devarāja reads मधु which also is supported by RS.

Three Mss of R add स्मृनीकम् before 58, and सतीकम् before 59.

After 63, कम् is added as a variant in R., which is often used in RS and 93 is omitted which does not occur.

७० ऋतस्य योनिः। ७१ सत्यम्। ७२ नीरम्। ७३ रयिः। ७४ सत्। ७५ पूर्णम्। ७६ सर्वम्। ७७ अक्षितम्। ७८ बर्हिः। ७९ नाभ। ८० सर्पिः। ८१ अपः। ८२ पवित्रम्। ८३ अमृतम्। ८४ इन्दुः। ८५ हेम। ८६ स्वः। ८७ सर्गः। ८८ शम्बरम्। ८९ अम्बम्। ९० वपुः। ९१ अम्बु। ९२ तोयम्। ९३ तूयम्। ९४ कृपीटम्। ९५ शुक्रम्। ९६ तेजः। ९७ स्वधा। ९८ वारि। ९९ जलम्। १०० जलाषम्। १०१ इदमित्येकशतमुदकनामानि ॥ १२ ॥

१ अवनयः। यज्याः। ३ स्रावः। ४ सीराः। ५ स्रोत्याः। ६ एन्यः। ७ धुनयः। ८ रुजानाः। ९ वक्षणाः। १० स्रादो अर्णाः। ११ रोधंवकाः। १२ हरितः। १३ सरितः। १४ अयुवः। १५ नभन्वः। १६ वध्वः। १७ हिरण्यवर्णाः। १८ रोहितः। १९ सस्रुतः। २० अर्णाः। २१ सिन्धवः। २२ कुल्याः। २३ वर्यः। २४ उर्व्यः। २५ इरावत्यः। २६ पार्वत्यः। २७ सर्वन्त्यः। २८ ऊर्जस्वत्यः। २९ पयस्वत्यः। ३० तरस्वत्यः। ३१ सरस्वत्यः। ३२ हरस्वत्यः। ३३ रोधस्वत्यः। ३४ भास्वत्यः। ३५ अजिराः। ३६ मातरः। ३७ नद्य इति सप्तविंशतिनदीनामानि ॥ १३ ॥

१ अत्यः। २ हयः। ३ अर्वा। ४ वाजी। ५ सप्तिः। ६ वह्निः। ७ दधिकाः। ८ दधिकावा। ९ एतग्वः। १० एतशः। ११ पैढः। १२ दौर्गहः। १३ औच्चैश्रवसः। १४ तार्क्ष्यः। १५ आशुः। १६ बभ्रुः। १७ अरुषः। १८ माँश्चत्वः। १९ अरुणयः। २० श्येनाशः। २१ सुपर्णः। २२ पतङ्गाः। २३ नरः। २४ हार्याणाम्। २५ हंसासः। २६ अश्वा इति षड्विंशतिरश्वनामानि ॥ १४ ॥

XII. Three Mss. of R. add अस्तृत after 97.

XIII. For 2, *Devarāja* reads पृथुः which is supported by RS. For 27, some read रेवत्: which occurs in RS. as an adjective to *Sindhu*.

XIV. Devarāja and some Mss. read 18 as मंहत्: and R. मंस्रत्: which probably ought to have been मंस्रत्:. The word occurs in RS. IX. 97. 52 as मंस्रते, and as मंसते in IX. 97. 54. These are the only occurrences of the word. Sāyaṇa interprets the former as मन्दमानानां

१ हरी इन्द्रस्य । २ रोहितोग्नेः । ३ हरित आदित्यस्य । ४ रासभावश्विनोः । ५ अजाः पूष्णः । ६ पृषत्यो मरुतां । ७ अरुण्यो गाव उषसाम् । ८ श्यावाः सवितुः । ९ विश्वरूपा बृहस्पतेः । १० निघुतो वायोरिति दशादिष्टोपयोजनानि ॥ १५ ॥

१ भ्राजते । २ भ्राशते । ३ भ्राइर्यति । ४ दीदयति । ५ शोचति । ६ मन्दते । ७ भन्दते । ८ रोचते । ९ ज्योतते । १० द्योतते । ११ द्युम-दित्येकादश ज्वलतिकर्माणः ॥ १६ ॥

१ जमत् । २ कलमलीकिनम् । ३ जङ्गणाभवन् । ४ मलमला-भवन् । ५ अर्चिः । ६ शोचिः । ७ तपः । ८ तेजः । ९ हरः । १० हर्णिः । ११ शृङ्गाणि शृङ्गाणीत्येकादश ज्वलतो नामधेयानि नामधेयानि ॥१७॥

गौर्हेमाम्बरं स्वः खेदय आताः श्यावी विभावरी वस्तोरद्रिः श्येनकोणौवनयोत्यो
हरी इन्द्रस्य भ्राजते जमदिति सप्तदश ॥
॥ इति प्रथमोध्यायः ॥

घातके as an adjective to सप्ति, and the latter as अक्षनामैतत् । मधु चरतीति । अन्धेः क्रियमाणे युद्धे । In RS VII. 44. 3 the word मुम्रुतो: occurs as an adjective to वरुणस्य, where Sâyaṇa explains अभिमन्यमानोऽभ्यायते नाशयतीति मम्रुस्तस्य । All this would seem to show that the reading of Devarâja is preferable.

XVII. For 10, Devarâja reads घृणि· which too is supported by RS.

द्वितीयोऽध्यायः ।

१ अपः । २ अप्रः । ३ दंसः । ४ वेषः । ५ वेषः । ६ विद्धी । ७ व्रतम् । ८ कर्वरम् । ९ करणम् । १० शङ्कु । ११ क्रतुः । १२ करणानि । १३ करींसि । १४ करिक्रत् । १५ करन्ती । १६ चक्रत् । १७ कर्वम् । १८ कर्तोः । १९ कर्तवे । २० कृत्वी । २१ धीः । २२ शची । २३ शमी । २४ शिमी । २५ शक्तिः । २६ शिल्पमिति षड्विंशतिः कर्मनामानि ॥ १ ॥

१ तुक् । २ तोकम् । ३ तनयः । ४ तोर्म । ५ तर्म । ६ शेषः । ७ अप्रः । ८ गयः । ९ जाः । १० अपत्यम् । ११ यदुः । १२ सूनुः । १३ नपात् । १४ प्रजा । १५ बीजमिति पञ्चदशापत्यनामानि ॥ २ ॥

१ प्रतृप्त्याः । २ नरः । ३ धवाः । ४ जन्तवः । ५ विशः । ६ क्षितयः । ७ कृष्टयः । ८ चर्षणयः । ९ नहुषः । १० हरयः । ११ मर्याः । १२ मर्त्याः । १३ मर्ताः । १४ व्राताः । १५ तुर्वशाः । १६ द्रुह्यवः । १७ आयवः । १८ यदवः । १९ अनवः । २० पूर्वः । २१ जगतः । २२ तस्थुषः । २३ पञ्चजनाः । २४ विवस्वन्तः । २५ मनवा इति पञ्चविंशतिर्मनुष्यनामानि ॥ ३ ॥

१ आयती । २ च्यवाना । ३ अभीशू । ४ अग्रवाना । ५ विनङ्गृसौ । ६ गभस्ती । ७ करस्नौ । ८ बाहू । ९ मुरिजौ । १० क्षिपस्ती । ११ दक्षिणे । १२ भरिभ्रे इति द्वादश बाहुनामानि ॥ ४ ॥

१ अगुर्वः । २ अण्व्यः । ३ क्षिपः । ४ त्रिशः । ५ शर्याः । ६ स्वानाः । ७ धीतयः । ८ अथर्याः । ९ विषः । १० कृष्याः । ११ अवनयः । १२ हरितः । १३ स्वसारः । १४ जामयः । १५ सनाभयः । १६ योक्त्राणि । १७ योजनानि । १८ धुरः । १९ दात्राः । २० अभी-

IV. For 10 Devarâja has क्षिपाते also.

V. For 8, Devarâja notices अपर्येषः as the more usual variant. After 12, three Mss. of R. add रोहितः. R.'s Mss. omit 22. Devarâja notices two variants for 22 as मुहस्त्याः and सहुतः.

१ वश्मि । २ उशमसि । ३ वेति । ४ वेनति । ५ वेसति । ६ वाञ्छति । ७ वष्टि । ८ वनोति । ९ जुषते । १० हर्यति । ११ आ चके । १२ उशिक् । १३ मन्यते । १४ छन्त्सत् । १५ चाकनत् । १६ चकमानः । १७ कनति । १८ कानिषदित्यष्टादश कान्तिकर्मणः ॥ ६ ॥

१ अन्धः । २ वाजः । ३ पयः । ४ श्रवः । ५ एषः । ६ पितुः । ७ सुतः । ८ सिनम् । ९ अवः । १० क्षु । ११ धासिः । १२ इतः । १३ इळा । १४ इषम् । १५ ऊर्क् । १६ रसः । १७ स्वधा । १८ अर्कः । १९ क्षन्न । २० नेमः । २१ सस्म् । २२ नमः । २३ आयुः । २४ सुकृता । २५ ब्रह्म । २६ वचः । २७ कोलालम् । २८ यश इत्यष्टाविंशतिरन्ननामानि ॥ ७ ॥

१ आ वयति । २ भवति । ३ बभस्ति । ४ वेति । ५ वेवेष्टि । ६ अविष्यन् । ७ वप्सति । ८ भसत् । ९ बन्धाम् । १० हरतीति दशात्तिकर्मणः ॥ ८ ॥

१ ओजः । २ पाजः । ३ शवः । ४ तवः । ५ तरः । ६ त्वक्षः । ७ शर्धः । ८ बाधः । ९ नृम्णम् । १० तविषी । ११ शुष्मम् । १२ शुष्णम् । १३ दक्षः । १४ वीळु । १५ च्यौत्नम् । १६ शुषम् । १७ सहः । १८ मन्युः । १९ वयः । २० वर्णः । २१ वृजनम् । २२ वृक् । २३ मज्मना । २४ पौंस्यानि । २५ धर्णसिः । २६ द्रविणम् । २७ स्यन्दासः । २८ शम्बरमित्यष्टाविंशतिर्बलनामानि ॥ ९ ॥

VI. Before 3, three Mss. of R. add अवयेति. For 5, Devarâja has वेशति also. For 7, R. has वेष्टि which probably is वष्टि. Three Mss. of R. omit 11. For 14, three Mss. of R. have यसनत्

VII Three Mss of R. add पाजः after 2; and omit 4. Devarâja reads मयः for श्रवः. For 7, Devarâja has वयः, and three Mss of R. read सुनम्. For 10, they read सुमत् or सुन् Devarâja omits 18. Three Mss. of R read वयः for 19, and omit 28.

IX. Three Mss. of R. read वृजः for 6, and विट् for 22. For 25 Devarâja reads चर्षणि.

१ मघम्। २ रेक्णः। ३ रिस्थम्। ४ वेदः। ५ वरिवः। ६ श्वात्रम्। ७ रत्नम्। ८ रयिः। ९ क्षत्रम्। १० भगः। ११ मीळ्हुम्। १२ गयः। १३ शुम्रम्। १४ इन्द्रियम्। १५ वसु। १६ रायः। १७ राधः। १८ भोजनम्। १९ तना। २० नृम्णम्। २१ बन्धुः। २२ मेधा। २३ पद्याः। २४ यज्ञः। २५ द्रविणम्। २६ अर्वः। २७ सूनृम्। २८ नृत-मित्यष्टाविंशतिरेव धननामानि ॥ १० ॥

१ अद्या। २ उषा। ३ उषसः। ४ अहः। ५ महः। ६ अदितिः। ७ इळा। ८ जगती। ९ शक्वरीति नव गोनामानि ॥ ११ ॥

१ रेळते। २ हेळते। ३ भामते। ४ हृणीयते। ५ भीणाति। ६ भेषति। ७ दोधति। ८ घनुष्यति। ९ कर्म्मते। १० भोजत इति दश कृष्यतिकर्माणः ॥ १२ ॥

१ हेळः। २ हरः। ३ हणिः। ४ त्यजः। ५ भामः। ६ एहः। ७ हरः। ८ तपुषी। ९ जूर्णिः। १० मन्युः। ११ व्यथिरित्येकादश क्रोधनामानि ॥ १३ ॥

१ वर्तते। २ अयते। ३ लोटते। ४ लोठते। ५ स्यन्दते। ६ कसति। ७ सर्पति। ८ रयमति। ९ सवति। १० संसते। ११ अवति। १२ ओतति। १३ ध्वंसति। १४ वेनति। १५ माष्टि। १६ गुरण्यति। १७ शवति। १८ कालयति। १९ पेलयति। २० कण्टति। २१ पिस्यति। २२ मिस्यति। २३ मिस्यति। २४ प्रवते। २५ प्लवते। २६ च्यवते।

X. For 11 Devarâja notices the variants मीळ्हम्, and मीळ्हुस्. The former is supported by RS. I. 100.11, where Sâyaṇa remark मीळ्हमिति धननाम। It occurs in three other places in RS. The latter seems to be supported by RS. V. 56. 3, and VI. 50. 12. The word मीळ्हु, however, occurs nowhere. Three Mss. of R. omit 20, and read रिते क्रतुमिति etc. for रयम्। रतमिति etc., which Devarâja rejects on the authority of स्कन्दस्वामी.

XI. For 6, R. reads अदितिः which does not occur in RS. at least.

XII. For 4, R. has गृणीयते which is common but does not occur in RS.

XIII. For 8, Devarâja reads घृणिः which is supported by RS. but हृणिः is recognised as the older and the more usual reading. For 7, three Mss. of R. have धरः.

XIV. The whole section is read with many changes according to another recension and therefore is quoted below:—

वर्तते। अयते। लोटते। लोठते। स्यन्दते। कसति। सर्पति। रयमति। सवति। संसते। ओतति। ध्वंसति। वेनति। माष्टि। गुरण्यति। शवति। कालयति। पेलयति। कण्टति।

२७ कर्वते। २८ गर्वते। २९ नर्वते। ३० क्षोदति। ३१ नक्षति।
३२ सक्षति। ३३ म्यक्षति। ३४ सचति। ३५ ऋच्छति। ३६ तुरीयति।
३७ चतति। ३८ अतति। ३९ गातिं। ४० इयक्षति। ४१ सश्चति।
४२ त्सरति। ४३ रंहति। ४४ यतते। ४५ धर्मति। ४६ धर्जति।
४७ रजति। ४८ लजति। ४९ क्षिपति। ५० घर्मति। ५१ मिनाति।
५२ ऋण्वति। ५३ ऋणोति। ५४ स्वरति। ५५ सिसर्ति। ५६ वेषिष्टि।
५७ योषिष्टि। ५८ रिणाति। ५९ रीयते। ६० रेजति। ६१ दृघ्यति।
६२ दघ्नोति। ६३ युध्यति। ६४ धन्वति। ६५ अर्षति। ६६ आर्यति।
६७ डीयते। ६८ तकति। ६९ दीयति। ७० ईषति। ६१ फणति।
७२ हनति। ७३ अर्दति। ७४ मर्दति। ७५ सर्हते। ७६ नसते।
७७ हर्यति। ७८ इयर्ति। ७९ ईर्ते। ८० ईह्ते। ८१ जर्यति। ८२ श्वात्रति।
८३ गन्ति। ८४ आ गनीगन्ति। ८५ जङ्गन्ति। ८६ जिन्वति।
८७ जसति। ८८ गर्मति। ८९ धर्ति। ९० धार्ति। ९१ धर्यति।
९२ वहते। ९३ रर्यर्ति। ९४ जेहते। ९५ ष्वःकति। ९६ क्षुम्पति।
९७ ष्णाति। ९८ वार्ति। ९९ घार्ति। १०० इषार्ति। १०१ द्रार्ति।
१०२ द्रूढति। १०३ एजति। १०४ जर्मति। १०५ जर्वति। १०६ वश्चति।
१०७ अनिति। १०८ पर्वते। १०९ हन्ति। ११० सेधति। १११ अगन्।
११२ अजगन्। ११३ जिगाति। ११४ पतति। ११५ इन्वति।
११६ द्रर्मति। ११७ द्रवति। ११८ वेति। ११९ हर्यन्तात्। १२० एति।
१२१ जगायात्। १२२ अयुधुरिति द्वाविंशशतं गतिकर्मणः॥ १४॥

पिस्यति। विभ्यति। मिस्यति। श्रवते। क्षवते। च्यवते। कवते। गवते। अवते। क्षोदति। सक्षति। इयक्षति। मियक्षति। सचति। अचति। ऋच्छति। तुरीयति। त्वरति। अतति। पतति। चतति। सश्चति। रहति। भ्रमति। भ्रजति। रजति। लजति। क्षिपति। क्षिणोति। कण्वति। सिसर्ति। वेषिष्टि। योषिष्टि। कणति। कणति। इयर्ति। रीयते। नेदति। नक्यति। दघ्यति। दघ्नोति। युध्यते। धन्वति। अर्षति। अलर्यति। डीयते। तकति। दीयते। ईषति। कणति। सक्षति। सिक्षति। धवति। धावति। हन्यति। हयति। ईर्ते। ऋयति। श्वात्रति। गन्ति। गनीगन्ति। जगन्ति। जगति। गमति। मिनाति। धति। धार्ति। भ्रयति। ध्रुवति। वरगूयति। अपर्यति। ईहते। जेहते। वदति। राति। रुरुहति। पजति। वञ्चति। षष्कति। ष्वष्कति। क्षुम्पति। ष्णाति। वाति। याति। जायति। पतयति। पथते। हन्ति। सेधति। अगन्। अजगन्। आगनीगन्ति। गाति। जिगाति। इन्वति। नजति। द्रवति। द्रुष्णाति। वेति। हयन्तात्। जगायात्। अयुधुरिति गतिकर्मणः।

For 56, Devaraja has विषिष्टि, and for 67, सीयते.

For 119, Devarâja has इन्तात् and notices this also

१ नु। २ मक्षु। ३ द्रवत्। ४ ओषम्। ५ जीराः। ६ जूर्णिः। ७ शूर्ताः। ८ शूघनासः। ९ शीभम्। १० तूयु। ११ तूयम्। १२ तूर्णिः। १३ आजिरम्। १४ मुरण्युः। १५ शु। १६ आशु। १७ प्राशुः। १८ तूर्तजिः। १९ तूर्तजानः। २० तुज्यमानासः। २१ अञ्जाः। २२ साचीवित्। २३ शुगत्। २४ ताजत्। २५ तरणिः। २६ वातरंहा इति पञ्चविंशतिः क्षिप्रनामानि ॥ १५ ॥

१ तडित्। २ आसात्। ३ अभ्यरम्। ४ तुर्वशे। ५ अस्तमीके। ६ आके। ७ उपाके। ८ अर्वाके। ९ अन्तमानाम्। १० अवमे। ११ उपम इत्येकादशान्तिकनामानि ॥ १६ ॥

१ रणः। २ विवाक्। ३ विषादः। ४ नदुः। ५ भरे। ६ आक्रन्दे। ७ आह्वे। ८ आजौ। ९ घृतनाज्यम्। १० अभीके। ११ समीके। १२ ममसत्यम्। १३ नेमधिता। १४ सद्धाः। १५ समितिः। १६ सर्मनम्। १७ मीळ्हे। १८ घृतनाः। १९ स्तृधः। २० मृधः। २१ घृत्सु। २२ समत्सु। २३ सम्पे। २४ समरणे। २५ समोहे। २६ समिथे। २७ संख्ये। २८ सङ्गे। २९ संयुगे। ३० सङ्गथे। ३१ सङ्गमे। ३२ वृत्रतूर्ये। ३३ घृणे। ३४ आणौ। ३५ शूरसातौ। ३६ वाजसातौ। ३७ समर्नीके। ३८ खले। ३९ खजे। ४० पौंस्ये। ४१ महावने। ४२ वाजे। ४३ अज्मे। ४४ सत्रे। ४५ संयत्। ४६ संवत इति षट्चत्वारिंशत्सङ्ग्रामनामानि ॥ १७ ॥

XV. For 17, one Ms. of R. reads घृणुचित् or प्राशुचित्; for 18, three Mss. of R. read जूर्तजित्; and for 19 तूर्तजानाम:. Devarâja reads तूर्तजानः which also is supported by RS

XVI. For 2, two Mss. of R. read आसा.

XVII. For 13, three Mss. of R. read नेमधिति; for 21 घृत्सुः; and for 27 सङ्गे which is not supported by any text in RS. The three Mss. of R. omit 31 and add प्रवने after 34. For 43 some read अज्मन्; for 44 सत्मन् and स्वप्नन्, for 45 संयत and for 46 संवतम्. For 25 R. reads समोहे which is rare and does not occur in RS.

१ इन्वंति। २ नक्षंति। ३ आशाणः। ४ आनट्। ५ आप्ट। ६ आपानः। ७ अशात्। ८ नशात्। ९ आनशे। १० अश्नुत इति दश व्याप्तिकर्माणः॥ १८॥

१ दभ्नोति। २ भर्यति। ३ घरंति। ४ घूर्वंति। ५ वृणाक्ति। ६ वृश्चति। ७ कृण्वति। ८ कृन्तति। ९ हवसिति। १० नभंते। ११ अर्दयंति। १२ स्तृणाति। १३ वेहयंति। १४ यातयंति। १५ स्फुरति। १६ स्फुलति। १७ निवंपन्तु। १८ अवंतिरति। १९ वियंतः। २० आ तिरत। २१ तळित्। २२ आखंडल। २३ द्रुणाति। २४ रम्णाति। २५ शृणाति। २६ शम्नाति। २७ तृणेद्धि। २८ ताद्धि। २९ नितोंशते। ३० निर्बर्हयति। ३१ मिनाति। ३२ मिनोति। ३३ घमतीति त्रयस्त्रिंशद्धवकर्माणः॥ १९॥

१ दिद्युत्। २ नेमिः। ३ हेतिः। ४ नमः। ५ पविः। ६ स्रुक्। ७ वर्धः। ८ वज्रः। ९ अर्कः। १० कुत्सः। ११ कुलिशः। १२ हुवः। १३ तिग्मः। १४ मेनिः। १५ स्वधितिः। १६ सायकः। १७ परशुरित्यष्टादश वज्रनामानि॥ २०॥

१ इरज्यति। २ पर्यंते। ३ क्षर्याति। ४ राजतीति चत्वार ऐश्वर्यकर्माणः॥ २१॥

१ राधीं। २ अर्यः। ३ नियुत्वान्। ४ इन इति चत्वारीश्वरनामानि॥ २२॥

अपस्तुजद्रुघ्या आयती अधुवो वस्यन्ध आवयत्योजो मघमद्या रेक्ते रेक्णो वर्णते
नु तळिद्ग इन्वति दभ्नोति विद्युदिरज्यति राधीति द्वाविंशतिः॥

॥ इति द्वितीयोऽध्यायः॥

XVIII. For 2, three Mss. of R. read ननक्ष; and for 5 आटः.

XIX. For 2 three Mss. of R. read अपनि; for 7 चणति; for 12 मर्दति; and for 14 याषति. Three Mss. of R add जूर्वति after 32.

XX. After 6, Devarâja adds वृक्षः. For 9, three Mss. of R. read अक्कः. For 12 Devarâja reads सुज, and for 13 तिग्मम्

तृतीयोध्यायः ।

१ उरु । तुवि । २ पुरु । ४ मूरिं । ५ शश्वंत् । ६ विश्वंम् । ७ परोणसा । ८ व्यानशिः । ९ शतम् । १० सहस्रंम् । ११ सलिलम् । १२ कुविदिति द्वादश बहुनामानि ॥ १ ॥

१ ऋठन् । २ ह्रस्वः । ३ निघृष्वः । ४ मायुकः । ५ प्रतिष्ठा । ६ कुधु । ७ वसुकः । ८ दभ्रम् । ९ अर्भकः । १० क्षुल्लुकः । ११ अल्प इत्येकादश ह्रस्वनामानि ॥ २ ॥

१ महत् । २ बघ्नः । ३ ऋष्वः । ४ बृहत् । ५ उक्षितः । ६ तवसः । ७ तविषः । ८ महिषः । ९ अर्भवः । १० क्रमुक्षाः । ११ उक्षा । १२ विहायाः । १३ यहः । १४ ववक्षिथ । १५ विवक्षसे । १६ अम्भृणः । १७ माहिनः । १८ गभीरः । १९ कुकुदः । २० रभसः । २१ वार्यन् । २२ विरप्शी । २३ अद्भुतम् । २४ वंहिष्ठः । २५ बर्हिषदिति पञ्चविंशतिर्महन्नामानि ॥ ३ ॥

१ गयः । २ क्षत्रं । ३ गतेः । ४ हर्म्यम् । ५ अस्तम् । ६ पस्त्यम् । ७ दुरोणे । ८ नीळम् । ९ दुर्याः । १० स्वसंराणि । ११ अमा । १२ दमें । १३ क्षत्तिः । १४ योनिः । १५ सदं । १६ शरणम् । १७ वरूथम् । १८ छर्दिः । १९ छदिः । २० छाया । २१ शर्म । २२ अज्मेति द्वाविंशतिर्गृहनामानि ॥ ४ ॥

१ इरज्यति । २ विधेम । ३ सपर्यति । ४ नमस्यति । ५ दुवस्यति । ६ ऋघोति । ७ ऋणद्धि । ८ ऋच्छति । ९ सपति । १० विवासतीति दश परिचरणकर्माणः ॥ ५ ॥

I. For 11 three Mss. of R. read सरिर.

II. For 1 the Mss read रिहं or रहं or रहत्. After 3 some add वृषभः or विषभः, for 6 the Mss. read कुधुकः or कधुकः; and for 8 दहरकः or देहरकः. Three Mss. of R. omit 10.

III. For 1 three Mss. of R. read मह्, for 4 उक्षः, for 19 ककुहसिना. and for 24 and 25 बर्हिष्ट and बर्हिषि.

IV. Three Mss. of R. read नीर for 5; अस्य for 6; शर्म for 15; and वर्म for 21.

V. For 1 the Mss. of R. read इरध्यति; for 9 शपति.

१ शिम्बाता । २ शतरा । ३ शार्तपन्ता । ४ शिल्गुः । ५ स्यूमकम् । ६ शोशुचम् । ७ मयः । ८ सुगम्यम् । ९ सुदिनम् । १० शूषम् । ११ शुनम् । १२ शग्मम् । १३ भेषजम् । १४ जलाषम् । १५ स्योनम् । १६ सुम्नम् । १७ शोवम् । १८ शिवम् । १९ शम् । २० कमिति विंशतिः सुखनामानि ॥ ६ ॥

१ निर्णिक् । २ वत्रिः । ३ वर्पः । ४ वपुः । ५ अमतिः । ६ अप्सः । ७ प्सुः । ८ अर्मः । ९ पिष्टम् । १० पेशः । ११ रूशत्नम् । १२ मरुत् । १३ अर्जुनम् । १४ ताम्रम् । १५ अरुषम् । १६ शिल्पमिति षोडश रूपनामानि ॥ ७ ॥

१ अक्षेमा । २ अनेमा । ३ अनेद्यः । ४ अनवद्यः । ५ अनभिशस्त्यः । ६ उक्थ्यः । ७ सुनीथः । ८ पाकः । ९ वामः । १० वयुनमिति दश प्रशस्यनामानि ॥ ८ ॥

१ केतुः । २ केतः । ३ चेतः । ४ चित्तम् । ५ कर्तुः । ६ असुः । ७ धीः । ८ शची । ९ माया । १० वयुनम् । ११ अमिख्येत्येकादश प्रज्ञानामानि ॥ ९ ॥

१ यद् । २ श्रत् । ३ सत्रा । ४ अद्धा । ५ इत्था । ६ ऋतमिति षट् सत्यनामानि ॥ १० ॥

१ चिकित्वत् । २ चाकन्त् । ३ अर्चदम । ४ चष्टे । ५ विचष्टे । ६ विचर्षणिः । ७ विश्वचर्षणिः । ८ अव चाकशदित्यष्टौ पश्यतिकर्माणः ॥ ११ ॥

१ हिकम् । २ शुकम् । ३ सुकम् । ४ आहिकम् । ५ आकीम् । ६ नकिः । ७ माकिः । ८ नकीम् । ९ आकृतमिति नवोत्तराणि पदानि सर्वपदसमाम्नानाय ॥ १२ ॥

VI. For 4 Devarâja reads शर्म.

VII. The Mss. of R. add क्नयुः after 4, omit 7 & 8 and read पक्षः instead. For 12 Devarâja reads प्नयः

VIII. Three Mss. of R. omit 2, and add क्नविचः after 3; for 5 three Mss. of R. have अनभिशस्तिः. Devarâja reads अनभिशस्ता, but अनभिशस्ता occurs in RS.

XI. For 1, 2, and 3, the Mss. of R. read चित्यम् । चन । चादम. Devarâja reads आचक्षम for 3.

१ इदमिव । २ इदं यथा । ३ अग्निर्न ये । ४ चतुरश्चिद्दमानात् । ५ ब्राह्मणा व्रतचारिणः । ६ वृक्षस्य नु तें पुरुहूत वयाः । ७ जार आ भगम् । ८ मेषो मूतोऽभि यन्नयः । ९ तद्रूपः । १० तद्वर्णः । ११ तद्वत् । १२ तथेत्युपमाः ॥ १३ ॥

१ अर्चंति । २ गायंति । ३ रेभंति । ४ स्तोभंति । ५ गूर्धयंति । ६ गृणांति । ७ जरंते । ८ ह्वयंते । ९ नदंति । १० पृच्छंति । ११ रिहंति । १२ घर्मति । १३ कृपायंति । १४ कृपण्यंति । १५ पनस्यंति । १६ पनायंते । १७ वल्गूयंति । १८ मन्दंते । १९ भन्दंते । २० छन्दंति । २१ छन्दयंते । २२ शशमानः । २३ रञ्जयंति । २४ रजयंति । २५ शंसंति । २६ स्तौति । २७ यौति । २८ रौति । २९ नौति । ३० भनंति । ३१ पणायंति । ३२ पणंते । ३३ सपंति । ३४ पिपृक्षाः । ३५ महयंति । ३६ वाजयंति । ३७ पूजयंति । ३८ मन्यंते । ३९ मदंति । ४० रसंति । ४१ स्वरंति । ४२ वेनंति । ४३ मन्दयंते । ४४ जल्पतीति चतुश्चत्वारिंशदर्चति-कर्मणः ॥ १४ ॥

१ विप्रः । २ विप्रः । ३ गृत्सः । ४ धीरः । ५ वेनः । ६ वेधाः । ७ कण्वः । ८ ऋभुः । ९ नवेदाः । १० कविः । ११ मनीषी । १२ मन्धाता । १३ विधाता । १४ विपः । १५ मनश्चित् । १६ विपश्चित् । १७ विप्रन्यवः । १८ आकेनिपः । १९ उशिजः । २० कीस्तासः । २१ अद्धातयः । २२ मतयः । २३ मतुथाः । २४ वाघत इति चतुर्विंशतिर्मेधाविनामानि ॥ १५ ॥

१ रेभः । २ जरिता । ३ कारुः । ४ नदः । ५ स्तोमुः । ६ कीरिः । ७ गौः । ८ सूरिः । ९ नादः । १० छन्दः । ११ स्तुप् । १२ रुद्रः । १३ कृपण्युरिति त्रयोदश स्तोतृनामानि ॥ १६ ॥

XIV. For 15 and 16 other readings are पनस्यति । पणायते; for 33 & 34 स्पपिनि and पिपृक्षाः; for 38 स्वदति; and for 40 to 44 R.'s Mss. read रसति । वेनति । वल्गते । जल्पति । मन्त्रयते । क्रन्दत इति ।

XV. For 6 R.'s Mss. read मेधाः, and omit 14. After 18 they add केनिपः, and for 24 read मेधाविनः.

XVI. The Mss. of R. read for 8 to 13: कारः । कीरिः । तामुः । सूरिः । रुद्रः । मदः । नादः । छन्दः । स्तुतः । गौः । कृपण्युरिति.

१ यज्ञः । २ वेनः । ३ अध्वरः । ४ मेधः । ५ विदथं । ६ नार्पः । ७ सवनम् । ८ होत्रा । ९ इष्टिः । १० देवताता । ११ मखः । १२ विष्णुः । १३ इन्द्रः । १४ प्रजापतिः । १५ धर्म इति पञ्चदश यज्ञनामानि ॥ १७ ॥

१ भरताः । २ कुर्वः । ३ वावृतः । ४ वृक्तबर्हिषः । ५ यतस्रुचः । ६ मरुतः । ७ सवार्धः । ८ देवयव इत्यष्टावृत्विङ्नामानि ॥ १८ ॥

१ ईमहे । २ याचामि । ३ मन्महे । ४ दद्मि । ५ शग्धि । ६ पृधि । ७ मिमिदि । ८ मिमीहि । ९ रिरिहि । १० रिरीहि । ११ पीपरत् । १२ यन्तारः । १३ यन्धि । १४ इषुध्यति । १५ मदेमहि । १६ मनामहे । १७ मायत इति सप्तदश याच्ञाकर्माणः ॥ १९ ॥

१ दार्ति । २ दाशति । ३ दासति । ४ रार्ति । ५ रासति । ६ पृणक्षि । ७ पृणाति । ८ शिक्षति । ९ तुर्शति । १० मंहत इति दश दानकर्माणः ॥ २० ॥

१ परिस्रव । २ पवस्व । ३ अभ्यर्ष । ४ आशिष इति चत्वारोध्येषणाकर्माणः ॥ २१ ॥

१ स्वर्पिति । २ सस्तीति द्वौ स्वपितिकर्माणौ ॥ २२ ॥

१ कूपः । २ कातुः । ३ कर्तः । ४ वन्नः । ५ काटः । ६ स्रातः । ७ अवतः । ८ त्रिविः । ९ सूदः । १० दर्सः । ११ ऋक्षयदात् । १२ कारोतरात् । १३ कुशायः । १४ केवट इति चतुर्दश कूपनामानि ॥२३॥

१ तृप्तुः । २ तक्षाः । ३ रिम्बा । ४ रिप्तुः । ५ रिक्षा । ६ रिक्षायाः । ७ तायुः । ८ तस्करः । ९ वनर्गुः । १० कुरश्चित् । ११ मुषीवान् । १२ मलिम्लुचः । १३ अयर्वासः । १४ वृक इति चतुर्दशैव स्तेननामानि ॥ २४ ॥

१ निण्यम् । २ सस्वः । ३ सनुतः । ४ दिरुक् । ५ प्रतीच्यम् । ६ अपीच्यमिति षण्णिर्णीतान्तर्हितनामधेयानि ॥ २५ ॥

XVII. For 4 three Mss of R. read नाभि

XVIII. For 1 Devarája reads मारुता.

XIX. For 4 the Mss. of R. read दक्षि and for 13 यक्षि.

XX. Three Mss. of R. add वृक्षति before 8, and omit 9.

XXIII. The Mss. of R. add अवटः after 6

XXIV. For 1 some read क्षिप्र, for 2 रिक्षा. for 3 वृक्ष, and for 6 रिक्षा

१ अके । २ पराके । ३ परावैः । ४ आरे । ५ परावत इति पञ्च दूरनामानि ॥ २६ ॥

१ प्रत्नम् । २ पुरिवः । ३ पूर्वयाः । ४ सनेमि । ५ पुरुयम् । ६ अह्नायेति षट् पुराणनामानि ॥ २७ ॥

१ नवम् । २ नूत्नम् । ३ नूतनम् । ४ नव्यम् । ५ इदा । ६ इदानीमिति षडेव नवनामानि ॥ २८ ॥

१ प्रपित्वे । २ अभीके । ३ दभ्रम् । ४ अर्भकम् । ५ तिरः । ६ सतः । ७ त्वः । ८ नेमः । ९ ऋक्षाः । १० स्तृभिः । ११ वप्रीभिः । १२ उपजिह्विका । १३ उदरम् । १४ कुदरम् । १५ रम्भः । १६ पिनाकम् । १७ मेना । १८ ग्राः । १९ शेपः । २० वेतसः । २१ अया । २२ एना । २३ सिषक्ति । २४ सचते । २५ म्यसते । २६ रेजत इति षड्विंशतिर्द्विश उत्तराणि नामानि ॥ २९ ॥

१ स्वचे । २ पुरन्धी । ३ विषुरे । ४ रोदसी । ५ क्षोणी । ६ अम्भसी । ७ नभसी । ८ रजसी । ९ सदसी । १० सद्मनी । ११ घृतवती । १२ बहुले । १३ गभीरे । १४ गम्भीरे । १५ ओण्यौ । १६ चम्वौ । १७ पार्श्वौ । १८ मही । १९ उर्वी । २० पृथ्वी । २१ अदिति । २२ मही । २३ दूरेअन्ते । २४ अपारे अपारे इति चतुर्विंशतिर्द्यावापृथिवीनामधेयानि नामधेयानि ॥ ३० ॥

उद्वृहन्नहृय इरज्यति शिम्बाता निर्णिगस्मा केतुर्वेद् विक्ष्यद्विकमिदमिवार्चति विप्रो रेभो यज्ञो मरता ईमहे दाति परिस्रव स्वपिति कूपस्तूपुर्निग्यमाके प्रत्नं नवं प्रपित्वे स्वचे त्रिंशत् ॥

॥ इति तृतीयोऽध्यायः ॥

XXX. For 1 the Mss. of R. read स्वचे, add रोदसी after 4, and omit 7. For 16 and 17 they read चम्व्यौ । पार्व्यौ, and for 21 and 22 they read बृहती.

चतुर्थोऽध्यायः ।

१ जह्रा । २ निधा । ३ शितांम । ४ मेहना । ५ दस्मनाः । ६ मूषः । ७ इषिरेण । ८ कुरुतने । ९ जठरे । १० तितउ । ११ शिप्रे । १२ मध्या । १३ मन्दू । १४ ईर्मान्तासः । १५ कार्यमानः । १६ लोधम् । १७ शीम् । १८ विद्रधे । १९ द्रुपदे । २० द्रुग्धंनि । २१ नंसन्ते । २२ मसन्त । २३ आहनसः । २४ अघ्नसत् । २५ इष्मिणः । २६ वाहः । २७ परिलक्ष्म्या । २८ सुविते । २९ दर्यते । ३० नू चित् । ३१ नू चं । ३२ दावने । ३३ अकूपारस्य । ३४ शिशीते । ३५ सुतुकः । ३६ सुप्रायणाः । ३७ अप्रायुवः । ३८ च्यवनः । ३९ रजः । ४० हरः । ४१ जुह्वरे । ४२ व्यन्तः । ४३ क्राणाः । ४४ वाशीं । ४५ विपुणः । ४६ जामिः । ४७ पिता । ४८ शंयोः । ४९ अदितिः । ५० एरिरे । ५१ जसुरिः । ५२ जरते । ५३ मन्दिनें । ५४ गौः । ५५ गातुः । ५६ दंसयः । ५७ तृताव । ५८ चर्यसे । ५९ विपुते । ६० ऋघक् । ६१ अस्याः । ६२ अस्येति द्विषष्टिः पदानि ॥ १ ॥

१ साक्षिम् । २ वाहिष्टः । ३ हृतः । ४ वावशानः । ५ वार्यम् । ६ अन्धः । ७ असंश्चन्ती । ८ वनुष्यति । ९ तरुष्यति । १० भन्दनाः । ११ आहनः । १२ नदः । १३ सोमो अक्षाः । १४ श्वात्रम् । १५ ऊतिः । १६ हासमाने । १७ पड्भिः । १८ सुसम् । १९ द्विता । २० व्राः । २१ वराहः । २२ स्वसराणि । २३ शर्यीः । २४ अर्कः । २५ पविः । २६ वक्षः । २७ धन्व । २८ सिनम् । २९ इत्था । ३० सचा । ३१ चित् । ३२ आ । ३३ द्युम्नम् । ३४ पवित्रम् । ३५ तोदः । ३६ स्वश्वाः । ३७ शिपिविष्टः । ३८ विष्णुः । ३९ आघृणिः । ४० पृथुज्रयाः । ४१ अथर्युम् । ४२ काणुका । ४३ अग्निगुः । ४४ आङ्कूषः । ४५ आपान्तमन्युः । ४६ इमशा । ४७ उर्वशीं । ४८ वयुनम् । ४९ वाजपस्त्यम् । ५० वाजमन्यम् । ५१ गर्ध्यम् । ५२ गर्धिता । ५३ कौरंयाणः । ५४ तौरंयाणः । ५५ अहूयाणः । ५६ हरंयाणः । ५७ आरितः । ५८ व्रन्दी । ५९ निष्पपी ।

६० तूर्णाशम्। ६१ क्षुम्पम्। ६२ निचुम्पुणः। ६३ पादिम्। ६४ पादुः।
६५ वृकः। ६६ जोषवाकम्। ६७ क्रतिः। ६८ श्वघ्नी। ६९ समस्य।
७० कुटंरुष। ७१ चर्षणिः। ७२ शम्बः। ७३ केपयः। ७४ वृतुमाकुषे।
७५ अंसत्रम्। ७६ काकुदम्। ७७ बीरिदे। ७८ अक्तुं। ७९ पारे।
८० ईम्। ८१ सीम्। ८२ एनम्। ८३ एनाम्। ८४ सृणितिते चतुरुत्त-
रमशीतिः पदानि ॥ २ ॥

१ आशुशुक्षाणिः। २ आशांभ्यः। ३ काशिः। ४ कृणांरम्।
५ अलातृणः। ६ सलकूकम्। ७ कल्पयम्। ८ विस्रुहः। ९ वीरुधः।
१० नक्षद्राभम्। ११ अस्कंधोयुः। १२ निशुम्भाः। १३ वृषदंश्यम्।
१४ ऋदूदरः। १५ ऋदूपे। १६ पुलुकामः। १७ असिन्वती।
१८ कृपना। १९ भाकंजोकः। २० रुजानाः। २१ जूर्णिः। २२ ओमना।
२३ उपलप्रक्षिणी। २४ उपासे। २५ प्रकलवित्। २६ अभ्यर्धयज्वा।
२७ ईशे। २८ क्षोणस्य। २९ अस्मे। ३० पार्यः। ३१ सर्वोमनि। ३२ समर्याः।
३३ विदर्यानि। ३४ आयन्तः। ३५ आशीः। ३६ अजोगः। ३७ अमूरः।
३८ शशमानः। ३९ देवो देवाच्यां कृपा। ४० विजामातुः। ४१ ओमासः।
४२ सोमालम्। ४३ अनवायम्। ४४ क्रिमीदिने। ४५ अमवान्।
४६ अमीवा। ४७ दुरितम्। ४८ अघ्वां। ४९ अमातिः। ५० श्वघ्नी।
५१ पुरंध्रिः। ५२ रुशत्। ५३ रिशादसः। ५४ सुदत्रः। ५५ सुविदत्रः।
५६ आनुषक्। ५७ तुर्वाणिः। ५८ निवेणसे। ५९ अवृते सूर्ते।
६० अभ्यंक्। ६१ पादहिमन्। ६२ जारयायिं। ६३ अग्रिया। ६४ वनः।
६५ पवता। ६६ शुरुधः। ६७ आमिनः। ६८ जन्वंतीः। ६९ अप्रतिष्कुतः।
७० शामंदानः। ७१ सूमः। ७२ सुशिमः। ७३ रंसु। ७४ द्विबर्हाः।
७५ अक्तः। ७६ उराणः। ७७ स्तियानाम्। ७८ स्तिपाः। ७९ जबांह।
८० जरूथम्। ८१ क्रतिमाः। ८२ तुजः। ८३ बर्हणां। ८४ ततनिम्।
८५ इलीबिशाः। ८६ क्रियेधाः। ८७ भूमिः। ८८ विन्दितः। ८९ पुरीषम्।
९० रास्पिनः। ९१ ऋञ्जतिः। ९२ ऋजुनीती। ९३ मृतदंसु।

९४ हिनोति । ९५ चोप्कूयमाणः । ९६ चोप्कूयते । ९७ सुमत्।
९८ दिविंशिप्रु । ९९ दूतः । १०० जिन्वति । १०१ अमंत्रः ।
१०२ ऋचीषमः । १०३ अर्तर्शारर्ति । १०४ अनर्वा । १०५ असामि।
१०६ गल्दया । १०७ जन्हवः । १०८ बर्कुरः । १०९ बेकनाटान्।
११० अभि धेतन । १११ अंहुरः । ११२ बतः । ११३ बातापर्यम् ।
११४ चाकन् । ११५ रथ्यर्यति । ११६ असक्राम् । ११७ आधवः।
११८ अनवब्रवः । ११९ सदान्वे । १२० शिरिम्बिठः । १२१ पराशरः ।
१२२ किविर्दती । १२३ कर्ल्हती । १२४ दनः । १२५ शराहः ।
१२६ हृदंयुः । १२७ कीकटेषु । १२८ बुन्दः । १२९ बृन्दम् । १३० किः ।
१३१ उल्बम् । १३२ ऋचीसमृचीसमिति द्वात्रिंशच्छतं पदानि ॥ ३ ॥

जहा सन्निमाशुशुक्षणिश्रीणि ।

॥ इति चतुर्थोऽध्यायः ॥

पञ्चमोऽध्यायः ।

१ अग्निः । २ जातवेदाः । ३ वैश्वानर इति त्रीणि पदानि ॥ १ ॥

१ हविर्दाः । २ इध्मः । ३ तनूनपात् । ४ नराशंसः । ५ इळः । ६ बर्हिः । ७ द्वारः । ८ उषासानक्ता । ९ दैव्या होतारा । १० तिस्रो देवीः । ११ त्वष्टा । १२ वनस्पतिः । १३ स्वाहाकृतय इति त्रयोदश पदानि ॥ २ ॥

१ अश्वः । २ शाकुनिः । ३ मण्डूकाः । ४ अक्षाः । ५ यावाणः । ६ नाराशंसः । ७ रथः । ८ दुन्दुभिः । ९ इषुधिः । १० हस्तघ्नः । ११ अभीशवः । १२ धनुः । १३ ज्या । १४ इषुः । १५ अश्वाजनी । १६ उलूखलम् । १७ वृषभः । १८ दुघणः । १९ पितुः । २० नद्यः । २१ आपः । २२ ओषधयः । २३ रात्रिः । २४ अरण्यानी । २५ श्रद्धा । २६ पृथिवी । २७ अप्वा । २८ अग्नायी । २९ उलूखलमुसले । ३० हविर्धाने । ३१ द्यावापृथिवी । ३२ विपाडिन्द्रतुद्दौ । ३३ आत्नीं । ३४ शुनासीरौ । ३५ देवी जोष्ट्री । ३६ देवी ऊर्जाहुती इति षट्त्रिंशत्पदानि ॥ ३ ॥

१ वायुः । २ वरुणः । ३ रुद्रः । ४ इन्द्रः । ५ पर्जन्यः । ६ बृहस्पतिः । ७ ब्रह्मणस्पतिः । ८ क्षेत्रस्य पतिः । ९ वास्तोष्पतिः । १० वाचस्पतिः । ११ अपां नपात् । १२ यमः । १३ मित्रः । १४ कः । १५ सरस्वान् । १६ विश्वकर्मा । १७ तार्क्ष्यः । १८ मन्युः । १९ दधिक्राः । २० सविता । २१ त्वष्टा । २२ वातः । २३ अग्निः । २४ वेनः । २५ अस्तुनीतिः । २६ ऋतः । २७ इन्दुः । २८ प्रजापतिः । २९ अहिः । ३० अहिर्बुध्न्यः । ३१ सुपर्णः । ३२ पुरूरवा इति द्वात्रिंशत्पदानि ॥ ४ ॥

१ श्येनः । २ सोमः । ३ चन्द्रमाः । ४ मृत्युः । ५ विश्वानरः । ६ धाता । ७ विधाता । ८ मरुतः । ९ रुद्राः । १० ऋभवः । ११ अङ्गिरसः । १२ पितरः । १३ अथर्वाणः । १४ भृगवः । १५ आप्याः । १६ अदितिः । १७ सरमा । १८ सरस्वती । १९ वाक् । २० अनुमतिः । २१ राका । २२ सिनीवाली । २३ कुहूः । २४ धर्मी । २५ उर्वशी ।

२६ पृथिवी। २७ इन्द्राणी। २८ गौरी। २९ गौः। ३० धेनुः। ३१ अघ्न्या। ३२ पथ्या। ३३ स्वस्तिः। ३४ उषाः। ३५ इळा। ३६ रोदसी इति षट्त्रिंशत्पदानि ॥ ५ ॥

१ अश्विनौ। २ उषाः। ३ सूर्या। ४ वृषाकपायी। ५ सरण्युः। ६ त्वष्टा। ७ सविता। ८ भगः। ९ सूर्यः। १० पूषा। ११ विष्णुः। १२ विश्वानरः। १३ वरुणः। १४ केशी। १५ केशिनः। १६ वृषाकपिः। १७ यमः। १८ अज एकपात्। १९ पृथिवी। २० समुद्रः। २१ अथर्वा। २२ मनुः। २३ दध्यङ्। २४ आदित्याः। २५ सप्त ऋषयः। २६ देवाः। २७ विश्वे देवाः। २८ साध्याः। २९ वसवः। ३० वाजिनः। ३१ देवपत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि ॥ ६ ॥

अग्निर्देविणोदा अश्वो वायुः श्येनोश्विनौ षट्।

॥ इति पञ्चमोऽध्यायः ॥

॥ समाप्तम् ॥

VI. B1 reads at the end as follows —

आद्ये नैघण्टुके काण्डे द्वितीयं नैगमं तथा।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्थितः ॥ १ ॥
गौराद्यपार्थपर्यन्तमाद्यं नैघण्टुकं मतम्।
जह्नाद्युल्वमृषीकान्तं नैगमं परिचक्षते ॥ २ ॥
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते।

अग्न्यादिर्द्यौ र्जसाद्व्यन्तः क्षितिगतो गणः ॥
वाय्वादयो मर्ग(गाः)न्ताः स्युरन्तरिक्षस्थदेवताः ॥ ३ ॥
सूर्यादिदेवपत्न्यन्ता द्युस्थान(नाः)देवता इति।
गोरादिदेवपत्न्यन्तः समाम्नायोभिधीयते ॥ ४ ॥

इत्येवमादिना क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणं पूर्वाह्णमध्यन्दिनापराह्णेषु यथाध्येयमधीतस्य च स्वरसौष्ठवयुक्तस्य यज्ञकर्मणि प्रयोग इत्येवमाद्यर्थजातं निदर्शनं च । तथा ह्यधीतः प्रयुज्यमानश्चापूर्वाङ्गभावाय नान्यथेत्येवमर्थवत्ता शिक्षायाः । एवं ह्याह

" मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोपराधात् ॥ " (शि० ५२)

इति । वेदाध्ययनानुपकृतश्चेतिहासपुराणशास्त्राणां लौकिकानां ग्रन्थविस्तररचनानामत एवाध्ययनपरिज्ञानम् ।

शिक्षाधिगनाध्ययनविधेर्वेदस्याक्षरकोशवदव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिराद्रियते । इयताक्षरकोशेनेयद्भिः पादैर्गायत्रीयद्भिस्त्रिष्टुबिति । न ह्यविज्ञातच्छन्दसा प्रयुज्यमानो मन्त्रः कर्मण्यार्धुकः स्यात् । एवं ह्याह । " यो ह वा अविदि-

---

8. *m.* °ग्रन्थविस्तारवचनानां for °विस्तररचनानां 10. *d.* om °रक्षण°. 11. *d* आद्रियेत for आद्रियते 12 *d.* माङ्कुक, *bi.* आर्द्धक. for आर्धुकः of *a. b. m.*

---

3. As to the different points dealt with in पाणिनीयशिक्षा *cf.* तैत्तिरीयोपनिषद् I. 2. which briefly enumerates them.

4. मन्त्रो हीनः etc.—This verse occurs as fifty-second in the current edition of *Pâṇiniyas'ikshâ*, but *bi.* refers to it as verse 50 It also substantially occurs in *Vyâkaraṇa-mahâbhâshya* (*cf.* Bombay Series Edn. Vol. I. p. 2.) with the variant दुष्टः शब्दः for मन्त्रो हीन-

9. °परिज्ञानम् । शिक्षाधिगन°—The sentences here are separated according to the reading of some Mss.; *bi.* reads here the first word only of the next para, but it makes no sense; besides if it be made to begin the next para it looks symmetrical with other similar paragraphs that follow.

12. According to *bi.* the text यो ह वा etc. occurs in सामवेद आर्षेयब्राह्मण प्रपा० १ खं० १. The reading is partially doubtful as two of our Mss. read र्वै for गर्ते of others and of *bi.*; and there is a doubt as to the verb. All Mss. (except m.) and *bi.* read पद्यति, m. reads पाद्यते. Prof. Max Müller his Rig-veda (P. 40, Vol. I. first edn.) prints this text as गर्ते वा पते. Kâtyâyana's Sarvànukramanî seems to read the text as गर्तं वा ते स्थाणुं पर्च्छति प्रमीयते वा. I have adopted the reading of the Bom. Univ. Mss. of the Ârsheya Br. which speaks of this chapter as प्रपा० १.

तार्येयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान्भवति यातयामान्यस्य छन्दांसि भवन्ति" इति। अतोनुपलब्धौ वक्तव्यादिलक्षणपरिज्ञानं लोके। अत्र "लौकिकम्" इति ह्याह।

सम्यगधीतस्य परिज्ञानच्छन्दसोमुष्मिन्कर्मणि विनियोग इति कल्प आदियते। तद्यथा "इषेत्वेति छिनत्ति ऊर्जेत्वेत्यनुमार्ष्टि" इति। न हि कल्पानभिज्ञः प्रयोगान्विजानीयादिति।

श्रुतिचोदितकर्मोद्भूतकालपरिज्ञानाय ज्योतिषम्। अनुपलब्धावपि प्राणिनां शुभाशुभकर्मफलविपाककालपरिज्ञानम्।

व्याकरणाद्विभक्त्यादिपरिज्ञानम्। एवं ह्याह "प्रयाजाः सविभक्तिकाः कर्तव्याः"।

---

2. *d. m.* गर्तं for गर्ते of *a. b. h.*; *m.* वा पात्यते वा प्रमीयते for वा पद्यति प्र वा मीयते of *a d. b. h.* We read with the Bomb. Univ. Ms. 3. *m.* इत्याह for इति ह्याह. 4. *m.* सम्यगधीतपरिज्ञातछन्दसः for सम्य° to °छन्दसो 7. *b.* °दृश्यादो प्राणिनां 8. *m.* °विपाककर्मकाल°.

3. All Mss. read लौकेऽत्र here I have separated the words as belonging to two different sentences. The word अत्र, however, hardly fits in the context. I almost suspect that the reading ought to be अथ लौकिकमिति आह for अत्र लौकि°, for, the Sutra of पिङ्गल reads अथ लौकिकम् after the vedic metres have been explained and then follow the classical metres.

5. यजु० वाज० सं० I. 1-2. The words छिनत्ति and अनुमार्ष्टि are not found in the Yajurveda texts which are simply इषेत्वा। ऊर्जेत्वा On it Mahîdhara comments that the first is a formula for cutting (the branch), and the second for मार्जन (making it clean and plane) The additional words in the text above are, therefore, introduced from the use of the formula as read by आपस्तम्ब श्रौ० सू० I. i. 11. अपि वपे इषेत्वा-च्छिनत्त्यूर्जे त्वेति मनसापत्यनुमार्ष्टि वा।

7. *cf.* वेदा हि यज्ञार्थमभिप्रवृत्ता: कालानुपूर्वं विहिताश्च यज्ञा:।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥
(Vedângajyôtisha I. 7.)

9. The quotation occurs in Mahâbhâshya Vol. I. p. 3 (Bomb. Series) but there too, it is introduced as वार्त्तिकाः पठन्ति.

तया चोहं दर्शयति "संख्यादयो न विवर्धन्ते" इति । न च व्याकरणानभिज्ञो विभक्तीर्जानीयादूहितुं वा मन्त्रान् । तत एव चानुपक्षतो लोके लौकिकलक्षणपरिज्ञानमेवं छन्दस्येवं भाषायामिति प्रविभागो नान्तरीयकोनन्तरेण व्यवस्थितः ।

अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तविनियोगस्योपलक्षितकर्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानं वेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानम् । तदूनः शब्दः । स चेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते । स च पुनरर्थाभिधानवशेन मन्त्राणाम् । यो यमर्थमभिधानेन संस्कर्तुं समर्थो मन्त्रः स तत्र विनियुज्यते । तदुक्तम् "अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्" इति । न च निरुक्तादितेन्यदङ्गमन्यद्वा बाह्यं शास्त्रमस्ति तात्पर्येण यदशेषाञ्शब्दान्निर्ब्रूयात् । यदपि च क्वचित् क्वचिदन्यशास्त्रे शब्दनिर्वचनमत एव तदित्युपलक्ष्यम् । यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणादेवं शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात् । वस्तुमात्रमेव ह्यितरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किंचिच्चिन्त्यते । ब्राह्मणमपि च विध्यर्थवादरूपमशेषमन्त्रार्थशेषभूतमेव । मन्त्रब्राह्मणार्थपरिज्ञानवद्दुरध्याध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाममोक्षाख्योखिलपुरुषार्थः । न चानिरुक्तो मन्त्रार्थो व्याख्या-

---

1. *d m* चोहं for चेद of others; *m.* चिन्तयंत इति; *d.* व्याकरणायानभिज्ञो.
2. *m.* om. लोके. 4. *d.* °प्रति° for °प्रवि° 5. *m.* °दर्शितशब्दलक्षण°
8. *m* यमर्थाभिधानेन for यमर्थमभि°; *m.* मन्त्राः for मन्त्र. 10. *m.* बाह्यशास्त्रं for बाह्यं शास्त्र; *m.* यदशेषाञ्शब्दान् 11 *m* उपलक्षण for उपलक्ष्यं. 12. *m.* °लक्षणया परिज्ञानं. 14. *a. d.* मन्त्रार्थे शेषभूतमेव, *m.* अशेष मन्त्रार्थशेषभूतमेव (perhaps better); *m.* °परिज्ञान वद्ब्रा। 15.. *m.* न च निरुक्तो.

---

3. I cannot trace the quotation संख्यादयो etc. to its source, and I am doubtful whether it is accurate.

4 ff. On the sense of उह, see Mahâbhâshya vol. I p. I (Bomb. series).

13. Jaimini Sûtra III. ii. 1. The remaining portion of the sûtra is तस्माद्उत्पत्तिसंबन्धोऽर्थेन नित्यसंयोगात्.

तव्य इति । तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम् । अथास्यैवमखिलपुरुषार्थोपकारवृत्तिसमर्थस्य संग्रहः ।

तद्यथा—नामाख्यातोपसर्गनिपातलक्षणं (नि० १. १-११) भावविकारलक्षणं (नि० १. २) नामान्याख्यातजानि न सर्वाणि च यथोपन्यस्य पक्षप्रतिपक्षौ विचार्यावधारणं सर्वाण्याख्यातजानि कानिचिदवैनैकधातुजान्यपीति (नि० १. १२-१४) मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्तावधारणं (नि० १. १५-१६) पदविभागपरिज्ञानप्रतिज्ञाबोधावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्गसङ्कटेषु मन्त्रेषु याज्ञिकापरिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा (नि० १. १७) अर्थज्ञप्रशंसा अनर्थज्ञावधारणं (नि० १. १८-२०) वेदवेदाङ्गव्यूहः सप्रयोजननिघण्टुसमाम्नायविस्तर प्रकरणत्रयविभागेन नैघण्टुकप्रधानदैवताभिधानप्रविभागलक्षणं (नि० १. २०) निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः (नि० २. १) अर्थप्राधान्यात्तोपोपधाविकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तस्थानोपोपधाविकारवर्णलोपद्विवर्णलोपाद्यन्तविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता अर्थतत्स्थान्नर्थोनुनिमित्तेन संप्रसार्यासंप्रसार्योभयप्रकृतिधातुनिर्वचनोपदेशः भाविकलाक्षोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः नैगमप्रायोवृत्तिभ्यो भाविकशब्दार्थप्रसिद्धिः देशाव्यवस्थया शब्दरूढ्युपदेशः तद्धितसमासनामनिर्वचनलक्षणं (नि० २. २-३) शिष्यलक्षणं (नि० २. ४) विशेषव्या-

---

2. *m.* °पकारकृत्ति°. 3 *d.* मार्विकार°. 4. *b* om. °*m.* न before सर्वाणि, all Mss. have it. 5 *d* आख्यातजानानि for आख्यातजानि, *m* °धातुजन्यमपि. 6. *m.* अर्थवधारण for अर्थज्ञावधारण. 7 *b.* °प्रतिज्ञा° °बोधा°. Here the reading of *m.* is better; but not being supported, I have not introduced it in the text; *m* reads °प्रतिज्ञा तदवबोधावलम्बिप्रदर्शनाय 8. *m* reads °दैवतलिङ्गेषु मन्त्रेषु, *b* याज्ञिकपरिज्ञानेन 8–[illegible] *a. d* अर्थज्ञप्रशंसा अनर्थवधारण, *m.* अनर्थज्ञावधारण, *b* अनर्थज्ञावधारण, *c* [illegible] °निघण्टुसमाम्नाय° 12. *m* °मध्यन्त°. *b* om. °द्विवर्णलोपाद्यन्त° I read the text with *a. d* and *m.* but perhaps the word आद्यन्त after विपर्यय is superfluous. I think the reading should be °वर्णलोपद्विवर्णलोपाद्यन्तविपर्ययव्यापत्ति° as will be seen from reference to the text given above. 15 *b* शब्दरूपव्यपदेश°, *a d. m.* as in the text 16. *b.* विशेषेण व्याख्यायते for विशेषव्याख्यया of *a d.* as in the text, *m.* विशेषव्याख्याय.

---

4. यथोपन्यस्य—I feel there should be इति here for यथा. I. 7. [illegible] sense is not clear. I have, however, kept यथा in the text. See [illegible] read by any of the Mss. or by the printed editions.

स्यया तत्त्वपर्यायभेदसङ्ख्यासंदिग्धोदाहरणनिर्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणं (नि॰ २.५-३.२२) अनेकार्थानवगतसंस्कारानुक्रमणं (नि॰ ४.१-६. यावदन्तं) परोक्षकृतप्रत्यक्षकृताध्यात्मिकमन्त्रलक्षणं स्तुत्याशीःशपथाभिशापाधिक्षेपापरिदेवनानिन्दाप्रशंसादिनिर्मन्त्राभिव्यक्तिहेतूपदेशः (नि॰ ७. १-३) निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वं इतरेतरजन्मत्वं (नि॰ ७. ४) स्थानत्रयभेदशः तिसृणामेकैकस्या माहाभाग्यकृतोनेकनामधेयप्रतिलम्भः पृथगभिधानस्तुतिसंबन्धाद्वा (नि॰ ७. ५) देवतानामाकारचिन्तनभक्तिसाहचर्यसंस्तवकर्मसूक्तभाक्त्वहविर्भाग्त्वव्यञ्जनभाग्त्वानि (नि॰ ७. ६-१३) पृथिव्यन्तरिक्षस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्युदाहरणं तन्निर्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः (नि॰ ७.-१२.) विद्यागम्प्राप्त्युपायोपदेशः मन्त्रार्थनिर्वचनद्वारेण देवताभिधाननिर्वचनफलं देवताताद्भाव्यं (नि॰ प॰ १३.) इत्येष समाम्नो निरुक्तशास्त्रचिन्ताविषयः ॥

तस्यैषा गवाद्या देवपत्न्यन्ता पदाख्यायी सूत्रसमूहः। सा च पुनरियं साक्षात्कृतधर्मभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थमुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्यमवेक्ष्य तदनुजिघृक्षया वाक्यार्थसामर्थ्यादभिधेयानुनीय मन्त्रार्थविबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता। सैषा छन्दोवयवभूता छन्दोधर्मिण्येव। यथा यूथापत्रस्तो हि गौर्गौर्धर्मा। इयं च तस्या द्वादशाध्यायी भाष्यविस्तरः। तस्या इदमादियाक्यं **समाम्नायः**

---

1. *bi.* ᶜसन्दिग्धोदाहरणान्निर्वचनᵓ It appears to be ᶜदाहरणतन्निर्वचनᵓ, *vide* comm. on Nir. II. 5. 4. *bi.* ᶜशपथाभिशापाधिक्षेपापरिदेवनाᵓ, *m.* ᶜपरिदेवनानिन्दाᵓ *a d.* ᶜमन्त्राभिव्यक्तिहेतूपᵓ. We read with *bi* and *m*, as ᶜव्यक्तिᵓ makes better sense. 5. *bi* and *m* निदानपरिज्ञानव्याख्यापनाय, *a. d* as above; *m.* reads ᶜमादिष्टᵓ for ᶜअनादिष्टᵓ, all read ᶜपदेशप्रकृतिᵓ. For the sense, however, I believe it should be ᶜपदेश प्रकृतिᵓ. 6. *m* पत्नैकस्य for पत्नैकस्या; *d* महाभाग्यᵓ for माह्नाᵓ. 7. *m.* पृथगभिधानस्तुतिसम्बन्धाद्वा. This agrees with the text VII. 5. But it is supported by a single Ms. only. *a d. bi.* पृथगभिधानस्तूत्पत्तिसम्बन्धाद्वा; *bi.* ᶜचिन्तनं भक्तिᵓ, *a d.* as above. 9. *m.* ᶜद्युस्थानदेवतानदेवतानां; *a. d.* ᶜव्युत्पत्तिप्राधान्यस्तुत्युदाहरणᵓ, *m.* ᶜप्राधान्यस्तुत्युदाहरणंᵓ, *bi.* ᶜप्राधान्यश्रुत्युदाहरणᵓ. 13. *m.* गौरादिदेवपत्न्यन्ता. 14. *m.* अपेइय for अवेक्ष्य. 15. *bi.* वाक्यार्थᵓ for वाक्यार्थᵓ, *a. d. m* as in the text; *a* अभिधेयमुन्नीयोन्नीय, *m.* अभिधेयानुन्नीयोन्नीय. 16. *m.* and *d* समाम्नाताः for समाम्नाता। *m.* यूथापन्नस्तादृग्गौ, *bi.* यथापन्नस्तागौर्गौर्धर्मा इति. We read with *a.* and *d.* which continue as गौर्धर्मेय च तस्या &c. I separate the sentences in accordance with the sense. 17. *bi.* अयं for इय; *a. d. m.* तस्य for तस्या.

समाम्नात इति । गवादिर्देवपत्न्यन्तः शब्दसमुदायः समाम्नाय उच्यते । समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य कर्मणि कारके समाम्नायः । समभ्यस्यते मर्यादयायमिति समाम्नायः । स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः, पञ्चाध्यायीशास्त्रसंग्रहभावेनैकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः ।

तस्य किमिति । **स व्याख्यातव्यः** । स च योसमाम्नातश्छन्दस्येवावस्थितोगवादिरन्यैर्वा निरुक्तैर्यः समाम्नातोय चैतस्मिन्निरुक्ते स एष उभयलक्षणोपि व्याख्यातव्य । आह । कथमेतद्भ्यतेसमाम्नातव्याख्यानमप्यत्राभिमतमिति समाम्नानार्हाणां वा किमर्थमसमाम्नानम् । उच्यते । निर्वचनलक्षणोपदेशान् निर्वचनप्रसक्तानां च मृगकर्णदक्षिणालक्ष्मीनिघण्टुभद्राधःशब्दप्रभृतीनामेवमाद्यानां निर्वचनोपदेशाज्ज्ञायते-
5 समाम्नातव्याख्यानमप्यत्राभिमतमिति । यत्पुनरेतदुक्तं समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति । अत्र ब्रूमः । न हि समाम्नानार्हाणामन्तोस्ति तेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात् । अतश्चाध्ययनश्रवणज्ञानशक्तिहानदोषः प्रसज्येत । शक्यश्चैतावल्लक्षणोद्देशोदाहरणभूतानिघण्टुशब्दसमुदायेनाधीतवेदेन मेधाविना तपस्विना लक्षणविनियोगार्थच्छन्दोदैवतनिदानविदाभियुक्तेनागमवता मन्त्रार्थोंभ्यूहितुमित्येतावानेव निघ-
10 ण्टुषु शब्दसमुदायः समाम्नातः । तस्मादुपपन्नमसमाम्नातव्याख्यानमप्यत्राभिमतमिति । असमाम्नाने च सर्वेषा शास्त्रातिगौरवभयादिति । व्याख्यातव्यः । विभज्येमान्यत्र नामानीमान्याख्यातान्युपसर्गा इमे निपाता इम इदं सामान्यलक्षणमिदं विशेषलक्षणमिमान्येकार्थानीमान्यनेकार्थानीमान्यनवगतसंस्काराणीदमभिधानमिदमभिधेयमिदमभिधानस्य निर्वचनमित्येवंविधया मर्यादया परिपाट्या यथासमाम्नात आख्यातव्यो निर्वक्तव्य इत्यर्थः ।
15 **तामिमं समाम्नायं निघण्टव इत्याचक्षते** । तं च योसमाम्नातश्छन्दस्येवावस्थितोगवादिरन्यैर्वा निरुक्तैः समाम्नातस्तमिमं च निघण्टव इत्याचक्षतेन्येष्याचार्या इति वाक्यशेषः । निघण्टवो ह्यिमेतस्मिञ्छब्दसमुदाये संहेत्यभिप्रायः ॥

---

1. *d.* गवादिर्देवपत्न्यन्त° *d* om. समाम्नाय 5. *m.* om. तस्य किमिति 5–6 *b.* स च यो समाम्नात छन्दस्येवावस्थितो गवादिभिरन्यैर्वा निरुक्तैर्य समाम्नात° म च &c We accept the reading of *a d m* 7. *b* अस्माभिप्रेतमिति The above text reads with *a.* and *d* 8. *m.* om वा; *b.* adds इति after असमाम्नाने 9 *m* °मद्राधो° for भद्राध°; *a.* and *d* निर्वचनप्रदेशात् for निर्वचनोपदेशात् 10. *b* असमानिव्याख्यान for असमाम्नातव्याख्यान of *a d m* 12. *m.* अध्याय(य ?)नश्रवणज्ञानशक्तिहानिदोष. 13. *b.* *b.* निघण्टुशब्दसमुदायेन, *a d.* and *m* as in the text 14 *b* °विनियोगार्थच्छन्दो°. 16. *a d* om. च before सर्वेषा. 18 *b* इत्यवगतसस्काराणि, *a d m.* as text. 19. *d.* एवंविधाया, *m.* एवं विधाय, for एवंविधया of *a b*; *d* परिपाट्या, *m.* परिपाठ. for परिपाट्या. 21 *a. d.* °वस्थितो अगवादिरन्यैर्निरुक्तै. 22. *b* °तस्मिंछब्द समुदाये, we read with *a. d m.*

निघण्टवः कस्मादिति । निघण्टुशब्दव्युत्पिपादयिषया प्रश्नं निर्विवक्षयेदमाह। **निगमा इमे भवन्ति** । येऽभिधाननिर्वचनप्रारम्भकेऽवाचार्योयं यास्को निरुक्तकारः कस्माच्छब्दमुत्तरत्र न कुर्यात्तावपि व्याख्याकाले कस्मादिति शब्दः समुत्पाद्यस्तया हि व्याख्यासाकल्यं भवति । **निगमा इमे भवन्ति** । निश्चयेनाधिकं वा निगूढार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ततो निगमसंज्ञा इमे भवन्ति । 5

आह। कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति। उच्यते-यस्मादेते **छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः** । छन्दांसि मन्त्रास्तेभ्य उपलक्षितसामर्थ्याः समाहृत्य ग्रन्थीकृता इत्यर्थः । आह कस्मात्पुनरेतावन्त एव ग्रन्थीकृता इति । उच्यते। इतो यस्मादेतैरेव छन्दस्यवस्थितैरभिनिविष्टधियामपि मेधाविनां तपस्विनां लक्षणविनियोगार्थच्छन्दोदैवतनिदानविदामपि सतां मन्त्रार्थपरिज्ञानोद्यमभङ्गः क्रियते दुष्परिज्ञानत्वात्तेषाम्। एतेषु परिज्ञानेऽवश्यप्रतिबन्धेन गम्यते मन्त्रार्थः परिज्ञातुमित्यत उच्यते त एव ज्ञापका भवन्तीति । अतश्चैत एवोक्तसामर्थ्याः समाहृत्य समाम्नाता इति समाम्नानमात्रमेव दर्शयति । प्रकरणगताश्च नित्या एवैत इति गम्यते । 10

ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः । उदाहृताः समाम्नाता निर्वचनप्रसङ्गे निरुच्यन्ते य एते समाम्नाता गवादयस्त एते मन्त्रार्थनिगमयितृत्वादुभयेपि निगन्तवः सन्तो निगमनाद्वेतोर्निघण्टव उच्यन्त इत्यौपमन्यवः । इत्येवमर्थनिगमयितृत्वान्निगन्तव एते संज्ञाः सन्तोतिपरोक्षवृत्तिना शब्देन 15

---

1. *d.* °शब्दव्युत्पिपादयिषया प्रश्ननिर्विवक्षयेदमाह. 2. *a. d* om. अथ यास्को निरुक्तकारः. 3. *a. d.* व्याख्याकालेऽयं समुत्पाद्यः, *m.* समुत्पाद्य for समुत्पाद्य. otherwise it agrees with the text. 4. *a. b. bi.* °साकल्यं, *d. m.* °साकल्य; *a.* निश्चयेनानधिकं वा निष्कृष्य निगूढार्था, *d.* निश्चयेन अधिकं वा निष्कृष्य निगूढार्थां, *m.* agrees with *a*, but reads निष्कृत्य for निकृष्य. 5. *m.* adds ज्ञापयन्ति after गमयन्ति; *bi.* adds निघण्टव एव and *m.* निघण्टव after निगमसंज्ञा, *a. d* as in the text. 6. *m.* कस्मात् for यस्मात्; *bi.* adds गवादयः after यस्मादेते: *a. d. m.* agree with the text. 10. *bi.* परिज्ञानायोद्यमभङ्गः and दुष्परिज्ञानत्वात्, *a. d. m.* as in the text. 12. *m.* adds समाहृत्य again after समाहृत्य; *m.* समाम्नायमात्र, *d.* समाम्नातमात्रं, for समाम्नानमात्रं of *a. b. bi.* 17. *m.* अतिपरोक्षवृत्तिशब्देन.

---

15. I am almost inclined to drop the Visarga of उदाहृताः here, and read उदाहृता-समाम्नाताः as one word or read उदाहृताः समाम्नातनिर्वचन°. Then only the sentence serves as a reason for the निर्वचन of words like निघण्टु. The manuscripts and the editions, however, read as above.

गकारस्थाने घकारं कृत्वा तकारस्थाने च टकारं कृत्वा निघण्टव उच्यन्ते। वर्णाग्मापत्त्यादिलक्षणम् 'लयाप्यादिविपर्ययः' इत्येवमादि। तदेतत्परोक्षातिपरोक्षकृत्सु शब्देषु यथासंभवं द्रष्टव्यम्। त्रिविधा हि शब्दव्यवस्था। प्रत्यक्षकृतयः परोक्षकृतयः अतिपरोक्षकृतयश्च। तत्रोत्कटक्रियाः प्रत्यक्षकृतयः। अन्तर्लीनक्रियाः परोक्षकृतयः। अतिपरोक्षकृत्सु शब्देष्वेव निर्वचनान्युन्नयः। तस्मात्परोक्षकृत्तिनामाख्यातप्रत्यक्षकृत्तिना शब्देन निर्वक्तव्याः। तद्यथा। निघण्टव इत्यतिपरोक्षकृत्तिः। निगन्तव इति परोक्षकृत्तिः। निगमयितार इति प्रत्यक्षकृत्तिः। यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यन्ते। उक्तं च—

"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥"

वक्ष्यति चायमपि वर्णविपर्ययवर्णव्यापत्तिलक्षणम्। त एते निगन्तवः सन्तो निघण्टव उच्यन्त इत्येवमतिपरोक्षकृत्तयो निर्वक्तव्याः। प्रायेण चौणादिषु परोक्षकृत्तयः शब्दा-श्चिन्त्यन्ते। तत्र तेषां लक्षणमुपेक्षितव्यम्। वेदानामपि लक्षणं नास्ति तेषामपि तत्र कल्प्यम्। अपरिसमाप्ता हि गुणादय इति लक्षणविदः प्रतिजानते। सर्वथापि लक्षणसंभवे धातूपोदरादिपाठसिद्धिरेव द्रष्टव्या। तत्र हि यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्व-

---

4. *a d* तत्रोत्कटक्रियाः प्रत्यक्षकृतयः, *m* अत्रोत्(त्व?)टक्रियाः. *b*. तत्रोत्कक्रियाः-
5. *b*, om पद्य after शब्देषु; *a. b. d. m* as in the text add it. 6. *d*. om. इति before उच्यन्ते 13 *m* अत्र for तत्र, and उपेक्षितव्यम् for उपेक्षितव्यम्
14. *m*. कल्पम् for कल्प्यम्, अपरिसमाप्तता for अपरिसमाप्ता. गुणादय for न्युणादय, and प्रतिजानीते for °तिजानते. 15. *d*. appears to read पाठसिद्धेरेव द्रष्टव्या॥; *m*. adds सर्वे after हि, and reads शब्दः for शब्दाः॥, *d*. adds between यथा and ध्ययनमेव (probably introduces in the body of the comm. a marginal note occuring in its original)—*विमतदुत्पन्नादेर्दोष्य शब्दस्यः शब्द इष्यते। स्वयमेवागिकलिप्ते प्रभेदैः स पुनस्त्रिधा॥ १॥ अव्यक्तयोगनिर्योगयोगाभावैस्त्रिधा प्रियः। ते च गुणादि-मूलादिमत्त्वपाठा यथाक्रमम्॥ २॥ शुद्धतन्मूलकमिश्रभेदैर्दोगिकस्त्रिधा। ते च प्रातिस्वि-कान्तिके.....।*.

---

1. I take the liberty of adding निघण्टव उच्यन्ते after टकारं कृत्वा on the analogy of the sequel. Otherwise, I fear, the sentence remains incomplete. The whole para appears to be in an unsatisfactory condition.

2. and 11. For the लक्षण See Nir II. 1.

9. The Kârikâ occurs in the Kâs'ikâ on धृषोदरादीनि यथोपदिष्टम्। (*Pân.* VI. 3. 109.)

मिव्याहारानभिघातायेति हि लक्षणविदो मन्यन्ते। **इत्यौपमन्यवः**। आचार्यो मन्यत इति वाक्यशेषः। उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः। कीर्तिप्रथनार्थमौपमन्यवग्रहणम्।

अपि वाहननादेव स्युः समाहृता भवन्ति। अपि वैवं यथोक्तम्। अपि चैवमन्यथा निघण्टवः स्युः। कथमिति। आहननादेव। न निगमनादित्यभिप्रायः। विद्यमानमपि निगमनमविवक्षितमेतस्मिन्पक्षे। अनेककियायोगेपि हि सति कांचिदेव कियामङ्गीकृत्य नामधेयप्रतिलम्भो भवति। तदुत्तरत्र वक्ष्यामः। आह। किमेतेष्वाहृतमिति। उच्यते। **समाहृता भवन्ति**। समः स्थाने नीत्येव नियुक्तः। दर्शयिष्यति चायमुपसर्गव्यत्ययं 'निरित्येव समित्येतस्य स्थाने' इति। आङविद्यमान एवाघ्याहृतो मर्यादार्थप्रकाशनाय। हन्तेः पाठार्थे वर्तमानस्यानेकार्थत्वाद्धातूनां वर्णव्यापत्त्यौष-शब्दवत् हकारस्थाने घकारः। अथ कोर्थः। एतस्मिन्पञ्चाध्यायीसंग्रहे मर्यादया पठिता ह्येते भवन्ति तस्मात्समाहृताः समाहन्तव एते सन्त उपसर्गव्यत्ययोपसर्गाध्याहारवर्णव्यापत्तिभिर्निघण्टव इत्युच्यन्ते। प्रसिद्धश्च पाठार्थे हन्तेः प्रयोगः। एवं हि वक्तारो भवन्ति 'ब्राह्मण इदमाहृतम्' 'सूत्र इदमाहृतम्' इति। अर्थप्राधान्यादर्थनिर्वचनवशेन शब्दविपरिणामोयं प्रदर्शितः।

यद्वा समाहृता भवन्ति। पूर्ववदेवोपसर्गव्यत्यय उपसर्गाध्याहारोत्रापि। धातुस्तु हरतिरत्र। यस्मादित्यर्थः। यस्माद्वा एते समाहृता भवन्ति छन्दोभ्यस्तस्मात्समाहरणक्रियायोगात्समाहर्तार एते समाहृताः सन्तः पूर्ववदेवोपसर्गव्यत्ययादिक्रमेण निघण्टव इत्युच्यन्ते। एतस्मिन्नपि निगमनसमाहननक्रिये निघण्टुषु विद्यमाने अप्यविवक्षिते कृत्वा समाहरणक्रियायोगहेतुको नामधेयप्रतिलम्भ उक्तः। एवमेव निघण्टुशब्दो गमेर्वेकोपसर्गोदन्तिहरतिभ्यां वा द्युपसर्गाभ्यां निरुक्तः।

---

1. a. b. m. add एवमौपमन्यव again before आचार्यो, d. मन्यव only instead. 6. a. b. d. m. add हि after विद्यमानमपि. 9. d. पवाहूतो for एवाघ्याहूतो. 10. b. वर्णव्यापत्त्या for वर्णव्यापत्त्या. 11. a. b. d. m. add तकारस्य टकारः after घकारः, d. इकारस्य स्थाने for हकारस्थाने, bi. as the text above. 13. m. om. इति before उच्यन्ते. 14. m. ब्राह्मइदमाहृतं; bi. ब्राह्मणे इदमाहृतम्; 19. m. reads गमन° for निगमन°; a. विद्यमानेप्यविवक्षिते?, b m. विद्यमाने अपविवक्षिते?, bi. विद्यमाने अर्थविवक्षिते. 21. a. d हरतिहरतिभ्यां वा द्युपसर्गाभ्यां, b. द्युपसर्गाभ्यां, m. द्युपसर्गाभ्यां, bi. न्युपसर्गाभ्यां.

---

7. उत्तरत्र etc., *vide* Nir. I. 12.

आह । किमयं पुनरतिमहान्यत्न एकस्मिन्नभिधानेनेकधात्वर्थनिर्वचनकृत इति। उच्यते । इह नावत्सर्वाण्याख्यातजानि नामानीति सिद्धान्तः । सत्याख्यातजत्वेभिधेयस्था या क्रिया लक्ष्यते तदभिधानसमर्थे परोक्षवृत्तौ वा तदभिधायिनि रूढिशब्दे वा धातुरुपलभ्यते स च पुनः स्वरवर्णक्रियासामान्येन । तत्रैव सति रूढिशब्दे यावन्तो धातवः स्वलिङ्गं रूढिगतं दर्शयन्ति तावतः संगृह्य स रूढिशब्दो निर्वोढव्यः । किं कारणम् । विशेषलक्षणव्यवस्थाभावात् । नहि तत्र विशेषलक्षणव्यवस्था काचिदस्ति यथैकोवतिष्ठेतान्ये व्यावर्तेरन् । अपि चोक्तं वार्तिककारेण

" यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् ।
अर्थेष्वाप्यभिधेयस्यस्तावद्भिर्गुणविग्रहः ॥ "

इति । रूढिशब्दगतानां च धातूनां रूढिशब्दवाच्येर्थे क्रियायोगे सत्येतत् । अभावे तु क्रियाया रूढिशब्दे वर्तमानमपि धातुलिङ्गमकिंचित्करम् । स एव क्रियाभावस्तदाश्रयनिर्वचनव्यावर्तको भवति । ता एतास्तिस्रः क्रिया निगमनसमाहननसमाहरणाख्या निघण्टुषु विद्यन्ते । तदभिधायिन्यपि च रूढिशब्दे निरुच्यमाने गमिर्हन्तिर्हरतिश्चाहंपूर्विकया संनिपत्य वदन्ति ममानुरूपं मयैतं निर्ब्रूहि मयैतं निर्ब्रूहीति । गमिस्तत्र गकारमात्मीयं व्याप्तं मन्यते घञन्तम् । तथा इन्तिर्हरतिर्हकारं व्याप्तं घञन्तं मन्येते । तस्माद्यमनेकधात्वर्थैर्निघण्टुशब्दो निरुक्त एवजातीयाभिधाननिर्वचनप्रदर्शनाय ॥

तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति । इहैतावदेवोक्तं समाम्नायो निघण्टव इति। समाम्नायशब्दपर्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता । न तु निघण्टुशब्दस्यार्थतत्त्वमवधारितं तदवधार्यत इति पर्युपयुक्तस्तच्छब्दः । किं पुनस्तदिति । **यान्येतानि चत्वारि पदजातानि** या एताश्चतस्रः पदजातयः । क । लोके वेदे च । कतमानि तानि ।

---

1. *m.* °भिधानेकधात्व°, *a. d* °निर्वचने कृत°. 3. *m. b* om. या before क्रिया; *a. b m.* °समर्थेपरो°, *b. d* °समर्थे परो°; *a* तावद° for या तद° of *d. m. b. b.*; *a. d. b.* om. या before धातु°, *m.* as text above, *b.* °शब्देन for °शब्दे या. 4. *d.* कल्पेदयते, *a b. m* कल्पेक्षते, *b.* उपकृत. 5 *b.* स्व स्वं लिंग, *a. m. b.* स्वलिंग, *d* स्व लिंग; *b.* वर्षयन्ति for दर्शयन्ति, *b.* तावन्तः; *b.* om स before रूढिशब्दो. 7. *a. d.* read as text, *b. m* यथैको व्यवतिष्ठ (ष्ठे m.)तान्ये, *b.* योपमेकोवतिष्ठेतान्ये 8 *a. d* यावतोमेव ?, *b* यावत्समेव ?, *b. m* as text. 10. *m.* रूढिशब्दवाक्येऽर्थे ?; *a.* तत्क्रियाया for तु क्रियाया. 12. *a d* om. ता before यता; *m. b.* read it. 14. *b. m.* om मयैत निर्ब्रूहि (1st); *b. m* गमिस्ताद्दत्र, *a. d. b.* as text. 18. *m.* इहैतावता तदेवोक्त ?

---

8. The quot. occurs in Bṛihaddevatā II. 102. But वार्तिककार means कुमारिलभट्ट probably.

नामाख्याते चोपसर्गनिपाताश्च । किं तेषामिति । इमानि चत्वारि पदजातानि सन्ति एतस्मिञ्शास्त्रे । किमिति । निघण्टुसंज्ञानि भवन्ति । नित्यमेवानुविधीयमानानि भवन्तीत्याह । न कदाचिदपि न भवन्ति नित्यं भवन्त्येवेत्यभिप्रायः । **चत्वारीति** चतुर्ग्रहणमवधारणार्थम् । नैकं पदजातं यथार्थः पदमैन्द्राणामिति । नापि द्वे यथा सुबन्तं तिङन्तं च । नापि त्रीणि निपातोपसर्गावेकतः कृत्वा । नापि पञ्च षड्वा यथा गतिकर्मप्रवचनीयभेदेनेति । **पदजातानीति** पदगणा इत्यर्थः । जातशब्दो हि गणे प्रसिद्धः । तद्यथा गोजातमश्वजातमिति । तद्वदिहापि । तत्र नामपदगणः स्त्रीपुंनपुंसकविभागेन । तथाख्यातपदगणः कर्तृवचनभाववचनकर्मवचनप्रविभागेन । तथोपसर्गगण आडादिः । तथा निपातगण इवादिः । एवमभिप्रेत्योक्तं **चत्वारि पदजातानीति** । अत्र नामाख्यातयोः पूर्वमभिधानं प्राधान्यात् । अप्राधान्यादुपसर्गनिपातानां पश्चात् । उभे अपि नामाख्याते निपातोपसर्गनिरपेक्षे अपि सती स्वमर्थं ब्रूतः । न तूपसर्गनिपातानां नामाख्यातनिरपेक्षाणामर्थोऽस्ति । वक्ष्यति हि 'न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः' इति । वाच्येन चैते अर्थेनार्थवती द्योत्येनोपसर्गनिपाता इति वा प्राधान्यम् । 'नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति' इति । तस्मादुपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वमभिधानमप्राधान्याच्च पश्चादुपसर्गनिपातानामिति । नामाख्याते इतीतरेतराकाङ्क्षित्वमुभयोर्नामाख्यातयोः समासेनाभिधानम् । कथमितरेतराकाङ्क्षित्वमिति । यज्ञदत्त इति हि नामशब्दस्तावदेव साकाङ्क्षो भवति यावत् पचतिपठतीत्याद्याख्यातशब्देन निराकाङ्क्षीक्रियत इति । तथा पचतीत्याख्यातशब्दस्तावदेव साकाङ्क्षो भवति यावन्न यज्ञदत्तशब्दः । पचति यज्ञदत्त ओदनमितीतरे-

---

1. *a. d.* as text, *b.. m. bi* add अपि after चत्वारि. 2. *m.* पतस्मिञ्शास्त्रे. 3. *m.* om. न after कदाचिदपि and adds चत्वारि पदजातानि before चत्वारीति. 5. *d.* निकृन्त च; *m.* तानि for नापि. 6. *m.* कर्मप्रवचनीयभेदेनेति? 7.–8 *b.* °नपुंसकलिङ्गविभागेन, *bi. m.* °नपुंसकलिङ्गप्रविभागेन, *a. d.* as text. 8. *m* कर्तृवचनकर्मवचनभाववचनप्रवि°; *m.* तथोपसर्गपदगण° आडादि निपातपदगणः. 11. *b.* समर्थं for स्वमर्थं. 12. *m.* °निपातानामाख्या°. 13. *a b.* इतिचा° for इति वा. 14. *m.* प्राधान्यनामाख्यातयो°. 16. *a. d.* इतरे° for इतीतरे° of *m. bi*; *d.* कथमितीतराकाङ्क्षित्वमिति. 18. *m.* इत्याख्यातशब्दैः. and adds च after तथा. 19. *m.* यो यत्र for यावन्न; *d.* om. पचति.

---

12. For the quot. *vide* Nir. I. 3.

14. For the quot. *vide* below Nir. I. 3.

16. I believe we should read here °काङ्क्षित्वाद्भयो° instead of °काङ्क्षित्वमुभयो°. But all Mss. read as text.

तराकाङ्क्षित्वमुभयोर्नामाख्यातयोः । समानकार्यत्वं चैतयोर्लक्ष्यते वाच्येनार्थेनार्थैक-त्वमित्यतः समस्येते नामाख्याते इति । नाम्नः पूर्वनिपातोल्पाच्तरत्वात् । नाम-पदवाच्यार्थाश्रयक्रियोपलक्ष्यत्वाच्चाख्यातस्य पश्चान्निपातः । उपसर्गनिपाता इत्युभयेषा-मुपसर्गनिपातानां नामाख्यातयोरर्थविशेषद्योतकत्वात् समानकार्यत्वमित्यतः समस्यन्ते । आख्यातसहयोगित्वादुपसर्गाणामाख्यातानन्तरं पाठः परिशेषाणां निपातानां पश्चादसंनि-धिताश्च निपाता इति ॥

तच्चैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति । तत्र । तस्मिँल्लोकवेदप्रसिद्धे पदच-तुष्टये निघण्टुशब्दसमानसंज्ञोपलक्षिते ये तावन्नामाख्याते तयोस्तावदेतल्लक्षणं प्रदिशन्ति । कुतमत् । यदेतल्लक्ष्यमाणमित्यभिप्रायः । **प्रदिशन्ति ।** प्रविभज्येदं नाम्नां लक्षणमिदमा-ख्यातस्येत्येवं दिशन्त्युपदिशन्ति आचार्या इति वाक्यशेषः । आह लक्षणोपदेशः कस्मात् । अनुक्रमणेनैव सिद्धत्वात् । अनुक्रमणेनैव हि वक्ष्यति 'इमानि पृथिवीनाम-धेयान्येकविंशतिः' 'हिरण्यनामान्युत्तराणि पञ्चदश' 'कान्तिकर्मण उत्तरे धातवोष्टादश' 'गतिकर्मण उत्तरे धातवो द्वाविंशशतम्' इति । तत एव विज्ञा-स्याम इमानि नामानीमान्याख्यातानीति । तस्मादयमनर्थको लक्षणोपदेशः । नान्-र्थकः । कस्मात् । व्यापि हि लक्षणं समाम्नातान्यसमाम्नातानि च व्याप्य वर्तते । यत्पुनरेतदुक्तमनुक्रमणादेव विज्ञास्याम इति । अत्र ब्रूमः । निर्देशोसौ न हि लक्षणम् । निर्देशश्च परिच्छिन्नविषयः । स तर्हि किमर्थ इति । शास्त्रे रूपसंभावोपप्रदर्शनार्थः । तस्मादसमाम्नातार्थोयमादितो लक्षणोपदेशो युक्त इत्युपपन्नम् ।

आह । तात्पर्येणैवेदमन्तरेण समाम्नातवदसमाम्नातानि कस्माल्लोपदिश्यन्ते । अपि च तथा सूपदिष्टानि भवन्तीति । उच्यते । तथाह्युपदेशगौरवं प्रसज्येत ग्रहणशक्तिह्रानं चापि । तथा चोक्तम्

---

1. *a d* वक्ष्यते for लक्ष्यते 3. *bc* नामपदवाच्यार्थाश्रय°; *m.* आख्यातार्थस्य for आख्यातस्य 4 *m.* समस्यते for समस्यन्ते. 11 *m* om. हि, before वक्ष्यति; *a d* लक्ष्यति for वक्ष्यति. 13 *bi* गतिकर्मण; *a b d. m. bi.* द्वाविंश शतम्, but cf. Nir III 9 14 *m* इमानि नामान्याख्यानीति 15. *a.* स्यात् for कस्मात्; *bi* अपापि for व्यापि, *bi* समाम्नातान्यसमाम्नातानि; *d.* व्याप्या for व्याप्य. 16 *b* तत्र for अत्र. 17 *m* हि for तर्हि 18. *m* लक्षणोपदेशोपयुक्त इति ?, *d* लक्षणोपदेशोऽयुक्त ? 19 *bi.* °समाम्नातानि. 20 *a. b d.* as text, *m. bi.* भवति for प्रसज्येत; *m.* °शक्तिहीन. 21. *bi* om. तथा after अपि which it connects as अपिचोक्तम् and not with the last sentence as in the text.

---

2. For this reason of the पूर्वनिपात *vide* Pân. II. 2 34

11.–13. For the quotations, *vide* Nir. II. 7, 10; and III. 9; also Nigh I, 1, 2, and II. 6, 14.

" ऋषयो ह्युपदेशस्य नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥ "

इति । तस्मादुपदेशगौरवभयाद्ग्रहणशक्तिहानदोषाच्च समानलक्षणोपदेशः क्रियत इति ।

आह । किं पुनर्लक्षणमिति । उच्यते । " **भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि** । नामपदवाच्यार्थाभ्यक्रियाव्यङ्ग्यो भावः पाकरागत्यागाद्यः । स यत्र प्रधानं गुणभूता क्रिया तदिदं भावप्रधानम् । किं पुनस्तदिति । आख्यातम् । आख्यायतेऽनेन गुणभावेन वर्तमानानेककारकप्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया तस्याश्च प्राधान्येन वर्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातम् ।

आह । कथं पुनर्गुणभूता क्रियेति । उच्यते । तदर्थत्वात् । तदर्था हि सा । भावार्था । भावसिद्ध्यर्थमात्मलाभमनुभूय कारकेषु तण्डुलादौ पाकाद्यं भावमभिनिष्पाद्यावसितप्रयोजनैकपद एव निरोभवति । यस्य च यदर्थं आत्मलाभस्तत्तद्गुणभूतं भवति । भावसिद्ध्यर्थश्च क्रियाया आत्मलाभस्तस्माद्गुणभूतेति गम्यते । भावसिद्ध्यैव चानुमीयते क्रिया परोक्षापि सती ।

आह । कथं पुनः परोक्षा क्रियेति । उच्यते । न हि सेन्द्रियाणामन्यतमेन स्वरूपस्था सती कदाचिदपि संनिकृष्यते । किं तर्हि । तदवसाने योभिनिष्पद्यते भावस्तेन लिङ्गयते । नूनमभिनिर्वृत्ता क्रिया यया भावोयमभिनिष्पादित इति । नाभिनिर्वृत्ता चेद्भविष्यदेव प्राक् क्रियानिर्वृत्तेर्नामवदयं भाव एवं साम्प्रतमपि नामविष्यत् । अस्ति चायम् । तस्मादभिनिर्वृत्ता क्रियेत्येवमनुमीयते । तदेतदाख्यातं क्रियावाचकमपि सद्भावार्थत्वात् क्रियाया भावप्रधानमुच्यत इत्येवमेके मन्यन्ते ॥

अपरे पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते । प्रकृत्यर्थविशेषणं हि प्रत्ययार्थादय इति । भावः कर्म क्रिया - धात्वर्थ इत्यनर्थान्तरम् । स यत्र प्रधानं गुण-

---

1. *m.* reads ऋषयोप्युप°; *bi* पृथक्तराः. 3. *m.* °शक्तिहीनदोषाच्च; *b.* सामान° for समान°. 5. *m. d.* °व्यङ्गो for °व्यङ्ग्यो; *m.* पाकयागाख्यः. 6 *m.* प्रधान for प्रधान. 7. *m.* स्फुरमाणप्रधान° (perhaps better). 8 *a. b d. m.* as text, *bi.* प्रवर्तमान°; *a d.* स्वात्मलाभ° प्रधान, *bi. m* स्वात्मलाभप्रधान, *b* स्वात्मप्रधानलाभः, *a. d. b. m.* as text; *bi* इत्याख्यातः 11. *bi. m.* °प्रयोजनैकदेश पत्र, *a d* as text; *a. d.* °लाभस्तद्गुणभूत, *bi.* as text. 14. *d.* आह पुनः कथ. 16. *a.* भूतं for नूनं; *bi.* यथा for यया of *a. b. d. m* 17. *bi.* सा for प्राक् of *a d. b m.* 18. *m.* सद्भाव for सद्भावार्थत्वात् 19. *bi.* भाव प्रधान for भावप्रधान of *a. b. d. m.* 20. *bi.* पक्षे for अपरे of *a. b. d* , *m.* पक्षे instead. 21 *m.* इत्यर्थान्तरं for इत्यनर्थान्तरं of *a. d. bi. b.*

---

1. Sayanâchârya in the introduction to his Bhâshya on सामसंहिता quotes this verse as of पूर्वाचार्याः. His reading is—ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्ततः । The second line as above.

भूतानि साधनानि तदिदं भावप्रधानम् । किपुनस्तत् । आख्यातम् । आख्यायन्ते स्त्रीपुंनपुंसकानि क्रियागुणभावेन वर्तमानान्यनेन क्रिया च तेषामुपरि प्राधान्येन वर्तमानेत्याख्यातम् ॥

आह । कथं पुनरत्र क्रियायाः प्राधान्यमिति । उच्यते । सा ह्यत्र शब्दवाच्या । अर्थगृहीतानि तत्साधनानीत्यतः प्राधान्यमत्र क्रियायाः । इतश्च प्राधान्यम् । कुतः । विशेषप्रत्ययाधानात् । पचतीति प्रथमपुरुषैकवचनपरस्मैपदान्त आख्यातशब्दो वर्तमानकालकर्तृविषयो यत्किंचिद्विवक्षितविशेषमेव पक्त्रादि साधनमात्मन आश्रयभावेनोपलक्षयन्नेककियाशक्तिमत्यपि पक्त्रादा साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति । नान्यासु क्रियासु नापि विशिष्टे पक्त्रादौ साधने । यश्च यस्मिन्नर्थे विशेषेण वर्तते शब्दः स एव तस्य प्रधानम् । विशेषेण च क्रियायामाख्यातशब्दो वर्तते गुणभावेन कारकेषु । तस्माद्विशेषप्रत्ययाधानाद्भावप्रधानमाख्यातमित्युपपन्नम् । अपि च क्रियाव्यापारविज्ञानपरतया पृष्टः 'किं करोति देवदत्तः' क्रियाख्यानपरतयैव प्रत्याचष्टे 'पचतीति' । न त्वोदनमिति पूर्वमुक्त्वा ततः पचतीति ब्रवीति ॥

अथ कथमुच्यते भावप्रधानमाख्यातमिति । शृणु । अमूर्ता हि क्रिया निरुपाख्या सा हि कारकैरभिव्यज्यमाना कारकशरीरे वसन्ती शक्यते निर्देष्टुम् । इतरथा ह्यशरीरा सती सा न गृह्येत । अग्रहणे च सति कथमिव निर्दिश्येत । तन्नैव सति कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्टमात्मीयं कार्यमारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद्ग्रहणासंभवान्निर्दिश्यते । न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वकृतिरिति साक्षाद्ग्रहणासंभवः । तस्मादोदनकर्मका क्रिया देवदत्तकर्तृकौदनशब्दोपपदैव निर्दिश्यते ओदन पचति देवदत्त इति । तत्राविवक्षितस्वार्थ ओदनशब्दः । अपि च क्रियाव्यापारपिपृच्छिषयैव पृष्टः किं करोतीति क्रियाव्यापारमात्रमेव प्रत्याचष्टे पच-

---

2 *d* प्राधान्ये for प्राधान्येन 6 *b* प्रथमपुरुषैकवचनान्ते आख्यात°, *a b. d. m* as text, *m* वर्तमानकर्तृविषय . 8. *m* शक्तिसत्यपि, and विशेषेण प्रत्यय for विशेषप्रत्यय. 10 *m* गुणाभावेन ?; *b* कारके for कारकेषु of all Mss. 12. *m.* क्रियाख्यापनपरतयैव 14 *a b d* निरूपाख्या 15. *b* च सन्ती for वसन्ती, *m* वसती ; *b*. *m* निर्दिष्टु for निर्देष्टु. 16. *m* गृह्यते for गृह्येत ; *b m.* add तथा before अग्रहणे 19. *a d* ओदनकर्मकाया, *b* °कर्मिका, *m* °कर्मिकाया, *b*. °कर्मकार्या. 21. *a d* क्रियाव्यापरपिपृच्छिषयैव पृष्ट किंकरोतीति । क्रियाख्या[ख्या *d*]परमात्रमेव प्रत्याचष्टे ।, *b* क्रियाव्यापारपिपृच्छिषयैव पृष्टः किं करोतीति । क्रियाया व्यापरमात्रमेव प्रत्याचष्टे ।

---

19 I read °कर्मका क्रिया though it is not so read anywhere. The Mss. as well as *b*. indicate that there is an original या after °कर्मका, which by itself does not complete the sentence. Hence I guess it must be क्रिया instead.

तीति। ततः किमिति पर्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति। तस्माच्छब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम्। यत् पुनरेतदुक्तमोदनमिति पूर्वमुक्तेति तत्र ब्रूमः। स हि पर्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्यनुयोगोनुक्तो द्रष्टव्यः। तस्मात् पचतीनि शब्दवाच्यत्वादत्र क्रियायाः शब्दान्तरवाच्यत्वाद्द्रव्यस्य क्रियैव प्रधानमिति। इतश्च न द्रव्यप्रधानमाख्यातम्। एकस्मिन् वाक्ये द्वयोराख्यातयोरसमवायात्। पचतिपठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति। न ह्येतरः शब्द इतरत्र गुणीभवति। द्रव्यशब्दे च समवायात्। समवैति द्रव्यशब्देनाख्यातशब्दः। पचति देवदत्त इत्युक्ते पचिक्रियागुणभूतो लक्ष्यते देवदत्तः। तस्मादुपपन्नं भावप्रधानमाख्यातमिति। अपिचोक्तम्

"क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते।
त्रीनत्र पुरुषान् वियात्कालस्तु विशिष्यते॥"

इति। तत् पुनरेतच्चतुःप्रभेदमाख्यातं भवति। कर्तरि भावे कर्मणि कर्मकर्तरि चेति। पचतीति कर्तरि। भूयते पच्यते इति भावकर्मणोः। पच्यते स्वयमेवेति कर्मकर्तरि। चतुर्ष्वप्यवयवार्थानि द्रव्याण्यप्रधानानीति क्रियैव प्रधानम्। तामभिदधत् तयैव लक्ष्यमाण आख्यातसंज्ञो भवतीत्युक्तम्॥

आख्यातजत्वान्नाम्नां प्रतिशाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तं पश्चान्नामलक्षणमुच्यते। किपुनस्तत्। **सत्त्वप्रधानानि नामानि**। लिङ्गसङ्ख्ययोरत्र सद्भाव इति सत्त्वम्। तया लक्षणोपपत्तेः। तेष्वपि प्रधानं गुणभूता क्रिया नामान्येव तानि। नमन्त्याख्यातशब्दे गुणभावेन नमयन्ति वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि। यथैव ह्याख्याते विद्यमानापि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रियाविवक्षिता द्रव्यपरत्वात्सत्त्वशब्दस्य। तद्विक्रियाजनितमुत्तरकालं क्रियोपभूतमभिधाय धात्वर्थोसौ व्यावर्तते॥

---

1. *m.* पर्यनुयुक्तो for पर्यनुयुक्ते, *bi.* पर्यनुयुक्ते; *a.* °णापाकं करोति, *b.* °ण पाकं करोति. 5. *b.* द्रव्यविषयपरिज्ञानार्थो, *m.* द्रव्यविशेषपरिज्ञानार्थं; *a. d.* add अपि after अनुक्तः; *d.* पचतीति वाच्यशब्दत्वात् 6. *m.* शब्दान्तरं वाच्यत्वात्तद्द्रव्यस्य, and इतरच्च मात्रमधान. 8. *d.* नहीतरशब्द इतरत्र 14. *a. d.* भूयते भावे पच्यत इति भावकर्मणोः. 15. *b.* चतुर्ष्वं चविवक्षितार्थानि, *m.* चतुष्वंप्यविवक्षितावयवार्थानि; *m.* द्रव्याण्यप्राधान्यानीति for द्रव्याण्यप्रधानानीति. 19. *a. b.* प्रधानगुणभूता for प्रधानं गुणभूता; *a. d.* नमयति, *a.* नामयन्ति also, *bi. m.* नमन्ति. 21. *d.* om. अपि before क्रिया; *m.* विद्यमानक्रिया. 22. *b. m.* तद्वि क्रिया° for तद्विक्रिया° of *a. d. bi.*; *m.* °जनितमुत्तरकालं; *b. m.* कृतार्थोसौ for धात्वर्थोसौ.

---

11. For quotation *vide* Rik-Prâtis'âkhya. II. 12. 8.

आह । कथं पुनर्नाम्नि क्रिया विद्यत इति विद्यमानापि चाविवक्षितेति । उच्यते । प्रकृतिः प्रत्ययो विभक्तिरिति त्रेधा विभज्यमानमेतावदेवैतन्नाम । तत्र प्रकृतिर्धातुरित्येकोर्थः । धातुश्च पुनः क्रियावचनः स च नाम्नि विद्यत इति तदभिधेयभूतया क्रियया भवितव्यम् । यथावदयं यत्रार्थस्तत्र तदभिधायकः शब्दो यत्र शब्दस्तत्र तद्वाच्योर्थ इति । संबद्धौ हि शब्दार्थौ वाच्यवाचकत्वेन नित्यमिति । एवं तावत् क्रिया विद्यते । यत् पुनरेतदुक्तं विद्यमानापि क्रिया कथमविवक्षितेति । अत्र ब्रूमः । नाम्नि यो धातुः स इत्यत्ययोगजनितेन प्रातिपदिकेनाभिभूतक्रियाभिधानशक्तिः प्रातिपदिकान्तर्लीनवृत्तिरेव समर्थमुद्भावयितुमशक्नुवन् प्रातिपदिकार्थमेवानुवर्तमानो द्रव्यप्रधान एव भवतीत्येवं न विवक्षिता क्रिया । सा तु विद्यमानापि विगृह्यमाणे नाम्नि प्रातिपदिकनिबन्धनादुन्मुच्यमाना द्रव्यगतमेवं प्रकाशयति न प्राग्विग्रहादिति द्रव्यपरता सत्त्वशब्दस्य गम्यते । तथा चोक्तम्

" शब्देनोच्चारितेनेह येन द्रव्यं प्रतीयते ।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः ॥ "

इति । पुनश्चोक्तम्—

" अर्थो यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः ।
तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः ॥ "

" निर्देशः कर्म करणं प्रदानमपकर्षणम् ।
स्वाम्यर्थोधाधिकरणं विभक्त्यर्थाः प्रकीर्तिताः ॥ "

इति । स्त्रीपुंनपुंसकभेदं निपातोपसर्गाणामपि वा क्वचिन्नामत्वमपेक्ष्य बहुवचनेनोक्तं नामेति ॥

---

1. *a b. d m* चाविवक्षितेति, *bi.* वा विवक्षितेति. 2. *d* क्रिया for त्रेधा 3. *d* °त्रेकार्थं. 4. *a. b. d. m* तथा for यथा of *bi*, which is preferred as it yields better sense; *m* तद्वाच्यार्थं for तद्वाच्योर्थं. 6 *d. m* om. अपि before क्रिया 7 *bi.* सहतु प्रयोजयति तेन The reading preferred is met with in all our Mss 9 *m.* अविवक्षिता for न विव°; *m.* °वचनान्मुच्य°. 12. *a. d.* प्रदीपते for प्रतीयते 14. *d.* om. इति. 16. *d.* प्राहुर्भेदे? 18 *b. m.* स्वाम्यर्थोधाधिकरण. *d.* स्वाम्यर्थोधिकरण. *bi* स्वाम्यर्थोध्यधिकरणं. We prefer the first as it alone suits the metre

---

12. *Vide* Bṛihaddevatâ I. 42.

15. *Vide* „ I. 43.

अपरे पुनः। भावप्रधानकारकसंख्याकालवाचि एतेषां आख्यातम्। तेषां भावप्रधानता भवति। अतो भावप्रधानमाख्यातमित्युक्तम्। नाम्नापि सत्त्वं द्रव्यं संख्या लिङ्गमित्येतेषां। तेषां द्रव्यं प्रधानमित्यतः सत्त्वप्रधानानि नामानीत्युक्तमेवमेके मन्यन्ते।

तत्सत्त्वप्रधानं भवतः। एवं तावदनयोर्नामाख्यातयोः परस्परविनाभूतयोः स्वस्वार्थाभिधेयकस्य भावप्राधान्यसत्त्वप्राधान्यस्य प्राधान्यम्। अथ पुनरेतौ कथं भवतः। क्व वा पुनरेतौ दृश्येते भवतः। आर्षे। तत्र यस्य प्रधानार्थैः यस्य गुणभूतो इति। शेषः। **भावप्रधानं भवतः** तस्य क्रियाभिधानत्वात्। यस्मिन् ह्याख्याते प्रधानं तदर्थत्वात् गुणभूतो नाम तदर्थस्य भावनिर्वर्तकत्वेन भूतत्वात्। एवं तावदाख्याते यस्मिन् प्रधानम्।

अथ पुनः कथमभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते। किं या तदाख्यातमिति। यतो लोकप्रसिद्धेरेवोदाहरति तत्प्रसिद्धत्वात्फलदर्शनैकत्वस्य। **पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्**। आपूर्वमनार गत्यर्थत्वात्पूर्वापरीभूतं पूर्वापरमिव पौर्वापर्येणाविच्छिन्नमेकमनेकासु क्रियास्वाश्रितमुपलक्षयति नपूर्वोत्तरादविहरणादिभोजनशयनागनोदकानायाम्बाधिनं तदभिनिर्वृत्तिरूपेणाभिनिर्वर्तमानं कर्मभिस्तु गुणभूतं किं करोतीत्यस्य आचष्टे व्रजतीति। अविगतकर्तृकं क्रियायमित्युदाहरणद्वयं भावद्योतप्रदर्शनार्थम्। **उपक्रमप्रभृतीति**। उपक्रम आरम्भमाद्यारभ्यापवर्गपर्यन्तं यावद्भव्या क्रियेत्यर्थः।

I. a. m. भावप्रधानं भवति तत्। 2. m. om. इति before कथम् 3 a. द्रव्यप्रधान for द्रव्यं प्रधानं. 4. a. परस्परविनाभूतयो, b. परस्परं विना, bb. m. परस्परविना. 5. a. d. यत्र ते कर्म for यत्रैते कर्म, b. यत्रैतं कर्म नामाख्याते. 6. All read प्रधानमर्थः which I change into प्रधानार्थं, as I think the former is ungrammatical. 13. m. 'दर्शिनद्वन' for 'दर्शिनद्वन'. 14. a. b. d. m. 'पाद' for 'पद' of bb. 15. m. 'निर्वर्तमानं for 'निर्वर्तमान; b d. करोतीति, c. appears to do the same, bb. m. करोति; m. 'कर्तृक for 'कर्तृक. 16. b. 'द्वयोपदर्श'.

3. a. m. read भावप्रधानं in I. 1. for भावप्रधानता, and a. reads द्रव्यप्रधानं here for द्रव्यं प्रधानं of all the other Mss. From similarity to द्रव्यप्रधानं here, I am tempted to suggest that भावः प्रधानं in I. 1. is a better reading than the one in the text above, which, however, is retained as it is supported by many Mss.

15. Is it possibly अविगतकर्तृकं प्रयोगं विगतकर्तृकं क्रियेति? All the Mss. and editions read as अविगतकर्तृकं क्रियेति, but it hardly makes sense as it stands. Hence the query.

आह। अन्यार्थनियो भावनिर्वृत्तिदर्शनादन्त्यैव निर्वर्त्यत इति। शृणु। पूर्वाभावे अन्यैव न स्यात्। पूर्वापेक्षं हि तस्या अन्यत्वम्। अपि च प्रामिकलो हि व्रजतिः। न चैकया क्रियया अभिमतदेशान्तरप्राप्तिरस्ति। तस्मादुपक्रमाद्याभिः क्रियाभिरपदीयदभिनिष्पाद्यमानो भावोऽन्त्यायामभिसंनिष्ठते। ततः सनिकर्षं गृह्यते न तस्यामन्त्यैव निर्वृत्त इत्यन्ते गृह्यतः। अपि च प्रसिद्धमनुपक्रमादारभ्य यत्र व्रजिं यच्च व्रज्यते व्रजिष्यमाण तत्सर्वमेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति। न प्रसिद्धिपक्षेऽयं न्याय्या। यथार्थस्थितानां हि शब्दानामन्वाख्यानमात्रमेव शास्त्रेण क्रियते नोत्पाद्यन्ते शब्दा नाप्यर्थेषु विधीयन्ते। तस्मात्प्रसिद्धः शास्त्रसमयोपि लौकिकप्रसिद्धयैव पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्। तस्मादुपक्रमनेकक्रियाभिर्निर्वर्त्यमानो भाव आख्यातेनोच्यत इति। आह च

" क्रियासु बह्वीष्वभिसंधिनो यः पूर्वापरीभूत इवैक एव।
क्रियाभिनिर्वृत्तिवचेन सिद्ध आख्यातशब्देन तमर्थमाहुः॥

इति॥

मूर्तं सत्त्वभूतं सत्त्वनामभिः। कदाचित्तु तमेव भावं तयोपक्रमप्रभृत्यभिनिर्वर्तमानमपवर्गपर्यन्तं मूर्तं सत्त्वभूतं सत्त्वगुणं लिङ्गसंख्यायुक्तैः सत्त्वनामभिराचष्टे। कथम्। व्रज्या पक्तिरिति। तत्रोक्तो विशेषः। कृदभिहितो भावो द्रव्यवद्भवति। सोयं प्रयुक्तस्य लक्षणस्य प्रयोगमपेक्ष्य क्वचिदपवादः। आह च

" क्रियाभिनिर्वृत्तिवचोजातः कृदन्तशब्दाभिहितो यदा स्यात्।
संख्याविभक्तिव्यवलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्यः॥ "

इति॥

---

2. *bi* अन्त्यात्व, we read अन्त्यत्व with *a. b d m*, the reading of *bi.* is however, perhaps better, *a. d.* व्रजि for व्रजतिः, *m.* व्रजनि. 3. *bi.* °देशान्तरो प्राप्ति°, we read with *a. b. d*, *m.* has देशान्तरप्राप्ति°; *b.* om one इयत्, all others have it. 4. *a. b. d. m* न त्वसावन्त्यैवाभिनिर्वर्त्यत इत्यन्ते, &c., *bi.* न त्वसावन्त्यैव निर्वृत्त इत्यन्ते, &c 5. *a. b d* गृह्यते for गृह्यतः; *a. d. m.* यत्र व्रजिः यत्र व्रज्यते यत्र व्रजिष्यमाण, *b* reads यत्र व्रजिन. यत्र व्रज्यते यत्र व्रजिष्यमाण.. 7. *m* अन्वाख्यातमात्र° 8. *m.* शब्दः for शब्दा°; *a. b. m.* प्रसिद्धः शास्त्रसमयोपि, *b.* प्रसिद्धशास्त्र°. 14. *a. b d m* om. तु before तयोप; *m.* तयोप for तयोप. 15. *b.* °यामिनिर्वर्त्यमान; *m* adds सन्त after मूर्तं 16. *a.* तयोक्तो for तयोक्तो. 17. *b.* प्रयोगमुपेक्ष्य for °मपेक्ष्य. 19. *a.* °क्षोपलक्ष्य इति, *b.* °क्षोपलक्ष्य इति, *d.* द्रव्यमिवोपलक्ष्य इति.

---

11. For quot. *vide* Bṛihaddevatā I. 44. It reads इहैक पद for इहैक पद here.

18. For quot. *vide* Bṛihaddevatā I. 45. It reads °विभक्तयव्यय° for °भक्त्यव्यय°.

आह। कस्मादुभयेऽपि सावन्तिकेन कृदन्तेन सान्त्ययोच्यत इति। उच्यते। शब्दस्वाभाव्यादेते सान्तवत् प्रयोक्तव्यमिति। अपि चौक्तलक्षणानिमित्तवन्त्यनानैव शब्दानामभिधानाभिधेयसंबन्धेनाभिसंबद्धानामेव नित्यसंबन्धाख्यानमात्रमेव क्रियते। नोदाहरणेषु वा विशेषणे शब्दा इति। अत्र्या पङ्क्तिरित्युदाहरणद्वयमनुक्रमयोजनम्।

अद इति सत्त्वानामुपदेशः इति। सावधिकृतः। स च पुनः सत्त्वभूतो नेतरः। यदन्तसंबन्धेनैव नाम्नो यदवगम्यते तदुच्यते। किं पुनस्तत्। सामान्यविशेषवाचित्वम्। तत्राद इति सत्त्वानामुपदेशः। सामान्यत इति वाक्यशेषः। सर्वेषामपि सत्त्वानामन्यतमे प्राप्ते त्रिलिङ्गविशिष्टत्वादिदमेवैकमुदाहृतमुपप्रदर्शनार्थम्॥

आह। विशेषोपदेशः कथमिति। उच्यते। गौरश्वः पुरुषो हस्तीति। सत्त्वानां विशेषोपदेश इति वाक्यशेषः। सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम्। सामान्यकृत्या विशेषकृत्या चोभयथा शब्दः प्रवर्तत इत्युभयमुपदर्शितम्।

भवतीति भावस्य सामान्येनोपदेशः। अत्र हि सर्वेषां सत्तावाचिनामन्यतमे प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः। विद्यमानतामेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्यानभिधेयक्रियाभिर्निसंबध्यन्ते। तस्माद्भवतीति सर्वक्रियाप्रसवबीजभूतमस्तित्वमात्रमेव निदर्शनेन भवतिशब्देनोच्यत इत्युपपन्नं भवति सामान्यवाचित्वम्। विशेषनिर्देशः कथमिति। उच्यते। आस्ते शेते व्रजति तिष्ठतीति। सकर्मकाकर्मकोपदर्शनार्थमुभयवानुदाहरणम्।

---

1. *a.* om. सान्त्ययोच्यत इति। उच्यते शब्दस्वाभाव्यादेते (through mistake); *b.* adds च again after अन्यथा; *m.* om. उच्यते after इति, and reads कर्तव्य for कर्ते. 5. *m.* इति सावधिकृत by joining the *Pratika*. 6. *d.* यदविशिष्यते; *m.* om. तत् after पुन:. 8. *b. m* लिङ्गविशिष्टत्वात्. 9. *b.* adds सत्त्वसूत्रम् after उच्यते; *m.* om. कथमिति उच्यते; *b.* गौरश्वपुरुषौ 10. *b.* सोपाधिप्रदर्शनार्थ. 12. *b.* सामान्योपदेश:. 13. *a.* उदाहरणार्थस्य for °र्थः; *d.* °मन्यतमप्राप्तौ भवतिरेवैक, *m.* भवतिरेकैक; *a. b. d. m.* विद्यमानतां for मानत्वं of *b.*; *d.* °नुभवन: for °नुभवन्त:. 14. *m.* °संबध्यन्ते, *b.* सबन्धन्ते, *a. b. d.* संबध्यन्ते. 15. *m.* अस्तित्व° for अस्ति°.

---

4. For the प्रयोजन *vide* page 41, L. 15.

10. The sense of the line is not clear. Perhaps the reading of *b.* is better. But the reading of the majority of Mss. is retained.

इन्द्रियनित्यं वचनमौदुम्बरायणः । आह । इह तावदुक्तं पदचतुष्टयं भाववचनता द्रव्यवचनता गुणभावः प्रधानभावः पूर्वापरीभावः सामान्यवाचित्वं विशेषवाचित्वमिति नोपपद्यते । कस्मात् । वचनानित्यत्वात् । कः पुनरेवमाहानित्यं वचनमिति । उच्यते । **इन्द्रियनित्यं वचनमौदुम्बरायणः** । इन्द्र आत्मा सर्वेण ईयते लिङ्गयतेनुमीयते वास्यसावात्मा कर्ता यस्येदं करणं नाकर्तृकं करणमस्तीति तदिन्द्रियम् । तस्मिन्नित्यमिन्द्रियनित्यम् । किं पुनस्तत् । वचनम् । उच्यतेनेनेति वचनं वाक्यमित्यर्थः । कतमत् । यदेतन्नामाख्यातोपसर्गनिपातात्मकम् । **औदुम्बरायणः** । आचार्यो मन्यत इति वाक्यशेषः । उदुम्बरस्यापत्यमौदुम्बरिस्तस्यापत्यमौदुम्बरायणः ॥१॥

तत्र चतुष्टं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च । व्यापिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तेषां मनुष्यवद्देवताभिधानं पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मन्त्रो वेदे ॥

षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेस्ति विपरिणमते वर्धतेपक्षीयते विनश्यतीति । जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्धते विजयेनेति वा वर्धते शरीरेणेति वापक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥ २ ॥

[2] पढ । ततः किमिति । उच्यते । **तत्र चतुष्टं नोपपद्यते** । तत्र तस्मिन्वाक्य however, नित्ये सति यदेतत्पदचतुष्टयमुक्तमेतन्नोपपद्यते । कस्मात् । शृणु । यावदेव वक्तुमाप्ति[2], [on] श्रोतुश्च श्रोत्रेन्द्रिये वचन तावदेव तदस्तीति शक्यते वक्तुं प्रच्युतं च नास्ति। others have

न त्वसावित्यथैव निरु. *a d* °वदुत्तर । पद° for °वदुक्त पद°; *b m* इद for इह and वजित: यत्र वजयते यत्र ॰ after °दुक्त showing that the sentence ends there. 7. *m* अन्वाख्यातमात्र°. 3 *m* इत्युपपद्यते for इति नोप°. 5 *bi* चास्य° for *bi* प्रसिद्धशास्त्र° 14. *a c m* तस्मिन्निति इद्रि° for °स्मिन्नित्यमिन्द्रि°. 7. *m*. 15. *b*. °त्यभिनिर्वर्त्यमान; *m* °कृतोपयोगश्च 12. *A. Bi* complete Khanda 17. *b*. प्रयोगमुपेक्ष्य for °मपेक्ष्य. conclude Khanda 3 after प्रतिषेधति 20. *m* द्रव्यमितोपलक्ष्य इति. om. श्रोतुश्च श्रोत्रेन्द्रिये found in all our Mss.

11. For quot. *vide* Bṛihadd. for पदचतुष्टयं । See below L 21.

18. For quot. *vide* Bṛihad. p. 258 (Bomb. Sansk. series.) °मन्विख्य° here.

जाते च वाक्यमपि सनसनुभूतं तदिन्द्रिये नामनिष्ठते पदसमभूतानि पदान्यवस्थितानि परिसंख्यातुम्। न च विनष्टाविनष्टयोः पदयोः सहचरिसंख्यानमस्ति। तस्माद्वचना-नित्यत्वात्पदचतुष्टयानुपपत्तिरित्युपपन्नम्।

किंचान्यत्। अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः। वाशब्दः समुच्चयार्थो "वा विकल्पोपमानद्वन्द्वसमुच्चयार्थेषु" इति हि नियमविदः पठन्ति। ऽ यस्मिन् चाक्याते 'वेति विचारणार्थे' इत्युक्त्वा 'अथापि समुच्चयार्थे भवति' इति। एवं चैतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानां योगपद्येतरेतरोपदेशो इतरेतरगुणप्रधानभावो नास्ति आख्याते प्रति गुणभावेनोपदेशो आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशोयं च नोपपद्यत इत्युच्यते। किं कारणम्। न हि विनष्टं नाम गुणभावनिमित्तमाख्याते नापि नष्टमाख्यातं प्रधानभावनिमित्तमस्ति। न हि विनष्टाविनष्टयो-10 रितरेतरगुणप्रधानभावोस्ति।

किं चान्यत्। शास्त्रिकृतो योगश्च। यस्मात्तं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः। तद्यथा। उपसर्गस्य धातुना धातोः प्रत्ययेन प्रत्ययस्य लोपागम-वर्णविकारैः। अयं च वचनानित्यत्वान्नोपपद्यते। किं कारणम्। अयुगपदुक्तौ हि सत्यां धातुरुच्चारितो विनष्टः स क्रियानुसर्गेण योक्ष्यते प्रत्ययेन वा। न हि विनष्टाविनष्टयो-15

---

1. *bd.* °द्रियेनामनिष्ठते, and adds वाक्य again after कार्ये. 2. *m.* om. पदयोः, and adds इति after अस्ति. 4. *a.* पुनश्च° for अयुगपच्च°; *b.* किं चान्यत् for किं चाक्यत्. 5. *a. b.* °ख्यातं for °ख्यातो of *d. m. bc.*; *b.* समुच्चयार्थेभ्यो इ for °र्थेभ्यः इति. 6. *b. m.* add वाक्यो before भवति; *m.* अपिच for अथापि. 9. *a.* om. आख्यातस्य च नाम प्रति प्रधानभावनोपदेशः (perhaps error of copy). 10. *d. m.* विनष्ट for नष्ट. 12. *bd.* किं चान्यत् for किं वा° of *a. b. d. m.*; *m.* शास्त्रदृष्टस्य, and adds शब्दस्य after योगः. 14. *bc* om. च after क्रम, all the Mss. have it. 15. *bc.* न चान्यच्च° for न क्रियच्च° of *a. b. d. m.*

---

1. All read तद् after अभूत. Should we read च instead?

5. It is not clear who are referred to by निरुक्तविदः. Whence this text is quoted is not certain. Similar to it are the following quotations from the Sanskrit glossaries:—

वा सादिकल्पोपमयोर्द्वे पदमूले। समुच्चये च (Quoted from मेदिनी in the रमाकुमोदिका of अमरकोष, but not found in Jîvânanda's edition of मेदिनी).

वा सादिकल्पोपमदोषेषार्थे च समुच्चये। इति विश्वः (Râmâśrama's Tîkâ on अमरकोष).

6. For the senses of वा *cf.* Nir. I. 4.

योगोऽस्ति । तस्माच्च एव नामाख्यातयोरितरेतरगुणप्रधानभाव उपसर्गनिपातानां नामाख्याताभ्यां योगो यच्च पदचतुष्टमुक्तं सर्वमेतदसम्यगिति ।

युगपदुत्पन्नानामयुगपदुत्पन्नानामित्येवमारभ्यमाणयोर्वाक्ययोरनयोरन्यो व्याख्यानार्थो भवति । नोपपद्यते । युगपदुत्पन्नानामयुगपदुत्पन्नानामित्युभावपि व्याहारौ प्राप्नुतः । समानसंहित्वात् । इन्द्रियनित्यत्वात्पदचतुष्टानुपपत्तिरित्युच्यार्थं मनाथशब्दारेणैतदुक्तार्थमेते ।

युगपदुत्पन्नानामिति । अथ मन्त्रः ।

"अविचालिन एवेते कूटस्था अविनाशिनः ।
शब्दास्ते तु कल्पान्ते....." ॥

तस्माद्व्याप्तिरूपाद्विशीर्णेष्वभिधेयेष्वभिधानेषु कारणभावमापद्यमानेष्वाश्रयाभावादेवावस्थातुमशक्नुवन्तोऽभिधेयाभिधानसहिता एव कारणात्मभावमधिकमनुभूयाभिसंभवन्ति कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्यकारणसर्वभूतसाधारणात्मभूते हिरण्यगर्भे विवर्तमाने तद्बुद्धिमाश्रयं प्राप्य तेनैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति । अत्र ब्रूमः । एवमप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टं प्राप्नोत्येव सहावस्थितानां तथापीतरेतरोपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति । नहि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति । किं चान्यत् । कूटस्थेषु चाविचालिषु

---

1 *b*, पद for पद of *a b d m*., *m* इतरेतरं गुणप्रधानभावोपपद्यं°. 2. *b*. °योगे for °योगो, and चतुष्टय° for चतुष्ट° of all our Mss 3. *a*. *d* om °मयुगपदुत्पन्नानां° (perhaps an error); *b* om. °नयो° of *a*. *b*. *d*. *m*. 4. *b* इत्युभावपि पाठौ व्यापारौ प्राप्नुत., *m* agrees with *b*. but reads व्यापार for व्यापारौ. 5. *a*. *d*. मनाथशब्दारेणैतदुक्तार्थमेते, *m* °न्युच्चार्यमाणयका° and °दवचार्यते We prefer the reading of *b*. and *b*, correcting the latter where it is badly printed. 7 *d* °नाशनः for °नाशिन°. 9. *b*. तस्याव्याप्ति° for तस्माद्व्याप्ति°. 10. *b*, अयक्रुवन्. आमे°, *a b d*. *m*. °क्रुवनोऽभि; *b*, °संस्व° for °संभव° of *a b*. *d*. *m*. 11 *m*. °यन्नक्ष्य° for °वन्यक्ष्य°; *b* °करण° for °कारण°, I almost believe there ought to be °निर्मित° for °निर्जित°. 13. *a* °चतुष्ट, all others °चतुष्टय here; *m*. प्राप्नोत्येव for °त्येव. 15 *m*. इतरेतरमेवानभावोऽस्ति; 6 किं चान्यत्.

---

7. We print this quotation as we find it in our Mss. It is doubtful whether it is accurate and correct especially in the latter incomplete half. We cannot trace it to its source. However it may be observed that the attributes कूटस्थ and अविचालिन् are often applied to शब्द in the Mahâbhâshya (See p. 7 and p. 126 of the Bombay Sanskrit series edition of it.)

14. च after इतरेतरगुणप्रधानभाव: seems to be superfluous.

नित्येषु शब्देषु य एष शास्त्रकृतो योगः स एष नोपपद्यते। किं कारणम्। अयुक्तो हि युज्यते। नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च। प्रत्ययाश्च लोपागमवर्णविकारैरिति। तस्मान्नित्यपक्षेपि वचनस्य यदेतदुपवर्णितं गुणप्रधानभावादि पदचतुष्टयमधिकृत्य सर्वमेतदसम्यगिति॥

व्याप्तिमत्त्वात्तु शब्दस्य। उच्यते। सर्वमेतदुपपद्यते। कस्मात्। व्याप्तिमत्त्वाच्छब्दस्य। तुशब्दः पक्षव्यावृत्तौ। व्यापनं व्याप्तिः सा यस्मिन्नस्ति सोयं व्याप्तिमाञ्शब्दः। तद्भावो व्याप्तिमत्त्वम्। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य। सर्वमेतदुपपद्यत इति वाक्यशेषः। आह। कथं पुनर्व्याप्तिमाञ्शब्द इति। शृणु। शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयान्तर्गताकाशप्रतिष्ठिता। तयोरभिधानरूपाभिधेयरूपयोर्बुद्ध्योर्मध्येभिधानरूपया शास्त्राभिमतप्रयोजनविज्ञापयिषया पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन प्रयत्नेनोदीर्यमाणः शब्द उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानतया पुरुषार्थाभिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन बहिर्विनिक्षिप्तोविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्याप्यस्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमाञ्शब्दः। आह। ततः किं यदि व्याप्तिमाञ्शब्दः। उच्यते। यदि नित्यो यद्यनित्यः पदचतुष्टयादि सर्वमुपपद्यत एव। किं कारणम्। न ह्यसंव्याप्य

---

1. *a. d.* °योग एष नोपपद्यते; *b* अयुक्तौ for °क्तो. 2. *a. d m* नित्ययुक्ताभ्य धातव &c., *b* also does so but adds हि after च. 3. *bi.* तदे° for यदे° of *a. b. d. m.*; *a. d.* °वर्णितं गुणप्रधानभावविषयं चतुष्टयमधिकृत्य. 6. *b. d. m.* तुशब्दः पक्षव्यावृत्तौ after शब्दस्य, *a.* तुशब्दः पक्षव्यावृत्तौ, *bi.* om. it. 8. *m.* om. पुनः after कथं. 9. *a. b. d. m.* °तिष्ठिता तयो° for °निष्ठितयो° of *bi*; *a. d.* तयोरभिधानाभिधेयरूपयो°. 10. *bi.* adds बुद्धया not found in *a. b. d m.* before पुरुषेण, *b.* °सामर्थेन for °समर्थेन. 11. *a. b* °दीर्यमाणादिषु सत्पुर.°, *d.* °दीर्यमाणासत्पुरः°; *b.* °कण्ठादिषु वर्णस्थानेषु, *a. d.* निष्पद्यमानस्तया, *b.* निष्पद्यमानतया, *m.* निष्पद्यमानस्तया. The last two make some sense. *bi* has निष्पद्यमानस्तया. We prefer the reading of *b.* as it makes the best sense. 12. *m.* पुरुषयत्नेन; *b.* विनाशिव्यक्तिभाव° for अविनाशिनि व्यक्ति°. 13. *a. d. m* प्रत्याप्यस्य, *b.* प्रत्याद्यस्य, *bi* प्रत्याप्यास्य, *m.* सर्वार्थरूपा सर्वाभिधानरूपा. 14. *m.* पद्व्याप्तिमान् for यदि व्याप्तिमान्. 15. *a. b. d. m.* यद्यनित्यः for यदा नित्य of *bi*.

---

15. We adopt the reading of all our Mss. in preference to that of *bi*. as it appears that here an answer is made to the objections based on both the suppositions of अनित्यत्व and नित्यत्व of शब्द. The answer to the former is first given and to the latter the reply is given below, see next page, L. 15 et seq.

पुरुषस्य बुद्ध्यवस्थमर्थप्रत्ययमाद्धीत । न चानवस्थितो व्याप्नुयात् । ततश्च भिन्नः शब्दः स्वमर्थमभिदधत् स्वक्रियाप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानमभिसंधाय तिरोभवितुमुपक्रमते विनाशं चोपैति । तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एव । तस्मात्सम्यगेवोक्तम् । यत्पुनरेतदुक्तं न हि विनष्टाविनष्टयोः परिसंख्यानमस्तीति । अत्र ब्रूमः । पुरुषप्रयत्नोपजनिताद्धुक्वोद्धातात्परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते न तु शब्दाद्धनयः । तास्तु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति । तासु साक्षात्पदपरिसंख्यानं वर्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणयोपचर्यते । तस्माद्व्याप्तिमत्त्वाच्छब्दस्य पदत्वनुट्त्वादि सर्वमुपपद्यत एव । व्याप्तिमत्त्वादित्येनेनैवेतरेतरोपदेशः प्रत्युक्तः । शास्त्रकृतो योगश्च । नामाख्यातपदरूपे बुद्धितत्त्वे सत्त्वक्रियाविषये गुणप्रधानभावेनावलिप्येते । तयोर्गुणप्रधानभावे सति तच्छब्दे लक्षणयोपचर्यते । तथा च धातुरूप बुद्धिस्तदर्थया संयुज्यते । बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते । तस्यां संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते । तदभिधायकत्वाच्छब्दस्य । तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः शास्त्रकृतश्च योगो नोपपद्यत इत्येतदयुक्तमिति । नित्यत्वपक्षेपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तमनैकान्तिकोसौ दृष्टान्तः । दृष्टो हि युगपदुत्पन्नयोरेककाले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः । तत्र यदुक्तं युगपदुत्पन्नानामितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं व्याप्तिमत्त्वाच्छब्दस्य सर्वमुपपद्यत इति तदेव सम्यगिति ।

---

1 *b. m.* add बुद्धि after पुरुषस्य, *d.* अर्थं प्रत्यय° for अर्थप्रत्यय°. 2 *a. d. m* शब्दस्तं तमर्थमभि° for शब्दः स्वमर्थमभि°; *a. d.* °पजनितेननेनाभिधा°. 3. *b.* विनाशं चोपैति, *bi.* विनाश चोपैति. *a. d. m.* चोपैति. 7. *a. d.* तास्तु मुख्योभिधानशक्तया बुद्धिद्वारेणावस्थिताः स्वानभिधेयान् प्रका°. 9. *a d. m.* °दित्येतेनैवे° for °दित्यनेनैवे°. 10. *a. d.* शास्त्रकृतश्च यो योग ; *b.* नामाख्याते पदरूपे and सर्व° for सत्त्व°, *bi.* °रूपबुद्धित्वे and °नाविष्टेन, *a d. m.* as text. 11 *b.* तच्छिष्टे for तच्छब्दे; *a.* तच्छब्दलक्षणया व्यक्तिषूपचर्यते, *d.* तच्छब्दे लक्षणया व्यक्तिषूपचर्यते. 12. *b.* तदर्थनया for तदर्थया, *m.* adds संस्क्रियमाणाया after तदर्थया, *m.* °रेव for बुद्धिरेव, *b* om. हि after बुद्धिरेव; *b.* परिणममाना for विपरिणम°. 13 संस्क्रियतेति for संस्क्रियते; *a. d.* शास्त्रेण for शास्त्रेण; *m.* शब्दसंस्कारो° for शब्दे संस्कारोप°. 14. *bi.* शास्त्रकृतस्य for °कृतश्च. 15. *b.* °पदेप्रपि for °पक्षेप्रपि. 16. *a. d.* om. अयो; *a. d.* एककालराजपुत्रा°. 18 *a. b* संगमयति, *d.* °मुपपद्यतदेवसम्यग्गमयति.

---

2. I believe it must be स्वक्रियाप्रदेशोपजनितेन here, though none of our Mss. read it in this way. *cf.* LL. 3–4 below. Otherwise no sense is possible.

अपरो व्याख्यामार्गः। इन्द्रियनित्यत्वात्पदचतुष्ट्वानुपपत्तिस्तदाश्रयस्य च सर्वस्येत्येवमादिसे परिहारद्वारेणेदमवतार्यते। **युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेश** इति। अत्र समस्त एव वाशब्दः। कथम्। अयुगपदुत्पन्नानां वा युगपदुत्पन्नानां वा नित्यानां वा अनित्यानां वेत्यर्थः। **इतरेतरोपदेशः**। इतरस्येत्याख्यातस्य क्रियावचने शब्देभिधानत्वेनोपदेशः इतरस्य च नामशब्दस्य सत्त्ववचने शब्देभिधानत्वेनोपदेशः। **शास्त्रकृतो योगश्च**। लक्षणशास्त्रेण चैतं क्रियासत्त्वे आख्यातनामशब्दाभ्यां युज्येते। तस्मादुपपद्यते पदचतुष्ट्वमिति। आह आगमनमात्रमेतत्। हेतुरुच्यतां कथं विनष्टाविनष्टयोः सहपरिसंख्यानमवस्थितयोर्वा गुणप्रधानभाव इति। उच्यते **व्यापिमत्त्वात्तु शब्दस्य**। हेत्वर्थः समान एव पूर्वेण।

आह। यदि व्यापिमत्त्वाच्छब्दस्य व्यवहारार्थं पदचतुष्ट्वमुपादीयते एवमपि नोपादेयम्। किं कारणम्। अभिनया अपि व्यापिमन्तः पाणिविहाराक्षिनिकोचादयः। तैरेव कार्यसिद्धिरुच्यति। अपि चैवं पदचतुष्ट्यदोषेणैनं संभक्ष्यामहे न चायमतिमहान् वेदसमुदः पठितव्यो भविष्यति क्लेशेनेति। उच्यते। स्यादेतदेवं यद्ययमपरो विशेषहेतुर्न स्यात्। कतमः।

23947

अणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके। सत्यम्। अभिनया अपि व्यापिमन्तः। न त्वणीयांसः। ते महता यत्नेन व्याप्नुवन्ति न च निःसंदिग्धं ब्रुवन्ति। तत्प्रतीतशब्दार्थसंबन्धस्यैव नेतरस्य। शब्दस्त्वपरिमितमर्थमल्पीयसा यत्नेनोच्चारितो व्याप्नोति। तस्मादणीयस्त्वादिति विशेषहेतूपपत्त्या शब्देनैव संज्ञाकरणं व्यव-

---

1. *a. d.* om. च after तदाश्रयस्य. 2. *bi.* परिहारपक्षेण. 3. *m.* युगपदुत्पन्नानाम्. युगपदुत्पन्नानां वा. 4. *a. m.* om. वा अनित्यानां; *a. d.* om. इतरेतरोपदेशः; *a. d.* om. इति after इतरस्य; *a. b. d. m.* आख्यातशब्दस्य for आख्यातस्य. 5. *m.* adds. च सत्त्ववचनस्य after नामशब्दस्य. 10. *bi.* व्यापिमत्त्वाच्छब्दस्य. 11. *b. m.* °सकोचादयः for °निकोचादयः. 12. *d* न वायमति° for न चायमति°. 13. *a. b. d. m.* अतिक्लेशेन for क्लेशेन; *m.* इति before अतिक्लेशेन, *a. b.* om. इति after अतिक्लेशेन. 17. *m.* तत्प्रतीतार्थसंबन्ध° (perhaps better); *m.* om. अर्थ after अपरिमित.

---

7. Is it आगममात्रमेतत्?

12. पदचतुष्ट्वदोषैः would have been better.

हारार्थं लोक इत्युपपन्नम्। यत्पुनरेतदुक्तमध्ययनदोषैर्न संमक्ष्यामहे न चायमतिमहान्वेदसमुद्रोध्येतव्यो भविष्यतीति। अत्र ब्रूमः। अभ्युदयो ह्यत्र वेदानुरूप एव भवति। अभ्युदयार्थं नः शास्त्रारम्भे यत्नः।

तेषां मनुष्यवद्देवताभिधानम्। आह। एवं तावन्मनुष्याणां मनुष्येषु शब्देन चतुर्धा विभक्तेनावबोधकरणम्। अथ मनुष्याणां-देवेषु हविःसंप्रदानादीःप्रार्थनादिव्यवहारः केनेति। उच्यते। तेषामेव शब्दानामियमेव व्यवस्था देवेष्वपि देवानपि प्रति। कतमा। मनुष्यवद्देवताभिधानमिति। मनुष्यैस्तुल्यं मनुष्यवत्। देवताभिधानमभिहितिरभिधानम्। यथैव हि मनुष्याः प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिदधत्येवमेव देवा अपि। देवेष्वपि शब्दस्याभिधानशक्तिरपरिहीनेत्यभिप्रायः। तेपि हि मनुष्यवद्देवा अङ्गादियुक्ताः। 'पौरुषविधिकैरङ्गैः कर्मभिश्च संस्तूयन्ते' इति हि वक्ष्यति। तस्मादुपपद्यते मनुष्यवद्देवताभिधानमिति।

आह। यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवानप्यभिधातुमथ किमर्थं वेदे मन्त्रः समाम्नात इति। उच्यते। **पुरुषविद्यानित्यत्वात् कर्मसंपत्तिर्मन्त्रो वेदे।** पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात्पुरुषविद्यानित्यत्वाद्धेतोः कर्मसंपत्तिः फलेन संपादनमविगुणकर्मसंपत्तिः फलसंपन्नमेव कर्म भविष्यतीत्येवमर्थं वेदे मन्त्रः समाम्नात इति वाक्यशेषः। इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभि-

---

1. *a.* *d.* *m* अध्ययनकृतैर्दोषै, *m* मस्यामहे for °समक्ष्या°. 3. *m.* न for नः (bad), *a.* *b.* *d* *m.* read after यत्नः as follows –तत्र यदुक्तमध्ययनकृतैर्दोषैर्न समक्ष्यामहे न चायमतिमहान्वेदसमुद्रोऽध्येतव्यो भविष्यतीत्येतदुक्तमिति *b.* for the last words *b.* °त्येतदयुक्तमिति *l*, and *m.* त्येतदुक्तमिति।† This sort of repetition is found in such writings, but is almost superfluous, therefore the reading is overlooked. 5. *bl.* मक्तेन for विभक्तेन of *a* *b.* *m*; *bl.* वेदेषु for देवेषु of *a.* *b.* *d.* *m.* 7 *bl.* मनुष्येण तुल्य for मनुष्यैस्तुल्य of *a.* *b* *d.* *m.* 8. *bl.* °भिहिषु° for °भिहिति° of *a.* *b.* *d.* *m*, *a.* *d.* *m* अभिदधति. *b.* *bl.* अभिदधाति 9. *a* *b.* *d.* देवानपि for देवा अपि of *m* *bl*; *a.* *d* शब्दस्याभिधानेनशक्ति°, *bl.* °भिधानेनापि शक्ति°. *b.* *m* °भिधानशक्ति°; *a.* *b* *d.* °परिहीणे°, *bl* *m.* °परिहीने°. 10 *a.* *f.* कर्मभिश्च संस्तूयन्त इति हि वक्ष्याम.. 12 *a.* *b* *d* °परिहीणा, *m.* *bl* °रिहीना. °कु *m.* वेदमन्त्र for वेदे मन्त्र.. 14. *a.* *d.* विज्ञानस्यानित्यत्वं तस्मात् पुरुष°; *b.* *m* °णामनित्यत्वात्तस्मात् पुरुष°. 15 *a.* फलेनसंपादन for फलेन संपादनं; *b.* कर्मण° *l.* for कर्मसंपत्ति; *a.* सफल° for फल°; *a.* *d.* °मेवं for मेव.

2. Mss. *m.*, thus is not an exact quotation but all the words may be possible.

† Nir. VIII 5.

दधते देवानामाख्यातोपसर्गनिपातैरशिक्षितत्वान्मन्दशिक्षितत्वाद्विस्मरणशीलत्वाद्वा देवानामपराध्येयुरयथावत् प्रयुञ्जाना नामाख्यातोपसर्गनिपातान् । ततश्च सर्वार्थप्रत्यक्षदर्शो देवाः स्वल्पमप्ययथावदभिधानं न मर्षयन्ति विगुणमेतदिति । विद्यानित्यत्वात्तदभावे नेयुः कर्माणि । ततश्च देवताहीनं कर्मफलं न संपद्यते । न च केवलं फलासंपत्तिः । किं तर्हि । दुरिष्टहेतुको दोषोपि स्यात् । तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । न हि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति । एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यते ।

आह । कथमनित्यत्वं विद्यायाः पुरुषेष्विति । उच्यते । येन वाक्यविरचनानुक्रमेणार्थवत्वानुक्रमेण वोक्तत्वानुप्रेष्यते मनुष्य एवमेव ब्रूयास्त्वममुं देवदत्तमिति । स तेनैव वाक्यविरचनानुक्रमेणैवावबद्धमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम । एवमनित्यत्वं विद्यायाः पुरुषेषु । तददोषं वा मनुष्यान् प्रति सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्यायाः । अयमपि हि येन वाक्यानुक्रमेणार्थ वक्ति मनुष्यः कंचिदर्थं न तेनैव अः शक्नोति वक्तुम् । तत्र यदुक्तं किमर्थं मन्त्रो वेदे समाम्नात इति । इदं न युक्तम् । पुरुषविद्यानित्यत्वात्कर्मफलसंपत्त्यर्थं मन्त्रो वेदे समाम्नात इति । नह्यविचारितमेव विज्ञायते अत इदमाह ॥

पदचतुष्टयमाक्षिप्य पक्षप्रतिपक्षशो विचार्यावधारितम् । विषयश्चाक्षेपप्रसङ्गेनैवास्य परिकृतः । देवमनुष्यव्यवहारार्थमेतदिति । तदेतत्सर्वमपि चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम् । भावस्तु प्रकृतो यतस्तच्छेषमधुना वर्णयिष्यामः ।

---

1. *m.* adds यत् before देवाना. 2. *bi.* °पराध्येयपावत् for °पराध्येयुरपधावत्. 3. *a. d.* स्वल्पमप्यपराधं न मर्षयन्ति ।; *a.* repeats विगुणमेतदिति. 4. *m.* °ताहीनकर्मफल, *bi.* om. न after कर्मफलम्. 5. *m.* दुरित° for दुरिष्ट°. 6 *a. b. d.* °परिपाटि°; *b. m.* om. °वि° before °नियमार्थं 7. *b m* add हि after एतदेव; *a. d.* कदाचित् for कथाचित् 8. *a. b. d. bi.* इत्युच्यन्ते, *m.* इत्युच्यते (better). 9 *a. d. m.* add इह before येन. 10. *a.* ब्रूयास्त्वंगदेवदत्तमिति, *d.* ब्रूयास्त्वगतदेवदत्तमिति, *m* ब्रूयात्वपत्तुअमुदेवदत्तमिति, *bi.* इह तु न वाक्यविरचनानुक्रमेण अर्थवत्त्व- मनुष्य एवमेव ब्रूयात् 'त्वं गन्तु देवतत्तमिति'. We have followed *b.* as the most intelligible of these all. 11. *bi.* °क्रमेण बद्धमपि for the text of Mss. given above. 12. *m.* om after अयमपि all the text to विमर्षं. 13. *bi.* om. अत्र before वक्ति; *d.* किंचिदर्थं for कंचिदर्थं for अः of *a. d.* 14. *a.* असमाम्नात for समाम्नात. 15. *a. d.* नह्यविचारितमेव वेदे पठ्यते इत्यत इदमाह, *b* नह्यविचारितमेव विज्ञायते इदमाह, *m.* नह्यविचारितमेव विज्ञापते अत इदमाह, *bi.* नह्यविचारितमेव विज्ञापते। अत इदमाह, 16. *bi.* विषयाभ 17. *a. d bi.* परिक्रिया.

स च पुरुषमात्रो भावः । कार्यात्मा कारणात्मा च । तयोर्यः कार्यात्मा तन्निवृत्त्योक्तं क्रियानिर्वर्त्यो योर्थः स भावः किंदेव वा भव इति । इदानीं कारणात्मा भावो निरूप्यते । कथम् । क्रियाद्रव्ययोः स्वात्मस्थो विशेषः कार्योन्मुखचलनयोः पुरुषोपभोगसन्तानोन्मुखये कार्योन्मुखभावापन्नो येनात्मभावेन भवनमात्रादिसंबन्धिना प्रलयकालेवतिष्ठते सोत्पन्नाविनाशधर्मा आत्मा भाव इत्युच्यते ।

आह । कथमयमिह प्रस्तुतः । शृणु । तद्विकार एव हि द्रव्यगुणकर्मभावेनावस्थितः सन्नो नामाख्यातोपसर्गनिपातैरभिधीयते स्थितिकाले । अस्तयि च प्रहीणसर्वविशेषभवनमात्रक्रियाभिसम्बन्धी सन् व्याकृतसर्वोपपदाभ्यां नामाख्यातशब्दाभ्यामुच्यते भवतीति भाव इति च । शब्दगतविभुत्वादपोद्धृतसर्वविशेषान्येतावत्यानेतौ शब्दावास्पदः । यत एतयोरेव साधारण्यार्थमयमिह प्रसङ्गिनः पदचतुष्टयाधिकरणे ।

आह । प्रधानमेतत् स्यात् । कि कारणम् । तद्भावेन येनाभिप्रेतेन प्रलयकाल इत्येके मन्यन्ते । तच्च नैव । किं कारणम् । भावविकार एव हि सोमवदवाच्यत्वात् प्रधानभाव इति चेच्यते । पुरस्तादिह । तन्नाप्यमनेव हेतुः अनुपलक्षणशास्त्रित्वात् । एतेनैव ईश्वरपरमाण्वादिभावाः प्रत्युक्ताः । ईश्वरभावः परमाणुभाव इति सोमवदत्वात् । शून्यं तर्हि । तदपि न । यस्माच्छून्यशब्देति भावशब्दावधारणम् । न हि तत्रार्थे शब्दः प्रयुज्यते । शब्दो हि शब्दस्यार्थेन संबद्धः । किंचित्तदस्ति यच्छून्यमिति । लोके हि प्रसिद्धं गृहं शून्यं धनः शून्यः शून्ये शब्दमहत्वे इति । तस्मान्न शून्यशब्देनाभाव एवोच्यते । किं तर्हि । अपेक्षाकृतं शून्यत्वमिति । भावशब्द एवात्रोपपदत्वेन युक्त

---

1 *a. d.* अनयो for तयो. 2 *b.* om. यः after °निर्वर्त्यः. 3 *m.* कार्यात्मा-प्रध्वस्तयो. 4 *b.* सदन° for भवन°, *b* om. it, *b.* adds तनुनाशः before प्रलयकाले. *m.* adds न तु माया instead. 5. *b.* °विनाशधर्मभाव for °विनाशधर्मा. 6. *d.* प्रसिक्त for प्रसक्त; *m* द्रव्यकर्मगुणभावेना°. 7 *b.* प्रहीन°. 8. *m.* व्याहृत° for व्याहत°. 9. *b m.* शब्दगतविभुत्वादपोढ°, *a. d.* शब्दमतं विभुत्वादपोढ°, *b.* शब्दयतत्वादपोढ°. 10. *b.* प्रसञ्जित्र for प्रसङ्गिनः; *m.* om. नय before इह 11. *m.* प्रेषज° for हेतुज°. 12. *b m.* सोय पदशब्द° for सोमपदशब्द°. 13. *a. d. m.* om. हि before उच्यते. 14 *a. d* परमाण्वादिभावविकारः प्रत्युक्ता-*m.* °कारा प्रत्युक्ता, *b.* °कार प्रत्युक्त. 15. *a.* शून्ये शब्देऽपि भावशब्दावधारणम्; *d.* om. तर्हि, *m.* तस्मात् for यस्मात्. 16. *b.* सबन्ध for संबद्ध; *m.* om. तत् after किंचित् 17. *a. d.* om. शून्ये शब्दमहत्वे. *m.* शब्दे महत्वे, *a. b. d.* तस्मात् शून्यशब्देनेह भाव उच्यते. *m.* तस्मान्न शून्यशब्देनेहाभाव पदोच्यते, *b.* तस्मान्न शून्यशब्देनाभाव पदोच्यते. 18. *a. b.* प्रत्यपेक्षाकृत for अपेक्षा°. *m.* भावशब्दो for भावशब्द.

1². The sense would need सः to be added after पद हि.

इति चेत्। न। प्रयोगाप्रसिद्धेः। न हि भावभाव इति प्रसिद्धः प्रयोगः। न च प्रयुज्यमानोऽपि भावशब्दो भावशब्द एवोपपदत्वेन प्रधानादिशब्दवत् कंचिद्विशेषप्रत्ययमादधाति। तस्मात्स्वोपपदहीनस्य भवतेरेवंलक्षणस्य भावः। अतस्तेनात्मभावेनेदं जगदित्यम्। इतरेस्तु भावविकारैः पृथिव्यादिभिर्भावविकारात्मभिरनित्यम्। कस्मात्। विकारात्मकत्वादेव। विकारो ह्यनित्यः। तमेव भवनमात्राभिसंबन्धेन प्रहीणसर्वभावविकारमेतत्सद्भावविदोवधूतवेदान्तरहस्यसंपदः परापरविदो वेदविदो मेधाविन आत्मकृन्मकारितया मुक्ताधिकारत्वत्वेना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसंताना: सन्त आत्मकामाः प्रतिपद्यन्ते नेतरे। प्रधानादिविदो वेदानुगास्त्वेकदेशानीश्वरसुखप्रधानादीननित्यान् भावविकारान् स्वमतिकल्पनाहेतुव्यवहितान् कृत्वा स्थिरीकृत्य चातो नित्यत्वेन प्रतिपद्यन्ते भवनमात्राभिसंबन्धेन। तदेतस्मादात्मन इच्छिज्ञ आत्मप्रणाशकातर्यादिना कर्मोपभोगसंतान शिवमिव मन्यमाना. केचिच्छक्तिहानादसंबोधनादेव। स एष

---

1. *a. d.* न हि भावभाव इति प्रसिद्धपूर्वः प्रयोगः, *m* as text above, *b* नहि भावाभाव इति प्रसिद्ध. पूर्वः प्रयोगः, *bi.* न हि अभावे भाव इति प्रसिद्धः प्रयोगः 2 *a. d* न च प्रयुज्यमानो भाव°; *a. d.* भावशब्द एवो°; *m* किंचित् for कंचित्. 3 *bi.* भवतेरात्मभावेनेदं for भवतेरेवंलक्षणस्य भावोतस्तेनात्मभावेनेदं of *a. b d. m.* 5 *bi.* प्रहीन° for प्रहीण° of *a. b. d m.* 6. *b.* विधूतवेदान्तरहस्यसंविदो वेदविद परापरविदो मेधाविन, *a. d.* °विधूतवेदान्तरहस्यसंपद परापरविदो मेधाविन., *m* °विधूतवेदान्तरहस्यविदो वेदविदो मेधाविन, *bi.* °विधूतवेदान्तरहस्यसपद. परापरविदो मेधाविनः. 7 *a.* आत्मसंप्रपातकातर्यादीना विशुद्धदर्शनप्रयोगा वेदविहितकर्मकृतस्तत्कारितया मुक्ताधिकार°, *d.* आत्मसंप्रपातकातर्यादीना विशुद्धदर्शनप्रयोगा वेदविहितकर्मकृतस्तत्कारितया मुक्ताधिकार°, *m.* आत्मकृन्मकारितया मुक्ताधिकार°, *bi.* आत्मवेदविदो न कृन्मकारितया मुक्ताधिकार°. 9. *m.* अनित्यभावविकारान्: *b bi.* मत्वा, *m.* मत्या, *a. d.* कृत्वा; *bi.* स्थिरीकृत्यानेन प्रति°, *a. d.* स्थिरीकृत्य चातो नित्यत्वेन प्रति°. 10. *a. b d.* as text, *m* आत्मप्रणाशकतया नाकमपि भोगसमाप्य तत् सतान शिवमिव मन्यमाना, *bi.* आत्मप्रकाशकान्तर्यान्यय चित्संतानमिव मन्यमानाः. 11 *a. b. m. bi. add* च after केचित्; *bi.* असबोधनादेव.

9–11. The reading of the whole page, and especially of these lines, is not satisfactory. The text printed above is based upon the available material. The various readings of the Mss and the printed edition are fully noted here. In line 9, either कृत्वा of *a. d*, or मत्वा of *m.* makes sense.

10. Separate वदिनन्ते आत्मप्रणाश &c., which makes some sense.

इह वेदार्थे वेदार्थनिर्वचनाभिनिवेशिनि शब्दानां सामान्यविशेषवृत्त्युपदेशप्रसङ्गे वर्तमाने भवतेः कृदन्तीभूतस्य भवनमात्रमेव वक्तुं सामर्थ्यं नेतरान् भावविकारान् विद्यमानानपोह्येतेन प्रसङ्गेनात्र सूचितः । वेदरहस्यब्राह्मणेस्तत्र तत्र विस्तरेणायं निर्णीयते ॥

षड्भावविकारा भवन्तीति । अपि च लक्षणविदो विगृह्णन्ति भावशब्दं भवतेः स्वः पदार्थो भवनं भाव इति । "सन्मात्रं भावलिङ्गं स्यात्" इति च पठन्ति । तस्य विकारा **भावविकाराः** । **भवन्तीति** सामान्यादात्मनः प्रस्कन्दा इव सन्त. स्वेन स्वेन वैशेषिकेण भावविकारात्मलाभाय भवन्ति । इतिपरः प्रयुज्यमानः शब्दः शब्दपदार्थकः ।

क एवमाह षड्भावविकारा इति । उच्यते । **वार्ष्यायणिरिति** । तिकादिपाठात् फिन् । आचार्य इति वाक्यशेषः । निर्देशात् उपलब्धाना पण्डित्यवधारणं सुखार्थम् । वक्ष्यामः 'अतोन्ये भावविकारा एतेषामेव विकारा भवन्तीति ।'

आह । कतमे त इति । उच्यते । **जायतेस्ति विपरिणमते वर्धतेपक्षीयते विनश्यतीति ।**

आह । एतेषा जन्यादीना भावविकारशब्दानां क. कस्यां विकारावस्थायामवस्थितं भावमाचष्टे कं वा विद्यमानमपि नाचष्टे क वा न प्रतिषेधतीति । उच्यते । जायत

---

1 *b* वदाङ्गे, *a* वेदार्थे निर्व°, *b* °निर्वचनाभिनिवेशशब्दानां सामान्य°; *b*. प्रवर्तमाने. 2 *a d* add वा after कृदन्तीभूतस्य. 3 *a. d* अत्र for अत्र, *b*. सप्तधिन, *b* वेदरहस्यो ब्राह्मणे, *b* विर्णीयते for निर्णीयते of all our Mss, *b*. om. one तत्र. 4 *a d* om षड्भावविकारा भवन्तीति, *b m*, instead of षड्भावविकारा भवन्तीति. read उक्तो[क्त *m*.]द्विविधो भावः कारणरूप' कार्यरूपश्च । तत्र कारणे विकृतत्वादभि[*m*. त्यभि]व्र एवेत्यवगत [*m* त]इदानीं कार्यरूपस्यानेकविकृत[*b* नि]रूपत्वादुर्वि[*m*. र्वि]ज्ञे. यत्वेन निर्वक्तुमाह । षड्भावविकारा भवन्तीति वार्ष्यायणि । भाव उक्तलक्षणो नित्य विकृतिकारणं तैर्विकारैर्विशिष्ट षट्प्रकारोभिधीयत उपचारत । यतो वि[*m* तोर्य वि]द्यमानमात्रमेव भवनशब्देनाभिधत्ते । तेन यो विद्यमानमात्रभवनात्मक स पर भिन्नोऽभिधीयते । 5 *b*. स्वपदार्थे, *a b d* स्व. पदार्थो, *m* स्वपदार्थभवन, *b* om च after इति. 6. *m*. om भावविकारा, *b* भावविकार 7. *b* सन्तस्वेन for सन्तः स्वेन of *a. b. d m*. 8 *b*. om शब्द, *m*. शब्दपदार्थः. 9 *m* om. क before एवं. 10. *a. d* पण्डित्यवधारणार्थं, *b* om वक्ष्याम. 11. *b* भावविकारा for विकारा. 12. *b*. कतमदिति.

---

11. *Vide* next section.

इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति । जनिः पूर्वो भावस्तस्य पूर्वभावस्य पञ्चानां भावविकाराणां यदि वान्यो यः पूर्वो भावविकारस्तस्य जायत इत्यनेन शब्देनादिमाचष्टे ।

आह । किमादिमेव । नेत्युच्यते । उक्तमुपकल्पप्रकृत्यवयवगर्भवन्तमिति । स एव पूर्वापरीभूतो भावस्तावदेव जायत इत्युच्यते यावन्निष्ठाशब्दवाच्यः संवृत्तो जात इति । नापरमावमाचष्टे न प्रतिषेधति । नेति प्रतिषेधे । न परो भावोपरभावः ।

आह । कस्मादपरः । पौर्वापर्यं हि देशकालकृतम् । उच्यते । जनिशब्दवाच्यो भावविकारः पूर्वः । तस्मादपरकालोऽस्तिशब्दवाच्यः । तत्रैवं सति जनिशब्दवाच्ये भावविकारेऽस्त्यर्थोऽस्ति विद्यमानता । किं कारणम् । न ह्यविद्यमानो जायते । अपि च कारणात्मनि भावे सर्व एते भावविकाराः सन्ति । सर्वार्थप्रसवशक्तित्वात्तस्य । यथा पृथिव्यां घटादयो भावविकाराः । ते तु द्वारद्वारिभावेन विशेषात्सत्यमं प्राप्नुवन्ति । तद्यथा । जनिद्वारेणास्तिः । अस्तिद्वारेण विपरिणतिः । किं कारणम् । न ह्यजातोऽस्तीत्युच्यते । नाप्यविद्यमानो विपरिणत इति । तत्रैवं सति जायत इत्येव शब्दो जन्मैव केवलं सर्वास्त्यविवक्षितेतरभावविशेषम् । किं कारणम् । एकार्थवृत्तित्वाच्छब्दस्य । अस्तिशब्दवाच्यस्य भावविकारस्यासंपूर्णत्वात् । जनवधृतत्वं हि तस्यानवस्थायां तद्व्यनुमानगम्यं किमपि जायत इति । तस्माज्जायत इत्येव शब्दो जायमानावस्थायामस्तिचं विद्यमानमपि नाचष्टे ।

आह । यदि नाचष्टेऽर्थादापन्नं भवति प्रतिषेधतीति । उच्यते न प्रतिषेधति इति । अस्तित्वस्य न प्रतिषेधं करोतीत्यर्थः । किं कारणम् । उच्यते । अस्तित्वान्वयानि ह्यतो जायते । एतस्मिन् प्रतिषिद्धेनात्मक एव स्यात् । कस्मात्त्व्य जायते । तस्मान्न प्रतिषेधत्यस्तित्वम् । उपस्थितत्वाच्च । उपस्थित एव च प्रत्यक्षतस्तस्यावधारणाच्च इत्यतश्च न प्रतिषेधति ।

एवमेव शेषेषु उत्तरेष्वपि भावविकारेषु । समाप्तस्तु चायं यद्वक्तव्यं तत्र तद्ब्रूमः ।

---

1. *b.* reads the *pratika* upto आचष्टे; *d.* reads जायत इत्येव भावः पूर्वभावस्य; *m.* adds इति after प्रतिषेधति; *a. d.* जनिर्पूर्वो भावस्तस्य &c. 2. *m.* भवेदः for भवो यः. 3. *m.* यावन्नटाशब्दवाच्यः. 6. *a. d.* नेति प्रतिषेधे भवो भावः आह &c., *b. m.* नेति प्रतिषेधे भवोभावः अपरभाव आह, *h.* नेति प्रतिषेधे न परोभावः अपरभाव आह. 7. *d.* देशकालकृत। उच्यते। 8. *a. b. d.* अपरकालेऽस्तिशब्दवाच्यः. 12. *d.* जनिद्वारेणास्ति। अस्तिद्वारेण &c. 15. *m.* तस्मादवस्थायां तद्भवेत्। 20. *b. m.* जायते तस्मिन्. 21. *b. m.* om. च after अवस्थित एव. 23. *m.* तत्र यद्वक्तव्यं तत्र ब्रूमः.

अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् । अस्तीति जातस्य सत्त्वस्यावधारणमात्रं ब्रवीति न विपरिणाममाचष्टे अपूर्णत्वात् । न प्रतिषेधत्युपस्थितत्वात् ।

विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम् । विपरिणमत इत्येष शब्दोऽप्रच्यवमानस्य तत्त्वादप्रध्वंसमानस्य तत्त्वासद्भावाद्विकारम् । योऽस्य भावोस्तित्वं स्वरूपत्वं वा तस्माद्विकारं विक्रियामात्रं ब्रवीति न वृद्धेरर्थमाचष्टे । न प्रतिषेधति ।

वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां चार्थानाम् । वर्धत इत्येष शब्दः स्वेषामङ्गाना शिरोग्रीवाबाहूदरादीनां सांयौगिकानां वा गोहिरण्यधान्यादीनामभ्युच्चयमाह । अभ्युच्चिनोति ब्रवीति ।

आह । कथं प्रयोगः । उच्यते । वर्धते विजयेनेति वा वर्धते शरीरेणेति वा । वर्धते विजयेनेति सांयौगिकेषूदाहरणम् । वर्धते शरीरेणेति स्वाङ्गाभ्युच्चये । अत्र वर्धत इति द्युवमापक्षी(क्षि?)यतिमाचष्टे न प्रतिषेधति ।

अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमम् । यथैव हि स्वाङ्गैः सांयौगिकैर्वा द्रव्यैरुपचीयते तथैवापक्षीयते । तत्रापि नाचष्टे न प्रतिषेधति ।

विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति । विनाश एवापरभावस्यादिमाचष्टे । किमादिमेव । नेत्युच्यते । उपक्रमप्रभृत्यपवर्गपर्यन्तमित्युक्तं यावद्विनष्ट इति । स च विनाशं ब्रुवन्न पूर्वभावमाचष्टेपक्षी(क्षि?)यतेरर्थो विद्यमानमपि तस्मिन्विनाशे । कथं युगपदपक्षी(क्षि?)यतेरर्थो विनाशोऽनीति । उच्यते । न ह्यनपक्षीयमाणो विनश्येत् ॥ २ ॥

---

1. *a. d* om अस्तीति before जातस्य. 4. *m.* तत्त्वादप्रध्वंसमानस्य. 5. *m.* स्वरूप for स्वरूपत्व, *bi.* पुरुषत्व; *b* om. न before वृद्धे. 8. *a.* adds अर्थानां after वा, and reads हिरण्यधान्या° for गोहिरण्य°. 10. *m bi.* द्युवन्नपक्षीयति°. 13 *a d* इत्यनेनैव. 14. *a d* वक्षीयते and अपक्षीयतेऽपि for उपचीयते and अपक्षीयते. 16. *a.* om. all from विनाश to आचष्टे; *b* विनाश पर परमाव. &c.; *d.* तस्मादिमाचष्टे. 17 *a.* *d* इतिद्युक; *b.* om. न after द्युवन्. 18. *bi.* विद्यातमपि for विद्यमानमपि, *d.* उपक्षीयते after युगपद्; *m* विनाशो for विनाशे.

---

14. It appears that the word विनाश should be understood after न in तत्रापि नाचष्टे. *cf.* the above similar passages. Our Mss. do not read it.

अतोन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह ते यथावचनमभ्यूहितव्याः ॥

न निर्वक्ता उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम्। 5

आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्यं प्रतीत्येतस्य प्रातिलोम्यमति सु इत्यभिपूजितार्थे निर्दुरित्येतयोः प्रातिलोम्यं न्यवेति विनिग्रहार्थीया उदित्येतयोः प्रातिलोम्यं समित्येकीभावं व्यपेत्येतस्य प्रातिलोम्यमन्विति सादृश्यापरभावमपीति संसर्गमुपेत्युपजनं परीति सर्वतोभावमधीत्युपरिभावमप्येवं चैवमुच्चावचानर्थान्प्राहुस्त उपेक्षितव्याः ॥ २ ॥ 10

आह। एतेभ्यो भावविकारेभ्यः किमन्येपि व्यतिरिक्ताः सन्ति भावविकारा न वेति। उच्यते। **अतोन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह**। अतो भावविकारपञ्चकान्येन्यत्वेन भावविकारा लक्ष्यन्ते न ते पृथक् पृथगन्यान्यमिश्राः सन्ति। किं तर्हि। **एतेषामेव विकारा भवन्ति**। तद्यथा। जनिशब्दवाच्यो भावविकारोनेकप्रभेदभिन्नोनेकपर्यायशब्दवचनो निष्पद्यतेभिव्यज्यत उत्तिष्ठतीत्येवमाद्युपेक्षितव्यम्। तथास्तिशब्दवाच्योनेकप्रभेदभिन्नोनेकपर्यायवचनश्च अस्ति विद्यते भवतीत्येवमादि। तथा विपरिणमतिशब्दवाच्यो विपरिणमते जीर्यति भावान्तरमापद्यत इत्येवमादि। तथा वर्धतिशब्दवाच्यो वर्धते पुष्यति उपचीयते आप्यायत इत्येवमादि। तथा अपक्षी(क्षि?)यतिशब्दवाच्यो ध्वस्यति भ्रश्यतीत्येवमादि। 15 20

---

5. A. Bi. complete Khaṇḍa 4 after °विकरणम्. 11. A. Bi. complete Khaṇḍa 5 after उपेक्षितव्याः, and then read प्रथमाध्यायस्य प्रथमः पादः. 14. bi. om. न before ते, a. b. d. न ते पृथगेवान्यन्तमिश्राः &c. 18. d. तथा विपरिणमतिशब्दवाच्योनेकप्रभे[दो] विपरिणमते; m. जीर्यते for जीर्यति. 20, b. m. आप्यायत, a. d. आप्याप्यत, bi. अपायतः; a. d. भ्रस्यति भ्रस्यतीत्येवमादि, b. ध्वस्यति भ्रश्यतीत्येवमादि.

तथा विनश्यतिशब्दवाच्यो विनश्यति म्रियते विलीयत इत्येवमादि । इति ह स्माह । एवमाहाचार्यो वार्ष्यायणिरित्यनुवर्तते ।

ते यथावचनमभ्यूहितव्याः । त एते जन्यादिशब्दवाच्या विकारा यथावचनं यो यस्मिन्वचने यथावचनमवस्थिताः सन्तः प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणं प्रत्यभ्यूहितव्या वितर्क्या. । प्रयुज्यमाना इति वाक्यशेषः । सर्व एव धातवो भाववचनास्तेषामिहाध्ययने प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टम् । इह शास्त्रे व्याख्याशैलीयं द्रष्टव्या। उद्देशो निर्देशः प्रतिनिर्देश इति । तत्रोद्देशः सूत्रस्थानीयः । तद्यथा । 'षड् भावविकार' इति । निर्देशो वृत्तिस्थानीयः । तद्यथा । 'जायतेऽस्ति विपरिणमत' इति । प्रतिनिर्देशो वार्तिकस्थानीयः । तद्यथा । 'जायत इति पूर्वमात्रस्यादिमाचष्टे' इति । एवं सर्वत्र यथासंभवं योज्यम् ॥

सानुपङ्गमुक्तं नामाख्यातयोर्लक्षणं नाम्नस्तु किंचिदवशिष्यते तदवसरप्राप्तमपि सदधुना नोच्यते पदचतुष्टयलक्षणप्रतिज्ञाव्याघातभयात् । उक्त्वा पदचतुष्टयलक्षणं चतुर्थेन पादेन तद्वक्ष्यामः । प्रतिज्ञाप्रसक्तमेवाधुनोपसर्गलक्षणमुच्यते ।

आह । वक्ष्यति भवानुपसर्गलक्षणमिदमेव तावदुच्यताम् । किमिमे उपसर्गा नामाख्यातवत् पदचतुष्टयान्निष्कृष्य बद्धाः सन्तोर्थानाहुर्न वेति । उच्यते । **न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः** । नेति प्रतिषेधे । निष्कृष्य नामाख्यातमध्यात् पदवाक्यरूपेण विरचिता. सन्तः । के पुनस्ते । उपसर्गाः । आख्यातमुपगृह्यार्थविशेषमिमे तस्यैव सृजन्त्युपसर्गा. । अर्थान्निराहुरिति शाकटायनः । निश्चयेन सतोर्थानाहुः । साक्षान्न तेषामर्थाभिधानशक्तिरस्ति पृथग्विरचितानामित्यभिप्रायः । यथा वर्णानां पदादपगतानामर्थाभिधानशक्तिर्नास्ति एवमेतेषामपि नामाख्यातवियोगेर्थाभिधानशक्तिर्नास्ति । क एवमाह । शाकटायनः शकटस्यापत्यं (नडादिपाठात् फक्) शाकटायनः ।

आह । कथं तेषामर्थवत्तेति । उच्यते । **नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति** । तुशब्दोवधारणार्थः । नामाख्यातयोरेव योर्थः कर्म तमेव विशेषं कंचिदुपसंयुज्य द्योतयन्ति । स एष नामाख्यातयोरेवार्थविशेष उपसर्गसंयोगे

---

1. *m* om विलीयते. 2 *a. d. m* क एवमाह for एवमाह of *bi.*, *b* कथमाह instead. 6 *a. d.* व्याख्यागैली for व्याख्यागैली 8. *b* om. अस्ति after जायते. 11 *a. b. d.* नामसु, *m* नामस्तु, *bi.* नामस्तु. 12. *m.* °पदचतुष्टयलक्षणाव्याघातभयात् &c. 14. *bi.* उपसर्गनामा°, 15 *a d, bi.* नि कृष्य, *b.* निकृष्य, *m.* निष्कृष्य, *bi.* सनो for सन्तो, and न इत्युच्यते for नवेति। उच्यते of our Mss. 16. *b.* निकृष्य for निष्कृष्य. 20 *bi.* पदादपगतानां 23 *a d.* om. उच्यते. 24. *b.* तव for तमेव 25. *d* किञ्चित् for कंचित्; *m.* स एव for स एष; *a.* उपसर्गे for उपसर्गसंयोगे.

ति व्यज्यते। यथा प्रदीपसंयोगे द्रव्यस्य गुणविशेषोभिव्यज्यमानो द्रव्याश्रय एव भवति न प्रदीपाश्रयः।

आह। कोन्वया भवीति येनैवमुच्यते शाकटायन एवमाहेति शृणु। उपसर्गाः पदार्था भवन्तीति गार्ग्यः। उपसर्गाश्च उपसर्गा बहुलमिति इत्यर्थः। एवमुपसर्गपदानामर्थाः पदार्था भवन्ति नियुक्तानामपि नामाख्याताभ्यामिति गार्ग्यः। आचार्यो मन्यत इति यास्कस्यैवः। एकैकोन्येषां प्रादीनां नामाख्यातनियोगेनार्थ इत्यभिप्रायः। तथा। "प्रेत्यादिकर्मोपसर्गभूतार्थेषु।" इत्यभिधाने शक्तिरस्त्येवेत्येवमानुपलक्षितव्यं लक्षणशास्त्रे। यदुच्यतेदुक्तं वर्णानर्थिति। अनभ्युपगमादयुक्तं न ह्यभ्युपगमस्माभिरेतदनर्थका वर्णा इति। सामान्या हि वर्णेष्वभिधानशक्तिरस्त्येव। यथा मृदोमयेषु सर्वमृन्मयभाण्डारम्भशक्तिः। सा तु परत्वेन बहुदितानामर्थनिरोधेनतिष्ठते। यथा मृदोमयानां घटे घटारम्भशक्तिरभिव्यक्त एवम्। तत्र यदुक्तं वर्णानर्थका उपसर्गा नामाख्यातनियोगादित्येतदयुक्तम्। अपि च। वर्णैरनर्थकैरारभ्यमाणं पदमप्यनर्थकमेव स्यात्। न ह्यशुक्लन्तुभिरारभ्यमाणः पटः शुक्लो भवति। ततश्च पदैरनर्थकैरारभ्यमाणं वाक्यमनर्थकमेव स्यात्। वाक्यैश्चानर्थकैरारब्धं शास्त्रमप्यनर्थकमेव स्यात्। ततश्चाभ्युदयनिःश्रेयसार्थो योयमभ्युपमः स्वप्रत्ययेन विदुषामयमनर्थक एव स्यात्। अनिष्टं चैतत्। तस्मादर्थवन्तो वर्णा इत्युपपन्नम्। यत्पुनरेतदुक्तं प्रदीपवदनर्थका उपसर्गा इति। तत्रोच्यते। प्रदीपोपि स्वेनार्थेन प्रकाशात्मनेनार्थवानेव। सत्यां चार्थवत्त्वे प्रकाशमर्थनाधारभूतं प्रकाशयन् स्वां प्रकाशनशक्तिमभिव्यनक्ति। एवमुपसर्गा अर्थवन्तोपि सन्तः स्वार्थाभिधानशक्तिमनेकप्रकारां नियमानामपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याभिव्यञ्जयेयुः। तत्र यदुक्तं प्रदीपवदनर्थका उपसर्गा इत्येतदयुक्तम्। नामाख्ययोरेवार्थ उपसर्गसंयोगे सत्युपजायत इति। तत्र ब्रूमः। न हि लोके यो यत्र समर्थो

---

2. b. दीपाश्रयः, d. प्रदीपोश्रयः for प्रदीपाश्रयः. 5. a. पुनना for नियुक्तना. 7. b. om. अपि, c. d. प्रेत्यादिकर्मोप(d. प्)दार्थेभिधानेषु, d. a. प्रेत्यादिकर्मोदीर्णो पदार्थे इत्यभिधाने. 8. a. शक्तिरस्त्येवमादुप°, 10. c. d. मृन्मयेषु, a. b. d. a. °भाण्ड° for °भाण्ड°. 11. c. d. मृन्मयभाना. 12. a. om. तत्र. c. d. read यत्र for it, c. नामाख्यातियोगा° for °ख्यातनियोगात्. 13. d. अपि च न तु वर्णैरनर्थकै°. 16. b. °भुक्लमन्यमन्यपेन, a. अनर्थं for अनर्थक. 17. c. d. इत्येतदुपपन्न, c. d. इति तदयुक्तं for इति तत्रोच्यते. 19. b. सं for सत्. 21. c. अत्र for तत्र; b. पारयुक्तं। यदप्युक्तं नामाख्याभ्यां &c. 22. c. d. a. om. तत्र before ब्रूमः.

भवति स तत्रान्यमपेक्षते । नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोगमपेक्षेते । तस्मादुपपन्नमुपसर्गस्य क्रियाविशेषोर्थः क्रियासामान्यमात्रमाख्यातस्येति ।

तत्र यदुक्तमनर्थकाः पृथगवस्थिता उपसर्गा इत्येतदयुक्तम् । कुतः । तद्य एषु पदार्थः प्राहुरिमे तम् । तदेतदुपपन्नं भवति । य एषूपसर्गेषु स्वोऽनेकप्रकारोर्थ इति प्राहुरेव तमिमे उपसर्गाः पदविशेषाः पृथगपि सन्तः । कः पुनरसाविति । उच्यते । नामाख्यातयोरर्थविकरणम् । अर्थक्रियामित्यर्थः । तस्मादर्थवन्त एवेति ।

उच्यतां तर्हि क एषां कस्मिन्नर्थविशेषे वर्तते । उच्यते । अयं तावत् । आ इत्यर्वागर्थे । तद्यथा । आ पर्वतादिति । अर्वागिति गम्यते । अनेकार्थत्वेपि सत्युपसर्गाणामेकैकोर्थ उदाहरणत्वेनोच्यतेर्थवत्त्वप्रकाशनार्थम् ।

प्रपरेत्येतस्य प्रातिलोम्यम् । प्र परा इत्येतावुपसर्गावेतस्यैवाङोर्थस्य प्रातिलोम्यमाहतुः । प्रगतः परागतः ।

अभीत्याभिमुख्यमाह । अभिगतः ।

प्रतीत्येतस्यैवाभेः प्रातिलोम्यमाह । प्रतिगत इति ।

अति सु इत्यभिपूजितार्थे वर्तते । अतिथनः सुब्राह्मण इति ।

निर्दुरित्येतयोः प्रातिलोम्यम् । निर्धनो दुर्ब्राह्मण इति ।

न्यवेति विनिग्रहार्थीयौ । निगृह्णाति । अवगृह्णातीति ।

उदिति अयमेक एव एतयोर्द्वयोः प्रातिलोम्यमाह । उद्गृह्णातीति ।

सम्मित्येकीभावमर्थमाह । संगृह्णातीति ।

व्यपेत्येतस्य प्रातिलोम्यमाहतुः । विगृह्णाति अपगृह्णातीति ।

अन्विति सादृश्यापरभावमाह । अनुरूपमस्येदमिति सादृश्यम् । अनुगच्छतीत्यपरभावः ।

---

1. *bi.* अपेक्षते for अपेक्षेते. 4. *m.* om. इत्: before अनेकप्रकार°. 6. *d.* °मादर्थवतमेवेति, *m.* adds उच्यते after एवेति. 7. *m* om. उच्यता. 9. *m.* adds एव after °शनार्थम्. 13. *b m.* om. एव अर्थे; and *m.* om. आह. 14. *bi.* adds एतौ before अभिपूजितार्थे; *m* om. वर्तते and adds अति सु इत्येतावभिपूजितार्थं ज्ञापयति. *d.* अतिधनुः for अतिथन°. 17. *b m.* उदित्येतयोः प्रातिलोम्यमिति । उदित्यवधारणार्थमेतयो प्रातिलोम्यमाह. *d.* om एतयो. 18. *m.* adds after the pratika व्याख्यातं निष्कृष्य विगृह्णातीत्यादि निष्कृष्य all our Mss.; omit it. 20. *m.* om. इदं before इति. 21. *b.* for तत्रैव. °भाव°

अपीति संसर्गमाह। सनेरोपि स्यात्। मनुतोपि स्यात्।

उपेत्युपजनम्। उपजनमाधिक्यम्। उपजायते।

परीति सर्वतोभावमाह। परियावतीति।

अधीत्युपरिभावमाह। ऐश्वर्यं वा। अधितिष्ठति अभिनतिरोति।

आह। 'नानाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति' इत्युक्तम्। अत्र नानाः कर्मोपसंयोगद्योतका भवन्तीत्येवं न पठ्यते। "उपसर्गाः क्रियायोगे" इति प्रतिज्ञा उपसर्गाणां क्रियावदेन योगो न नाम। उपसर्गा हि क्रियाङ्खेनैव नामान्यास्कन्दन्तीति ॥ ३ ॥

अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्यप्युपमार्थेपि कर्मोपसंग्रहार्थेपि पदपूरणाः ॥

तेषामेते चत्वार उपमार्थे भवन्ति। इवेति भाषायां चान्वध्यायं चाग्निरिवेन्द्र इवेति ॥ नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायं "नेन्द्रं देवममंसत" इति प्रतिषेधार्थीयः पुरस्तादुपावारस्तस्य यत् प्रतिषेधति। "दुर्मदासो न सुरायाम्" इत्युपमार्थीय उपरिष्टादुपावारस्तस्य येनोपमिमीते ॥ चिदित्येषोनेककर्माचार्याभिदेदं ब्रूयादिति

---

2. *Bi.* om. कथनन्तामिकम् of all our Mss., *a. d.* कथनम for कथनः 6. *b.* कर्मोपसर्गद्योतकाः; *a.* लिङो for प्रतिङो. 11. R. reads मन्तीति। इवेति, we follow all our Mss. 15. A. Bi. conclude, Pa. 2. Kh. 1. here after उपमिमीते.

---

ot. see LL. S–4, P. 57.

quot. see Pâṇini I. iv. 59.

s the first Pâda of the first Adhyâya here. There is nce in reading the colophon. The Mss. generally treat this yâya, as they include the five adhyâyas of the Nighaṇṭu e Nirukta chapters in continuation. Besides all Mss. marking the pâdas. Hence we omit the colophons e pâdas altogether.

पूजायाम्। आचार्यः कस्मादाचार्य आचारं ग्राहयत्याचिनोत्यर्थानाचि-नोति बुद्धिमिति वा। दधिचिदित्युपमार्थे। कुल्माषांश्चिदाहरेत्यवकुत्सिते। कुल्माषाः कुलेषु सीदन्ति॥ नु इत्येषोनेककर्मेदं तु करिष्यतीति हैत्वपदेशे। कथं नु करिष्यतीत्यनुदृष्टे अन्वेतदकार्षीदिति च। अथाप्युपमार्थे भवति।

"वृक्षस्य तु ते पुरुहूत वयाः।"

वृक्षस्येव ते पुरुहूत शाखा वयाः शाखा वेतेर्वातायना भवन्ति शाखाः स्वशायाः शक्नोतेर्वा॥

---

1. D. R. add आचार्यः कस्मात् before आचार्यः, B. adds कस्मात्, C. has lost a page, but agrees generally with B D, Bi om. this but notices it as the reading of some of its Mss 5 A. Bl. conclude Pā. 2. Kh. 2 after भवति. 6. All Mss. accent the quotation from Rig-veda, but A. accents some other portions of the text also, generally at the end of a section or a sentence; Bl. also marks accents similarly, though A. differs from them in some cases e. g. A reads संप्रयुक्ष्यते। अह्न च त्व चै वृत्रहन्नित्येतस्मिन्नेवार्थे &c; विचारणार्थे।, समुच्चयार्थे भवति. As, however, these accents merely indicate the occasional rise and fall in intonation, and are not the natural accents of the words, we follow the practice of Mss other than A. in omitting them altogether.

1, 3. R puts the derivations of आचार्यः and कुल्माषा. here into brackets. These words are not found in the Nighaṇṭu, but are derived like many other words occasionally in the course of other explanations by Yāska The Mss. of the commentary take no note of them excepting m whose additions are noticed *loc. cit.*

4. Here, as also in LL. 6, 7 on P. 69, I would prefer to take नु by separating it into न and उ, and not as a compound particle. If we remember that the point in question is the sense of the particle उ, my suggestion seems to be proper. Besides the commentary makes sense if we take them so, and not otherwise. I have, however, allowed them to stand together on the authority of R. and Bi.

6. The line is quoted from RS. VI. 24. 3.

अथ यस्यागमादर्थपृथक्त्वमह विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहः। चेति समुच्चयार्थे उभाभ्यां संप्रयुज्यते

"अहं च त्वं च वृत्रहन्।"

इत्येतस्मिन्नेवार्थे

"देवेभ्यश्च पितृभ्य आ।"

इत्याकारो वेति विचारणार्थे

"हन्ताहं पृथिवीमिमां निदधानीह वेह वा।"

इत्यथापि समुच्चयार्थे भवति॥ ४॥

अथ निपाताः। उक्तमुपसर्गलक्षणं सामान्यं 'नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति' इति। विशेषलक्षणमपि 'आ इत्यर्वागर्थे' इत्येवमादि। अल्पा इति 10 कृत्वा च ते प्रत्येकं समाम्नाताः। अधुना सामान्यलक्षणानुपक्तं प्रतिज्ञाप्रसक्तमेव निपातलक्षणं वर्तयिष्यामः। तदधिकारोयमथशब्दः।

उच्चावचेष्वर्थेषु निपतन्ति। उच्चावचेष्वनेकप्रकारेष्वर्थेषु निपतन्तीति निपाताः।

आह। कतमे पुनस्ते। उच्यते। **अप्युपमार्थेपि कर्मोपसंग्रहार्थेपि पदपूरणाः।** उपमेवार्थ उपमार्थः। तस्मिन्नुपमार्थे। उपमा नाम कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुण- 15 स्तस्यान्यस्मिन्नप्रसिद्धतद्गुणेर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा। कर्मोपसंग्रह एवार्थः कर्मोपसंग्रहार्थः। तस्मिन् कर्मोपसंग्रहार्थे। अर्थोपसंग्रहार्थे इत्यर्थः। कर्मशब्दो हि प्रायेणार्थपर्यायवचन एतस्मिञ्छास्त्रे। 'गतिकर्माण उत्तरे धातवः' गत्यर्था इति गम्यते। पदमेव पूरयितव्यं येषामर्थास्ते पदपूरणाः। तदेतत् त्रिधात्वर्थभेदकृतं निपातानां समासेन॥ 20

---

1. A. पृथक्त्वमहमिति विज्ञापते। 10. *m.* अल्प for अल्पा. 11. *m.* reads °कर्मनिष्ठा°. 12. *bi.* वर्णयिष्याम; *m.* °विकारार्थोयमथ°. 14. All our Mss. read कतमे पुनस्ते य एतेषामित्युच्यते, *bi.* as our text. 16. *a. d.* सोपमार्थोपसंग्रह एवार्थः. 17. *a. d.* अर्थोपसंग्रहार्थे। कर्मशब्दो हि &c. 19. *a. b. d.* त्रैरात्र्यं for त्रिधात्व.

---

9. The लक्षण is given in the last section.

आह। किमविशेषेण सर्व एतस्मिन्नर्थे निपतन्ति। नेत्युच्यते। तेषामेते चत्वार उपमार्थे भवन्ति। तेषां सर्वेषां मध्ये एत एव चत्वार इव न चित् नू च प्रायोदृत्योपमार्थे भवन्ति।

अधुनैवमुक्त्वा भाषाच्छन्दःप्रविभागेनोदाहरणमेकैकं दर्शयति। समासनिस्ताराभ्यां हि शास्त्राणि प्रतीयन्ते। तत्रायं तावत्। इवेति भाषायां च उपमार्थीयः। मन्वध्यायं च। छन्दसि चेत्यर्थः। कश्चित् छन्दस्येव भवति न भाषायां कश्चिद्भाषायामेव न छन्दसि कश्चिदुभयत्र इत्यतो विभागेन प्रदर्शते।

आह। किमुदाहरणमिवेत्यस्योपमार्थीयस्य। का चोपमाशब्दस्य व्युत्पत्तिरिति। उच्यते। उपगम्यातयागुणेर्मीयत इत्युपमा। अग्निरिवेन्द्र इवेति।

"अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि।
हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व॥

इत्येतदुदाहरणम्। तपसः पुत्रो मन्युर्नाम तस्येयमार्षम्।

आह। ननु सर्वे एवायमृग्यजुःसामाथर्वात्मको ब्रह्मराशिरादित्यान्तरपुरुषस्य भगवतो हिरण्यगर्भस्य प्राणस्यार्षम्। ऐतरेयके रहस्यब्राह्मणे "शतर्चिनो माध्यमाः" इत्येवमाद्यनुपरिक्रम्य पुनः पर्यावृत्य "एतमेव सन्तं शतर्चिन इत्याचक्षते" "एतमेव सन्तं गृत्समद इत्याचक्षते" इत्येवमादिना क्रमेण मन्त्रदृक्शब्दान् प्राणे

---

2 *a* इवनुचित्रव॰ प्रायोदृत्या &c, *b d* इवनचित्रव॰ प्रायोदृत्या &c. 4. *m* °मुक्ता; *d.* उदाहरणे for उदाहरणं; *m* adds च after दर्शयति; *m* omits all from समास° to व्युत्पत्तिरिति उच्यते l. 9 below. 6. *d.* om. च after मन्त्रध्याय. 8. *a. b. d.* °पमार्थोपत्वे for °पमार्थोपस्य of *b*. 9 *a b. d. m.* read उपगम्यानयागुणेर्मीयते[मीमित *m*;]. 13 *a d* ऋग्यजु॰सामात्मको. 14. *m. b*. हिरण्यगर्भप्राणस्य for हिरण्यगर्भस्य प्राणस्य of *a. b. d*; *b*. मध्यमाः for माध्यमा. of *a. b. d. m.* 15. *a. d* पुनः पर्यावृत्येतमेव &c

---

9. The two examples are taken by Durga to be parts of two ṛiks one of which is explained in our Mss. here, and the other below. May it be that Yâska intended one of these as an illustration from the यजु: and the other from the Veda?

सङ्ग्. For quotation *vide* RS. X. 84. 2.

if we take for quotation see Ait Âr. II. ii. 1. There the reading is शतर्चिन to stand एतमेव सन्तम्, and there is also a similar invertion in the next

6. The

निगमयति। अपि चैता ऋचः शौनकेन संदृष्टा यस्यामार्षाणि चिन्त्यन्ते सा च स्मृतिः। श्रुतिस्मृत्योश्च विरोधे श्रुतिरेव गरीयसीति। न्यायविदः खल्वपि पठन्ति "विरोधे त्वनपेक्षं स्यात्" इति। तस्माद्विरोधाभिधानमनर्थकमेवेति। उच्यते। न ह्येकस्मादात्मनः परिशयमात्रशेषः सन् शौनकः कुर्यात्। पश्यतो ह्युभावपि। तेन क्षेत्रज्ञाद्युभावपि मन्त्राभिव्यक्तौ व्याप्तौ। बुद्धिदेवतात्वेन हिरण्यगर्भः क्षेत्रज्ञोवस्थितः सर्वभूतानां कर्मविपाकानुरूप्येण यमर्थं शब्दं वा दर्शयति तमितरो विशिष्टकर्मकारी क्षेत्रज्ञो बुद्धिस्थः पश्यति। तत्रैवं सति वसिष्ठादिर्मन्त्रदृक् क्षेत्रज्ञस्तेनैवोपदर्शितं मन्त्रं पश्यतीत्युभयमुपपद्यते। एवं सत्युभावपि याथात्म्यतस्तावदनुसंधेयौ मन्त्रप्रयोगकाले उभयोरर्थवत्त्वाय। यत् पुनरेतदुक्तं भवति श्रुतिस्मृत्योर्विरोधे स्मृतिरनपेक्षेति। न हि विरोधोस्त्युभयोरपि संधीयमानयोः। अपि च श्रुतिपूर्वकमेवेदं स्मरणं न स्वतन्त्रम्। ताण्डके हि रहस्यब्राह्मणं दर्शयति "येन साम्ना स्तोष्यन् स्यात् तत्सामोपधावेत्। यस्यामृचि तामृचम्। यदार्षेयं तमृषिम्" इति। तत्र यदुक्तं स्मृतिरियमिति तदयुक्तम्। तस्माद्वक्तव्यमेव विशेषार्षेयमिति।

---

1. *a. b. d. m.* अपि चैता ऋचः for अथार्षेयाः of *bi*; *a. d.* सदृष्टा, *b.* साद्दृष्टा, *bi. m.* संदृष्टाः; *a. b. d.* चिन्त्यन्ते, *m. bi.* विदन्ते; *m.* तथा च for सा च. We read with *a. d.* as it makes sense, though the form सदृष्टा is ungrammatical. 3. *a. b. d. m.* न ह्येकस्मात् for नह्येकस्मात् of *bi*. 4. All Mss. as well as *bi.* read परिशय°, but it makes no sense. Is it पुरिशय? The text is unintelligible yet retained as such for want of better help. *b. a. d* व्याप्तौ for व्याप्तौ; *a. b. d. m.* क्षेत्रज्ञो व्यवस्थितः for क्षेत्रज्ञोऽवस्थितः of *bi*. 6. *a. b. d. m.* कर्मविपाकानुरूपेण for °रूप्येण of *bi*.; *m.* दर्शयते for दर्शयति; *a. d.* तमितरो for तदितरो of *bi*. 7. *d.* वसिष्ठादिर्मन्त्रदृक्; *m.* om. from तत्रैवं सति to उभयमुपपद्यते; *a. d.* उभयमुत्पद्यते. 8. *a. d.* एवं सत्युभावपि य[था *d.*]थात्म्यतस्तावदनुसंध्येयौ मन्त्रप्रयोगकाले उभयोरर्थतत्त्वाय, *b.* as the text, but has तौ for तावत्, *m.* यथात्मतस्तावदनुसंधेयः, and अर्थत्वाय; *m.* om. यत्. 9. *m.* om. पुनः and भवति; *bi.* °विरोधे श्रुतिरनपेक्ष्येति, *a. d.* स्मृतिरनपपेक्षेति, *b.* स्मृतिरनपेक्षेति (preferable), *m.* स्मृतिरपपेक्ष्यति। 10. *m.* काण्डके for ताण्डके. 11. *bi.* यत् साम्ना for येन साम्ना of all our Mss. 12. *bi.* यदार्षं for यदार्षेयं of all our Mss.; *a. d.* यदृषिक for तदयुक्तम् of *b. m. bi.*; *b.* यस्यात् for तस्मात्. 13. *bi.* विशिष्यार्षेयमिति, *m.* विशेषार्षमिति.

---

1. Grammar would require here संदृष्य for संदृष्ट्वा. The स्मृति probably means the सर्वानुक्रमणी.

2. The quotation is from Jai. Sū. I. iii. 3.

त्रिष्टुवेषा मान्यवी श्येनादिषु निष्केवल्ये शस्यते । मन्युः पुनरिन्द एव माहाभाग्यात् कर्मपृथक्त्वाच्च । अथवा देवतान्तरं पृथगभिधानश्रुत्यभिसंबन्धात् ।

आह । ननु मान्यवो मन्त्रो माहेन्द्रमहयजिसंनिधौ निष्केवल्ये शस्यमानो महेन्द्रमभिहितसंस्कारेणासमर्थ एव वक्तुम् । अथ किमर्थमयं निष्केवल्ये शस्यत इति । उच्यते । अन्यदेव हि स्तुत्यभिव्यङ्ग्यमपूर्वमारादुपकारकभूतं माहेन्द्रमहयजिव्यङ्ग्यस्यापूर्वस्य । "अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्" इति न्यायविदो याज्ञिकाः पठन्ति । वक्ष्यति चायमपि 'इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाजः क्रतुभाजश्च भूयिष्ठाः' इति । स एष मन्युः स्तुतिभागेव । यथा "अभि त्वा शूर" इति इन्द्र एव तस्मिन्निष्केवल्ये, यथा "आपो हि ष्ठा" इत्याप आग्निमारुते । सूर्योदय आश्विने एवम् ।

हे मन्यो सहुरे-सहनशील एतस्मिन् शत्रूणामभिभवनकाले प्रत्युपस्थिते हूतः-आहूतः सन् अस्माभिः सेनानीः-सेनाग्रणेता नः-अस्माकम् एधि-भव । ततश्च अग्निरिव लेलिपतः-दीप्तस्त्वं तेजसा भूत्वा सहस्व-अभिभव तानस्मच्छत्रून् । इत्थं-हत्वैव यदेतेषामस्मच्छत्रूणां वेदः-धनं तत् त्वमादाय तेषामस्मद्योधानाम् ओजः-बलं मिमानः-निर्माय यथावत्तु यथार्हं विभजस्व । येपि च केचिद्धतावशिष्टाः भूयः-

---

1. *d.* मान्यवे; *a* निष्केवल्येषु 2 *a. b. d.* पृथगभिधानस्तुत्यभिधानसंबंधत्वात *m.* °श्रुत्यभिसंबंधात्, *bi.* °श्रुत्यभिधानसंबंधात् 3 *m.* माहेन्द्र महः, *a d.* माहेन्द्रा महयजि°; *m* माहेन्द्र for महेन्द्र. 4 *bi* व्यभिहितसंस्कारेण for °भिहितिस° of *a b d m.*; *m.* किमर्थमेव for °र्थमय. 5. *a b. d. m.* स्तुत्यभिव्यंग्य for स्तुत्यभि° of *bi*; *m.* माहेन्द्र महयजि°. 6 *b* अपि च for अपि वा; *m* स्तुतिसंयोगात्; *a d.* °शंसतीति, *b. bi* °शंसती. *m.* °शंसति, *bi* विदधताम् for विदध्याताम् of all our Mss. 8. *a.* स्तुतिभागेन for °भागेव, *a. d.* add च after यथा. 9. *m* यथापीहेडीये यथाग्निमारुते. 11. *a. d m* सहनशीले!; *m.* एतस्मिन्शत्रूणां, *a b. d. m.* om हूत, *bi.* हूत°. 13 *bi.* om भूत्वा after तेजसा, *m.* om सहस्व and reads अभिधाव for अभिभव. 14. *a. d* add स्वं before वेदः. 15. *b.* यद्यपि च केचिद्धतावशिष्टा भूयः &c

---

1 एषा i. e. RS. X 84. 2, given above fully. Jîvânanda's edn. cites RS. X 83. 2 in support of मन्यु पुनरिन्द्र एव.

6. For the quot see Jai Sû. II. 1. 24.

7. वक्ष्यति च i. e. in Nir. VII. 13.

8. For quot. see RS. VII. 32. 22.

9. The quot. is from RS. X. 9. 1.

मृधकारिणः अस्मद्द्विषः अस्मत्तः प्रत्याजिहीर्षन्त्येतद्धनं तेषामोजो मिमानः तूलयित्वा कियदवशिष्टबला ह्येते न शक्ताः प्रत्यार्द्धुमित्येव मिमानस्तावन्मात्रशेषबलान् कृत्वा त्वं विनुदस्व-एनान् दूरं प्रक्षिप अपुनरागमनाय ।

द्वितीयमुदाहरणमेतस्यैव

"इहैवैधि मापे च्योष्ठाः पर्वतइवाविचाचलिः'।
इन्द्रइवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥"

' अनया चानुष्टभा ध्रुव आङ्गिरसो राजानमभिषिषेच । इहैव-राष्ट्रे त्वम् एधि-भव । मा चातस्त्वम् अप च्योष्ठाः । पर्वत इव अविचाचलिः-अविचलनशीलः । इन्द्र इव च इह ध्रुवः-शाश्वतः तिष्ठ । स्थित्वा च इदं राष्ट्रम् इह उ-एव विभूतियोगेवस्थितं धारय । इत्याशीः ।

भाषायां प्रसिद्धमेवेति कृत्वा नोदाहरणं पठितम्। अथवा एते एव। अग्निरिव तीक्ष्णः। इन्द्र इव विक्रान्तः ।

---

1. Between °त्येतद्धनम् and तेषां all our Mss. add:—तानपि विनुदस्व दूरम-पुनरागमनाय । अथवा ओज इत्यस्योत्तरेण विनुदस्वेत्यनेन क्रियापदेन योग' । कथं । हत्वा शत्रूनाजयित्वा च तद्धन ये केचिद्धतावशिष्टा अस्माद्विषः प्रत्याजिहीर्षन्त्येतद्धनमस्मत्तः (*b. l.* in this passage:—*m. b.* add प्रेरयस्व after विनुदस्व ; *b.* यद्वा for अथवा; *m.* om. अनेन before क्रियापदेन ; *b. m.* संबन्धः for योगः ; *b.* om. च before तद्धन ; *b* इतनावशिष्टाः after केचित् ; *b.* अस्माद्विषत. for द्विष ; *b.* अस्मत् for अस्मत्तः.); *b. m* तुलयित्वा for तूलयित्वा. 2. *a. d.* ह्येते तेन शक्ताः; *m.* om. त्व. 3. *m.* om एनान्, प्रक्षिप, *a. b. d* om. प्रक्षिप. 4. *a.* एव तस्यैव for एतस्यैव. 7. *bi.* अभिसिषेच. 8. *a b. d m.* om. अविचाचलिः; *b.* om. च after इन्द्र इव. 9. *a. d.* om. च after स्थित्वा; *m.* reads राष्ट्रे for राष्ट्र; *a b d. m.* om. उ; *a. d. m.* विभूतियोगे-ऽवस्थित, *bi.*, °योगेन स्थित. 11. *a. d.* पठन्ति, *b.* पठति, *m. bi.* पठितं.

---

1. The addition after °तद्धनं (noticed in the *v. l.* given above) is common to all our Mss. and would perhaps look natural. It also accounts for the repetition of ओजो मिमानः in construing the text as found in the reading of *bi.* which I have allowed to stand. The addition is not introduced in the body of the commentary as without it also a connected idea is somehow made out by the reading as it is printed. Yet I think it probable that the addition formed part of the original reading of the commentary.

5. The quot. is RS. X. 173. 2.

नेति प्रतिषेधार्थीयो भाषायां प्रसिद्धः । उभयमनिन्द्र एव मन्यमानः । "नेन्द्रं देवममंसत" इति । नेन्द्रं देवमात्मनो दीपयितारममन्यन्तादृ । [illegible] देवे अं ।

आह । किं पुनर्लक्षणमिति । उच्यते । प्रतिषेधार्थीयः पुरस्तात्प्रयुज्यमानो ऽनुपसर्गस्य यत् प्रतिषेधति । दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपाधारस्तस्य येनोपमिमीते इति येनार्थेनोपमेयमर्थमुपमिमीते । तद्यथा

"हत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम्
ऊधर्न नग्ना जरन्ते ॥"

काण्वो मेधातिथिरात्रिरसश्च प्रियमेध ऐन्द्रं सूक्तं ददृशाते । तत्रैषा गायत्री । येषामपि विनियोगः क्वचिदन्यत्र नास्ति तेषि वाचःस्तोमे विनियुज्यन्ते । हृत्सु पीतासः-पीताः सन्तो हृदयेष्ववस्थिताः सोमाः युध्यन्ते इव-संप्रहारमिव कुर्वन्ति अहं विशिष्ट इत्येवं स्पर्धमानाः । क इव । दुर्मदासो न । दुर्मदासः "आजसेरसुक्" । यथा कुत्सितमदाः केचित् पुरुषाः सुराया पीतायां सत्यां युध्येरन् एवम् । किं च तमेव यजमानं जरन्ते-स्तुवन्तीव आत्मलाभपरितुष्टाः । कथं जरन्ते । ऊधर्न-ऊधरिव-रात्रिमिव नमाः भूत्वा स्त्रियं संप्रयोक्ष्यामह इत्येवमभिप्राया इव केचिद्विशिष्टाः पुरुषाः ।

चिदित्येषोनेककर्मा । चिदित्येषोनेकार्थोपि सत्युपमार्थीयसंयोगादत्रोदाहृतः । कथमयमनेकार्थ इति । उच्यते । आचार्यश्चिदिदं ब्रूयादिति पूजायाम् । आचार्य

---

2 *m* °मन्यत for अमन्यन्त, *b. m* इति शेष, *d* देवते शेष, *b. c* om. it altogether. 3–5 *a. d* आह किं पुनर्लक्षणमिति । उपमार्थीय उपरि[वि *d*]ष्टादुपाधारस्तस्य येनार्थेनोपमेयमर्थमुपमिमीते, *b* आह किं पुनर्लक्षणमिति । दुर्मदासो न सुरायामिति उपमार्थीय उपरिष्टादुपाधारस्तस्य येनार्थेनोपमेयमर्थमुपमिमीयते, *m* om. इति after उपमिमीते. 9. *a. d* आचास्तोमे for वाच स्तोमे. 10. *b. c.* om. इव after युध्यन्ते 13. *m* ष्टुवन्तीव for स्तुवन्तीव, *b* स्तुवन्ति च. 14. *m* सम्प्रोक्ष्यामहे ?, Jîvânanda's edn. adds after °मिप्राया इव -नमा स्तोत्राः । ते च ऊधर्न पयसा पूर्ण गवादेरूध इव सोमपूर्ण त्वां जरन्ते स्तुवन्ति इति सायण', evidently a marginal note wrongly incorporated into the commentary. 15. *a. d.* उपमार्थी[*d* धे]यसंयोगेनोदाहृत. 16. *m* adds (between आचार्य. and एव) कस्मादाचार्य आचारं ग्राहयत्याचिनोत्यर्थानाचिनोति बुद्धिमिति वा.

---

1. The quot. is from RS. X. 86. 1.
2. The reference is to Nir. XIII. 4. Pariśishṭa.
6. The quot. is RS. VIII. 2. 12.
11. The quot. is Pâṇ. VII. i. 50.

[कोन्य एवं वक्ष्यतीति। दधिचिदित्युपमार्थे दधिरव ओदन इति। गिरिदाहरत्यवकुत्सिते। भृशं कुत्सिते। पुरुषानपि सायदाहेति किं हरिष्यसि॥

नु इत्येषोनेककर्मा। कथम्। इदं करिष्यतीति। कथं हि क्रियाया हेतुनिमित्तमित्यर्थः। कथं नु करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत् पुनरनुपृच्छति कथं नु करिष्यति तदज्ञानमेतस्मिन्ननुपृष्टे। नन्वेतदकार्षीदिति च। अनुपृष्ट एवायं भवतीति। नन्वयमकार्षीदेतत् कथमयं स्यादिति कथं करिष्यतीति। अथाप्युपमार्थे भवति। तथया

"अक्षो न चक्र्योः शूर बृहन्त्र तै मह्ना रिरिचे रोदस्योः।
वृक्षस्य नु ते पुरुहूत वया व्युतयो हरन्त्रि पूर्वीः॥"

भरद्वाजो गार्हपत्योत्त्रिष्टुभः पूर्वेणार्धेनेन्द्रं स्तुत्वोत्तरेणोपालभमानः। हे शूर इन्द्र पुरुहूत महानक्ष इव चक्र्योः प्र रिरिचे-प्रकर्षेणातिरिच्यते तव मह्ना-महत्त्वेन विभूतिः। कुतोतिरिच्यते। रोदस्योः-द्यावापृथिव्योः। तथापि त्वैवं विभूतियुक्तस्य सतस्तव त्वद्भक्तानामेवास्माकं सतां वृक्षस्येव वयाः-शाखाः पूर्वीस्तयः-पूर्वैस्त्वयागम-नमार्गाः विहरन्तः-रिक्तीभूतास्तवागमनान्। अहो कष्टं मन्दभागधेयतास्माकं येन नो धनं तदस्ति येन त्वो यजेमहि। किमत्र त्वो वक्ष्याम इति।

---

1. a. d. ओदनमिति. 2. m. adds कुरुमाषाः कुलेषु सीदन्ति। after भृशं कुत्सिते. 3. d. क्रिया° for क्रिया°; b. आहारिष्यति for °सि. 4. m. adds हेत्वपेक्षो after करिष्यतीति, m. क्रिया for क्रियाया; d. m. हेतुनिमित्त°. 5 b. om. नु after कथं; m. om. करिष्यतीति पृष्ट्वा: m. °नुपृच्छति for °सि 6. m. °नुज्ञात° for °नुज्ञान°. 7. a. b. d. अथाप्युपमुपमार्थे भवति. 8. a. om. तथया. 11. b. adds इति after पूर्वीः; a. d. पारिप्लवो after बार्हस्पत्यो. 12. a. b. d. चक्र्योः for चक्रयोः. 14 m. adds तेषु after वृक्षस्येव; bi. पूर्वीस्म° for पूर्वैस्म° of our Mss. 15. bi. तत्त्वाग° for तत्त्वाग° of our Mss. 16. bi. adds न after धनं; b. m. वरयाम for वरयामः.

4-6. All the Mss. of the commentary as well as the editions are unsatisfactory from इदं नु to अनुपृष्टे. May the text be इदं नु करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत्पुनरनुपृच्छति कथं नु करिष्यतीति तदनुज्ञानमस्मिन्ननुपृष्टे। I allow the text to stand as the Mss. read it, but I cannot understand the passage as it is.

9. The rik quoted is RS. VI. 24 3.

यथाः—शाखा इति पर्यायवचनः । चेतेर्वया इति निगमप्रसक्तस्य निर्वचनम् । शाखा खशायाः इति पर्यायप्रसक्तस्य । व्याख्याता उपमार्थीयाः ॥

अथानन्तरं प्रतिज्ञाप्रसक्तानेव कर्मोपसंग्रहान् वक्ष्यामः । अथ यस्यागमादर्थपृथक्त्वमद्द विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्करत्स कर्मोपसंग्रहः । यस्यागमादध्याहारादध्रूयमाणस्येव निपातस्य सरूपविरूपैकशेषादर्थतो वा पृथक्त्वमद्द पृथग्भाव एव विज्ञायते । तद्यथा देवदत्तयज्ञदत्तौ देवदत्तश्च यज्ञदत्तश्चेति ।

आह । द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते न तु तयोरौद्देशिकमिव पृथक्त्वमिति यथा गाः अश्वान् पुरुषान् पशूनिति प्रत्येकमुद्दिश्यमानानाम् । इह तु विग्रहेण चशब्दागमादेतत् पृथक्त्वमुपजायते । नानाग्रहणं द्वयोर्बहूनामर्थानां विग्रहः । स एव पृथक्त्वाद्धेतोः पृथक्त्वेन निमित्तेनोपलक्ष्यमाणो यस्माद् द्वावर्थौ बहून् वा गृहीत्वैकस्मिन् कर्मण्युपसमावेष्टयति तद्यथा देवदत्तयज्ञदत्तौ पचेते इत्येवम् । तस्मात् कर्मोपसंग्रह इत्येतदस्मैव तद्भवति । अथवा बृहस्पतिश्चेत्युक्ते प्रजापतिरुक्तोपि द्वितीयो गम्यते प्रजापतिश्चेति ।

कतमः पुनरसाविति । उच्यते चेति कदाचिदयमेव समुच्चयार्थः उपाख्यायपर्यायाभ्यां विगृहीताभ्यामेव संयुक्तः प्रयुज्यते । यथा

" अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ ।
अरातीवा चिदद्रिवोनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥"

घोरपुत्रः प्रगाथोनयेन्द्रया पङ्क्त्या इन्द्रस्य सख्यार्थी सन्नब्रवीत् । हे वृत्रहन्-इन्द्र । अहं च-प्रगाथः त्वं च सं युज्याव एकस्मिन्नर्थे सति प्राप्तिलक्षणे युज्यावहै आ सनिभ्यः-आ प्राप्तेः । अरातीवा इत्येकं पदम् । अथैवमादौ संयुक्तौ दृष्ट्वा हे अद्रिवः । अद्रिर्वज्रस-

---

5 *a. b d.* °विरूपैकशेषादर्थपृथक्त्वमद्द, *but b.* om. अद्द. 7. *m* नन्वु *for* न त्व. 8 *d* प्रत्येकिमु°?; *d* om. च after विग्रहेण. 9 *a. d* तेनाग्रहण *for* नानाग्रहणं, *b.* नानात्वेन ग्रहण, *a. d* स एव *for* स यथ. 10. *a.* यतस्मिन् *for* एकस्मिन्. 11. *m.* इत्येवं नामैव *for* इत्येतन्नामैव. 13 *d.* कदाचित्तयमेव. 14. *b. m.* सप्रयुक्तः *for* संयुक्तः. 17. *a. d.* om पङ्क्त्या; *m.* सख्यार्थी। 18. *d. m.* प्रगाथस्तर्व, *b.* प्रगाथ त्वं ?; *b.* युज्यावहै *for* युज्यावहै; *a. d.* आ सनि प्राप्तेः.

---

1 Should it not be पर्यायवचनम्? We read, however, with all our Mss. and *b*.

15. The quotation is RS. VIII. 62. 11.

द्वन्। हे शूर विक्रान्तेन्द्र अरातीवा चित्। अदानशीलोपि दानशीलतामुपेत्यानुमंस्यत एवावयोर्दानम्। मद्राः-मन्दनीयाः इन्द्रस्य रातयः-दानानीत्येवं मन्यमानः। को हि नाम त्वत्संयुक्तानामस्माकं न दद्यादित्यभिप्रायः॥

अथाप्याकारः। **एतस्मिन्नेवार्थे**-समुच्चयार्थे **देवेभ्यश्च पितृभ्य एत्याकारः।** अयमस्मिन्मन्त्र आकारः

"यो अग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ॥"

अनुष्टुप् यामी पितृयज्ञे विनियुक्ता। योग्निः कव्यस्य वोढा यस्यायमधिकारः कव्यानि वोढव्यानीति स इहास्माकं पितृयज्ञे होतृत्वेन स्थितः पितॄन् आहूय यक्षत्-पूजयन्नित्यर्थः। किंलक्षणान् ऋतावृधः-सत्यवृधो वा यज्ञवृधो वा। किंच। प्रेदु हव्यानि वोचति-वोचतु च प्रवोळ्हतानि हवींष्यस्मत्प्रदत्तानि। कस्मै। देवेभ्यश्च पितृभ्यश्च इति॥

वेति अयं विचारणार्थे। समुच्चयार्थीयप्रसङ्गेनोद्दाल्यते

"हन्ताहं पृथिवीमिमां निदधानीह वेह वा। कुवित्सोमस्यापामिति॥"

ऐन्द्रो लवस्तस्येयमार्षी गायत्री। हन्त इदानीमेव अहम् इमां पृथिवीं इह वा अन्तरिक्षलोके। इह वा-द्युलोके। अथवा इह-दक्षिणे स्कन्धे इह वा-सव्ये निदधानि-अवस्थापयामि अतः स्थानादुद्धृत्य। अथ किमर्थं ब्रूषे कुवित्सोमस्य-बह्वहं सोमं अपां-पीतवानिति। अस्य मे सोमपानस्यानुरूपमेव वीर्यमस्तीत्यभिप्रायः।

अथापि वेत्ययं समुच्चयार्थे भवति॥ ४॥

---

1. *a. d.* om. अरातीवा चित्; *a. d. bi.* om. after (मद्रिव') अद्रिर्न्नस्तदद्य हे शूर विक्रान्तेन्द्रः; *a.* अनुमंसत, *m.* अनुमंतस्यत। 4. *a* आकार', *d* अथाप्यकारः; *a. d.* एतस्मिन्समुच्चयार्थे, *b.* अथाकार एतस्मिन्समुच्चयार्थे. 5. *d.* अयमेतस्मिन् 6. *a. b d.* कव्यवाहन.। 8. *bi.* आग्नी for यामी of *a. b. d. m.*; *a. d.* कव्यवोढा, *b.* कव्यस्य वोढा. 9. *a. d.* होतृत्वेन व्यवस्थित; *bi.* om. आहूय after पितॄन्. 11. *a.* वोचतु वा, *a. b. d. m.* read °प्तानि for °प्रदत्तानि of *bi.* 15. *b.* ईन्द्रो for ऐन्द्रो; *b.* तस्येदमार्षं, *m.* स्तुत्येयमार्षं? 16. *m.* अथ for अथवा; and दक्षिणस्कन्धे for दक्षिणे स्कन्धे. 17. *bi.* श्रुते for ब्रूषे of our Mss. 18. *a. d.* वीर्यमस्यास्तीत्यभिप्रायः. 19. *m.* om. तात्पर्यं.

---

6. RS. X. 16. 11.
14. RS. X. 119. 9.

वायुर्वा त्वा मनुर्वा त्वेति ॥ अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते। अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं न करिष्यतीत्यथान्युकार एतस्मिन्नेवार्थे उत्तरेण मृषेमे वदन्ति सत्यमु ते वदन्तीत्यथापि पदपूरण इदमु तदु। ह्वीत्येषोनेकक्रमेदं हि करिष्यतीति हेत्वपदेशो। कथं हि करिष्यतीत्यनुपृष्टे। कथं हि व्याकरिष्यतीत्यसूयायाम्। किलेति विद्यामर्षे एवं किलेत्यथापि न नु इत्येताभ्यां संप्रयुज्यतेनुपृष्टे न किलैवं ननु किलैवम्। मेति प्रतिषेधे। मा कार्षीर्मा हार्षीरिति च। खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्बभूवेति। शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे। नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागत्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रादित्सांचकार। स इन्द्र एत्य परिदेवयांचक्रे ॥५॥

वायुर्वा त्वा मनुर्वा त्वेति।

"वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः।
ते अग्नेश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः ॥"

---

1. A. Bi. conclude Pâ. 2. Kh. 3. here after त्वेति. 2. R. करोत्वयमिदं ह, all others as text; A C नु for न 7, B. C. R. ननु किलैवं मेति प्रतिषेधे, A D. Bi. किलैव मेति. 11. A. अगत्य. 12. A. Bi. conclude Pâ 2. Kh. 4. here after परिदेवयांचक्रे. B. concludes also the second पाद. Some Mss. of the commentary conclude the 2nd pâda at the end of the next section A concludes the 2nd pâda at the end of the 3rd pâda of Bi. 13. a. d. मनुर्वो त्वा। अस्मिन्मन्ने। मनुष्टेषा &c 15. b. अश्वमायुञ्जन्.

---

4. Durga regards इदमु and तदु as the initial words of two riks, for which see commentary These may, however, be alike the other examples in this sect.

14. VS. IX. 7. is very similar to this in sense and reading. It reads वातो वा मनो वा गन्धर्वाः &c.

अनुब्रूथा। वाजपेयसंयोजने विनियुक्ता। हे अश्व वादुष त्वा मनुष त्वा गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। त एव च पूर्वमन्यमं युक्तवन्तो देवानामृभूणां च। त एव च तस्मिन्नवनादधुरुपहितवन्तो यस्मादतो ब्रवीमि मनापि चाग्रे वनथं त एव युञ्जन्तु जवं चास्मिन्नाद्धवितेति।

अह इति च ह इति च क्षुब्धेतौ **विनिग्रहार्थौ भवतः।** तयोः पुनरेतयोरेव प्रयोगस्वाभाव्यम्। द्वयोर्वाक्ययोरेककाले प्रकृत्योः **पूर्वेण** पूर्ववाक्यगतेनार्थेन **संयुक्तौ प्रयुज्येते।** तद्यथा। **अयमहेदं करोत्वयमिदम्।** अयमह यज्ञदत्तो गाः पायस्तु अयं देवदत्तो मुङ्क्तामिति।

हकारस्योदाहरणम्। **इदं ह करिष्यति।** यज्ञदत्त इदं ह करिष्यति। **इदं न करिष्यतीति।** ओदनं न पक्ष्यतीति।

अथाप्युकार एतस्मिन्नेवार्थे उत्तरेण। विनिग्रहार्थे भवति। स पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्तः प्रयुज्यते। तद्यथा। **मृषैते बृसला वदन्ति। सत्यमु ते ब्रह्मण वदन्तीति।** विनिग्रहो नाम विभाषितावस्थितयोर्यज्ञदत्तदेवदत्तयोरेकस्मिन् यज्ञदत्तेनिरुक्तस्तगोनामयनस्य नियमेन ग्रहणं यत् स विनिग्रहः। तदर्थौ विनिग्रहार्थः। विनिग्रहार्थ एव विनिग्रहार्थीयः।

अथापि उकारः पदपूरणः भवति।

"इन्नु त्वदुरुवनं पुरुवाज्योतिस्तमंसे वसुनावदस्यात्।
नूनं दिवो दुहितरो विभानीर्गातुं कृणवन्नुषसो जनाय॥"

---

2. *b. m.* अस्मिन्नर्थे for अस्मिन्रथे; *b.* एव च for त एव च of *a. b. d. m.* 3. *m.* युक्तः for युक्तवन्तः; *b. m.* अस्मिन् for तस्मिन्; *m.* om. ते before एव च. 4. *bi.* चाग्रे for चाग्रे. 5. *b. m.* विनिग्रहार्थौयौ पूर्वेण सम्बुध्येते. 6. *m.* प्रयोगस्वाभावत्वात्; *b. d. m.* om. पूर्वेण; *b.* संबुध्येते for सयुक्तौ. 8. *m.* मुङ्क्ष for मुङ्क्ताम्. 9. *a. d.* °दरादगम्। इद ह करिष्यति यज्ञदत्त इद न करिष्यति ओदनं न पक्ष्यतीति। *b.* °दरहगम्। इद ह करिष्यति इद न करिष्यतीति। यज्ञदत्त इदं ह करिष्यति ओदनं न पक्ष्यतीति। 10. *m.* om. इति after करिष्यति. 11. *a. d.* अथाप्युकार एतस्मिन्नेव विनिग्रहार्थे भवति. 12. *bi.* सम्बुध्येते for संबुक्तः of *a. b. d. m.*; *m.* reads the *pratika* मृषैते वदन्ति सत्यमु ते वदन्तीति and then adds वृषभा वदन्तीति ब्रह्मणा वदन्तीति. 14. *m.* अनियतगोनामयस्य। 16. *a. d.* अथाप्युदनुकार; *m.* पदपूरणे for °पूरणः.

---

17. RS. IV. 51. 1.

वामदेवो गौतमोनया त्रिष्टुभोपसं तुष्टाव । प्रातरनुवाकाश्विनयोः शस्यते । इदं तद् ज्योतिः यत् जनाः कथयन्ति । उकारः पदपूरणः । एतत् पुरुतमं बहुतमम् । कुतः पुरुतमम् । तमसः । यदभिभूय शार्वरं तमः स्वमात्मानमभिव्यनक्ति । अत एव तद् बहुतमम् । पुरस्तात् प्राच्यां दिशि ज्योतिः वयुनवत्–प्रज्ञानवदुत्तिष्ठति । नूनं निश्चयेन एता उषसः दिवो दुहितरः । रूपसामान्यात् दुहितृत्वम् । विभातीः–विभासमानाः गातुं गमनमपि कृतार्थं जनाना कृण्वन् कुर्वन्त्य आगच्छन्ति यथेयमनुरज्यते प्राची दिक् विध्वंसते च तम[a] । एकस्या एव पूजनार्थं बहुवचनम् ।

"तदु प्रयक्षतममस्य कर्म दंससस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिंन्वन्मध्वर्णसो नद्यश्चतस्रः ॥"

द्वितीयमुदाहरणमस्यैव । गौतमो नोधा अनया त्रिष्टुभेन्द्रमस्तौत् । प्रवर्ग्ये विनियुक्ता । तत् प्रकर्षेण यक्षतमं–पूज्यतमम् । उ इति पदपूरण एव । अस्य–इन्द्रस्य दंससस्य–दासयितुर्दर्शनीयस्य वा चारुतमं–शोभनतमम् । अन्यदपि तस्य अस्ति दंसः–कर्म किमपि बहुप्रकारं तत्सर्वमेव पूज्यमेव । इदमेव तस्य चारुतमं च पूज्यतमं च । तत् किम् । उपह्वरे यत् उपरः अपिन्वत् । उपह्वानमर्हन्ति यस्मिन् देशेवस्थिताः सहायाः स उपह्वरो देशः–जनैरनाकीर्णो यस्मिन्नेकाकी यत् उपराः–मेघपूरिताः मध्वर्णसः–मधुदका. चतस्रः नद्यः–नदीः अपिन्वत्–अपातयत् अक्षारयत् । वर्षद्वारेण यज्ञादि प्रावर्तयत् इत्यतः एतदेवास्य चारुतमं पूज्यतमं चेत्यभिप्रायः ।

---

2. *m.* यज्ञना for यज्ञनाः ; *b.* पदपूरणार्थः for पदपूरणः. 5. *bi.* दुहितृत्वात् for दुहितृत्वम् of all our Mss. 6 *bi* कृण्वत् for कृण्वन् of all others. 7. *bi.* विध्वस्यते for °ध्वस° of all our Mss ; *b.* एकस्या for एतस्या. 10. *a. d.* नोधानया, *b.* नोधा अनया, *bi* नोधाश्चानया, *m.* om. these. 11. *b.* पदपूरण for °पूरण. 13. *b.* तत्सर्व पूज्यमेव, *m* तत्सर्वेष्वेव ?, *m* पूज्यतमे for पूज्यतमं. 14. *a. d. m.* यत् for तत् before किं. 15. *a. d* om. स and read जनैराकीर्णे for जनैरनाकीर्णो ; *b.* तस्मिन् for यस्मिन्; *a b d. m.* om. मध्वर्णस and नदीः. 16. *a. d. m.* अप क्षानयत् for अपातयत् ; *a d.* om अक्षारयत्; 17. *a. d. m* यज्ञादि वर्षद्वारेण प्रवर्तयत इत्येत एतदेवास्य चारुतमं पूज्यतमं[om *m.*] चेत्यभिप्राय , *b* यज्ञादि वर्षद्वारेण and चारुतमं पूज्यतमं चेत्यभिप्राय., *bi.* चारुतमत्व पूज्यतमत्वं चे°.

---

8. RS. I. 62. 6.

द्वीत्येषोनैककर्मा। तथया। **इदं हि करिष्यतीति** हेत्वपदेशो। **कथं हि करिष्यतीत्यनुष्टे**। **कथं हि व्याकरिष्यतीत्यसूयायाम्**। कथमयं व्याकरिष्यतीत्यकृतप्रयत्नोयमित्यभिप्रायः। असूयादसाधाच्छब्दपूर्वकोभिप्रायः परिवादोसूयेत्युच्यते। परगुणानन्यनुज्ञेत्यर्थः।

किलेति विद्यापकर्मे-विज्ञानातिशय इत्यर्थः। अन्यत उपश्रुत्यातिशयेनावधार्यान्यस्मा आचष्टे कश्चित् **एवं किल** एतदासीद्भवतीति।

अथापि न ननु इत्येताभ्यां संयुक्तः किलेत्ययं **प्रयुज्यते अनुष्टे अर्थे**। अन्यत उपश्रुत्य कंचिदर्थं नायमेवमिति ततस्तमेवार्थमन्यमनुपृच्छति। अथेतरमथइघट्टस्य **न किलैवम्** इति। **ननु किलैवम्** इति।

मेति अयं प्रतिषेधे। तथया। **मा कार्षीर्मा हार्षीरिति च अयं च प्रतिषेधार्थीय एव**।

खल्विति च। तथया। **खलु कृत्वा**। अकृत्वेत्यर्थः। देशभाषाव्यवस्थयैवंजातीयानामुपक्षिपितव्यः क्वचित् प्रयोगः। **अथापि** खल्वित्ययं **पदपूरणो** भवति। तथया। **एवं खलु तद्भवतीति**। अन्वीक्ष्यः प्रयोगः क्वचिदादवृत्तेषु।

शश्वदिति विचिकित्सार्थीयो भाषायाम्। छन्दसि पुनरन्येष्वप्यर्थेषु भवति। यथास्थानं द्रष्टव्यः। इयं चास्य शैल्यर्थमपेक्ष्य। एवंशब्दस्य पुरस्तात्प्रयोगो वा भवत्युपरिष्टाद्वा। तथया। **शश्वदेवमित्यनुष्टे एवं शश्वदित्यस्वर्यनुष्टे**। अर्थं इति वाक्यशेषः।

ननमिति विचिकित्सार्थीयो भाषायाम्। विचिकित्सा नाम विवेकपूर्वकोवधारणाभिप्रायः। तत्रायं भाषायां भवति। **उभयमन्वध्यायम्**। छन्दसि पुनरयमर्थद्वये भवति। **विचिकित्सार्थीयश्च पदपूरणश्च**।

---

1. *m.* adds च before द्वीत्येषो°. 3. *b.* om. इति after व्याकरिष्यति. 4. *bi.* परगुणानभिज्ञेत्यर्थः, we read with our Mss. 5. *bi.* adds after इत्यर्थः:-अन्यत उपश्रुत्यातिशय इत्यर्थः. 6. *m* एवं किलेति. 8. *m.* अर्थान्तरे° for अथेतरम°. 10. *m* om. अयं after मेति; *m.* om. च after अयं, *b.* खल्विति चायं प्रतिषेधार्थीय एव। तथया &c. for अयं च प्रतिषेधार्थीय एव। खल्विति च। तथया &c. 12. *a. b. d.* add एव after तथया; *a. d.* देशभाषाव्यवस्थयैवं &c.? 14. *m.* अन्वीक्षय for अन्वीक्ष्यः. 15. *a. d.* अन्येष्वर्थेषु भवति. 16. *a. d.* शीली for शैली; *b.* अपेक्षय for अपेक्ष्य. 19. *a. d.* om. उभयं, and read अन्वध्यायं पुनरयमर्थद्वये &c., *b.* उभयमन्वध्यायं छन्दसि पुन° &c., *bi.* om. छन्दसि.

उदाहरणमन्त्र निर्विवक्षुर्निदानमेवाह । अगस्त्य इन्द्राय इत्यादि । निदानवतां मन्त्राणां निदानमेव पूर्वं वक्तव्यम् । तेन खल्वतिशयार्थं उच्यमानः प्रकाशते । ततः पदानि । ततोर्थः । ततः प्रत्येकं विग्रहेण निर्वचनम् । एष हि व्याख्याक्रमः । अगः कुम्भस्तत्र स्थानः संहत इत्यगस्त्यः । स इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार । संप्रदातुमेच्छदित्यर्थः । स इन्द्र एत्य परिदेवयांचक्रे । परिदेवना नाम मन्युपूर्वको विलापः ॥ ५ ॥

"न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् ।
अन्यस्य चित्तमभिसंचरेण्यमुताधीतं वि नशयति ॥"

न नूनमस्त्यद्यतनं नो एव श्वस्तनमद्यास्मिन् यवि । द्युरित्यहो नाम धेयं द्योतत इति सतः । श्व उपाद्यंसनीयः कालो ह्यो हीनः कालः । कस्तद्वेद यदभूतमिदमपीतरदद्भुतमभूतमिवान्यस्य चित्तमभिसंचरेण्यमभिसंचार्यन्यो नानेयश्चित्तं चेततेरुताधीतं विनश्यतीत्यध्याधीतं विनश्यत्यध्यातमभिप्रेतमथापि पदपूरणः ॥ ६ ॥

न नूनमस्ति इति । विचार्यमेतन्नमैनत्तावत् । अद्यतनं ह्यविर्मम नास्तीति । नकारं दृष्ट्वाद्यतनशब्दोध्याहृत आचार्येण । प्रतिषेधे हि सति प्रतिषेध्येनाप्यवश्यं भवितव्यमिति । एते च मन्त्रैकदेशा एव सन्तोध्याहाराः पदातिरेकादध्ययनकाले नाधीयन्ते । ते त्वर्थ-

---

1. *m* reads विविक्षु for निर्विवक्षु ; *b. m.* om. इत्यादि. 2. *b.* अर्थेनुच्यमान. 3 *b.* शब्दनिर्वचनम् for निर्वचनम्; *a. d.* एष हि व्याख्याक्रमः । 4. *a. b. d. m.* इन्द्रार्थं for इन्द्राय; *b.* निरूप्य. 5 *m* प्रदातुं for सम्प्रदातुं, *a. d. m.* उपेत्य for एत्य. 6 After विलाप *b.* concludes sect. 4. and adds the colophon इति निरुक्ते दैवते पञ्चाध्यायस्य द्वितीयः पादः, *a.* concludes section as ॥ to ॥ but does not conclude the pâda, *b. c. d.* conclude sect. 5 but do not mark the pâda. 11. A. B. °भूतमिति वा° for °भूतमिदम्°. 12, 13. B. C. D. R. as above, A. Bi. कृताधीतं विनश्यतीत्यध्याधीतमभि°; Bi. concludes sect. 1 of the *3rd pâda* after पदपूरणः; A. however concludes sect 5 of the *2nd pâda*. 15. *m.* अध्याहृतिपते for अध्याहृत, *a.* om. इति; *a. d.* om. अपि; *m.* प्रतिषेधेन for प्रतिषेध्येन. 16. *b.* पद for पद ; *m.* °रेकाध्यय° for °रेकाद्ध्यय°.

---

7. RS. I 170. 1,

निर्वचनकाले प्रकाशयितव्याः । अथापि स्यात् श्वस्तनं भविष्यतीति । **नो श्वः** । इदं तावदस्मदर्थमेव निरुक्तं सदस्मत्तो व्यापन्नमथ श्वस्तने का प्रत्याशा । किं कारणम् । **कस्तद्वेद यदद्भुतम्** । को हि नाम तद्वेद-जानाति यदद्भुतमनुत्पन्नं कस्य भविष्यतीति मम वा अन्यस्य वेति। कस्मात् पुनर्न विज्ञायत इति। अतो यस्मात् **अन्यस्य चित्त-मभिसंचरेण्यं**-संचरणशीलमनवस्थितमित्यभिप्रायः । उत अपि अथेति छन्दसि समानार्थाः । एतदयत्नं हविः **आधीतम्**-आख्यातमभिप्रेतं सत् मया ममेदमित्येवं तयापि **विनश्यति** एवान्यस्मै प्रदीयते । तस्मैवं सति श्वस्तनमस्माकं भविष्यतीति श्रुत एतदिति समस्तार्थः ।

अथैकपदनिरुक्तम् । **अद्य** अस्मिन् **दिवि** । **द्युस्थिरो नामधेयम्** । **द्योतत इति सतः** । द्योततेर्द्युरिति । द्योतत इति कर्तृकारकम् । सदिति यत्र ब्रूया-तत्रोच्चारित एव कारकनियमो द्रष्टव्यः । अन्यत्र यथेष्टं योज्यम् । **श्व उपाशंसनीयः** उपगम्य सचेतसा आशास्तव्यो भवत्यनागतत्वात् । **ह्यो हीनः कालः** । अतिक्रान्तो हि स भवति । श्वःसंबन्धात् ह्यःशब्दोऽयमानोऽपि निरुक्तः । **अद्भुतम्**-अभूतम् । **इदमपीतरदद्भुतम्** शोणितवर्णादि **अभूतमिव** कादाचित्कत्वात् । शब्दसारूप्य-प्रयत्नेदं निरुक्तम् । **अन्यो नानेयः** नानात्वेन व्यवस्थितस्यापत्यमसदृक्कुलजस्येत्यर्थः । अथवा न सतामानेयः । **चित्तं चेततेः** । चेतत्यनेनार्थानिति चित्तम् । **उताधीतं विनश्यतीति** । **आख्यातम्**-**अभिप्रेतम्** इति पर्यायवचनम् । एवमयमस्मिन्मन्त्रे विचिकित्सार्थीयः ॥ ६ ॥

---

2. *b*. अस्मत्तो for अस्मत्तो of all our Mss.; *b*. व्याप नूनमप for व्यापन्नमथ of *b*. *m*., *a*. *d*. व्यापन्नमप. 3. *m*. अद्भुतमुत्पन्न। 4 *m*. विज्ञायेति। 6. *b*. *d*. पत्र for पत्. 7. *b*. *d* पत्र for पत्र, 9. *b*. om अद्य. 10. *a*. *b*. *d*. *m*. द्योतते तदिति द्युरिति कर्तृकारकम् 11. *a*. *d*. तत्र तत्र for तत्र ; *d*. श्व इति उपाशंसनीयः; *b*. adds काल॰ after उपाशंसनीय॰. 12. *b*. स्वचेतसा, *b*. सचेतसा, *a*. *d*. चेतसा ; *m*. adds कालो before ह्यो as also before अतिक्रान्तो. 13. *m*. reads संबन्धात् for श्व संबन्धात् ; *b*. "विमानो" for विद्यमानो" of all our Mss.। 14. *a*. *b*. *d*. कदाचित्कत्वात्. 17. *m*. om. इति after विनश्यति ; *b*. om. पत्रम-यमस्मिन्मन्त्रे विचिकित्सार्थीयः। of all our Mss.

अथापि खलन्वलिन्नन्त्रे पदपूरणो भवति।

"नूनं सा ते मतिं वरं जरित्रे दुंहीयदिन्द्र दक्षिणा मघोनी।
शिक्षा स्तोतृभ्यो मतिं घग्भगों नो बृहद्वदेम विदथे सुवीरः॥"

सा ते मतिं दुग्धां वरं जरित्रे। वये वरयितव्यो भवति। जरिता गरिता। दक्षिणा मघोनी मघवती। मघमिति धननामधेयं मंहतेर्दानकर्मणो दक्षिणा दक्षतेः समर्धयतिकर्मणो व्यृद्धं समर्धयतीत्यपि वा प्रदक्षिणागमनादिह्यामभिप्रेत्य दिग्यस्तत्प्रकृतिर्दक्षिणो हस्तो दक्षतेस्तस्माद्दक्षकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राथुर्हनने। देहि स्तोतृभ्यः कामान्मास्मानतिदंहीर्मास्मानतिहाय दा भगो नोस्तु। बृहद्वदेम स्वे वेदने। भगो भजतेर्बृहदिति महतो नामधेयं परिवृढं भवति। वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा॥ सोमिति परिग्रहार्थीयो वा पदपूरणो वा। "प्र सोमादित्यो असृजत्"। मासृजादिति वा मासृजत्सर्वत इति वा।

"वि सोमतः सुरुचो वेन आवः"

इति च। व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनात्। अपि वा सोमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणं सोमनः सोमतः सोमातो मर्यादातः। सोमा मर्यादा विवोच्यति देशानिति॥ त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्वनामेत्येके॥ ७॥

---

1. *b* अस्मिन् for अन्दक्षिन्; after पदानि *a. f.* add इति निरुक्ते दैवतकाण्डस्य द्वितीयः पादः. 5. *A.* मंहने° for मंहते°. 9. *C. R.* नोस्तु. *Bi.* नो अस्तु. 10. *C. D R.* परिवृढं. *Bi.* परिवृढं 17. *A.* व्यवोचति, *Bi* विवोचति. *B. C. D. R.* विवोचति 18. *A.* concludes sect. 6 of the 2nd pâda, and *Bi.* sect. 2 of the 3rd pâda after इत्येके.

---

2. RS. II. 11. 21.

12. The quotation is from RS. II. 28. 4.

14. The quotation is from VS. XIII. 5, or SS. (Chh. ár.) IV. i. 5. 4.

नूनं सा ते इति। घृतसमदस्येयमार्षम्। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीये शस्यते। नूनम् इति पदपूरण एव। सा दक्षिणा ते-तव या पुत्रभावके कर्मणि। सा किं करोतु। प्रति दुग्धाम्। किम्। चरम्। कर्मणो दक्षिणागुणकात् फलप्राप्तिस्तथापि तु दक्षिणायामुपचर्यते। कस्मै। जरित्रे-स्तुवते यजमानाय। किंलक्षणा। मघोनी-मघवती-हिरण्यधान्यादिधनेन संयुक्ता तद्वतीत्यर्थः। किंच शिक्ष-देहि। कस्मै। स्तोतृभ्यः-ऋत्विग्भ्योनुकामान्। किंच मा ति धक्-मास्मानतिह्राय-अतीत्यान्येभ्यो देहीति मा दा इत्यर्थः अस्मभ्यं तावद्देहि ततोन्येभ्योपि दास्यसि चेत्यभिप्रायः। किं च भगो नः-धनं नोस्तु। येन किं कुर्याम। बृहद्वदेम-महद्जितं वदेम दीयतां भुज्यतामिति। क्व। विदथे-यज्ञे। अथवा स्वे गृहे। किं च युष्मदनुग्रहाच सुवीराः-वीरवन्तो भवेम पुत्रवन्तो यद्यपुत्राः। एवमयं मत्वर्थीयः सुः। अथ पुनः पुत्रवन्त एव ततः कल्याणवीरा इति समस्तार्थः।

अथैकपदनिरुक्तम्। वरो वरयितव्यो भवति। म्रियते ह्यसौ। जरिता गरिता गिरतेः स्तुत्यर्थस्य। मघं मंहतेर्दानकर्मणः। दीयते हि तत्। दक्षिणा दक्षतेः समर्धयत्यर्थस्य यज्ञे हि यत् किंचिद्विगतर्धिकं भवति तदियं समर्धयति विशिष्टं यज्ञस्य साधनमेतदिति। अपि वा प्रदक्षिणागमनात् दक्षिणा। दक्षिणा दिशमभिप्रेत्य। सा हि दक्षिणस्यां वेदिश्रोणावग्नेण गार्हपत्यं जघनेन सदो दक्षिणेनाग्नीध्रं गत्वा अन्तर्वेदि स्थित्वान्तरेण चात्वालमाग्नीध्रं चोत्सृज्यमाना गच्छति। दिक् पुनर्दक्षिणा हस्तप्रकृतिः। प्राङ्मुखस्य प्रजापतेर्यतो दक्षिणो हस्तो बभूव सा दक्षिणा दिगभवत्। अथ दक्षिणो हस्तः कस्माद्दक्षिण इति। दक्षतेः उत्साहार्थस्य। स

---

1. *b.* षष्ठ्यस्य for पृष्ठ्यस्य. 2. *a. m.* पदपूरणमेव for °पूरण एव; *b.* पुत्रभाविके for °भावके. 3. *b.* तथापितुदक्षिणाया। 4. *b. m.* om. जरित्रे; *d.* कस्मै ते यजमानाय. 5. *bi.* शिक्षा for शिक्ष of our Mss.; *b. m.* add हे इन्द्र before शिक्ष. 7. *b m.* दास्यसि चेद्देहीत्यभिप्रायः. 8. *b.* वदेम मदीयतां। 10. *b* पुत्रवन्त यद्यपुत्रा एव। अथं &c. 11. *bi.* एवं for एव; *d.* मवतः for ततः. 13. *bi.* om. गिरते, *b m. bi.* add इति after गरिता; *bi.* adds इति after मघं; *a d.* दानार्थस्य for दानकर्मणः. 14. *a. d.* add कृत before भवति; *b.* adds व्युत्पन्न समर्धयतीति before यज्ञे हि. 15. *a* adds हि before यज्ञस्य. 17. *bi.* °नाग्नीधीयं; *bi.* अन्तरेदिं; *bi.* अन्तरेण चात्वालोत्करौ तमाग्नीध्रं चोत्सृज्यमाना गच्छन्तीति। we read with *a. d*; *b. m.* add तां after °त्करौ; *b.* adds दिग्वस्तुप्रकृतिः before दिक्पुनः. 18. *bi.* om. यतो after प्रजापतेः. 19. *b.* adds दक्षिणो हस्तो दक्षतेरुत्साहकर्मण इति before अथ.

हुत्साहवान् भवति कर्मसु न तथा सव्यः । दाशतेर्वा स्यात् दानार्थस्य । तेनैव हि प्रायेण दीयते । अथ हस्तः कस्मात् । हन्तेः । तेन हि हन्यते । नन्वन्येनापि केनचिदेन हन्यते । एवम् । यो हन्तव्यो भवति तस्य हनने अयमेव तु शीघ्रः इत्यर्थः । बृहदिति महतो नामधेयं परिवृढं भवति इति । वीरो वीरयत्यभिप्रान् नानाप्रकारमीरयतीत्यर्थः । वेतेर्वा स्याद्गतिकर्मणः-गत्यर्थं वर्तमानस्य । गच्छत्येषासावभिमुखः शत्रून् । वीरयतेर्वा विक्रमार्थस्य । विक्रान्तो ह्यसौ भवति ॥

सीमिति अयं परिग्रहार्थीयो वा पदपूरणो वा ।

अस्यामेव तावदुभयमपि प्रदर्शयति । ततः परिग्रहार्थीयत्वे द्वितीयमुदाहरणं वक्ष्यति । गृत्समदस्य तत्पुत्रस्य वा कूर्मस्येयमार्षम् ।

"प्र सीमादित्यो असृजद्विधर्ता ऋतं सिन्धवो वरुणस्य यन्ति ।
न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन् ॥"

त्रिष्टुप् सौरी । सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते । प्रासृजत्सूर्यो रश्मीन् । सीमिति पदपूरण एव । कुतोपीत्यविवक्षितमेवैतत्पदपूरणपक्षे । अथ परिग्रहार्थीयम् । सर्वमेव परिगृह्णाति । प्रासृजत् सर्यत इति वा । विधर्ता-विधारयिता रसानां रश्मीनां वा । स्वरश्मिजालान्तर्गतस्य वा धर्ता सर्वस्य जगतः । ऋतम्-उदकमादाय पृथिवीलोकादन्तरिक्षलोकाच्च । सिन्धवः स्यन्दनाः सूर्यरश्मयः । ते हि आदित्यमण्डलान्न्यञ्चो वर्तमानाः स्यन्दन्ते वर्षकाले सूर्येण प्रसृष्ट्य उदकमादाय सार्वलौकिकं वरुणस्य-सूर्यस्य स्थानं मण्डलं यन्ति । तदेवमप्यनिशमुत्सर्गादानलक्षणं स्वकर्म कुर्वाणा न श्राम्यन्ति । न वा श्रान्ता अपि सन्तो विरागादप्येतत्कर्म विमुञ्चन्त्येते । कथं पुनः पतन्तो न श्राम्यन्ति ।

---

2. *a b. d.* add हस्तो before हन्ते, *bi* न for ननु. 3. *a. b d.* पत्र for पत्र of *bi. m*, *a d* सत्य हन्यते for तस्य हनने, *b.* सत्यं शीघ्रहनने हननेऽयमेव &c, *m.* तस्य हनते for तस्य हनने. (The reading of *a. d* is better here). 4. *a d.* परिगृह्य हि परिगृह्य तद्वतीति । 5. *bi* °प्रकार मारयती°. 6. *bi.* °मिमुख for °मिमुखः. 8. *b* परिग्रहार्थीयत्वेन. 9. *m* कूर्मस्येवार्षं 13. *a b d m* read पादपूरणपक्षे for पदपूरणपक्षे. 14. *a d.* om. वा after इति; *b m.* om. रश्मीना (perhaps better.) 16. *a.* स्यन्दनात्, *d* स्यन्दनात् for स्यन्दना, but *b. m.* स्यन्दमाना; *m bi* प्राञ्चो for न्यञ्चो. 17. *m.* स्यन्दन्ते; *d.* वर्षाकाले for वर्षकाले; *d* सर्वलौकिक; *m* सृष्ट्वा for प्रसृष्ट्य; *m.* स्थानमण्डल for स्थाने मण्डल. 18. *b* यान्ति for यन्ति, *a. d.* कर्म for स्वकर्म, *bi.* कुर्वाण. for कुर्वाणा of *d. m.* 19. *a. d.* add न before अपि; *a. m. d.* मुञ्चन्त्येते for विमु°.

---

10. RS. II. 28. 4.

किं शनकैः । न । वयो न-वय इव-पक्षिण इव शीघ्रं पतुः-पतन्तः खुया-लघुया-लघ्व्या-शीघ्रिकयापि गत्या परिजमन्-परिजमन्तः-परिगच्छन्तः सर्वमप्येतज्जगन्न शाम्यन्ति न विमुञ्चन्त्येतत् कर्म । एतद्गुणयुक्तानामप्येतेषां सूर्य एव प्रविसर्गे संयमे च ईश्वर इत्येवं सूर्यस्य स्तुतिरेषा ।

" ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । 5
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

इदं द्वितीयमुदाहरणम् । वामदेवपुत्रो नकुलेनया सिष्टुमादित्यं तुष्टाव । प्रवर्ग्ये विनियुक्ता ऋक्सोपधाने चाग्निचयने । ब्रह्म-आदित्याख्यं जज्ञानं-जायमानम् । प्रथमं-अनुत्पन्नेष्वन्येष्वदितेः पुरस्तात्-प्राच्या दिशि तदुदयोपलक्षितमेव प्राच्याः प्राचीत्वम् । **वि आवः-व्यवृणोत्**-विवृतानकरोत् । **सुरुचः**-प्रकाशरोचनान्-रश्मीन् । सीमतः 10 **-सर्वतः** । किं च स वेनः-मेधावी बुध्न्याः-बुध्नमन्तरिक्षं तदवयवभूता दिशः उपमाः -उपनिर्माण्यः तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतस्मात्ता एवोपनिर्माण्य उच्यन्ते । विष्ठाः-विस्याः । तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः । सतश्च-अभिव्यक्तस्य-स्थूलस्य असतश्च-अनभिव्यक्तस्य-सूक्ष्मस्य योनिं विवः-व्यवृणोदित्यर्थः । तदुदये ह्येवंगुणयुक्ता दिशोभिव्यज्यन्त इत्यभिप्रायः । अथवा बुध्न्या आप आन्त- 15 रिक्षास्ता उपमा इत्येवमादि सर्वं योज्यम् ।

अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणम् । सौम्रः सीमतः सोमातो मर्यादातः सीमा मर्यादा विधीयति देशाविति । विगतसंतानौ देशौ करोतीति ॥

---

1. *m.* om. खुया. 2. *bi.* गत्यापि for अपि गत्या. 3. *bi.* प्रतिसर्गे for प्रविसर्गे of *a. d.* 4. *m.* सूर्यस्तुति for सूर्यस्य स्तुति. 7. *b.* om. ब्रह्म जज्ञानमिति read by all others after उदाहरणम्, *m.* reads ब्रह्म जज्ञानं प्रथममिति ऋक्, *bi.* quotes the verse before वामदेवपुत्रो &c.; *m.* इति for इदं; *bi.* प्रवर्ग्यविनि°. 8. *a. d.* ऋक्सोपधाने. 9. *d.* अन्येषु for अन्येषु, *bi.* om. अन्येषु; *bi. a. b.* आदितः for अदिते°; *m.* अनुत्पन्ने अन्येषु अदितेः पुरस्तात् etc.; *bi.* तदुद्भवोप°; *a. d.* °लक्षितेनैव for °लक्षितमेव. 10. *a. b. d.* व्यावः for वि आवः. 11. *bi.* °पथमुतापा; *m.* om. दिशः. 12. *bi.* पतन् तस्मात् for पतस्मात् of our Mss.; *m.* adds उपमा उपनिर्माण्य after विस्याः. 14. *a. d.* सूक्ष्मयोनिः स्थानं विवः, *b. m.* सूक्ष्मस्यास्य जगतः योनिं स्थानं &c.; *m* अवृणोत् for व्यवृ°. 15. *bi.* आदित्योदये for तदुदये of all our Mss; *b.* आन्तरिक्ष्याः for °रिक्षा°. 18. *bi.* विधीव्यति.

---

5. VS. XIII. 3, or SS. (Chh. Ar.) IV. i. 3. 9.

त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्। निपातत्वेनैतदपि संदिह्यते। वक्ष्यति हि 'निपात इत्येके' इति। अतस्त्व इति ह्येवं निपातकाण्ड उदाहियते संशयपरिशोधनाय। त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम्। किं तत्। सर्वनाम। विप्रतिपन्नस्वरत्वात्स्वरमप्यवधारयन्नस्य अनुदात्तं इत्याह। कथं पुनर्विप्रतिपन्नस्वरमेतदिति। उच्यते। प्रातिपदिकस्यान्त उदात्त इत्यौत्सर्गिकं लक्षणमन्यत्रापवादात्। लक्षणविदोपि चास्यापवादं पठन्ति "त्वत्वनेमसमसिमेत्यनुज्ञानि" इति। अर्धनामेत्येके। अर्धस्यैतन्नामेत्येवमेके आचार्या मन्यन्ते। वक्ष्यति चायमपि 'त्वो नेम इत्यर्धस्य' इति। तदेतत् प्रकरणोपपदाभ्यामप्यवसेयं क्वार्धनाम क्व सर्वनामेति ॥ ७ ॥

"ऋचां त्वः पोषमास्ते पुपुष्वान्गांयत्रं त्वो गायति शाक्वरीषु।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः॥"

इत्यृत्विक्कर्मणां विनियोगमाचष्ट ऋचामेकः पोषमास्ते पुपुष्वान्होतर्गर्चंनी। गायत्रमेको गायति शाक्वरीषूद्गाता। गायत्रं गायतेः स्तुतिकर्मणः शाक्वर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्वमशाकन्नन्तुं तच्छाक्वरीणां शाक्वरीत्वमिति विज्ञायते। ब्रह्मैको जातेजाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति। ब्रह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो यज्ञस्य मात्रां विमिमीत एकोध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य

---

2 *m* इ for हि; *d* इति हैव for इति ह्येव; *m* अतस्त्व for अतस्त्व. 3 *b* किमु तत् for किं तत् of *b m*, *a d* सर्वनामाविप्रति°! 4. *m* स्वरमव्यवधारयन्? 5 *a. b d* om उदात्त, *b* adds च after अन्यत्र. 6 *a b m d* add अरोन after पठन्ति; *a d* त्वनेमसमसिमेत्यनुज्ञानि, *b* त्वात्वत् नेमसमसिमे इनुज्ञानीति, *m* त्वत्व नेमसमसिमेत्यनुज्ञानीति 8. *b* om क्व सर्वनाम. 15. C. D. read परिवृढो and परिवृढ्, B1. परिवृन्ढो and परिवृढ्.

---

2 For the quot. see p. 83. l. 2.

5. निपोदात्त उदात्त (Phitsûtra I 1) is the sûtra here referred to

6. Phitsûtra IV. 9. The readings of this sûtra in all the Mss. do not agree with one another, nor with Sidd Kâu in स्वरप्रक्रिया where the sûtra is read as त्वत्वनेमसमसिमेत्यनुज्ञानि.

7. For the quot. vide Nir. III. 20.

9. RS. X. 71. 11.

नेताध्वरं कामयतं इति वापि वाधीयाने युरुपबन्धोध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके। तत्कथमनुदात्तप्रकृति नाम स्याद्द्रष्टव्यं तु भवति।

"उत त्वं सख्ये स्थिरपीतमाहुः।"

इति द्वितीयायाम्।

"उतो त्वस्मै तन्वं विसस्रे।"

इति चतुर्थ्यामपापि प्रथमाबहुवचने ॥ ८ ॥

यथात्र सर्वनाम तथेयमृगुदाहृयते ऋचां त्वः इति। बृहस्पतेरार्षम्। ऋत्विक्कर्मणां विनियोगमनयर्चाचष्टे। ऋचां त्वः पोषमिति। य एते चत्वारो महर्त्विज एतेषां त्वः-एक इत्यर्थः। किमेकः करोति। ऋचां पोषं-पुष्टिं पुपुष्वान्-पुनः पुनर्भूतं वा देवतायाथात्म्यानुसंचिन्तनसंतानगर्भः स्थानकरणानुप्रदानवतीर्यथाकालमृचोधीयानः आस्ते। स हि तासां पोषः। कलम एक एतत्कर्म कुर्वन्नास्त इति। होता। एतत्तावद्गाध्ययनकर्म तस्मिन् होतरि विनियुक्तम्। उक्तं च "यद्वैव होत्रं क्रियते" इति। गायत्रं त्वः गायत्रमेको

---

3. B. C. D. read द्रष्टव्यपन्तु। This is the traditional way of recitation also, but makes no sense. The Nirnayasâgar edition reads द्रष्टव्यं तु instead, which makes sense, but the wording is rather unexpected, as on similar occasions we are familiar with तदेतेनोपेक्षितव्यं rather than द्रष्टव्यं. 7. A. concludes sec. 7 of the *2nd pâda*, but Bi. marks sect. 3 of the *3rd* pâda after °बहुवचने. 9. *a. d.* readऋत्विकर्मविनियोगमनयर्चाचष्टे. 10. *m* च for त्वः। 11. *d.* om. one पुनः; *a. b. d.* देवतायाथात्म्यानुसंचिन्तनसन्तानगर्भः स्थान°, *m.* देवता यथाशक्त्यनुसंचिन्तनसन्तानगर्भः स्थान°, *bi.* देवतायाथात्म्यानुचिन्तनसन्तानधर्म°. 12. *b.* ऋचावीपानः. 13. *b. m.* यत्स्मिन् for तस्मिन्. 14. *bi.* होत्रं for होत्र of our Mss.; *b.* om इति; *d.* om. एव after ऋचा; *a. d.* om. गायत्रं before एकः.

---

4. The quot. is from RS. X. 71. 5. The entire verse is quoted and explained in Nir. I. 20.

6. The quot. is from RS. X. 71. 4. For the entire verse quoted and explained, see Nir. I. 19.

14. The quot. is from Ait. Br. XXV. 8.

गायति शाक्वरीषु-ऋचु । कतमः । उद्गाता । तस्मिन्नप्येतत्सामगानकर्म विनियुक्तम् । उक्तं च "साम्नोद्गीथम्" इति । ब्रह्मा त्वः-ब्रह्मा नाम एक ऋत्विक् जाते-प्रायश्चित्ते विद्यां वदति विद्यात्रयहेतुत्वादात्मनो विद्यां-विज्ञानं; वदतीतरेभ्य ऋत्विग्भ्य इदमत्र कुरुतेति । तत्रापि ह्येतत् कर्म विनियुक्तम् । स पुनरेष सर्वविद्यः-सर्वविज्ञानस्तथाविधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमेव वेदितुमर्हति । न ह्यसर्ववित् तमधिकारं शक्नुयान्निर्वर्तयितुम् । उक्तं च "अथ केन ब्रह्मत्वं क्रियत इति । त्रय्या विद्यया" इति । यज्ञस्य मात्रां विमिमीत उ त्वः-एक इति । मीयत इति मानं कर्म तन्मानेत्युच्यते । या काचिदितिकर्तव्यता यज्ञस्य तां विमिमीतेऽर्थुर्नानाप्रकारं करोतीत्यर्थः ।

अथैकपदनिरुक्तम् । गायत्रं गायतेः स्तुत्यर्थस्य स्तूयते ह्यनेन । शाक्वर्य ऋचः शक्नोतेः इत्युक्त्वा ब्राह्मणेनापि शक्नोतेः शाक्वरीशब्दे धृतिः दर्शयति । तद्यदाभिर्बृत्रमशकद्धन्तुं तत् एतत् शाक्वरीणां शाक्वरीत्वम् । यस्मादाभिरभिभुत इन्द्रो बृत्रमशकद्धन्तुं तच्छाक्वरीत्वम् इति विज्ञायते । ऋचां शाक्वरीत्वमित्येवं ब्राह्मणेऽपि शक्नोतेरेव शाक्वर्य इति विज्ञायते । लिङ्गतोऽपि हि दर्शितं भवति आख्यातजानि नामानीति ।

ब्रह्मा परिवृढः श्रुततः स हि त्रयीं विद्यां वेद । शब्दसारूप्यप्रसक्तमुच्यते ब्रह्म परिवृढं सर्वतः । ऋगादि परं चोभयमपि तत्परिवृढं सर्वासु दिक्षु । अध्वर्युः अध्वरयुः एवमपि गृह्यत इति । पुनरप्याह । अध्वरं युनक्त्यध्वरस्य नेता-प्रापयितेत्यर्थः । स ह्यन्तं प्रापयत्यध्वरमेव । अथवा अध्वरं कामयते कर्तुम् इति

---

2 *a d* एकपक for एक. 3 *m* वदतीतरेतरऋत्विग्भ्य ! 4. *a b.* repeat इदमत्र कुरुत once more 5. *a.* त्रयीविद्यो संयुक्तो ! 6. *a. b. d. m.* read अथ केन ब्रह्मत्वमित्यनया अप्या[स्य ! *m*]विद्ययेति, *b.* अथ केन ब्रह्मत्वं क्रियत इति । अप्या विद्यया इति. 7. *a d.* add विमिमीते before एक इति. 8. *a. d.* समान for मानं of *m b.* 9. *a. d* read नानाप्रकारां for °प्रकारं. 10 *a. b. d. m* om. स्वधैकपदनिरुक्तम् ! 11 *b.* om ब्राह्मणेनापि शक्नोते. 12. *bi.* एव for एवत् of all our Mss ; *a d. m.* om. शाक्वरीणां, *b.* adds तत् before यदस्मा°. *b.* add तदेनच्छक्वरीणां before ऋचां, *b.* इत्येव for इत्येवं. 14. *b.* om ° *b.* गृह्यते for गृह्यते of all Mss. 18 *a. b. d.* °त्यध्वरम् ।

6. Phits[illegible] better).

do not agree

the sūtra is n

---

7. For the q Ait. [illegible] XXV. 8.

9. RS. X. 71 [illegible] XXV. 8.

अध्वर्युः। एतस्मिन्निर्वचने युः वन्यव इति यथा। अथवा अधीयाने तमध्वरम्। कस्मिंश्चिद् ब्राह्मणे अध्वर इतीयमेव संज्ञा भवति मन्त्रकेशवत्। एतस्मिंश्च निर्वचने युः अयम् उपबन्धः नामकरणः अध्वरमधीते यः सोध्वर्युः। विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमाचष्टे अध्वर इति यज्ञनाम। अध्वर इत्यधुना निर्वक्तव्यः। ध्वरतिर्हिंसाकर्मा। 'ध्वरति धूर्वति' इति हिंसार्थेषु पठितौ। तत्प्रतिषेधः अध्वरः अहिंस इत्यर्थः।

आह। नन्वत्र हन्यन्ते पशवश्छिद्यन्ते तृणवनस्पतयः। तत्कथमहिंसः। उच्यते। अभ्युदय एव हि सः। एवं हि श्रूयते "न वा उ एतन्म्रियसे" इति। तथा च

"कुशलमिच्छन्ति तृणानि राजन्"

इति। तस्मादभ्युदययोगादहिंस इत्युपपद्यते।

निपातः अयम् इत्येके मन्यन्ते।

एवमेकीयपक्षे निपातत्वमस्योक्त्वाधुना चोदकपक्षे स्थित्वा परपक्षमाक्षिपन्नाह। तत्कथमनुदात्तप्रकृति नाम स्यात् इति। तदेतच्छन्दसनुदात्तत्वभावं सन् कथं नाम स्यात्। ननु भवतैवोक्तम् 'उत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानि' इति

---

1. *b.* adds अपि वामीयाने मुडध्वन्धः before अथवा. 2. *bi.* मन्त्राक्षो° for मन्त्रको°. 3. *bi.* नामकरणम् for °करणः; *b.* अधीयते for अधीते? 4. *b. m. bi.* ध्वर् for अध्वर् after यज्ञनाम. 7. *m.* om. वृण°; *a. d.* क्व for तन्. 8. *bi.* एतस्मिन्म्रियसे, *b.* reads the whole verse given in the footnote. 10. *m.* om. इति after अहिंस. 12. *m.* °क्त्वाधुना &c.; *a. d.* add अनुदात्तं after शब्दरूपं. 13. *a.* om. इति after स्यात्.

---

2. The interpretation of अधीयाने etc., as printed by *bi.* seems to be inaccurate. Durga seems thereby to say that the word अध्वर् signifies by लक्षणा the person studying the sacrificial ritual. In this case the affix यु has no meaning, and hence the letter of the text, अधीयाने युडध्वन्धः, seems to be contradicted. We believe the proper idea should be that the word अध्वर्, i. e. sacrifice, signifies by लक्षणा the ritualistic treatise or a ब्राह्मण, which expounds the ritual of the sacrifice (अध्वर्). The affix यु then signifies अधीयानः e. g. अध्वरमधीते सः अध्वर्युः. We have, therefore, added punctuations to yeild this meaning.

5. Vide Nigh. II. 19. 3–4.

8. TS. XXIII. 16.

न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः।
यज्ञे दक्षिणो यत्र ते दधस्रं वा देवः सविता दाति वस्रः॥

14. अध्व्–see p. 82, l. 5.

प्रजावेभ्यसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपर आस्यमस्यते-रास्यन्दत एनदन्नमिति वा दघ्नं दृश्यतेः स्रवतिकर्मणो दंसयतेर्वा स्याद्विदंस्ततरं भवति। प्रमेया ह्रदा इवैके प्रमेया दद्दृशिरे स्नानार्हा ह्रदो ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोयापि समुच्चयार्थे भवति पर्याया इव त्वदाश्विनमाश्विनं च पर्यायाश्चेति ॥ अथ ये मन्त्रेष्वेमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कर्मामित्रिति ॥ ९ ॥

अक्षण्वन्तः कर्णवन्तः इत्येतस्यामृचि। बृहस्पतेरार्षं विद्यासूक्तं नाम। अक्षण्वन्तः-अक्षिसंयुक्ताः। कर्णवन्तः-कर्णसंयुक्ताः। एवमपि समानेन्द्रियाः समानपृष्ठोदरपार्श्वपादाः सन्तः। अपि च सखायः-समानख्याना: सर्वे मनुष्याख्याः। अथवा समानेषु शास्त्रेषु कृतश्रमाः। वैयाकरणा वैयाकरणानामेव समानख्याना नैरुक्ता एव नैरुक्तानाम्। मनोजवेषु-मनोगम्येष्वर्थेषु असमा बभूवुः। केचिद्ऊहापोहनधारणवक्तृत्वसमर्थाः केचिदनेवसः। कथमसाम्यमिति। यतो दृष्टान्तेन प्रतिपादयति। आदघ्नास उपकक्षास उ त्वे ह्रदा इव। आदघ्ना एव आदघ्नासः—आस्यदघ्नहृदपरिमाणाः केचिद् प्रज्ञया। उपकक्षासः-कक्षासन्निकृष्टदेशतुल्योदका इव ह्रदाः एके प्रज्ञया ह्रदाः स्नात्वा-स्नानार्हा-अक्षोभ्या अपरिमेयप्रज्ञानाः। ददृश्रे-ददृशिरे-दृश्यन्त इति समस्तार्थः।

अथैकपदनिरुक्तम्। अक्षि चष्टेः पश्यत्यर्थस्य। दृश्यते अनेन। अनक्तेः व्यक्त्यर्थस्य इत्याग्रायणः मन्यते। ब्राह्मणमपि चैतस्मिन्निर्वचने भवति। तस्मा-

---

1. A. B. C. अपर आस्य°, Bi. अपरे आस्य°. 3. A. ददृशिरे for ददृशिरे 4. Bi. R. ह्रदेः for ह्रादते° of A. B. C. D. 5. After समुच्चयार्थे भवति A. concludes sect. 8. of the 2nd Pâda, and Bi. sect. 4 of the 3rd Pâda. 8. d. adds सखायः after कर्णवन्त°; a. d. read अस्यां for एतस्यां; m. एतत् for नाम; d. adds (after नाम) तत्रेयपृक्. 9. bi. om. कर्णवन्तः कर्णसंयुक्ता° before पक्षपि. 10. m. om सन्तः; a. b d. m. om. सखाय; m. समानाख्यानाः; a. b. d. मनुष्याख्याः, bi. m. मनुष्या°. 11. m. om. वैयाकरणा°. 12. m. क्वचित् for केचित्; b. m. °पोहकरण° for पोहनधारण°. 13. b m. कथमसाम्यमिति, a. d. कथममायान्यमिति, bi. कथमशायान्यमिति; a. d. दृष्टान्तं न दर्शयति for दृष्टान्तेन प्रतिपादयति. 14. m. om. pratîka आदघ्नासः etc.; d. आस्यदघ्नहृदयपरिमाणा केचित्. 15. m. om. एके. 16. a. b d. °om. स्नात्वा; bi. om. स्नानार्हाः 18. bi. अथैकपदंनिरुक्तम्; a. adds इति after अनेन. 19. a. आग्रायणः for आग्रायण°; bi. ब्राह्मणमपि for ब्राह्मणमपि.

देते व्यक्ततरे इव भवत इति ह विज्ञायते यस्मादिदं नामेति। किमिति प्रकृतमपेक्ष्य। अथवा यस्मादेते तेऽर्थेषयवमूयिष्ठे तस्मात्कारणादित्येवं यच्छब्दमन्वाहृत्य विद्यमानमविद्यमानं चोपाय तस्माच्छब्दस्य सामर्थ्यमुपादत्ते। तथाहि स निरुक्तो भवति। सर्वत्र साकाङ्क्षेषु शब्देष्वेवं व्याख्यायमो इष्टयः। एते अस्मिन्नर्थे इतरेभ्योऽन्यो व्यक्ततरे-स्पष्टरे-प्रत्ययतरे भवतः अन्यकार्येऽपि हेते प्रकाशेते नक्तंचरदीनां न तथेतरान्यहानि एवं ब्राह्मणेऽपि अनर्थेक्षिणो इति ह विज्ञायते।

---

1. *bi* om. ह विज्ञायते after इति. 2. *m.* om. कारणात्. 3. *bi.* यत्तद् for तदाह; *b m* शब्दस्यान्यादपकृत्यर्थिते for शब्दस्य सामर्थ्यमुपादत्ते. 4. *bi.* adds च before साकाङ्क्षेषु; *a b.* व्याख्यायमो for व्याख्यानक्रमो of *bi.*, *d.* व्याख्यायमो इष्टयः. 5. *m.* om प्रकाशन्ते; *bi* प्रकाशेतेव for प्रकाशेते, *b.* प्रकाशयेते. 6. *a. d.* om. ह after इति; *b. m.* च for ह.

कर्णः कृन्ततेर्निकृत्तद्वारो भवति। ऋच्छतेरित्याग्रायणो मन्यते। ब्राह्मणमपि चैनस्मिन्निर्वचने भवति ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते इति। ऋच्छन्तावेतौ कर्णौ खेभिव्यक्ताः सन्तः शब्दाः। एतावपि च उदगन्तां प्रत्युद्गच्छत इव शब्दग्रहणाय। विचार्यमाणे ज्ञायते गे कर्णाविति। आन्यग्रस्यतेः क्षेपार्थस्य क्षिप्यते ह्येतदाभिमुख्येनास्रम्। स्यन्देतेर्वा स्याद्द्रुतस्यैव स्रवणार्थस्य। शुष्कोपि ह्येतदे आगते स्रवत्येव क्षेप्यमाणं येन तदार्द्रीभूतं प्रसितुं शक्यते। दृघं दृघ्यतेः स्रवत्यर्थस्य। घृतवरमिव तद्भवति पूर्वतरात्परिमाणात्। दस्यतेर्वा स्यात् क्षयार्थस्य। विदस्ततरं शुष्कक्षीणतरं तद् भवति उत्तरस्मात्परिमाणात्। ग्रन्थेयाः ग्रन्थेन स्नातुं येषु योग्यमगाधत्वात्ते ग्रन्थेयाः स्नानार्हा इत्यर्थः। ह्रदो ह्रादतेः शब्दार्थस्य। शब्दं ह्रसावभिहन्यमानः करोति। ह्लादतेर्वा स्यात् शीतीभावार्थस्य ग्रीष्मेपि ह्रदो शीतल एव भवति।

अथापि अयमपरो निपातः समुच्चयार्थे भवति। कनमः त्वन् इति। किमुदाहरणम्। पर्याया इव त्वदाश्विनम् इति। आह। किमुक्तं भवति। उच्यते। आश्विनं च पर्यायाश्चेति। एवं समुच्चयार्थे भवति॥

अथ ये प्रवृत्तेर्यमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कर्मोमिद्धिति। व्याख्याताः कर्मोपसंग्रहार्थीयाः। तदप्रसङ्गेन ह्येवमादयो अन्यार्था अप्युक्ताः। प्रतिज्ञाप्रमक्तानेवाधुना पदपूरणान् वक्ष्यामः। तेषां सामान्यमेव तावल्लक्षणमुच्यते। तत्राधिकारार्थोयमथशब्दः। अथ ये प्रवृत्ते परिसमाप्तेऽर्थे अन्यैरेव वाक्यगतैः पदैरमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्त एव मिताक्षरेषु पादगतेषु भवन्ति। उभयत्रापि तु तेनर्थका

---

2. *a. d.* ऋच्छन्ती इव. 3. *a d* उदगन्तामित्युद्गच्छत इव, *b.* प्रत्युद्गच्छत इव। 4. *b. m.* शब्दग्रहणाय, *bi.* ग्रहणाय. 5. *a d.* क्षिप्यते ह्येतदाभिमुख्येनास्रम्, *d.* क्षिप्येते for क्षिप्यते, *m.* °ह्येतदभि° for °ह्येतदाभि°. 6. *a. d.* om. अत्रे; *a. d* तदार्द्रीभूतं, *bi.* तदार्द्रीकृतम् for तदार्द्रीभूतं of *b. m.* 7 *bi.* उत्तरात् for पूर्वतरात्. 9. *m.* तेन for ते. 10. *m* अभिमन्यमान. for अभिहन्यमानः 12 *bi* एकतमः for कतप. of our Mss 14 *a. d.* पर्यायश्चेति पद समुच्चयार्थे. 16. *bi.* क आपि संग्रह° for कर्मोपसंग्रह°. 19. *a a* परिप्राप्ते for परिसमाप्ते. *b. m* प्राप्ते परिसमाप्ते for it; *b* अन्यैरेकवाक्यगते पदैः; *d.* om. गद्यग्रन्थेषु, *m* वाक्यग्रन्थेषु for it. 20. *m.* पदपूरणास्त पद, *bi.* om. पादगतेषु before भवन्ति.

अनर्थान्तरवाचकाः प्रकृतादर्थात् न किंचिदर्थान्तरं द्योतयन्ति । पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरम् । उक्तं च

" क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ॥"

इति । कतमे पुनस्ते । कमीमिदिति । एते चत्वारः कम् ईम् इत् उ इति ।

आह । ननु ये प्रकृत्तेर्थ इति यदेतदुपदिष्टं लक्षणमत एव विज्ञास्यामो येमिताक्षरेषु वाक्येषु पठितास्ते मिताक्षरेषु पदपूरणा भविष्यन्तीति । अथ किमर्थमेते विशेषतः कमीमिदवो निर्दिश्यन्त इति । उच्यते । एते हि प्रायेण पदपूरणा एव । अन्ये पुनः इवनचिन्वादयो अर्थवन्तोप्यर्थासंभवे सति पदपूरणा भवन्ति । लक्षणं हि तानपि व्याप्नोति । एते पुनः प्रायेणानर्थका एवेति विज्ञापनो निर्दिश्यन्ते । अथवा ते प्रायेणार्थवन्तः कदाचिदनर्थका एते पुनः प्रायेणानर्थकाः कदाचिदर्थवन्त इत्यतो विशेषतो निर्दिश्यन्ते ।

आह । एवमपि च उकारो न निर्देष्टव्यः । किं कारणम् । स हि पुरस्तान्निर्दिष्ट एव 'अथापि पदपूरण इदमु तदु' इति । उच्यते सत्यं निर्दिष्टः । प्रासङ्गिकस्तु स तस्य निर्देशोयमेवान्नोकारस्य पदपूरणत्वे मुख्यो निर्देशः स्वप्रकरणत्वात् । आह तत्र तर्ह्यकिंचित्करः इति । उच्यते । नाकिंचित्करः । किं कारणम् । शृणु । यदि ह्ययमुकारस्तत्र पदपूरणत्वेन नोच्येत इहैवोच्येत ततः पूर्वोक्तस्य विनिग्रहार्थीयत्वस्यायमपवाद इति गम्येत । अथापि तत्रैव केवलमस्य पदपूरणत्वमुच्येत नेह तथापि पदपूरणेषु परिसंख्यायमानेषु नायमुक्त इति परिसंख्यया पदपूरणत्वमस्य भाष्येत । अनिष्टं चैतत् । तस्मादुभयत्राप्यधीत इति ।

---

1. *bi.* प्राकृतात् for प्रकृतात्. 3. *bi* विशेषवत् for °कृत्. 5 *a. b. d.* add इत्युच्यते after पुनस्ते. 6. *bi.* पदे तदुप° for यदेतदुप°, *m.* प्रवृत्त्यर्थं for प्रवृत्तेर्थ. 8. *a. d.* om इति. 11. *bi.* om एते पुन प्रायेणानर्थका कदाचिदर्थवन्त. 13. *m* त्यदादिति for तदु इति, *m* om सः 14. *m.* °मेवार्थोन्नो° for °मेवान्नो°, *bi.* om. आह before तत्र. 15. *bi.* om उच्यते after इति. 16. *bi.* पूरणत्वेन for पदपूरणत्वेन, and नोच्यते for नोच्येत: *a d* इहैवोच्यते ! 17. *a d.* गम्यते for गम्येत; *bi* उच्यते for उच्येत, and पादपूरणेषु for पदपू°; *b.* पद-संख्याप-eyes t 18. *bi* पदसंख्यपा for परिसख्यपा. 13. *a. d* read अर्थापत for अधीत

2*ndly* s

second is °rātis'ākhya XII. 8.
II. 4.) But t—v: i. e. on p. 72, l. 4. above.
is given a name
quality, and not v

आह। मन्त्रेषु सप्तम्यन्तनिर्देशेभ्यः परिशेषेण परमूलत्वस्य लाभः प्राप्त इति। उच्यते। नैवम्। किं कारणम्। उकारान्तौ शुभावहौ। अथैव शुकारोऽर्थवानुकारश्चानर्थकश्च एते तावपि। तस्मादुकारशब्देनैव तावप्यत्र गृहीतौ द्रष्टव्यौ। न केवलमुभावेव। किं तर्हि। अन्येऽपि चानर्थकाः सन्ति। तद्यथा "आ घा ता कण्वायनोरा" इत्यत्र घकारः। तेऽपि चानादरेण द्रष्टव्याः। उदाहरणमात्रपदर्शनार्थं हीमानि एवोदाहृताः। न एते सर्वे एवार्थविशेषे सत्यनर्थका एवार्थविशेषे लक्षयन्ता इति। किं कारणम्। न हि कश्चिदर्थे तात्पर्यवति अनर्थकेनाक्षरेण शब्दः। अर्थप्रधानो हि शब्दः। स नाकारादीनक्षरेणानर्थेन विना वाचमे संहन्येत। तस्मादानदृन्नमेव तात्पर्यतः करणीयः। अत शुरेतुक्तं वाजपूरणा इति अगतिरेषा। तदेतत्सर्वमर्थविशेषे सत्यगतौ सत्यां भवति। त एते मन्त्रेष्वत्या इवनिष्वादयोऽर्थवन्तः। अथोत्तमा च कर्मणिदन्योऽर्थका इति दर्शनम्।

आह। मन्त्रादौ च मन्त्रे च पूरणागमागमो दृष्टः। तद्यथा "पूर्वा सा ते" इति। अथ कथमुच्यते ये मन्त्रेषु आगच्छन्ति ते परमूलाः इति। उच्यते। न ह्येतदभ्यनुज्ञातीयमानुपूर्वीमशरण्यो पदानां वा स्वात्मलाभे निमित्तमिति। अर्थवशात्तार्थनिर्वचनसंयोगान्यत्वानुपूर्व्यमुपजायते स्वात्मलाभे। तत्रैवं सत्यात्मलाभे सत्यां तत्तु यान्य तत्तासर्गादितत्तु निपाता इत्येतावानानुपूर्वीविशेषेणोक्तो तान ये मन्त्रेषु आगच्छन्ति ते परमूला भवन्ति। एतावतानुपूर्वीविशेषेण पूर्वमात्मलाभस्योक्तो तत्तु

1. M². om. परिशेषेण; M³. reads परमूलत्वस्य. 2. M². अत्रैवापि for अत्रैवेत्. 3. M². तावत्र एव for चानर्थका; M³. वर्णा and om. 5. M². अर्थ परत्वात्, for अर्थपरत्वात्. 6. a. b. C. add सत्र before उदाहृताः; M². एत सर्वे for एवार्थविशेषे, a. d. चार्थविशेषे. 7. a. d. अर्थवशे. b. M². अर्थेऽर्थे, for अर्थे तावत् of M²; b. अनर्थकत्वकरणा 9. d. कश्चिदित्यत्र for कश्चिदर्थे; a. d. तत्रैतत् for तत्रैतत्. 10. a. d. om. ते before एते. 12. b. परमूलाः; d. मन्त्रेषूपमूलाः. for पूर्वाणा of M². a. a. 13. M². आगच्छे for आगच्छन्ति. 14. a. d. M². आनुपूर्व for आनुपूर्व्यं; M². om. वा and परत्वात्. 15. M². "अर्थेनार्थपरत्वं", and स्वात्मलाभे. 16. M². अर्थेन for अर्थेषु; b. M². add सत्र before तत्. 17. a. d. om. ते before परमूलाः; b. d. M². add इति after भवन्ति; M². पूर्वात्मानुपूर्वीविशेष.

4. The quotation is from RS. X. 10. 10.
9. अत्र-cf. p. 87, l. 6.
12. The quot. is from RS. II. 11. 21.
13. and 17. cf. p. 87 l. 4.

नामलक्षणं तदनूपसर्गलक्षणं तदनु निपातलक्षणम् । तस्मादादावपि निपातः सन्मध्ये वान्त एव द्रष्टव्यः । लोकेपि हि दत्तानुयोगानां ब्राह्मणानामवस्थानक्रमोऽकिंचित्कर एव भवति । मध्येन्ते वावस्थितो यः प्रधानः सोप्य इत्युच्यते । तस्मात् सम्यगेवोक्तं ये प्रवृत्तेर्ये इति ।

व्यत्ययं चाधिकृत्य श्लोकमप्युदाहरन्ति

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि च ।
ब्रह्मणः परिपाल्यर्थं वेदे व्यवहितानि च ॥"

इति ॥ ९ ॥

"निष्ट्वक्त्रासश्चिदिन्नरो मूरितोका वृकादिव ।
ब्रिम्यस्यन्तोववाशिरे शिशिरं जीवनाय कम् ॥"

शिशिरं जीवनाय । शिशिरं शृणातेः शम्नातेर्वा ।

"एमेनं सृजता सुते ।"

आसृजतैनं सुते ।

"तमिद्वर्धन्तु नो गिरः ।"

तं वर्धयन्तु नो गिरः स्तुतयो गिरो गृणातेः ।

"अयमु ते समतसि ।"

अयं ते समतसि । इवोपि दृश्यते । सु विदुरिव सु विज्ञायेते इव ।

अथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभाषे ॥ १० ॥

अधुनैवमेतानुदाहृतान् कर्मोमिदून् समासतः प्रत्येकमुदाहरणैर्दर्शयति । शिशिरं जीवनाय कम् इत्यत्र कमित्येष पदपूरणः । शिशिरं जीवनाय जीवनार्थमित्यर्थः ।

---

1. *bt.* om. तदनूपसर्गलक्षणं तदनु निपातलक्षणम्; *bl.* तन्मध्ये वा अत एव for सन्मध्ये वान्त एव of all our Mss, *m* ont. वा 3 *a b. d.* मध्ये वा°; *a. b d. m* प्रधान; *a d.* add भवति after प्रधानं. 6. *m* प्रच्छित्रा°. 7. *m.* वेदव्य°. 17. After इयते A. concludes sect. 9 of the 2nd pâda, and Bt. sect. 5 of the 3rd pâda. 20. *b.* शिशिरे for शिशिरं.

तत्र हि प्रायेण प्रचुराणि मन्त्रब्राह्मणानि भवन्ति। कमिति पदपूरण एव। शाखान्तरेऽयं मेधो द्रष्टव्यः। कश्चिदेवं कृतमेधमन्त्रार्थयिते

"निष्टक्त्रासंश्चिदिनरो मूरितोका वृकादिव।
विभ्यस्यन्तोवंवाशिरे गिरिंरं जीवनाय कम्॥"

इति। निष्टक्त्रा एव **निष्टक्त्रासः**। निर्वसना इत्यर्थः। अपि च **मूरितोकाः**- वञ्चकत्या इत्यर्थः। के पुनस्ते। दरिद्राः केचिन्नरो-मनुष्या इत्यर्थः। किं तेपामिति। **वृकादिव विभ्यस्यन्तः**-पुनः पुनर्भृशं वा विभ्यतो वृकादिव हिमम् **ववाशिरे** पुनः पुनर्भृशं वावाश्यन्ते। किमिति ववाशिरे। **शिशिरमस्माकं जीवनाय** जीवनार्थमागच्छति इत्येवं हेमन्ते ववाशिरे। अल्पतरगीतं हि शिशिरं सुखं तत्र जीविष्यान इत्यभिप्रायः।

निगमप्रसक्तस्य शिशिरशब्दस्य निर्वचनम्। **शिशिरं शृणातेः** हिंसार्थस्य **शम्नातेर्वा**-हिंसार्थस्यैव। नार्थकृतो विशेषः। हिनस्ति तस्मिन् काले प्रतिबध्यमानो-तिशयेन दावाग्निः शुष्कानोषधिवनस्पतीन्।

---

1. *m.* reads शतब्राह्मणानि? After पदपूरण एव, Jîvânanda's edition adds "मूत्राणि त्वा हविषा जीवनाय कम्" इति (क स ८. ८. १९. १) अत्र सायणः। किमर्थम्? "जीवनाय कम्" जीवनार्थम्। इह लोके चिरकालावस्थानार्थमित्यर्थः। कमिति पूरक'। इति। *b*. reads this in a foot-note, none of our Mss. have it. 5. *a. b. d.* add निष्टक्त्रासः before निष्टक्त्रा; *m.* adds it and the pratîka upto परिमये before इति. 7. *m.* हिनान् for हिमात्; *a.* om. one पुनः. 8. *a. d.* add ववाशिरे after वावाश्यते, *a. d. m.* read दावाश्यते, *b*. वा वश्यते. 11. *d. m.* add हि after हिनस्ति.

---

3. No trace can be found of this verse any where. *m.* does not accent it; all other Mss. as well as R., however, do so. The remark शाखान्तरेऽयं मेधो द्रष्टव्यः, shows, that the commentator does not believe this to be the right quotation, or, at any rate, has not got the stanza, निष्टक्त्रासः in full in the text he is explaining. The only part that occurs in his text is the last quarter. J. quotes and Bl. gives in a foot-note a part of RS., X. 161. 1. with Sayana's commentary on it as an example from the Rig-Veda. This is not supported by any of our Mss. (This quotation is noticed in the readings loc. cit.) Besides a quotation from सायण in Durga's commentary is an anachronism. Nor does it appear to be the quotation intended by Yâska, as the word शिशिरं is not to be found in it.

इमित्यस्योदाहरणम्

"एमेनं सृजता सुते मन्दिमिन्दाय मन्दिने ।
चक्रिं विश्वानि चक्रये ॥"

ऐन्द्र्येषा गायत्री। मधुच्छन्दस आर्षम्। पृष्ठ्याभिप्लवयोः स्तोमशस्त्रे प्रातःसवने ब्राह्मगाच्छंसिनः शस्त्रे महाव्रते च तृचावृतिषु विनियुक्ता। आ सृजतैनम्-आभिमुख्येन सृजत। इम् इति पदपूरण एव। दत्त उक्थपात्रेण चमसेश्च सोमं हे अध्वर्यवः। किमासृजत। योयमिन्द्रस्य सुते-अभिषुते-सोमे स्वांशः-उक्थपात्रचमसस्थ एवमासृजत। मन्दिम्-मन्दयितारम्। मन्दिने इन्द्राय हर्षवते। चक्रिं-चक्रनवन्तं-क्रमणवन्तं वा। अपि वा हविर्धानशकटचक्राभ्यां चक्रवन्तम्। अपि च चक्रमिति कर्मनाम। प्रतिविशिष्टवीर्यजनकैः संस्कारकर्मभिर्मिश्रद्वन्तं विश्वानि-सर्वाणि भूतानि कर्माणि वा चक्रये-कृतवते इन्द्राय। सोमोत्र प्रत्यक्षो दातारश्च। परोक्षा त्विन्द्रस्य स्तुतिः। 'अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि' इति हि वक्ष्यति।

तमिद्वर्धन्तु नो गिरः इति इदित्यस्योदाहरणम्।

"तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव ।
य इन्द्रस्य हृदंसनिः ॥"

---

3. *m* adds इत्यृक् after चक्रये 4. *m.* om. पश्च after मन्दी; *b.* °मिश्रस्तोन°. 6 *b* reads सृजत twice before इम्; *m.* reads पूरण पद for पदपूरण एव; *a d* add आसृजन before दत्त. 7. *d.* क for किं; *d* अभिसुते for अभिषुते 8 *b m* मादयितारम् for मन्दयितारम्; *a d* add चरणवन्तं before क्रमणवन्तं. 9. *b.* °शकटचक्राभ्यां चक्रवतमपि। चक्रादिति &c. 10. *b.* अतिविशिष्ट° for प्रतिविशिष्ट° of all Mss; *b.* om. कर्माणि after भूतानि. 11. *b* om. अत्र after सोम 12. *b.* om. हि after इति. 13 *a* om. the *pratika* तमिद्वर्धन्तु नो गिर इति। 15 *m* adds इत्यृक् after सनिः.

---

2. The quot. is RS. I. 9 2.

9. चक्रम्-Nigh. II. i. 16.

12. वक्ष्यति i. e. in. Nir. VII. 2.

14. The quot. is RS. IX. 61. 14.

अमहीयोराङ्गिरसस्येयमार्षम्। गायत्री सौमी। प्रावस्तुतो विनियुक्ता। तं वर्धयन्तु नः। तं-सोमम्। इत्-इति पदपूरणः। वर्धयन्तूपजातवीर्यं कुर्वन्तु देवतृप्तये। नः एता अस्मदीगिरः-स्तुतयः। कथं पुनर्वर्धयन्तु। वत्सं संशिश्वरीरिव-वत्समिवैकशिशुका बह्वयो गावस्ता यथा पर्यायेण वत्समेकं मृतवत्साः स्वैः स्वैः पयोभिर्वेहनादिसमयै कुर्युरेवमेवास्मद्गिर एतं सोममुपजातवीर्यं देवतर्पणाय कुर्वन्तु-वर्धयन्तु। कतमः। यः इन्द्रस्य हृदंसनिः-हृदयसंभक्ता तमेनं वर्धयन्त्वित्यभिप्रायः। 5

आह कस्मात् पुनरत्र केचिदुदाहरणमन्त्रा अशेषाः पठ्यन्ते निरुच्यन्ते च केषांचिदेकदेशा इति। उच्यते। ये तावदशेषाः पठ्यन्ते निरुच्यन्ते च ते व्याख्याधर्मोपदेशनार्थम्। यदि पुनः सर्व एव पठ्येरन् निरुच्येरंश्च अतिगुरु शास्त्रं संपद्येत। अथापि सर्वेषामेवोदाहरणमन्त्राणामेकदेशः पठ्येत निरुच्येत च तथापि व्याख्याधर्मो न प्रदर्शितः स्यात्। तस्माद् व्याख्याधर्मोपदर्शनार्थं केचिदशेषाः पठ्यन्ते निरुच्यन्ते च केषांचिदेकदेशाः शास्त्रातिगौरवभयात्। इति प्रतिमन्त्रमपि सकलार्धर्चपादाध्ययने शक्यते प्रयोजनमन्वेष्टुं तदेतत्समासेन ब्रूमः। यस्मिन् यस्मिन्मन्त्रे यद्यत्पदमेकार्थमनेकार्थमनवगतसंस्कारं वा निर्ब्रवीति किंचिद्वान्यच्छब्दरूपमध्याहरति अन्यद्वापोहति अन्यथा वा कस्यचिद्विपरिणामं करोति संदिग्धं वा निर्णयति तदर्थमेव तं सकलमधीते। यस्मिन्वार्धर्चे पादे वा तत्पदं भवति यदभिमतं निर्वक्तुं तावन्मात्रमेवाधीते तन्निर्विवक्षया। तदेतदेवं निपुणमन्वेष्यं सर्वत्र।

उकारस्योदाहरणम्

"अय मु ते धर्मतसि कपोत इव गर्भधिम्।
वचस्तच्चिन्न ओहसे॥"

1. a. अमहीयोंगिरस्येयमार्ष, m. आमहीय आंगिरस्येयमार्ष। 2-3. m देवे तृप्तयोः for देवतृप्तये. 4. m. बह्वो for बह्वयो 5 bi. पदमेवास्मद्गिः पतं 1; d. पनं for पतं; d. देव तर्पणाय, a देवतर्पणाय for देवतर्पणाय 6. d m य· कतमः य इन्द्रस्य, b. reads य कतमः स इन्द्रस्य; m. हृदयस्य संभक्ता. 7. bi. om. च after निरुच्यन्ते. 10 bi सर्वेषामप्युदाहरण° for सर्वेषामेवोदाहरण° of our Mss.; a d om च after निरुच्येत. 11. a. d व्याख्योपपदर्शनार्थं, b m व्याख्योपदर्शनार्थं. 14. b. m. om वा after किंचित्; m अन्यदापोहं करोति. 15 bi. कश्चित् for कस्यचित्. 16 bi तावत् पद for वा तत्पदं 17. bi. अन्वेष्टव्यं for अन्वेष्यं. 18. m. adds कञ् after उदाहरणं.

19. The quot. is RS. IX. 30. 4.

शुनःशपो यूपे नियुक्तमात्मानं मोचयितुमिच्छन्नया गायत्र्येन्द्रं तुष्टाव। अयम् इति वर्तमान एव कर्मणि निदर्शयन्नाह। **ते**–तव त्वदर्थं सोमः यं प्रति नित्यकालमेव **समतसि**–संपतसि। त्वं तासु तासु क्रियास्वाह्रियमानः समतसि संपतसि। कथं पुनः संप्रति समतसि। कपोत इव। कत्पतनः कपोतः कुत्सितपतनः स यथा **गर्भधि**–गर्भधानीं कपोतिकाम् अण्डाश्रयं वा नीडं प्रति पुनः पुनः पतति एवं यं प्रति नित्यकालमेव संपतसि त्वं स एवायमभिषुतः सोम एभिर्ऋत्विग्भिः। अथ किमस्माभिः करिष्यसि। मोचयास्मान्। किं वा वच एवेदं नः स्तुतिलक्षणं नोहसे–न वितर्कयसि रोरूयमाणानां केनाप्यभिप्रायेण। वयमेव ब्रूमः कैर्वा युष्मद्गुणैर्न युक्तमेतदिति यतो न मोचयस्यस्मानतो यूपात्। श्रुत्वैतदवबुद्धार्थमार्तेतामस्माकमवधार्य कारुण्यान्मोचयास्मान्। किं तैस्माभिः। अयमेव तेस्मत्तः प्रतिविशिष्टतरः सोमोभिषुत इत्यभिप्रायः।

इवोपि दृश्यते। कदाचिदनर्थकः इति वाक्यशेषः। किमुदाहरणम्। **सु विदुरिव सु विज्ञायेते इव** इत्येते उदाहरणे। सुष्ठु विदुर्यज्ञं ब्राह्मणा इति। इनर्थक एव वाक्यपूरणः। सुष्ठु विज्ञायेते यज्ञनक्षत्रे ब्राह्मणैरिति अत्रापीवोनर्थक [मिश्र-पदपूरणघने]

व्याख्याताः पदपूरणाः। निपातसमाहारमधुना दर्शयति तदधिकारा[ः] शब्दः। अपीति संभावने। अथायमेव इदिति केवलः प्रयुज्यमानः पदपूरण[ः] अपि चायमेव न इत्येतेन संप्रयुक्तः प्रयुज्यते परिभये अर्थे। स[ः] परिभयम्॥ १०॥

---

1 *b*. शुनः शेफो नियुक्त आत्मान, and पतया for अनया. 2. *b*. वर्तमानः [illegible] कर्मणि निर्दिश्यन्नाह; *b*. युष्मदर्थं for त्वदर्थं 3. *b*. om. संपतसि, and ope तासु. 4 *b*. पुनर्यं प्रति for पुन संप्रति, and कंपतनः for कत्पतन of our Mss; *d*. om. गर्भधि. 6. *m*. एवमयं for एवायं 8. *b*. रोरूपमाणानां; *b m* वयमेव for वयमेतत् of *b*. 9 *b*. *m*. अर्थमार्तता for अर्थमार्तता of others 12 यज्ञब्राह्मणा for यज्ञे ब्राह्मणा 13. *b*. *m* यज्ञनक्षत्रे, *d*. यज्ञेन। क्षत्रं?, *bi* यज्ञो नक्षत्रं 14. *m* तदप्यविकारार्थो. 15 *a*. *d*. om अथ before अयमेव, *b*. *m*. अपि for अथ here; *a*. पादपूरणः for पदपूरणः. 16. *a*. *d*. अनेन for एतेन; *b*. संयुक्तः for संप्रयुक्तः.

"हविर्भिरेके स्वरितः संचन्ते सुन्वन्त एके सवनेषु सोमान्।
शचीर्मदन्त उत दक्षिणाभिर्नेञ्जिह्मायन्त्यो नरकं पताम॥"

इति। नरकं न्यरकं नीचैर्गमनं नास्मिन्नमणं स्थानमल्पमप्यस्तीति वायापि न चेत्येष इदित्येतेन संप्रयुज्यतेनुपृष्टे न चेत्सुरां पिबन्तीति। सुरा सुनोतेः। एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः॥ ११॥ 5

कथं प्रयोगः। नेञ्जिह्मायन्त्यो नरकं पतामेति। मृग्यः शेषः। केचित्त्वेतं कृतशेषमन्वाधीयते

"हविर्भिरेके स्वरितः संचन्ते सुन्वन्त एके सवनेषु सोमान्।
शचीर्मदन्त उत दक्षिणाभिर्नेञ्जिह्मायन्त्यो नरकं पताम"

इति। 10

नारदेन किल विप्रलभ्यमाना असुरपत्न्यो भर्तॄन्प्रति तमनेन मन्त्रेण प्रत्यूचुः। एके तावत् इतः लोकात् **हविर्भिः**-पुरोडाशादिभिर्निमित्तभूतैः **स्वः सचन्ते**-स्वर्गं लोकं प्राप्नुवन्ति स्म। अथ एके **सवनेषु**-यज्ञेषु **सोमान् सुन्वन्तः**-अभिषुण्वन्तस्तेन [1]र्मणेत्यर्थः। **शचीर्मदन्तः**-अन्ये शच्या वाचा स्तुतिभिरेके देवान् मादयन्तः-

[1] वः

---

5. Bi. concludes here sect. 6, and concludes the Pâda as इति प्रथमाध्यायस्य तृतीयः पादः, A. om. त, and after उपेक्षितव्याः concludes sect. 10. and also the pâda as इति प्रथमाध्यायस्य द्वितीयः पादः॥ 7. bi. अधीयन्ते. 11. m. adds हविर्भिरेक इति before नारदेन; a. विप्रलभ्यमानाश्च सुरपत्न्यो। 12 d. लोकान् for लोकात्, and पुरोडाशादिभिः for पुरोडाशादिभिः; m. निर्मितभूतैः for निमित्तभूतैः; d. सचेते for सचन्ते; a. d. om. लोकं. 13. a. d. प्राप्नुवन्ति स्म। अन्येके; a. b. m. om. सुन्वन्तः।, d. reads सोमानमभिषुण्वन्तः। 14. b. m. om. एके.

---

1. This verse is not traceable in the ऋग्वेद. The remark of the commentator मृग्यः शेषः &c. seems to question the occurence of the stanza in full in the text relied upon by him as authentic, though he too is conscious that it was found in some Mss. All the Mss, consulted by us, contain it as an accented text, and it is also preserved by traditional recitation in these parts of India. Hence we believe that the whole stanza did exist in the current text of the Nirukta from very old times.

संतर्पयन्त इत्यर्थः। अप्यन्ये **दक्षिणाभिः स्वः** सचन्ते इत्येतदेवानुवर्तते। तत्रैवं सति तेन तेनाभ्युद्यतेषु प्राणिषु श्रेयः, प्रति यदि वयमेतानपि भर्तॄन्न सम्यक् परिचरेमान्येषां जपहोमादीना कर्मणामसंभवे सति **नेत्** वयमेतेषामप्युपरि **जिह्मायन्तो**-जिह्ममाचरन्त्यो भगवन् **नरकं पताम** न **ह्यन्यो** भर्तृपरिचर्यातः स्त्रियाः कश्चन धर्मो-स्तीत्यभिप्रायः।

नरकशब्दं निर्ब्रवीति। नीचैरस्मिन्नर्यते गम्यत इति **नरकम्**यवा **नास्त्यस्मिन् रमणं** रतिकरं **स्थानमल्पमप्यस्तीति** नरकम्।

अथाप्ययमपरो निपातसमाहारो नचेत्येष इदित्येतेनैव संयुक्तः प्रयुज्यते। केनचिदनुपृष्टे सति प्रतिवचनं भवति। तद्यथा कश्चित् कंचित् पृच्छति तिष्ठन्ति वृषला इति। ततः प्रत्याचष्टे तिष्ठन्तीति। तनो यदि तिष्ठन्ति किमर्थं नागच्छन्तीति पुनरनुपृष्टे ब्रवीति **न चेत् सुरां पिबन्त्यागमिष्यन्ति इति।** यदि सुरां न पिबन्तीत्यर्थः।

अथ **सुरा** कस्मात्। **सुनोतेः।** सा ह्यभिषूयतेनेकैर्द्रव्यैः पिण्याकादिभिः।

एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः। एवमनेन प्रकारेणोच्चावचेष्वर्थेषु बहुप्रकारेषु समाहृताश्चान्येष्येवं बहुप्रकारा निपतन्ति प्रयुज्यमानास्ते लक्षणशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपगम्यानुप्रविश्य **ईक्षितव्याः** कः कस्मिन्नर्थे वर्तत इत्येवं द्रष्टव्याः परीक्ष्या इत्यर्थः॥ ११॥

---

1 *d.* स्व सचन्तेत्येतदेवा°. 2. *b d.* मर्तृन्न सम्यक्, *m bi.* मर्तॄन्सम्यक्. 3. *a.* कर्मणानसम्भवे; *bi* उप for अपि of all our Mss. 4. *m.* स्वग्यो for ह्यन्यो. 5 — *b* °स्मिन्नपते for °स्मिन्नर्यते; *a* नास्मिन् for नास्त्यस्मिन् (perhaps better). 7 मन्तीत्यर्थे probably a mistake. 13. *a. b. d. m* अथ 1. *bi* शुन्. 16. *a b d* read अनुप्रविश्य, *bi* °प्रवेश्य. 17. *a. b.* conकर्मणि निर्विसर्ग° clusion and the pâda after निगमनार्थः below, *b* concludes sect. तद्धि. 4 *bi* pâda after °परिसमाप्त्यर्थे below, *bi. m.* conclude Khaṇḍa *d.* om गर्वेषि. ter इत्यर्थः.

वयमेव for वयमेतत् peaking यदि seems to be superfluous and the reading 12 यज्ञयोजिता for यज्ञ referable. In that case the sentence makes sense नञ्च. 14. *m.* तद्व्या If यदि be there the reading of *b. d.* adopted here is आपे for अप here, *a* पादपू ng some sense, but then नेत् after सति seems to be ध्युक्तः for संप्रयुक्तः. oet should have its place after वर्त. We have, े and नेत् as no Ms. omits any of them. Hence s less faulty than the other one.

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्ग-
निपाताश्च। तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च।
न सर्वाणीति गार्ग्यो वैयाकरणानां चैके। तद्यत्र स्वरसंस्कारौ समर्थौ
प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि यथा गौरश्वः
पुरुषो हस्तीत्यथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च 5
तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन् यः कश्चाध्वानमश्नुवीताश्वः
स वचनीयः स्याद्यत् किंचिन्नृन्यान्नृणं तदथापि चेत् सर्वाण्याख्यात-
जानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयमतिलम्भः
स्यात्तच्चैवं स्थूणा दरदापा वा सज्जनी च स्यात्॥ १२॥

इतिकरणोविकारपरिसमाप्त्यर्थः। इमानि चत्वारि पदजातान्यनुक्रा- 10
न्तानि नामाख्याते चोपसर्गनिपाताश्च इति। प्रतिज्ञाभ्यासो निगमनार्थः
इतीमानि चत्वारि पदजातानीति व्याख्यातम्। अनुक्रान्तान्यानुपूर्व्येण पूर्वमाख्यातं ततो
नामानि तत उपसर्गास्ततो निपाता इत्येवमानुपूर्व्येण क्रान्तानि-वर्णितानि व्याख्यायेति
वाक्यशेषः। कतमानि पुनस्तानि। नामाख्याते चोपसर्गनिपाताश्चेति। तदपि व्याख्या-
तमेव। यच्च तदुक्तं नाम्नः किंचिदवशिष्यते तच्चतुर्थेन पादेन वर्णयिष्याम इति तदिदम- 15
वसरप्राप्तं पदचतुष्टयलक्षणानन्तरमारभ्यते। तत्र नामान्याख्यातजानीति शाक-
टायनो नैरुक्तसमयश्च। तत्र तस्मिन्नेव पदचतुष्टये यानि नामानि तानि सर्वाण्येवा

---

4. Bi. remarks, in the foot-note, that संविज्ञानानि is a variant here acknowledged by *Durga* 7. One Ms of Bi. यत्किंच तृन्यात्. 9. A. and three Mss. of Bi. read दर्दापा, one Ms. सज्जनी, R's variant is दर्दापा वा सज्जनी; after स्यात् A. Bi. conclude sect. I. of the *4th* pâda. 10. *m.* adds before इतिकरणः the pratîka up to स्थूरिति; *a. b. d.* add इति before इमानि. 11. *bi.* प्रतिज्ञाभ्यासो निगम इत्यर्थः. 12. *a. b. d. m.* पदजातानीति व्याख्यात। अनुक्रान्तान्यानुपूर्व्येण पूर्वमाख्याते &c., *bi.* पदजातानीति व्याख्याय अनुक्रा-न्तानि पूर्वमाख्यात etc. 13. *m.* व्याख्याय for व्याख्यया. 14. *m.* om. पुनस्तानि after कतमानि. 15. *bi.* adds पद after तदिदं. 16. *m.* तेनात्र for तत्र. 17. *bi.* पादचतुष्टये; *a.* repeats तानि once more.

---

15. तदुक्त i. e. on p. 58 *l.* 11 *supra.*

विशेषेणाख्यातजानीत्येवं शाकटायन आचार्यो ब्रवीतीति वाक्यशेषः। नैरुक्तानां चैष समयः—सिद्धान्तः सर्वेषामविशेषेण गार्ग्यवर्जम्। आह। कः पुनरन्यथा ब्रवीति येनैवमुच्यते शाकटायनो ब्रवीतीति। उच्यते। न सर्वाणीति गार्ग्यो ब्रवीति। किं गार्ग्य एव ब्रवीति। नेत्युच्यते। वैयाकरणानां चैके। व्याकरणमधीयते ये ते वैयाकरणाः। तेषां चैके न सर्वाण्याख्यातजानि नामानीत्येवं द्युवत इति वाक्यशेषः।

तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि इति। तदेतत्प्रत्यक्षेण। यान्याख्यातजानि नामानि यानि वान्यानि एवं पर्युपयुक्तस्वच्छन्दः। इह त्रिविधा व्यवस्था नाम्नाम्। तद्यथा। प्रत्यक्षक्रियाणि प्रकल्प्यक्रियाण्यविद्यमानक्रियाणीति। तत्र प्रत्यक्षक्रियाणि। तद्यथा कारको हारक इति। प्रकल्प्यक्रियाणि। तद्यथा गौरश्व इति। अविद्यमानक्रियाणि। तद्यथा दित्यो दवित्यो-रविन्दोर्वाद् चन्द्र इति। तत्रैवं सति यत्र-येष्वित्यर्थः। केषु। नामसु। स्वरसंस्कारौ-स्वरश्चोदात्तादिः संस्कारश्च प्रकृतिप्रत्ययादिर्यौ स्वरसंस्कारौ समर्थौ। समर्थता नामोपपत्तिरुच्यते। सगतार्थौ—लक्षणशास्त्रविहितयोपपत्त्या युक्तावित्यर्थः। यथैव लक्षणाविप्रतिपत्त्या स्वरोवस्थित एवं संस्कारोपि। येनापि च प्रादेशिकेन प्रदिश्यते द्रव्यमनयेति प्रदेशः क्रिया या तस्मिन् द्रव्ये व्यवस्थिता यद्धेतुकस्तस्य नामधेयप्रतिलम्भोभिप्रेतस्यः प्रदेशाख्यायाः क्रियाया अभिधायको धातुः स गुण इत्युच्यते। अन्यत्र हि गुणशब्दोप्रधाने वर्तते। शेषः अङ्गं गुणः इति समानार्थाः। प्रधानं तु तत्र क्रिया प्रदेशाख्या। तदभिधायको धातुर्गुणाख्यः। स प्रदेशवाचकत्वात् प्रादेशिको गुण इत्युच्यते। तेन धातुरूपेणान्विताववगतौ स्वरसंस्कारौ स्यातां भवेतां येषाम्। आह। किं तेषा-

---

2. *b* गार्ग्यवर्ज्यं 3 *a. d.* add पत after शाकटायन°, *b. m.* om. येनैवमुच्यते शाकटायनो ब्रवीतीति; *a d* om. इति after सर्वाणि; *a d.* om. ब्रवीति. 4. *b.* ब्रवीयन्ते, *d* पते for ये ते, *m* om. ये ते. 7. *b. m.* यानि वान्यानि. *bi.* यानि यानीति, *a d* यानि वानेति 8. *m.* तच्छन्द°, *bi* त्रिधा 9. *bi* प्रकल्पक्रियाणि; *bi.* om इति before तत्र, and तद्यथा before कारको. 10 *bi.* प्रकल्पक्रियाणि; *b.* om. तद्यथा before दित्यो. 11 *a. m* अरविन्दो वार्विद इति, *b.* अरविन्दोर्वाविद इति, *d.* दित्यो दविद्य अरविन्दोवोविद इति This is all unintelligible, neither is the reading of *bi* the more likely though it is retained above. 12. *a. b. d. m* पतो for तौ, *a. d.* प्रकृतिप्रत्ययपादिभि. for °त्ययादि; *a* °संस्कारसमर्थौ, *d.* °संस्कारौ समर्थौ! 14 *b* एकं संस्कारोप्यपि येषु। अपि च etc, *b. m.* om द्रव्य. 15. *m.* क्रियायाः for क्रिया या; *a b. d. m.* व्यवस्थिता for अवस्थिता of *bi.* 16. *b. m.* add यो before धातुः. 19. *b. m* धातुगुणेन for धातुरूपेण.

मिति उच्यते। **संविज्ञातानि तानि**। सम् विज्ञातानि ऐकमत्येन विज्ञातानीत्यर्थः। तेषु तावदविप्रतिपत्तिरस्माकमाख्यातजानि नामानीति। तद्यथा कर्ता कारकः पक्ता पाचक इति। न पुनर्यथा गौरश्वः पुरुषो हस्तीति। किं कारणम्। एतेषु प्रकल्प्यन्ते क्रिया न साक्षादुपलभ्यन्ते। अपि चैतेषु कल्पयितुमपि तावच्छक्यन्ते न डित्थादिषु पुनः प्रकल्पयितुमपि शक्यन्ते। तस्मान्न सर्वाण्याख्यातजानि नामानीति। तत्र यदुक्तं **सर्वाण्याख्यातजानि नामानीति** तदयुक्तम्। रूढिशब्देषु च क्रियाः केवलं शब्दव्युत्पत्तिकर्मण्युपलक्षणभूता निमित्तभावेनोपादीयन्ते न वस्तुतोर्थक्रियास्वनुसहायभावं प्रति। तत्र शब्दस्याप्रच्युतानुपलक्षितेतुप्रवृत्तेभिधाने निवृत्तायां क्रियायामुपरतव्यापारं निरूप्य क्रियायामभिधानं वस्तुमात्रस्य प्रतिनिर्देशकं रूढिरित्यभिधीयते।

अपरो व्याख्यामार्गः। **तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्**। यत्र यस्मिन्नग्नि स्वरसंस्कारौ समर्थौ अष्टाध्यायीलक्षणोपपत्त्या युक्तौ प्रदेशाभिधायिना च धात्वाख्येन प्रादेशिकेन गुणेनान्वितावनुगतौ स्यातां न्याय्यकार्मनामिकसंयुक्तेन संस्कारेण। तद्यथा कर्ता कारकः पक्ता पाचक इत्येवमादि। तदाख्यातजं गुणकृतमिति प्रतीम इति वाक्यशेषः। येषु पुनरष्टाध्यायीलक्षणपराङ्मुखौ स्वरसंस्कारावनुगतौ न च न्याय्यकार्मनामिकसंस्कारयुक्तेन प्रदेशाख्येन धातुरू-

---

1. *m.* समविज्ञातानि; *a. d.* एकमत्येन. 2. *m.* om नामानि; *a. b. d.* read तानि instead of नामानि. 3. *bi.* प्रकल्पन्ते for प्रकल्प्यन्ते. 4. *bi.* तद्दित्यादिषु or न डित्यादिषु, *d.* दित्यादिषु for डित्या°. 5. *a. bi.* कल्पयितुं° for प्रकल्प°; *c. m.* तत् for तत्र 6. *b. d.* पतत् for तत्; *bi.* रूढिशब्दे for °शब्देषु; *m.* क्रियाया' for क्रियाः. 7. *b.* शब्दस्य व्युत्पति°; *m.* °सद्भावमात्रं। 8. *b. m.* शब्दस्याप्रच्युतो उपलक्षिते, *a. d.* शब्दस्य प्रच्युतो उपलक्षिते, *bi.* शब्दस्य प्रच्युतानुपलक्षिते; *c. bi.* निर्वृतायां for निवृत्तायां of all our Mss.; *a. d.* om क्रियायां before °उपरत°; *c.* °साधनाव्यापार, *d.* °साधनाव्यापारं, *b. m. bi.* °साधनव्यापारं. 9. *m.* निरूप्य for निरूप्य of *bi. a. d*; *m.* reads वस्तु तस्य for वस्तुमात्रस्य of *a. b. d. bi.* 10. *m. b.* om. तत् before यत्र 12. *a. d.* प्रदेशाभिधायिना, *bi. m.* प्रादेशाभिधायिना, *b* प्रदेशाभिधानं विना च. 13. *d.* °कर्मनामिक° for °कार्म°. 14. *a.* पुर्णाकृतं for गुणकृतं of *b. d. m. bi.* 15. *b. m.* om न्याय्य° before °कार्मनामिक°.

---

8. The sentence beginning with तत्र यस्मिन् hardly makes any sense nor are the variants useful in this case. We select a reading which is the nearer to make any sense.

भिधानं द्वयोर्धात्वोः संचस्कार सत्यमिति। अथ कोऽर्थः। सन्तमर्थमाययति प्रत्याययति गमयतीति सत्यम्। कारितं च यकारादि च शुद्धं च सकारादि चेति इतरस्माच्चेतरस्माच्चेतरं चेतरं चार्थमिति समुच्चयार्थश्चकारः। एवं पदेभ्यः पदेतरार्थान् संचस्कार शाकटायनः। तदेतदन्याय्यं कृतवान्। को हि नाम पदं विभज्यानेकधातुजं कुर्यात्। तदितदकृतपूर्वमन्यैर्विद्वद्भिः शाकटायनोतिपाण्डित्याभिमानादकरोद्यदभिनत्पदानि। अपि चोपजायते नः शङ्का। यथासौ प्रवृत्तो नासौ पदेषु स्थास्यति। अवश्यमसौ वर्णानपि भेत्स्यति। अनेकार्थांश्च कल्पयिष्यति। यो हि पदान्यभिनत्तस्य वर्णभेदे विशेषहेतुः को भविष्यति। तस्मादतिप्रसङ्गदोषोपपत्त्या नानेकधातुजानि नामानि नापि सर्वाण्याख्यातजानि नामानीति।

अथापि अयमपरो दोषः प्रसज्येत। कतमः। **सत्त्वपूर्वो भाव इत्याहुः** अभियुक्तास्तद्विदः। सत्त्वं पूर्वमस्मात्सोयं सत्त्वपूर्वः। किं कारणम्। सत्त्वाश्रय एव हासौ। तत्रैवं सति **अपरस्माद्भावात्**—अपरकालीनेन भावेन—क्रियया **पूर्वस्य**—पूर्वोत्पन्नस्य सत्त्वस्य **प्रदेशाः**—प्रदेशनं—संज्ञाप्रतिलम्भो **नोपपद्यते**। किं कारणम्। उत्पत्तिसहभूता हि सा। स्वेनाभिधानेन क्रियानिरपेक्षेणाभिसंबद्धमेव द्रव्यमुत्पद्यते। नित्यसंबद्धो हि शब्दार्थौ। **इति तदेतत्** सर्वथा सर्वाण्याख्यातजानि नामानीति शाकटायनं **नोपपद्यते**। तदनुपपत्तावस्मत्पक्षसिद्धिः कानिचिदाख्यातजानि नामानि कानिचिन्नाख्यातजानीति। अथ शक्यते प्रत्यवस्थातुं प्रत्यवस्थीयतामिति। परिसमाप्तो ऽग्रेयपक्षः ॥ १३ ॥

---

1. *bi.* adds मवति after सत्यमिति; *a. d. b. m.* सन्तमर्थमाययति प्रत्याययति गमयतीति सत्यं. *bi.* सन्तमर्थमापयति प्रत्यापयति गमयन्तीति सत्य. 2. *b. m.* add पतेः before कारितं, *m.* om. च after कारितं; *b m.* add अन्तकरणमस्ते after यकारादि च; *a. d.* इतरस्माच्चेतर चार्थमिति, *b. m.* इतरस्माच्चेतरस्माच्चेतरं चेतरं चार्थमिति, *bi.* इतरस्य चेतरं चार्थमिति. 5. *m.* शाकटायन इति पाण्डित्या°. 6. *d.* पृष्टो, *a.* सृष्टो, *m.* प्रवृत्तो, *b. bi.* प्रवृत्तो; *a. b. d. m.* अवश्यमसौ, *bi.* अपि चासौ. 7. *b m.* वर्णभेदे, *bi. a. d.* वर्णभेदे. 8. *m.* अतिप्रसङ्गेन दोषोप°; *m.* om. after नानेकधातु° all from °जानि to कतमः in *l.* 10. 9. *a. d.* आख्यातजानीति, by omitting नामानि. 10. *b.* reads प्रसज्येत. 12. *a. b. d. m.* om. अपरस्माद्भावात्; and also पूर्वस्य. 13. *bi.* om. सत्त्वस्य before प्रदेशः. 14. *a.* सा हि t; *m* निरपेक्षणार्था° for निरपेक्षेणा°. 15. *m.* शब्दार्थाविति। तदेतत् &c.

---

14. I suggest that the reading here should be कल्पत्यसहभूता हि सा. This will give a consistent meaning. But no Ms. or edition comes to support the change. I have therefore allowed the reading of the Mss. to stand, though, I fear, it hardly makes any sense.

शाकटायनपक्षेणेदानीमेतान्दोषान्प्रतिसमाधास्यामस्तदर्थमिदमारभ्यते ।

यथो हि नु वा एतत्तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यमुपालम्भ एष भवति । यद् एतद्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः सम्नकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजव जीवनो भूमिज इत्येतेनैवोत्तरः प्रत्युक्तः । यथो एतद्यथा चापि प्रतितार्थानि स्युस्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोप्येकपदिका यथा व्रतातिर्दमूना जाट्य आदणारो जागरूको दर्विहोमीति यथो एतन्निष्पन्नेभिव्याहारेभिविचारयन्तीति भवति हि निष्पन्नेभिव्याहारे योगपरीष्टिः । प्रथनात्पृथिवीत्याहुः क एनामप्रथयित्किमाधारश्चेत्यथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैरप्येवं सर्वं एतद्दृष्टप्रवादा उपालभ्यन्ते । यथो एतत्पदेभ्यः पदेतरार्थान्संचस्कार योनन्वितेर्थे संचस्कार स तेन गर्ह्यः सैषा पुरुषगर्हा न शास्त्रगर्हा इति । यथो एतदपरस्माद्वावार्पूर्वस्य प्रदेशो नोपपद्यत इति पश्यापूर्वोत्पन्नानां सत्त्वानामपरस्माद्वावान्नामधेयप्रतिलम्भमेकेषां नैकेषां यथा विल्वादो लम्बचूडक इति । बिल्वं भरणाद्वा भेदनाद्वा ॥ १४ ॥

---

3. R's variant सत्वमुपालम्भ° 7. A. कृतोप्येकपदिका. 8 A. व्रर्ग for व्रतति । 11. A. Bi. conclude sect 3 of the fourth pâda after चेप्य-येः 13. B C. D. गर्ह्यं, Bi गर्हं, B1 om न शास्त्रगर्हा read by all other 14. C. प्रादेशो for प्रदेशो 16. Three Mss of B1. लम्बचूलक; Bi. conclud sect. 4 after भेदनाद्वा and then concludes pâda as प्रथमाध्यायस्य चतुर्थः पादः A. concludes sect. 4, but does not conclude its pâda here and goes marking the sections of the next pâda serially.

ययो हि नु वा एतदिति । ययेति वाक्योपादाने । यया येन प्रकारेण । उकारोवकारार्थः । व्याख्यातमेतत् 'अयाप्युकार एतस्मिन्नेवार्थे उत्तरेण' इति । येनैव प्रकारेण प्रसिद्धमाचार्येणाख्यातजत्वं प्रतिषिद्धं नाम्नैनेव प्रकारेण प्रत्यनुभाष्य समीकरिष्यामीति । हि हेत्यस्मूयायाम् । कथं हि व्याकरिष्यतीति । नु इत्येष हेत्वपदेशे । वै इत्ययं यथोक्तपूर्वापक्षोपदेशार्थः । येनैव प्रकारेणास्मयी हेतव उक्तास्तेनैव प्रकारेण प्रत्यनुभाष्य प्रतिवक्तृधर्मेण समीकरिष्यामः ।

यथेदमुक्तम् । किमिति । **तत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातामिति** । आह । तत्र किमिति । उच्यते । तदेतत्प्रत्युच्यत इत्युपयुक्तस्तच्छब्दः ।

आह । केन पुनः प्रकारेण प्रत्युच्यत इति । उच्यते । **सर्वं प्रादेशिकमित्येवमनुपालम्भ एष भवति** । सर्वमेव प्रादेशिकं सर्वमेव क्रियाङ्गं नाम । आह । ततः किमिति । **एवं सत्यनुपालम्भ एष भवति** । आह । कथम् । शृणु । प्रदेशवाचिन आख्यातानुत्प्रेक्ष्य तदाश्रयौ स्वरसंस्कारौ यावद्द्रव्यमनुविधेयौ । विभ्वी हि लक्षणगतिर्नैव शब्दागमयो नाप्यस्माकम् । भवत एवायमपराधो मन्दशिक्षितत्वाद्येनानुविधाद्धं स्वरसंस्कारौ विद्यमानावपि प्रदेशवाचिनि धातौ न शक्नोषि । स त्वं तावत् पुनः पुनः शिक्षस्वाख्यद्व्याकरणं यावच्छक्तिस्तावानुविधातुमिति । व्याकरणेऽप्यष्टधा भिन्ने लक्षणैकदेशौ विधिस्तः । कश्चिल्लोपो विधिः कश्चिदनुबन्धलक्षणशब्दान्तरिक्ताभ्याहारयोगविभागादिगम्यः । तद्यथा । मतान्तरव्याख्यानेषु कश्चित्तद्विधिर्विधित्सते । ते च सर्व एव प्रयोगमिच्छता प्रयोगकाल उपसंहर्तव्याः । एवमिहापि सर्वाण्येव लक्षणशास्त्राण्यपेक्ष्याण्यखिलस्वरसंस्कारसिद्धये इति स त्वं तावच्छिक्षस्वानिर्विण्णो यावदखिलशब्दानां स्वरसंस्कारानुविधातुमुपशातुं सामर्थ्यमिति ।

I. *m.* वाक्योपादानेन. 2 *b* इतरेण for उत्तरेणेति of all our Mss. 3, *b*. प्रत्यनुभाष्यामि for प्रत्यनुभाष्य समीकरिष्यामीति. *m* प्रत्यनुभाष्ये। 7 *a. d* यश्चैतद्भवान्; *m* किमिति. *d* om. तत् before यत्. 9. *a. d* om. पुनः after केन. 10. *m.* नाह for नाम । आह. 12 *m.* विभ्वी for विभ्वी? 13 *b* भवत इत्यारभ्य &c; *m.* adds तु after उच्यते. 14 *a b.* om. one पुनः. 15. *a d.* तावानुविधातु for तावानु°; *bi.* लक्षणैरेकदेशो विधिस्तः, *a d* लक्षणैकदेशो विधिस्तः. *b* लक्षणैकैकदेशो विधिस्तः, *m.* लक्षणे चैकैकदेशो विधिस्तः. 16 *a. d.* read विधि for धातु° of *b m*; *a d.* °रिक्ता व्याहार°; *bi* ° हारविभागा° for हारयोगविभागा° of all our Mss. 17. *m* गम्यमाह for गम्य ।, *b* om च, *m.* om च सर्वं after ते 19 *a. a.* अखिलस्वरसंस्कारसिद्धये निस्वरसंस्कारो वा इति ।?, *bi* अनिर्विण्ण for अनिर्विण्ण. 20. *a. d.* उपशातं for उपशातुं.

---

2. आख्यातम्–*Vide* p. 72, l. 8 supra.

क्रियाकारितो नामधेयप्रतिलम्भस्तया तक्षा परिव्राजक इत्येतान्येवोदाहरणानि। तक्षा ह्यन्यान्यपि कर्माणि करोति। न पुनस्तस्य तत्कृतो नामधेयप्रतिलम्भोस्ति। तन्न यदुक्तमेकस्यानेककियायोगादनेकनामता प्रसज्येतेति एतदयुक्तम्। न हि प्रसज्येत। यच्चोक्तमनेकेषामेकनामतैकस्य चानेकनामता प्राप्नोति ततश्च व्यवहाराप्रसिद्धिरिति न हि तदुभयमस्ति। अनेकेषामेककियायोगेपि हि सत्येकस्य चानेककियायोगेपि हि सति व्यवस्थित एव शब्दनियमः स्वभावत एव लोके। तस्मान्न व्यवहाराप्रसिद्धिदोषोस्ति। तत्र यदुक्तं व्यवहाराप्रसिद्धिदोषप्रसङ्गान्न सर्वाण्याख्यातजानि नामानीत्येतदयुक्तम्।

यथो एतत्-यत् पुनरेतदुक्तं **यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति**। अत्र ब्रूमः शब्दस्वाभाव्यमेतद्यन्न तथा सर्वाण्याख्यायन्ते यथा प्रतीतार्थानि भवन्ति। न तत्राहमपराध्ये भवतो नापि शास्त्रम्। यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव क्रियते। नाहं शब्दानां कर्ता। य एषां प्रयोक्तारस्तानेवोपालभस्व निराकुरु वा यदि शक्नोषि।

आह। कस्मात्पुनः कानिचिदाख्यायन्ते लोके। उच्यते। तदभिधानस्वाभाव्यमेव कानिचित् प्रतीतार्थानि कानिचिदप्रतीतार्थानि। तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्तव्यानि। एतदेव शास्त्रस्य शास्त्रत्वं यदप्रतीतार्थान्यपि प्रकृत्यादिना प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति। आख्यायन्त एव कानिचित्। कानिचिच्छास्त्रेण प्रतीतार्थानि क्रियन्ते। रूढ्यनुविधायित्वाल्लक्षणशास्त्रस्य गुणतस्तेषु लक्षणम्। अपि च। **सन्त्येवाल्पप्रयोगाः** प्रतीतार्थक्रिया अपि केचित् **कृतः**-कृत्प्रत्ययान्ताः शब्दा अपि **पेकपदिका**-एकप्रकरणान्तर्वर्तिनस्तद्धर्माणः। तद्यथा **व्रततिर्दमूना जाट्य**

---

1. *bi.* adds सति after °प्रतिलम्भ°. 3. *b.* प्रसज्येतेति, *d.* प्रसज्येते तदयुक्तम्; *b.* प्रसज्येत. 4. *bi.* यदि चोक्तं for यच्चोक्त of *b. m.* 5. *bi.* om अपि after °क्रियायोगे read by all our Mss; *b.* एकस्या चानेक°, *m.* एकस्य चानेक°. 7. *a. d.* add इति after अयुक्तं. 8. *b* यत्पुनरुक्त. 9. *bi.* om. न after यत् and before तथा. 10. *m.* प्रतीर्थानि 12. *a. d.* om. एव, *bi.* उपालम्भस्व. 13. *bi.* om. उच्यते read by *b. m.* after लोके; *bi.* अभिधाने स्वाभाव्यमेव, we read with all our Mss. 15. *a. d.* शास्त्रार्थत्वं for शास्त्रत्वं; *b. m.* प्रकृत्यादीनि for °न्यादिना of *bi. a. d.* 16. *m.* om. one कानिचित्; *a. d.* प्रतीतानि for प्रतीतार्थानि but *b.* om. it. 17. *bi.* लक्षणस्य for लक्षणशास्त्रस्य of our Mss; *b* omits एव after सति. 18. *d.* प्रतीतार्थां क्रिया; *bi.* om. अपि before केचित् read by all our Mss.; *a. b. d. m.* om. कृतः; *m.* reads कृत्प्रत्ययान्ताः for कृत्प्र°. 19. *a. b. d. m.* om. अपिand read पेकपदिकाः for एकपदिकाः of *bi.*

आदृणारो जागरूको दर्विहोमीति । नृतिवृणीङ्तेः वली । दमूना दममना गेत्येवमादि अग्निरतिथिर्वा । जाट्यः-जटावान् । आदृणारो-अटनशीलः । जागरूको-जागरणशील* । दर्विहोमीति-दर्व्या जुहोतीत्येव प्रतीतार्थान्यपि इति शाकटायनाभिप्रायः । तत्र यदुक्तं न सर्वाण्याख्यातजानि नामानीत्येतदयुक्तम् ।

अथो एतत्-यत् पुनरेतदुक्तं **निष्पन्नेभिव्याहारे अभिविचारयन्ति** तत्र ब्रूमः । युक्तं ते कुर्वन्ति **भवति हि निष्पन्नेभिव्याहारे योगपरीष्टिः** योगपरीष्टिर्नाम योगस्य परीक्षणम् । कथं चानुत्पन्नः मन्नभिधानयोगः परीक्ष्येत । तद् यदुक्तं **प्रथनात् पृथिवीत्याहुः क एनामप्रथयित्पृथिमाधारश्चेति** । वयमेवं ब्रूमः प्रथितेयं केनचिदतः पृथिवीयमिति । आह । कथमियमप्रथिता सती पृथिवीत्वमापेति । उच्यते । **अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः** । दृश्यमाना ह्येषा पृथिवी । तस्मादप्यप्रथिता केनचिदन्यैस्तथापीयं पृथुदर्शनयोगात् पृथिव्येव तत्र यदुक्तं **क एनामप्रथयित्पृथिमाधारश्च** एतदयुक्तम् अन्यथापि धात्वर्थं उपपद्यत एव । तन्नैवं सति यथा न विरोत्स्यते तथा निर्वक्ष्यामः । तस्मादयुक्तः शाकटायनाभिप्रायः ।

---

1. *a b d m* वीणाते for वृणाते of *bl*. 3. *m*. om. अपि; *b*: om इ before शाकटायन° read by *b m*, *m* reads शाकटायन. 4. *b*: नामानीति तद् युक्तम्. 6. *a. d* om युक्तं ते कुर्वन्ति. 7 *a. d m. b*. अथ वा° for अथो वा *a. d. m*. परीक्षेत. 8 *b*: *m* om न before वयं read by *a b. d* 11. *m. d*. read पृथुदर्शनक्रियायोगात्, *m*. in mistake °क्रियायोगायोगात् 12. *a. d*. add इति after किमाचारश्च, *b*. यतद् युक्तम् for एतदयुक्तम् of all Mss. 13. *b* अन्यथा हि धात्वर्थो नोपपद्यत एव ; *m*. निरोत्स्यते for विरोत्स्यते.

---

1. *cf.* Nir. VI. 28. *infra* for the der. of नृतिः. For the der. of दमूः (Nigh. IV. i. 5) *vide*. Nir. IV 4. *infra*.

2. For जाट्यः *vide* Pân. V. ii. 120 and the Vârtika on it. Hence simply means "*possessed of matted hair*". For जागरूक *vide* Pâṇi III. ii. 105.

4. यदुक्तं *vide* Nir. I. 12 *supra*

अथापि च यदि दृष्टेप्यर्थाः पृथुत्वे वयमुपालभ्यामहे । नन्वेवं सति सर्व एव दृष्टप्रवादा उपालभ्यन्ते न केवलमहमेव । यो यदृष्ट्वा ब्रवीति स तत्र दोष एव । या सति दृष्टहानं प्रसज्येत । अनिष्टं चैतत् । तस्मात् पृथुदर्शनात् पृथिवीत्युच्यते ।

यथो एतत्-यत्पुनरेतदुक्तं पदेभ्यः पदेतरार्थान्संचस्कारेत्यत्र ब्रूमः । नैरुक्ते शब्देनानभिधेये अर्थे अननुगतमसंबद्धं संचस्कार स तेनासम- 5 नासंबद्धेन संस्कारेण गर्ह्यः-गर्हणीयः । न पुनराचार्यो योनुगमय्य धातुभिर-नैरेकाभिधानगतानर्थांस्ततः संचस्कार नैव मौढ्येन । सैषा तदभिप्रायापरिज्ञानात् दृष्टगर्हा। पुरुषो हि कश्चिदशिक्षितत्वादेकधातुजमपि न जानाति किमुत बहुधातुजम् । पि च सन्ति लोके तादृशाः पुरुषा ये कारकहारकादीन्यपि प्रकृतिक्रियाणि सन्ति तेभ्यो धातुभ्य एतान्यभिनिष्पद्यन्त इति न जानते । एष पुरुषदोषो न शास्त्रदोषः 10 नुगमयितुं धातुशब्दैरर्थो न शक्यते । तत्र यदुक्तमनन्वितेर्थेप्रादेशिके विकारे दभ्यः पदेतरार्थान्संचस्कार शाकटायन इति तदयुक्तम् । अनुगत एवार्थे संचस्कार ाकटायनः । सन्तमेव ह्यर्थमाययति गमयतीति सत्यम् । तस्मादुपपन्नत एव शाकटा-नमतम् ।

अपि च रूढिशब्दव्युत्पत्तिर्मन्त्रेष्वपि दृश्यते । यथा लक्ष्यं तथा लक्षणं प्रवर्तितु- 15 र्हति । इतरथा हि कस्य तल्लक्षणं स्यात् । यदसर्पत् तत्सर्पिरिति मन्त्रो यत्रवमेतत्र-

---

1. *a b. d. m.* om. अथ read by *bi*, we read अथ according to the text; *c.* adds न before वयं। *bi.* उपलभ्यामहे। 2. *d* दृष्ट प्रवादाः for दृष्टप्रवादा; *d.* उपलभन्ते, *bi.* योयं दृष्ट्वा for यो यदृष्ट्वा of all our Mss. 3. *b.* प्रसज्येत, *a.* पृथुत्वदर्शनात्, *m.* पृथुना for पृथुदर्शनात् of *bi.*: *a d.* उपपद्यते for उच्यते. 4. *b.* om. एतत् after पुनः. 5. *d* शब्देनाभिधेयेर्थे; *bi.* तेन सशब्देन for तेनासम्बद्धेन of *a b. d. m.* 6. *bi* गर्ह्यः for गर्हणीयः of all our Mss; *bi.* omits before पुनः read by all our Mss.; *a. b d. m.* योऽनुगमय्य धातुभि° for अनुगतधातुभि° of *bi.* 10. *b. m.* अभिनिष्पद्यन्ते, *bi.* अभिनिष्पाद्यन्ते 11. *bi.* दैः for धातुशब्दैः; *m.* अनुगम इति for अनुगमयितुं; *a. d.* om. अनन्वितेर्थे to पुनः 14. *bi.* अननुगत for अनुगत of all others. 15. *a.* व्युत्ति° for त्प°; *b* व्युत्पत्ति for व्युत्पत्ति. *bi.* यथा लक्षणं तथा लक्ष्यं प्रवर्तितुमर्हति; *d.* adds after यथा; *a. d.* add च after तथा 16. *bi.* यत्रवमेतत्रमवदिति, we read as above with *a. d. m.*

---

16. The reading adopted does not make good sense. Perhaps it ught to be यत्रवमेतत्र° Pand. Sivadatta's edition reads यत्रवमेव नीतं तत्र-तमवदिति मन्त्रः. This makes sense but is not available in any Mss. have consulted.

वचीतनमनदिति मन्त्रः। अपि च ब्राह्मणेनाप्येकधातुजान्येव कृत्वा निरुक्ते तस्य मन्त्रानिधानानि यत्परिज्ञाने च फलमुपपद्यते। आह "तदेतद् व्यक्षरं हृदयमिति। ह इत्येकमक्षरमभिहरन्त्यस्मै स्वाधान्ये च य एवं वेद। द इत्येकमक्षरं ददन्त्यस्मै स्वाधान्ये च य एवं वेद। यमित्येकमक्षरमेति स्वर्गं लोकं य एवं वेद इति।" एवं हरते-5 र्दयतेरेतेर्हृदयशब्दस्तदर्थफलोपदर्शनार्थं ब्राह्मणेनैव निरुक्तः। तच्च नः परं प्रमाणम्। तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान् यदेनैकैधातुनिरुक्तमिधानं निरुक्तवानिति।

यद्यो एतत्-यत् पुनरेतदुक्तं **अपरस्माद्वावात् पूर्वस्य प्रदेशो नोपपद्यत इति** अत्र ब्रूमः। **पूर्वोत्पन्नानां सत्त्वानां** नामधेयप्रतिलम्भः **अपरस्मादपि सतो भावात्** केषाञ्चित्**यथा बिल्वादो लम्बचूडक इति**। पश्चात्कालीनयापि चूडालम्बन-10 क्रियया भविष्यता योगेन बिल्वादनक्रियया च पूर्वोत्पन्नस्य सत्त्वस्य नामधेयप्रतिलम्भ उपपद्यमानो दृष्टः। क्व चान्यत्र नोपपद्यते। तन्न यदुक्तमपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इत्येतदनैकान्तिकत्वादयुक्तम्। उपपद्यत एव हि केषाञ्चिदिति।

बिल्वं भरणाद्वा भेदनाद्वा। भृतं हि तद्भवति बीजानां बिभर्ति वा दुर्निक्षादौ भक्ष्यमाणं जनम्। भेदनाद्वा भिद्यते हि तदवश्यं भक्षणायेति।

15 आह किमिदमतिबह्विव किमपि पूर्वोत्तरवस्तुसंबद्धं नामाख्यातजन्यमधिकृत्योक्त-मिति। उच्यते। शिष्यबुद्धिवृद्ध्यर्थमेतदुक्तम्। कथं नाम व्युत्पन्नबुद्धिः शिष्योऽभि-धीयमानः सर्वतोमुखानेव लौकिकवैदिकाञ्छब्दान्निर्ब्रूयादिति। सर्वाण्येव हि व्याकरणानि निरुक्तानि च वेदाङ्गत्वाविशेषात्प्रमाणानि। तेषामिदं फल्गिवदं साध्विदमसाध्विति वक्तु-मिति ॥ १४ ॥

---

2. *b*. इद इत्येक for ह इत्येक. 4 *b*. लोके for लोकं of *a b*. *m*., *d* om. लोक. 5. *a*. *d*. फलोपदर्शनार्थं, *m*. °नार्थो; *b*. *m*. ब्राह्मणे चैव for ब्राह्मणेनैव; *d* appears to read ब(प्र)त्यः for न. 7. *a*. *m*. om. एतत् after यदुक्त. 8. *b*. reads पश्चायः after इति; *bi*. पूर्वोत्पन्नानां सत्त्वानामपरस्माद्भावान्नामधेयप्रतिलम्भन। अपरस्मादपि सतो भावात्। एकेषां न एकेषां तत् मथा; *c*. *d*. अपरकालीनात् for अपरस्मात्. 9. *d*. इम्बचूलक इति. 11. *m*. चान्दनोप°, for चान्दश नोप° of *b*. 12. *b*. कस्मै-तदनैकत्वादयुक्तम् for इत्येतदनैकान्तिकत्वादयुक्तम्. 13 *m*. om. वा after भरणात्. 15. *b*. अतिबह्विव for अतिबह्विव of all our Mss. 16. *b* शिष्योऽभिधीयमान-, *d*. शिष्यो न प्रतिबुध्यमान-, *b*. शिष्योऽप्रतिबुध्यमान-. 18. *b*. तेषामेव फल्गिद साध्वि-त्येतदशक्यं वक्तुमिति *l*. *m*. तेषामपीदं.

---

2. For the quot. *vide* S'atapatha Br. XIV. väl. 4. 1.

अयापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेयमप्रतियतो नात्यन्तं स्वरसंस्कारोदेशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च। यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सोनर्थका हि मन्त्रास्तदेतेनोपेक्षितव्यं नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्त्ययापि ब्राह्मणेन रूपसंपन्ना विधीयन्त "उरु प्रथस्वेति प्रथयति" । "प्रोहाणीति प्रोहति" । अयाप्यनुपपन्नार्था भवन्ति। "ओषधे त्रायस्वैनं" "स्वधिते मैनं हिंसीः" इत्याह हिंसन्नयापि विप्रतिषिद्धार्था भवन्ति।

"एक एव रुद्रोवं तस्ये न द्वितीयः।"

"असंख्याता सहस्राणि ये रुद्रा अधि भूम्यांम्।"

"अशत्रुरिन्द्र जज्ञिषे।"

"शतं सेना अजयत्साकमिन्द्रः।"

इत्ययापि जानन्तं संप्रेष्यति "अग्नये समिध्यमानायानु ब्रूहि" इत्यथाप्याहादितिः सर्वमिति "आदित्यौरदितिरन्तरिक्षम्" इति। तद्व्युत्पादनाख्यायामोयाप्यविस्पष्टार्था भवन्त्यम्यग्याहशिमज्ञारयायि काणुकेति ॥ १५ ॥

एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानामेतल्लक्षणं परिज्ञायते। **अयापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते।** अयशब्दोधिकारार्थः। द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति। अपीति संभावने। अपि पदेषु विभागेनाव-

---

1. A. विद्यतेयमप्रतियंतो१, Two Mss. of Bi. °मप्रतीयतो. 2. R.'s variant विद्यास्थान. 4. Three Mss. of Bi. °स्तदिति नो°. 16. *Bi.* एतल्लक्षणं. 18. a. d. om. इति after अधिकरोति.

स्थितेषु लोके वेदे वा अर्थ मन्त्रेषु वाक्यभावेनावस्थितेषु यः समम्नार्थस्तस्मिन्प्रत्ययो विशेषावधारणं न विद्यते—न भवतीत्यर्थः । अयोदं शास्त्रमन्तरेण पदार्थे प्रत्ययो नास्ति । अपि वाक्यार्थ इत्यभिप्रायः ।

आह । कः पुनः पदार्थवाक्यार्थयोर्विशेष इति । उच्यते । साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थः । तद्यथा गौरित्युक्ते किमित्याकाङ्क्षा भवति ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति । यथा गच्छतीत्युक्ते क्व इति साकाङ्क्षं भवति तथा गौरित्युक्ते निराकाङ्क्षं भवति । अथेदानीं गौर्गच्छतीत्युक्ते गौर्वाहदोहादिभ्यो व्यावृत्य गमनेवतिष्ठते । गमनं चान्येभ्यो व्यावृत्य गव्येवावतिष्ठते । एष वाक्यार्थः । स एष प्रकरणाविरोधी वाक्यार्थः पदार्थं नियमेन लक्षयति पदार्थश्च पदलक्षणम् । पदार्थसंनियोगेन हि व्याकरणे पदानां प्रकृतिप्रत्ययादीनि लक्षणानि व्यादिश्यन्ते ।

यत एवमतोऽर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोदेशाः । अर्थमप्रतियतोऽप्रतिपाद्यमानस्यानवधृतार्थस्येत्यर्थः । नात्यन्तम्-नैकान्तिकेन । एकान्तो नाम निश्चयो निश्चयेनेत्यर्थः । किम् । स्वरसंस्कारोदेशाः । स्वरोदेशश्च संस्कारोदेशश्च स्वरसंस्कारोदेशाः । स्वरावधारणं संस्कारावधारणं च नास्तीति वाक्यशेषः । किं कारणम् । न ह्यनवधृतार्थः स्वरसंस्कारावधारयितुं शक्नुयात् । अर्थवशेन हि स्वरसंस्कारावतिष्ठेते ।

तदिदम्—एवं कृत्वा निरुक्तशास्त्रं विद्यास्थानमेतदधीनत्वादर्थपरिज्ञानस्य । अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं व्याकरणस्य कात्स्न्यं कृत्स्नभावं करोतीति वाक्यशेषः । व्याकरणेन हि स्वरसंस्कारौ चिन्त्येते । तस्मादपरिसमाप्तमेव तावद्व्याकरणं यावन्निरुक्तं नाधिगतमिति । न ह्यनेरुक्तोऽर्थमवधारयितुमलम् । नानवधृतार्थः स्वरसंस्कारतत्त्वं विजानीयादिति ।

---

2. *a d* नास्तीत्यर्थ· for न भवतीत्यर्थः; *m* इति समस्तार्थ· for इत्यर्थः. 6 *b*. *m* यथा for तथा of *bi* before गच्छति; *m*. निकाङ्क्षं for निराकाङ्क्षं 7. *a*. *d* गच्छतीति मनू for गच्छतीत्युक्ते 8 *m* व्यान्येभ्यो for व्यान्येभ्यो, *b* *om* स before एव; *b*. *m*. प्रकरणविरोधी for प्रकरणाविरोधी 9. *a*. *b*. *d* *m* पदार्थेनियमेन for पदार्थं नियमेन; *a* *om* हि 10. *b*. *m* लक्षणादीनि for लक्षणानि. 12 *a* *d* नैकान्ते च for नैकान्तिकेन; *b* एकान्ते, *bi* एकान्त for एकान्तो of others 13. *m*. निश्चयो नेत्यर्थ ; 14. *bi* *om*. च before नास्तीति. 15 *bi*. °वतिष्ठते for °वतिष्ठेते. 16. *b*. पत्र तदधीन° for एतदधीन°. 18 *a* *d* व्याकरणे for व्याकरणेन

---

12. Should it not be °मनिपद्यमानस्य more correctly ?

आह । ननु व्याकरणस्य कात्स्न्र्येनाकरोतीत्युक्ते तच्छेषभूतमेवैतदुणादिवत् । ततश्च विद्यास्थानत्वमस्य विरुध्यत इति । नेत्युच्यते । स्वार्थसाधकं च । स्वार्थांजहदुक्त्या ह्येतदनुपङ्गतो व्याकरणस्य कृत्स्नतां करोति । यथा लोके स्वार्थमपरिहाय कश्चित्परानुग्रहं करोत्येवम् । यत्पुनरेतदुक्तमुणादिवदिति । ते हि तन्त्रान्तर्भूता एव । "उणादयो बहुलम्" इत्युक्तम् । न पुनर्निघण्टवो बहुलमिति । तस्मात्स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनम् । व्याकरणं तु लक्षणप्रधानमिति विशेषः ।

आह । यदि मन्त्रार्थप्रत्यया चैतदारभ्यते हन्त तर्ह्येतदेवमर्थमारभ्यमाणमनर्थकमेव स्यात् तीति । आह । क एवमाहेति । उच्यते । यौत्सः । किं कारणम् । अनर्थका हि मन्त्राः । न हि मन्त्राणामर्थोस्ति वाच्यवाचकत्वेन । तदर्थनिर्वचनायारभ्यमाणमिदमप्यनर्थकमेव भवति । तस्मान्नारब्धव्यमित्येवं यौत्सो मन्यते । तत् एतदेवमुच्यमानं यौत्सेनानेन नैरुक्तेनोपेक्षितव्यम् । उपगम्य वेदं शास्त्रं चेक्षितव्यम्, किमसौ सत्यमाचष्टे दृष्टेति वा परीक्ष्यम् । अर्थवत्त्वे मन्त्राणां यद्धेतुस्तानं वक्ष्यमाणं तदुपगम्यार्थवत्त्वं मन्त्राणामीक्षितव्यमिति केचिदाहुः ।

कथा पुनरुपपत्त्या यौत्सो मन्त्राणामानर्थक्यमाहेति । उच्यते । नियतवाचोयुक्तयो नियतानुपूर्व्यो भवन्ति इति । नियतवाचोयुक्तयो निरूढवाचोयुक्तयः अभिधाननियता हि ते भवन्ति । "आ त्वा आ याहु धीतये" इति मन्त्रे न पुनर्विभावसो आगच्छ पानायेति । नियतानुपूर्व्या नियतनिष्ठानुपूर्वी पदप्रयोगस्य । तद्यथा । आ त्वा आयाहु इति न पुनर्भवति आयाह्यग्ने इति । इह लोकेऽर्थवतां शब्दानामनियमेन

---

1. *a. d* कात्स्न्र्येनाभिव्यक्तयाने, *bi.* तच्छेषमेवैतत्, *a. b d.* उणादिवत्, *bi.* गुणादिवत् 2 *m.* विद्यास्थानमस्य; *b* adds किं after उच्यते. 3. *b. m* अनुषङ्गात् for °षङ्गो; *a. d* व्याकरणकृत्स्नतां, *m* सकृत्स्नता *a* अपरिहाप्य, *b. d.* अपरिहाप्य, *m.* स्वार्थमप्य° 4 *b* करोत्येव; *a. b d* उणादिवत्, *bi* गुणादिवत्; *m* तन्त्रान्तर्भूता एव. 5 *m* अथ निर्वचन for अर्थनि° 6. *m* लक्षणप्राधान्य for °प्रधान°. 7. *a. b d m* तर्ह्येतदेवमर्थं for तदेवमर्थं of *bi.* 8. *m.* om उच्यते 11. *bi.* उच्यमाने यौत्सं पदेन अनेन नैरुक्तेन न उपेक्षितव्यम् We read with all our Mss. 16. *bi.* मन्त्रेण for मन्त्रे न of all our Mss. 17. *a. d.* नियतनिष्ठानुपूर्वी; *m.* नियतानुपूर्वी,

---

4. For the Sûtra quoted *vide* Pâṇ. III. iii. 1.

16. For the quot. *vide* SS. I. i. 1.

पर्यायवचनता दृष्ट्वा गवादिप्रयोगे तथा न पौर्वापर्यं दृष्टम् । तद्यथा । गोणीमभ्याज अभ्याज गोणीम् । आहर पात्रम् । पात्रमाहरेति । न च तथा मन्त्रेषु । ततोऽधस्वच्छब्दवैधर्म्यात्पश्यामोऽनर्थका मन्त्रा इति ।

अथाप्ययमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह । कतम इति । उच्यते । ब्राह्मणेन हेते रूपसंपन्ना अपि सन्तो विधीयन्ते । रूपं नाम लिङ्गं तेन संपन्ना लिङ्गसंयुक्ता इत्यर्थः । प्रकटलिङ्गा अपि सन्तस्तदविवक्षितं कृत्वा कर्मसु विधीयन्त एव । यदि हेते अर्थवन्तोभविष्यन् स्वेनैव लिङ्गेन स्वमात्मानमेते विनियोक्तुं समर्था इति कृत्वा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त विहिताश्च । तद्यथा । "उरु प्रथस्व" इति प्रथनलिङ्गो मन्त्रो विहितः प्रथनकर्मणि । तथा च "उरुप्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम्" । यजुरिदम् । पुरोडाशं प्रत्युच्यते । पुरोडाश । त्वं विस्तीर्णप्रथनः सन् विस्तारयात्मानं ते तव यज्ञपतिश्चायं यजमानः प्रजापशुहिरण्यादिभिश्चोरु प्रथतां विस्तीर्यतामिति । तथा "प्रोहाणीति प्रोहति" इति ब्राह्मणं द्रोणकलशप्रोहणविधायि । इदमहमात्मानमेव प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्चसायेति । तेजोर्थं ब्रह्मवर्चसार्थं चात्मानं प्रोहामि प्राञ्चं प्रेरयामीति । प्रोहाणीति प्रोहतीति प्रोहणलिङ्गो विहितः प्रोहणकर्मणि । तस्मालिङ्गसंपन्नविधानात्पश्यामो ब्राह्मणेनानर्थकस्वरूपमेव सन्तं मन्त्रं नियुक्तम् । एवं सति मन्त्र पुनर्विदधद्ब्राह्मणमर्थवत् । अनर्थका मन्त्राः । न ह्यर्थवन्तः सन्तो दासवद्ब्राह्मणेन

---

1. *b m* read गोणी for गोणी 2 *b* om अभ्याज गोणीम्, *a d m* read गामभ्याज instead, *a d* ते ह्यधर्थवच्छब्द° for ततोऽधर्थव°. 4 *m* हेतुनानर्थक्ये for हेतुरानर्थक्ये 5 *b* ते for हेते, *b.* om it. 6. *a. d* om. एव after विधीयते, *b. m.* read it; *b* om रूप नाम etc to विधीयत एव 7. *b* तेनैव for स्वेनैव 8. *m* om one तेषु, *m* विधास्यन्ते for व्यधास्यन्त, *a b d m* om प्रथयनि added by *b.* from the text. 10. *m* adds ह्वे before पुरोडाश, *b* विस्तारयेथाः स्वात्मानं for विस्तारयात्मानं of all our Mss. 11 *m* विस्तार्यंता for विस्तीर्यंता. 13 *b* प्रोहणविधायीं । इदमहमात्मान प्रोहामि प्राञ्च प्रेरयामीति प्रोहाणीति प्रोहतीति प्रोहणलिङ्गो for प्रोहणविधायि &c to प्रोहणलिङ्गो of our Mss 15 *b d* read विनियुक्तं for नियुक्त, *b* मन्त्रं twice after एव मति. 16 *a. d* add हि after अनर्थका.

---

8. For the quot. *cf.* S'B I i 6 8; and Kát. S'r. Sû II 5 20

9. For the quot, see VS, I, 22.

12. In the ताण्ड्यब्राह्मण we read प्रोहामीति प्रोहति.

विधीयेरन् विहिताश्च। तस्मादनर्थका मन्त्रा इति पश्यामः। अपि च ब्राह्मणस्यानर्थक्यमभ्युपगमे देशकालकर्तृदक्षिणादि कर्माङ्गभूतं कुत उपलभ्येत। तथा च ब्राह्मणस्यानर्थक्येभ्युपगम्यमाने वेदैकदेशस्य मन्त्रस्यालन्तमेवानर्थकत्वमभ्युपगतं स्यात्। न हि ब्राह्मणस्य विधिस्तुत्यर्थत्वादतेर्थवत्त्वास्ति। मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकानामपि सतां विनियोगमात्रेणार्थवत्ता स्यात्। एतस्माच्च कारणादनर्थका मन्त्रा वाच्यवाचकत्वेन सन्तो विनियोगमात्रेणैवार्थवंतो विधेयत्वात्। विधायकत्वाच्च ब्राह्मणमर्थवदस्तिति।

अथापि-अयमत्रो हेतुरनर्थकत्वे मन्त्राणाम्। आह। कतम इति। उच्यते। अनुपपन्नार्था ह्येते भवन्ति। य एतेष्वर्थो लभ्यते। अयमेतेष्वर्थः स्यादिति नावगम्यते। तद्यथा। ओषधे त्रायस्वैनम् इत्याह। न चौषधिरात्मानमपि त्रातुं समर्था किमुतर्षभम्। तथा। स्वधितिर्मैनं॰ हिंसीः इत्याहालनैव हिंसन्। को हि नामैवमुक्त्वा स्वयमेव हिंस्यात्। हिनस्ति च। लोके चान्येवंविधानि वाक्यान्युन्मत्तप्रभृतीना तान्यनर्थकान्दृश्यन्ते तथैवेमानि। तस्मादिमान्यप्यनर्थकानीत्युपलभ्यते।

अथापि-अयमत्रो हेतुरानर्थक्ये मन्त्राणाम्। आह। कतम इति। उच्यते। विप्रतिषिद्धार्था भवन्तीति। अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधो विप्रतिषेधः- इत्येतद्व्याघात इत्यर्थः। तद्यथा। "एक एव रुद्रोवतस्थे न द्वितीयः"। "अस॑ङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्यां"। "अश्मन्मयीं हरति जक्षिषे"। "शतं सेना अजयत् साकमिन्द्रः" इति। एतान्युदाहरणानि।

---

2. a. d. अनर्थकत्वाभ्युपगमे for आनर्थक्याभ्युपगमे of b. m., bi. आनर्थक्योपगम्य; a d. उपलभ्यते; a. d om. च after तथा. 3. a. d. om. मन्त्रस्य, e. °स्यन्त्रिषा°. 4. bi. विधिरुत्पर्थाहते, m. °र्थत्वात् अन्तेनर्थ°. 5. a. d. add अपि after °माद्वेष, m. °मद्वैष्यानर्थ°; a. d. स्यादेव। तस्मात्कानमनर्थका०, b. एतस्मा च काद्, m. m. च after एतस्मात् 8. a. षु for एषु 10. bi. अनर्थाः for सनर्थाः of a b. d. m.; b. वृक्षः for वृक्षे. m. आत्मनैवं for आत्मनेव of bi. 12. d. m. add इति before उच्यन्ते; b. m. om. अपि after इमानि 13. b. om. कतम इति 14. a. b. d. m. add अन्यस्य वा (चा a. d.)न्येन before विप्रतिषेधः, b. प्रतिषेध for विप्रतिषेधः.

---

9. For quot. see VS. IV. 1.
10. For quot. see VS. IV. 1.
13. For असंख्याता etc. see VS. XVI. 54.
16. अश्मन् etc. is from RS. X. 183. 2; शतं etc. is from RS. X. 103. 1.

" एक एव रुद्रोवतस्थे न द्वितीयो रणे निघ्नन्नसुन्नसासु शत्रून् ।
संसृज्य विश्वा भुवनानि गोपा प्रत्यङ् जनान्संचुकोचान्तकाले " ॥

एक एवावस्थे रुद्रः स्थितवान् रणाय-रणार्थम् । नान्यो द्वितीयः कश्चिदस्तीति रुद्रबहुत्वप्रतिषेधः । कथमवतस्थे । निश्चयेन घ्नन् घ्नसनासु-स्पर्द्धनीयेषु संग्रामेषु । किं निघ्नन् । शत्रून् । किं च स एकः संसृज्य सृष्ट्वा विश्वा विश्वानि भुवनानि गोप्ता-रक्षिता सृष्ट्वा च सर्गकाले पालयित्वा च स्थितिकाले प्रत्यङ् सर्गप्रातिलोम्येन जनान् संचुकोच-सङ्कोचयति अन्तकाले प्रलयकाले । य एवंगुणयुक्तो रुद्रस्तं वयं स्तुमः ।

" असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषां सहस्रयोजनेव धन्वानि तन्मसि ।"

एषा शाक्वरद्विपदानुष्टुप् । तेन चाग्निचयनेकर्मणेनाज्ञाक्षीरमिश्रा गवेधुकाः सक्तवो हूयन्त इत्यस्यां श्रोणावन्त्यायामिष्टकायाम् । प्रजापतेरार्षम् । असंख्याता-असंख्या-तानि सहस्राणि-बहूनीति यावदुक्तं स्यात् । येषाम् । ये रुद्राः भूम्याम् अधि-उपरि तेषां सहस्रयोजने-अध्यन्यवस्थितानामेव अव तन्मसि-स्तुमः धन्वानि-धनूंषि । अप्रा-सानामेवास्मान्प्रतीत्यभिप्रायः । तावदेव च तानभिष्टुमो यावद्बलतानि तानि धनूंषीति ।

" त्वं सिन्धूँरवासृजोधराचो अहन्नहिं ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परिष्वजामहे
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥"

---

2. Roth (erläuterungen p 12 note 4,) reads संचुकोचावतकाले 3 b. adds एवे before रणाय, a. d. om, इति 4 b. adds नि after निघ्नन् 5. b. om. किं निघ्नन् before शत्रून् 5. m सृष्ट्वा for सृष्ट्वा 6. b. सर्गकालादवतमेव for सर्गकाले; b. पालयिता for पालयित्वा & प्रातिलोम्येन for सर्गप्राति°. 7 b. प्रत्ययकाले for प्रलयकाले, b. om. च before पर्व. 10. d शतरुद्रिये. b. अनेन for तेन, b. सक्तवो for सक्तवो of all our Mss 11. a b. d. m. असंख्याता, m om. असंख्यातानि. 12. a. d m इति after बहूनि. 13 a. b d. m. om. तन्मसि before स्तुमः, and धन्वानि before धनूंषि read by b. 14 b. तावदेतान् for तावदेव च तान्, b om च; d. m. यावद्बलतानि for यावत्तरानि of b; a. b. d. m. add इति after धनूंषि omitted by b. 15. a. b. m. do not read the whole verse, d. does.

---

10. Cf. Kât. Śr. Sû. 18. 1. 1–5.

एतया अतिच्छन्दसेन्द्रं तुष्टाव सुदाः पैजवनः । षोडशिनि शस्त्रे विनियुक्ता । हे इन्द्र मवाम्रजः सिन्धून्-स्यन्दमानेतान् माध्यमिकानुदकसंस्थायान् । कथं पुनरवाम्रजः । ध्यगवः-तानधोगमनान्कृत्वा सर्वानेवावाम्रजो निरुक्तम् । अहन्नहिम्-अन् मेघम् । अधुः-अगातधितव्यो जज्ञिषे-जायसे नित्यकालं भवसि तस्मिन् हते मेघे । किं च । स्वनेन प्रहारेण मेघवधकर्मणा विश्वं-सर्वं पुण्यसि-पुष्णासि वार्यं-वारिप्रभवं नीवादिकम् । तं त्वा-त्वामेवंगुणसंयुक्तं वयं पारिष्वजामहे-सर्वतः सजामहे-आश्लिष्यामः । नभन्तां-मा भूवन्यकेषाम्-अन्येषां ज्याका-ज्या अधिधन्वसु-अधिधनुःषु । किंतान्ये केचनाभ्युद्यच्छमाना एतेस्मद्विषोवततज्यधनुषो हतसैन्यिनाः सन्त्वित्यतस्त्वां परिष्वजामहे इत्यभिप्रायः ।

" आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । 10

संक्रन्दनोनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥"

इत्येषाप्रतिरथेन त्रिष्टुभमिप्रणयने विनियुक्ता । अप्रतिरथस्येन्द्रपुत्रस्यार्षम् । आशुः-व्याप्तः-क्षिप्रो वा शिशानः-शिक्षयानः-तीक्ष्णीकुर्वन्नायुधं प्रगृहीतायुधः वृषभो न-वृषभ इव पुष्टो योद्धा भीमः-शत्रूणां भयजनको घनाघनो-हनाहनो-जहिजहीत्येवं शब्दकारी क्षोभणः । केषाम् । चर्षणीनाम्-प्रत्यनीकावस्थितानामसुरादीनाम् । संक्रन्दनः 15 -समाहूता शत्रूणामाहूय चानिमिषः-आदरेणाजयं प्रति एकवीरः-एक एव विक्रान्तोप्रतिद्वंद्वः संप्रमेषु शतं सेना-बहीः शत्रुसेनाः साकमवस्थिता अजयदेक इन्द्रो यस्तं वयं स्तुमः । एवमितरेतरविप्रतिषिद्धान्येतानि मन्त्रवाक्यानि । यद्येको रुद्रः नासंख्यातानि

---

1. *bi*. सुदाः for सुदाः 2. m. माध्यमिकान्; a रुद्रसंस्थापान्। 3. *bi*. तानधिगमनान्; *b*. अवाम्रजः for अवाम्रजः; m. नित्यं काले. 4. m. नित्यं काले; d. तस्मिन् तस्मिन्. 5. m. om. सर्वं, *bi*. पारिष्व. 6. a. *b* d. m. om. स्वा, *bi*. om. आश्लिष्यामः after स्वजामहे read by a. *b*. d. m 7. *b*. d. m. add अपि after स्वा. 8. *bi* केषनाभ्युद्यताना: m. एतेस्मादिष', *bi*. एते स्म द्विषः 10. a. *b*. d. अप्रतिरथे, m. °रथ', *bi*. °रथेन; *b*. d. m. add अहो after त्रिष्टुप्; *b*. d. m. do not read the whole verse. 13. a. d. om. शिशान', m. reads शिशान'; m. एहीनायुध'. 14. *bi*. om. भीमः शत्रूणां भयजनकः. *b*. reads भयानकः शत्रूणां; *b*. योषाः for योद्धाः *bi*. om. हनाहनो after घनाघनो read by all our Mss. 16. *bi*. अप्रतिरंद्र, a. d. m. अप्रतिरथः *b*. अप्रतिरद्धा. 18. *bi*. नासंख्यातानि; a. नासंख्यातानि for नाडं', m. नासंख्यता.

सहस्राणि। अथासंख्यानानि नैकः। यद्यत्रुः कयं शतं सेना अजयत्। शय शतं सेना अजयत् कथमत्रुः। लोके हि यान्येवंलक्षणानि वाक्यान्युन्मत्तादीना तान्यनर्थकानीत्युच्यन्ते। तथा चेमानि। तस्मादिमान्यप्यनर्थकानीति।

अथापि—अयमपरो हेतुर्मन्त्राणामानर्थक्ये। कतम इति। उच्यते। जानन्तं संप्रेष्यत्यध्वर्युर्होतारम्। कथम्। "अग्नये समिध्यमानायानुब्रूहि" इति। होता हि विद्वि एव भवति। नह्यविद्वान् विहितोऽस्तीति स विजानात्येवामुष्मिन्नवधाविदं मयानुष्ठानव्यमिति। तदेतद्विज्ञातार्थस्य सतः संप्रेषणमनर्थकमेव भवति। यथैतदनर्थकमेवमन्येपि मन्त्रा इति।

अथापि—अयमपरो हेतुर्मन्त्राणामानर्थक्ये। आह। कतम इति। उच्यते। अथाप्याह मन्त्रनिगमः **अदितिः सर्वमिति**। आह। किमुदाहरणम्। "**अदितिर्द्यौरदितिरन्तरिक्षम्**" इति। तदेतदुदाहरणमुपरिष्टादैकपदिके व्याख्यास्यामः। इह त्वेवमर्थमिदमुदाहृता। कथं यैव द्यौः सान्तरिक्षम्। यैव माता स एव पुत्रः स एव च पितेत्येवमादि किमपि बह्वत्र परस्परासंबद्धमुच्यते। तदर्थवत्त्वे सत्युपपादयितुमशक्यम्। तस्मादनर्थका मन्त्रा इति।

अथापि—अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह। कतम इति। उच्यते। **अविस्पष्टार्था** अपि हि केचित् **भवन्ति**। तद्यथा। **अभ्यग् यादृशिमन् जारयायि काणुका** इत्येवमादयः। न ह्येषां विस्पष्टार्थता मन्त्रेषु शक्यते परिहातुम्। न च केचिदर्थवन्तः केचिदनर्थका इति न्याय्यमभ्युपगन्तुमर्धवैशसं हि स्यात्। तस्मात् सर्व एवानर्थका इति। परिसमाप्तः पूर्वपक्षः॥ १५॥

---

1 *m.* कयं for शत. 2. *a. d.* om. हि after लोके 3. *bi* om. उच्यन्ते। तथा चेमानि। तस्मादिमान्यप्यनर्थकानि। 5. *a. b d.* add इति after संप्रेष्यति, *m* विद्वान for विद्वि. *b b* adds स before एव, *m* विद्वांसो करोति for विहितोऽस्तीति; *m* °जानात्येवममुष्मि° 7. *b* विज्ञानार्थस्य, *b d* अनर्थमेव for अनर्थकमेव; *m* om एव before भवति, *b d* यथैतद° for यद्देतद° of *bi*, *m* °मनपेक्षये। 10. *bi.* om अथापि before आह, *m* om आह before किम् 11 *bi.* om ऐकपदिके after उपरिष्टात्. 13 *bi.* om च before पिता; *b d m.* बह्वत्र, *bi.* बह्वत्र, *a* च बह्वपि. 15. *m.* om उच्यते. 16. *a.* adds भवन्ति before अपि हि केचित्; *bi.* यादृस्मिन्. 17 *m* om इति after काणुका, *b d m.* पलेषां for एषां of *bi* 18 *a* om. न्याय्यमभ्युपगन्तु to एवानर्थका इति, *bi* अर्द्धविशस for अर्धवैशस 19. *d.* समाप्तः for परिसमाप्तः.

---

5. For the quot. cide S'B. i iu 2. 3.
10. For the quot. see RS I 89. 10.
11. व्याख्यास्यामः *c. d* in Nir. IV. 23.

अर्थवन्तः शब्दसामान्यात्। "एतद्वै यज्ञस्य समृद्धं यदुपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति" इति च ब्राह्मणम्। "क्रीळन्तौ पुत्रैर्नप्तृभिः" इति। यथो एतन्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति। यथो एतद्ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्युदितानुवादः स भवति। यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत। यथो एतद्विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतद्यथासपत्नोयं ब्राह्मणोनमित्रो राजेति। यथो एतज्ज्ञानन्तं संप्रेष्यतीति जानन्तमभिवादयते जानते मधुपर्कं प्राहेति। यथो एतददितिः सर्वमिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्रासाः पानीयमिति। यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति। यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारंपर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ १६ ॥

स्वपक्षमिदानीं स्थापयिष्यामः। तदर्थमिदमारभ्यते। **अर्थवन्तः शब्दसामान्यादिति**। अर्थवन्त एव मन्त्रा इति प्रतिज्ञा। हेतुरुच्यते। शब्दसामान्यादिति। समान एव हि शब्दो लोके मन्त्रेषु च। तद्यथा य एव गोशब्दो लोके स्वरसंस्कारयुक्तः स एव मन्त्रेष्वपि। तत्रैवं सति स एवार्थवान् लोके स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति। अस्ति च विशेषहेतावर्थवन्त एव मन्त्राः शब्दसामान्या-

---

2. After ब्राह्मणम् Bi concludes Pâ 3 Kh 1, A. concludes Pâ 3 Kh 5. S. A. C. D. E. read प्राहेति, Ba प्राह. 13. After मन्त्रे A concludes sect. 6 and concludes पाद as इति प्रथमाध्यायस्य तृतीयः पादः। Bi concludes sect 2 and the pâda as प्रथमाध्यायस्य पञ्चमः पादः। 14 *b. m* स्वपक्षमिदानीं for स्वपक्षनिदानं of *Bi*. 16. *a b d m* मन्त्रेषु for मन्त्रे of *Bi*, and तद्यथा for तथा च of *Ba*.; after तद्यथा *b.* reads य एव गोशब्दो लोके मन्त्रेषु च। तद्यथा। य एव गोशब्दो &c. (probably a mistake of copy), *a. d.* °संस्कारसंयुक्तः. 17. *b.* स एव चानर्थकः।

दित्युपपद्यते । यत्पुनरेतदुक्तं । प्रयोगानियमाल्लौकिकेर्थवत्त्वं प्रयोगनियमाच्च मन्त्राणामनर्थकयमिति प्रतिवक्ष्याम एतत् । लोकेपि हि प्रयोगनियमो दृष्टस्तद्यथा । पितापुत्रावितिं ।

किं चान्यत् । एतद्वै यज्ञस्य समृद्धं यदूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् । एतदेव हि यज्ञकर्मणः समृद्धम् । तत् किमित्युच्यते । यदृपसमृद्धं मन्त्रलिङ्गैरभिधीयते तदेव हि समस्तृद्धया युक्तं भवति नेतरत् । एतदेव भूयस्तरां स्पष्टीकरोति । यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणमिति । शब्दसामान्याद्ब्राह्मणप्रामाण्याच्चेति चशब्दः । ब्राह्मणमपि च मन्त्राणामर्थवत्त्वमेव दर्शयति । अनर्थका हि सन्तः कथं कर्माभिवदेयुः । कथं वानभिवदन्तः समर्थयेयुः अर्थवत्त्वं चाभ्युपगतं भवता ब्राह्मणस्याथापि ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्यत्र । ब्राह्मणेन सिद्धमेवार्थवत्त्वमुक्तं मन्त्राणाम् । तदेतदुपदर्शितमस्माभिस्तस्मादर्थवन्त एव मन्त्रा इति ।

किं पुनः समृद्धरूपत्वे मन्त्राणामुदाहरणम् । उच्यते । क्रीळन्ताविति ।

" इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ "

सूर्यायां आर्षम् । विवाहे विनियुक्ता । अनुष्टुप् । इहैव मं-भवतं युवां स्वे गृहे मोदमानौ-हृष्यमाणौ मा वि यौष्टम्-मा च वियुज्येथाम् । विश्वं सर्वमायुर्व्यश्नुतं क्रीळन्तौ पुत्रैर्नप्तृभिः-पौत्रैश्च सहेत्यार्थः ।

---

1. *b d.* यत्पुनरेतदुक्तं, *b.* तत्पुनरतदुक्तं° 2 *b.* add तत् before प्रतिवक्ष्याम. 3. *a* यज्ञस्य कर्मणः; *d* समृद्ध तत्किमिति 6 *b* om. यदृपसमृद्धं, *b m* om. मन्त्रलिंगैरभिधीयते, *b* समृद्धक्रया, *m* समस्तक्रया, for समस्तृद्धा of *b*, *a. d.* समस्तकृद्या। 8. *b.* एवं for एव after अर्थवत्त्व 9 *b. m.* मन्त्रा. for मन्त; *a* कर्म वदेयुः, *m.* कर्मणि वदेयुः; *a d. m* कथं चानभि° for चानभि°. 10. *b.* अर्थवाच्च वाग्यु° for अर्थवत्त्वं चाभ्यु°; *m* भगवता, *a. d.* भवतो 11. *a d.* सिद्धमेकार्थवत्त्व, *m* ब्राह्मणसिद्धमेव. 13 *m. d.* add आह before किं पुन 17. *a* वियुज्यनम्, *d* वियुज्यनाम्, *b.* वियुज्येनाम्, वियुज्येयाम् is printed above to be in agreement with the subject युवां, *m* om. विश्वं. 18. *a. b d* add च after पुत्रैः; *a. b d m* om. नप्तृभिः.

---

3. For एतद्वै etc vide AB. III 3 or 5. In both these places यजुर्वा does not occur in the original.

14. The quot. is RS. X. 85. 42,

स्यानित्यनर्थवत्त्वं मन्त्राणामधुना परस्य हेतोर्निराकर्तव्यानर्थक्यनिदमाह यथो एतदिति । यदुनरेतदुक्तं नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति अत्र ब्रूमः । लौकिकेष्वपि ह्यर्थवत्सु शब्देषु नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वं च दृष्टमेव । तद्यथा । इन्द्राग्नी इति पितापुत्राविति च । तत्र यदुक्तं नियतवाचोयुक्तित्वान्नियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इत्येतदयुक्तम् । लौकिकेष्वपि हि नियतप्रयोगाः सन्तः शब्दाः केचिदर्थवन्तो दृष्टा यथेन्द्राग्नी पितापुत्राविति । स एष प्रयोगनियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः । तस्मादर्थवन्त एवेति ।

यथो एतत् यत् पुनरेतदुक्तं ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्यत्र ब्रूमः । उदितानुवादः स भवति । नासमर्थं आत्मानमेते स्वेन रूपेण विधातुं नित्यतो ब्राह्मणेन विधीयन्ते । किं तर्हि । आत्मनियोगाश्रयमुक्तमेव सन्तं मन्त्रेणार्थं ब्राह्मणमनुवक्ति विस्तरेण प्रकृतार्थसन्तुष्टया । न ह्यनुक्तं स्तोतुं शक्यते सोयमेवमुदितानुवाद एव भवति । उक्तानुवाद इत्यर्थः । अपि चानेकेपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति । ते ह्यहंपूर्विकयैकं प्रयोगं प्रति सले कपोतवत् संनिपतन्ति । तेषां समुच्चये विकल्पे च प्राप्ते सत्यभिनत एको नियमार्थं ब्राह्मणेन विधीयते । एवमुभयोरर्थवत्त्वं मन्त्रब्राह्मणयोः । तत्र यदुक्तं रूपसंपनविधानान्मन्त्रानर्थक्यं मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमित्येतदयुक्तम् । तस्मादुभयमर्थवत् मन्त्राश्च ब्राह्मणं चेति ।

यथो एतत्-यत् पुनरेतदुक्तम् । ओषधे त्रायस्वैनं स्वधिते मैनꣳ हिꣳसीः इत्यादयोनुपपन्नार्था इत्यत्र ब्रूमः । ओषध्यधिदेवतोच्यते हे ओषधे त्रायस्वैनम् । त्वत्पूर्वको ह्येष कृष्यभिधीयमानः सन्यक् त्रिको भविष्यति ततश्च यज्ञे विनियुक्तः प्रतिविशिष्टमुत्कर्षमवश्यत्वाद्वरत्वात् प्राप्स्यत इत्येतत्प्रागनभिप्रेत्योक्तमोषधे

---

1. *b. d.* पदसहेतवो. 3. *a. b d* नियतानुपूर्वत्वं च, *b.* °पूर्वत्वं च, *m* om. it. 4. *bi.* पतद्यदा for तद्यदा and om इति after इन्द्राग्नी; *m.* °त्वाद्वा. 6. *m.* °स पव for स एष. 8 *a. b d m.* om. यथो पतत्; *a d* om. इति before अत्र. 9. *b. d. m* नामनर्थो, *bi.* न समर्थं, *c* नानसमर्थो; *a b. d* पते, *bi* पत, *m.* पने. 10. *bi.* विशेषते. 11. *m* सन्तुष्टविषया; *b* कोपदेवसुदिता°. 12. *a. d* प्रकरणसन्वा. 13. *m* पव for एक; *bi* सम्पतन्ति for संनिपतन्ति of *a. b d m.* 14. *m.* विशेषते. 15. *m* om. वा. 16 *a. d* इत्येतदुक्तं for इत्येतदयुक्तं. 17. *a. b. d. m.* om. यथो पतत् 18. *a. d* इत्येवमादयो for इत्यादयः. *bi.* मवन्ति for इति. 20. *a. b.* विनियुक्ता; *bi.* पतस्याः for पतस्मात् of all our Mss; *b. d. m.* add अत्र before ब्राह्मं.

"मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः।
उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः" ॥

इति। तथापि स्वल्पसत्त्वं दृष्ट्वा केचिदेवं वक्तारो भवन्त्यसमर्थोयं ब्राह्मण इति। एवमेव कल्पिदनिप्रवृद्धे भूरं शातिते मेघेन्येषामसारतामभिप्रेत्येदमुक्तं स्यात् अशत्रुरिन्द्र जज्ञिषे यस्त्वमेतमेवमनिप्रवृद्धमहनहिमिति। यत् पुनरेतदुक्तं शतं सेना अजयदिति अत्र ब्रूमः। कुतो हि सेना या इन्द्रो जेष्यति। न हि देवानां शत्रवः सन्ति ये जेतव्या इति। किं कारणम्। विभवो देवा वरिमोधिकरणधर्माणश्च परेण महिम्ना युक्ताः। आह। कथं तर्हि शतं सेना अजयदित्येतदुक्तम्। उच्यते। रूपकल्पनयैवैषा युद्धप्रवादा स्तुतिः। वक्ष्यति च 'अग्ना च ज्योतिश्च निर्भीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति' इति। तदेतद् भवता न सम्यग् दृश्यते सम्यगन्विष्यतां देवतासतत्त्वं नैरुक्तेभ्यस्ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यसे। नैवमवाक्यतत्त्वज्ञेन मन्त्रार्थोवगाहितुं शक्यः। गम्भीरपदार्थो हि वेदः कथमवभोत्स्यते। वेदार्थावबोधविभ्रान्ता एव हि प्रवादिनः स्वबुद्धिलाघवमाविर्भावयन्तो ब्राह्मणाः सन्तः सर्ववर्णसाधारणानि दर्शनान्तराणि प्रतिषेदिरे। यदुक्तं विप्रतिषिद्धार्थत्वादनर्थका मन्त्रा इति एतदयुक्तम्। न ह्येते विप्रतिषिद्धार्थाः। भवत एव मतिविभ्रमो मन्दशिक्षितत्वात्। तस्मादर्थवन्त एव मन्त्रा इति।

यथो एतत्-यदुनरुक्तं जानन्तं संप्रेष्यतीति अत्र ब्रूमः। लौकिकेष्वप्यर्थवत्सु शब्देष्वेतदेव सामान्यं दृष्टम्। तद्यथा जानन्तं गुरुमभिवादयते

---

2 *a* ऊत्पाद्यन्ते 3. *m* स्वयं सपत्न, *b* स्वरूपसपन्नं and असम्पन्नो. 4. *a. d* सशातिने, *m* संशातिते, *b.* शातिते for पातिने of *b*; *m* om मृधः *a. d.* add हि after मेघे, and read एतत् for इदम्. 5. *b.* त्वा for त्वं after यः. 7. *m.* षिनः for वरिन. *b.* अधिकरणधर्माश्च 9 *b.* युद्धप्रवादात् स्तुतिः 10 *m.* तदेव तत् for तदेतत्. 11. *b.* देवताऽत्वं for देवतासत्त्व 12 *d. b.* विगाहितुं for अवगाहितु. *m.* गभीरपदार्थे for °दार्थो. *a. d* add कथमवभोत्स्यते after वेदः. *b. m.* अवभोत्स्यसे for °ते 13. *b.* वेदार्थविषादविभ्रान्ताः *a. d* पद्य for पद्य. 15. *m.* omits from एतदयुक्तं to मन्त्रा इति I. 16, *a. d.* पद्य for पद्य. 16. *a.* तस्मादनर्थवन्त? 17. *a b. d m.* om. यथो एतत्; *a. d.* adds एतत् after पुनः. 18. *b.* om. अपि after लौकिकेषु, and तद्यथा after इदम्

---

9. वक्ष्यति i. e. in Nir. II. 16.

तत्रैवं सति **पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति** इति। य एते पारोवर्यविदो ब्राह्मणाः पारोवर्येण विज्ञानन्त्याचार्यपरंपरया ते पारोवर्यविदो न साक्षात्कृतधर्माण इत्यभिप्रायः। तेषां किम्। तेषां य एव भूयोविद्यो भवति बहुश्रुतः कश्चित्स एव प्रशस्यते। स एव मन्त्रार्थविज्ञाता प्रशस्यो भवति नेतरो मन्दबुद्धिरशिक्षितः। स हि बहुश्रुतो बहुदृष्टत्वादनेकविषये मन्त्रार्थे न क्वचित्प्रतिहन्यते न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति। तस्माद्धेतोः स त्वं बहु श्रुत ततः सम्यगवभोत्स्यसे मन्त्रार्थान्। तत्र यदवोचोविस्पष्टार्था मन्त्रा न हि तेविस्पष्टार्थास्तानधोपरिष्टान् स्थापयित्वा व्याख्यास्यामहे। तवैष मतिं भ्रनयति संमोहः। तस्मादर्थवन्त एव मन्त्रा इति सिद्धम्। तस्माच्चैतदपि शास्त्रं मन्त्रार्थप्रत्ययायारभ्यमानमर्थवदेव भवतीति सिद्धः शास्त्रारम्भः। तत्र यदुक्तं 'यदि मन्त्रार्थप्रत्ययायानर्थकं भवति' इत्येतदयुक्तम्। इति प्रमिनेषु परस्य हेतुषु स्वपक्षसिद्धावुदिते च कारणेवस्थिते मन्त्रगणस्य सार्थता। तदर्थमेतत् खलु शास्त्रमर्थवदिति ॥ १६ ॥

अथापीदमन्तरेण पदविभागो न विद्यते।

"अवसाय पद्यते स्द मूळ"

इति। पद्यदवसं गावः पश्यदनमवतेर्गत्यर्थस्यासो नामकरणस्तस्मान्नावगृह्णन्ति। "अवसायाश्वान्" इति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति।

"इतो निर्ऋत्या इदमाजगाम"

इति पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाऽकारान्तम्।

"परो निर्ऋत्या आचक्ष्व"

इति चतुर्थ्यर्थप्रेक्षैकारान्तम्। पदः संनिकर्षः संहिता। पदप्रकृतिः संहिता। पदप्रकृतीनि सर्वचरणानां पार्षदानि।

अथापि पाङ्क्ते दैवतेन बहवः प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते दूयुर्लिङ्गज्ञा अत्र स्म इति।

---

2. m. om. य पदे; a. पोरोर्व्यं for पारोवर्यं everywhere; a. b d विजानते for विजानति. 3. a. d. om. तेषां before किं. 4 bi क्वचित् for कश्चित्; bi. य for स after प्रशस्यते: m. bi. मन्त्रार्थविज्ञाता for °विज्ञाने; m नेतरो इदंबुद्धि°. 5. a. d. प्रतिविध्यते for प्रतिहन्यते. 8. Bi प्रमयति for प्रमयति, a. d. विप्रमयति; a. d. स मोहः for संमोहः. 10. a. om. यदि. 11. a. परस्य for परस्य; bi. उक्तिते for उदिते of a. d. m. 15. A. B. C. D, R. °ऽस्यासो, Bi. °ऽस्यासौ.

"इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति"

इति वायुलिङ्गं चैन्द्रलिङ्गं चाग्नेये मन्त्रे ।

"अग्निरिव मन्यो त्विषितः सहस्व"

इति तथाग्निर्मान्यवे मन्त्रे । त्विषितो ज्वलितस्त्वग्निरित्यप्यस्य दीप्तिनाम भवति ।

अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ १७ ॥

अथापीदमन्तरेण पदविभागो न विद्यते । शास्त्रारम्भप्रयोजनाधिकारे वर्तमाने अथापीदमन्तरेण मन्त्रेष्वर्थावधारणं नास्तीत्युक्ते यदि मन्त्रेत्यादिनानर्थक्यहेतुभिर्बहुभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य कौत्सेन मन्त्राणामर्थवत्तां स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः । तेषु स्थितमर्थवत्त्वं मन्त्राणाम् । तेषामर्थनिर्वचनायेदमारभ्यमाणमर्थवदित्युपपन्नमर्थवत्त्वं निरुक्तशास्त्रस्य । तदेतत्सर्वमपि चोदकशास्त्रिकारव्याजेन प्रसक्तानुप्रसक्तमुक्तं प्रज्ञाया विवृद्धये शिष्यस्य । कथं नामासौ विवृद्धप्रज्ञः शब्दार्थन्यायसंकटेषु हेतुसमयानभिज्ञः परैः प्रतिबध्यमानोपि पदार्थान्वाक्यार्थांश्चासंमोहेन निर्ब्रूयादिति । एवं तावदेतदन्तरेण मन्त्रार्थप्रत्ययो नास्ति । अथेदमपरमारभ्यप्रयोजनमित्येवं विशेषाधिकारार्थोऽयमथशब्दः । अपि मन्त्रार्थप्रत्यय इदमन्तरेण नास्ति नाप्यस्ति यदिदं वक्ष्यमाणमित्यपिशब्द एवं संभावने ।

आह । किं पुनस्तद्वक्ष्यमाणमिति । उच्यते । **पदविभागः** । एवं पदानि वक्तव्यानीत्येतत्पदविभागपरिज्ञानं नास्तीत्यर्थः । किं कारणम् । अर्थवशेन हि पदान्यवतिष्ठन्ते न चेदमन्तरेणार्थपरिज्ञानमस्ति । तस्मादत एव पदविभागप्रसिद्धिरिति । इदमर्थवत्त्वं मन्त्राणामन्तरेण पदविभागोप्यकिंचित्करः । प्रसिद्धश्चैष सर्वशाखासु । तस्मात्पदविभागार्थवत्त्वाय चार्थवन्तो मन्त्रा इति केचिद्वर्णयन्ति ।

एवं प्रतिज्ञाय समानसंहितेषु ग्रन्थेष्वर्थहेतुकं पदविभागविशेषं दर्शयति । तद्यथा । अवसाय पद्वते रुद्र मृळेति । पद्वत्—पादवत्—पादसंयुक्तम् । अवसं गावः पथ्य-

---

3. A reads सहस्वेत्यथाग्निर्मान्यवे. 5 B. C. D. R. read दीप्तिनाम for दीप्तिनाम of Bi. and A. 6. A concludes Pâ. 1, and B1 Pâ. 6. Kh. 1 after अज्ञाननिन्दा च. 7. *Li.* अपीद for अथापीद. 12 *m.* प्रज्ञया for प्रज्ञाया; *Li.* कथ नामा सा for नामासौ of *a b d m*; *a d* अविद्वप्रज्ञ, *Li* विद्वप्रज्ञा; *a* शब्दार्थेशापसकटेषु for °न्थायस°; *Li* °सकरेषु 13. *m* प्रतिबध्यमानोपि, वाक्यार्थांश्च संमोहेन! 15. *m* om. अथ and reads अयं शब्दः. 16. *a* पद्व प्रमावे, *b. d* पद्व प्रमावने for पद्व संभावने of *Li. m.* 18. *a b d.* पदविभागपरिज्ञान for विभागपरि° of *Li.* 19. *m.* पदविभागसिद्धिः. 23. *a.* पद्वत् for पादवत्; *a. d. b. m.* अवस पथ्यदने; *Bi.* गाव for गावः.

दनम् इति निगमप्रस्तुतस्य पर्यायवचनम्। अवतेर्गत्यर्थस्यासो नामकरणः प्रत्ययः। तस्मात्—अमनामत्वादस्य नावगृह्णन्ति एतदकारा इति शेषः।

" मयोभूर्वातो अभिवातूषा ऊर्जस्वतीरोषधीरा रिशन्ताम्।
पीवस्वतीर्जीवधन्याः पिबन्त्वमायं पतते रुद्र मृळ ॥ "

शबरो नाम कार्शीवत ऋषिः। भिष्टुप् छन्दः। पूर्वैस्त्रिभिः पादैर्गवामादित्यमाशा- 5
स्योत्तमेन तासामेव रुद्रात्सुखमयाचत। गवामुपस्थाने विनियुक्ता। मयोभूः—मयोभावयिता—पाश्चात्यो वात एता उषा अभिवातु—आभिमुख्येन वातु। किं च तेन सुखसुवा वातेनानुद्वेजनीयेन स्तूयमाना ऊर्जस्वतीः—प्रभूतरसा ओषधीरारिशन्ताम्—आस्वादयन्तु। आस्वाद्यास्वाद्य च मलवत्त्वादस्मान्माभिप्रेते काले उदकं पिबन्तु। तच्च पीतमोषधिमद्दिलसामा तया कोष्ठे विपच्यतां रसशोणितमांसमेदोमज्जास्थिक्रमेण ययैनाः पीवस्वत्यो 10
मवेयुः। पीवस्वतीः—पीवगुणयुक्ताः—स्थूला—बलवत्यो—बहुपयस्काः। सन्ति च बहुपयस्त्वे जीवधन्या—जीवधनिन्यो रोगदुष्टमातृकाः(?)। हे रुद्र वयमेनासां गवामेनामाशिषमाशास्महे। त्वमप्यस्मै गोलक्षणाय वत्साय पादयुक्ताय मृळ सुखो भव। मैना हिंसीस्त्वमासामीश्वर इत्यभिप्रायः।

अवसायाश्वानिति। इदमपरमुदाहरणम्। अस्मिन्पूर्वेण रूपेण सरूपमेव पदमर्थ- 15
कृताद् विशेषाद्वगृह्णन्ति। द्वयोः पदयोर्वर्णानां वा यदविच्छेदेनोच्चारणं स समासः।

---

1. *m.* पर्यायवचनं; *m.* नामकरणे प्रत्ययः for °करणः प्रत्ययः. 2. *m.* पदविभाग for पदकारा, and adds ऋक् after शेषः. 5. *bi.* सुचरो, *a. b.* सुमरा, *d.* सुमरो, *m.* शबरो, we read शबरो on the authority of Sāyaṇa and the Anukramaṇī; *bi* गौतम° म मयोभूरित्यस्यात्रिसुमः for कार्शीवत ऋषिः। भिष्टुप् छन्दः। of *m.* supported by Sāyaṇa. 6. *bi.* adds च after तासामेव, *m* विनियोगः for विनियुक्ता 8 *d.* यातेन for वातेन; *m.* अशोषधीः(?) for ओषधीः. 9. *m.* आस्वाद्यास्वाद्य च मलवत्त्वादस्मान्माभिप्रेते काले 10. *a.* om. पीवस्वत्यो मवेयुः। पीवस्वतीः पीवगुणयुक्ताः, *d.* also om. it except the last word, *b. m.* om. पीवस्वतीः 11. *m.* om. च after सन्ति. 12. *m.* reads जीवधन्याः for जीवधन्याः; *bi.* रोगदुष्टमातृकाः, *b.* रोगदुष्टपामूकाः, *d.* रोगदुष्टपातृकाः, *m.* रोगदुष्टपातृकाः, none is intelligible; *m* मयसो(?) for मयसू. 13. *bi* adds पदते before अवसाय; *m.* reads अवशाय (?). *bi.* पद्यदनाय for पादयुक्ताय, *a. d.* add पदते before पादयुक्ताय; *a. b. d.* मैनं for मैना of *bi*. 14. *m.* ईश्वरमित्यभिप्रायः 16. *bi* अवगृह्णाति for अवगृ *b. m.* पदावच्छेदेन, *bi.* पदविच्छेदेन, *a. d.* पदविच्छेदेन.

---

3. This is RS. X. 169. 1. पीत and not प्पेता
12. Is it to be separated as जीवधनिन्यः अरोगदु

तयोरेवार्थविभागोपप्रदर्शनार्थमवच्छेदेन ग्रहणमवग्रहः । तदेतदवगृह्यते पदम् । स्यतिर्धातुर्विमोचनेर्थे वर्तते स पुनरुपसृष्ट उपसर्गेणावेत्यनेनोपसृष्टः संयुक्त इत्यर्थः । यतो धातूपसर्गविभागोपप्रदर्शनार्थमेव तत्पदमवगृह्यते अवऽसाय इत्येतत् ।

" योनिष्ट इन्द्र निषदे अकारि तमा निषीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥ "

एतया त्रिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टुव । योनिस्ते । हे इन्द्र । योनिः-वेद्यास्थानं ते-तव निषदे-निषदनाय-उपवेशनाय यदिदं मया अकारि-कृतं तं योनिं-तत्स्थानम् आ निषीद-एत्य निश्चयेन सीद । कथं पुनर्निषीद । स्वानो न-स्वन्यमान इव अर्वा-अश्वः । संशब्द्यमान इवाश्वबन्धने यथा स्वे स्थाने निषीदत्येवं मया स्वमुपशब्द्यमानः स्तुतिभिरेतस्मिन्मया संस्कृते स्वास्तीर्णबर्हिषि स्थाने निषीद । कथं पुनर्निषीद । विमुच्येतान् वयोश्वान् । कुतः । रथात् । पुनरपि चैतानवसाय-वियोज्य रश्मिभ्योश्वान् खल्वोदकयवमान्कृत्वा दोषावस्तोर्वहीयसः-अहनि च रात्रौ च ये केचिद्वहन्ति तेभ्योपि वहीयसः-शीघ्रतरेण जवेन वोढृतमास्त्वमस्तं स्वस्थो भूत्वा निषीद । एतस्मिन् योनौ-एतस्मिन्संस्कृते बर्हिषि प्रपित्वे-प्राप्ते अस्माकं त्वद्यजनकाले मा नो विघ्नं कार्षीरित्यभिप्रायः । एवं तावदिदमवगृह्यमिदमनमवगृह्यमित्यर्थपरिज्ञानद्वारेण तस्मादेतन्निरुक्तमाख्यायते ।

---

1. *m* तस्य व अवार्थि° for तयोरेवार्थ°; *bi*. विभागोपदर्शनार्थं, *d* प्रविभागोप°, *a* प्रतिभागोप° for विभागोपप्रदर्शनार्थं of *m*. *b* 2. *bi* धातुः for धातु, *a*. *d*. स्यतिर्धातु. 3. *bi* अवगृह्येत for °गृह्यते 6 All the Mss. om. योनि. after इन्द्र. 7. *m*. वेद्यास्थपरयान for स्थान of *bi*; *m* om यदिद, *d* om निषदे, *a* reads निषदने for निषदे *b*. om. ते; *b* adds उपवेशनाय before मया, *bi*. om. उपवेशनाय यदिद 9 *m*. संशप्यमान for संशब्द्यमान; *m*. अश्वबन्धने यथा &c for अश्वबन्धनाश्च स यथा &c. of *a*. *b d bi*; *m*. निषदिनि for निषीदेत् of *bi*; *a*. *d* स्वनुपशब्द्यमान, *m*. स्वमुपशब्द्यमानः for स्वमपि शब्द्यमान of *bi*, *b* स्वमनुशस्यमानस्तुतिभि 10. *m*. स्वास्तीर्णबर्हिषि for स्वास्तीर्णे बर्हिषि. 11. *m*. पतावेद: for पत्रात् वयः; *m* विमुच्य for वियोज्य. 13 *a* *bi*. *c* शीघ्रतरेण for शीघ्रतमेन of *bi*.; *d*. जीवेन, *m*. नवेन for जवेन of others. शब्दार्थेशाद्यजनेन° for त्वद्यज° 15. *m*. पतस्मात् for तस्मात् समोहेन ।

d. पर्व प्रभावने for पत्र —वने विभागपरि° of *bi*. 19. *m* *d*. *b*. *m*. अवस पच्यदने; *bi*. गा

परो निर्ऋत्या आचक्ष्वेति । एतस्मिन्पदे चतुर्थ्यर्थेप्रेक्षा--चतुर्थ्यर्थदर्शनम् । अत एतत् पदमैकारान्तम् ।

" अपेहि मनसस्पतेऽप क्राम परश्चर ।
परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥ "

अचेता नामाङ्गिरस एतामनुष्टुभमपश्यत् । दुःस्वप्नदर्शने विनियुक्ता । मन इति विज्ञानमुच्यते बुद्ध्यादि तस्य पतिर्मनसस्पतिरात्मा इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः । उभावपि स्वकृतकर्मापेक्षया प्राणिनां बुद्ध्यादिविज्ञानोपसंहारस्येशाते । तयोरन्यतरः संबोध्यते । हे मनसस्पते । अपेहि—अपगच्छास्मत्तः । मा च त्वमीपदपगम्यास्मत्तः समीप एव स्था अस्माकम् । किं तर्हि । अपक्रम-दूरमपेत्य क्राम । अपक्रम्य च परः-परतः-अन्यतोस्मत्तः चर-अपुनरावर्तमानोस्मान् प्रति । किं च परः-परागत्य यस्यास्त्वं दूतो निर्ऋत्यास्तस्यै निर्ऋत्या आचक्ष्व । किमिति । बहुधा जीवतो मम मनः । अथवा परः -प्रकृष्ट आप्तस्त्व तस्या निर्ऋत्या दूतो मां प्राप्तः अविज्ञातमरणकाल एवातिसंमोहादतो ब्रवीमि । तस्यै निर्ऋत्यै गत्वा बहुधा अनेकप्रकारमाचक्ष्व-कथय । जीवतो यादृशं मनो भवति तादृशं मम मनो बुद्ध्यादिकरणज्ञानं दिनकरकिरणस्पष्टवृत्ति न तावत्संमुमूर्षु-रित्येतदाचक्ष्व । मुमूर्षोर्हि उपक्षीणकर्मणो नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति न च मम तथेत्यभिप्रायः । एवं समानसंहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यम् । स चार्थ इदमन्तरेण न विज्ञायते । अत इदमुक्तम् ' अथार्थादमन्तरेण पदविभागो न विद्यते ' इति ।

---

1 *a d m.* om. चतुर्थ्यर्थप्रेक्षा 2. *m* om अत. 5 *a d.* om. नाम, *m.* पतामनुष्टुप् for पतामनुष्टुममपश्यत्; *d m.* मन इति हि विज्ञानं &c. 6. *bi.* बुद्धयादि for बुद्ध्यादि of *a. b d m.*; *a d.* पति for पति°. 7. *bi m.* विज्ञानापसंहारस्य, *a* °द्धयादिप्रधान for °द्ध्यादि°; *m* अपेति for अपेत्य, *a.* क्राम. for क्राम. 10. *a. b. d m* = *b* om ते, *b* अ[illegible] for अन्यतर. 8. *bi* अपगच्छ । अस्मत्तो गत्वा च व्य°. 9. *bi.* adds सशयमान for सशय[illegible] प्र of *bi.* 11 *a b. d* om. निर्ऋत्ये, *d.* तस्मै for तस्यै; *bi* om *b d. bi*, *m.* निर्ऋ[illegible] 12 *m* प्रकृष्टः for प्रकृष्टं of all others, *b* पर नित्यं for परादि°, for परमपि शब्दमानः ज[illegible] तो, *bi.* समोहतो 13. *m.* तस्यैव for तस्यै. 14. *a b.* °ऋत्यैनावेदयति, *m.* °ऋत्यैनावेदयति, *bi* बुद्धयादिकरणज्ञानि, *bi* बुद्धयादिकरणज्ञानदिनकर°; *a b. d m.* °ऋत्यैनावेदयति for °ऋत्यैनाचक्षतन° for स्वदश[illegible] स्पष्टवृत्तित्वेन तावत्, *m.* संमुमूर्षु° for स मुमूर्षु° of *bi*. 15 *m.* समोहेन । for मुमूर्षो; *bi.* उपक्षीणकर्मणा for °कर्मणो of *a. b d. m.* *d* पत्र प्रमादेन [illegible] चार्थ. विमागपरि° of *bi*. 19. *m.* 164. 1.
d. b. m. अत्र पद्यदने, *bi.* ining of the section

पदविभागप्रसक्तमधुना संहितालक्षणमाह । **परः संनिकर्षः संहिता** इति । परः –प्रकृत्ये यः संनिकर्षः–संश्लेषः परस्परेण स्वराणां स्वराधिरूढानां च व्यञ्जनानां सा संहितेत्युच्यते । सा च पुनरियं **पदप्रकृतिः संहिता** । अत्र द्विधा वर्णयन्ति । पदानां या प्रकृतिः सेयं पदप्रकृतिः संहिता । किं कारणम् । संहितातो हि पदानि प्रक्रियन्ते तस्मात्संहितैव प्रकृतिः । विकारः पदानीत्येवमेके मन्यन्ते । अपरे पुनः पदप्रकृतिः संहितेति पदानि प्रकृतिरस्याः सेयं पदप्रकृतिरिति । किं कारणम् । पदान्येव हि संहन्यमानानि संहिता भवति तस्मात् पदान्येव प्रकृतिः विकारः संहितेति ।

एवं च कृत्वा **पदप्रकृतीनि सर्वचरणानां पार्षदानि** । सर्वेषा चरणानां–सर्वशाखान्तराणामित्यर्थः । किम् । पार्षदानि । स्वचरणपर्येव यैः प्रतिशाखानियतमेव पदावग्रहप्रगृह्याप्रगृह्यक्रमसंहितास्वरलक्षणमुच्यते तानीमानि **पार्षदानि**–प्रातिशाख्यानीत्यर्थः । आह किं तेषामिति । उच्यते । तानि पदप्रकृतीनि । पदं येषु संहिताया प्रकृतित्वेन चिन्त्यते तानीमानि पदप्रकृतीनि । तेषामपि स एव समय इत्यभिप्रायः ।

आह । किं पुनरत्र साधीयः । पदानां प्रकृतित्वं संहिताया विकारत्वमुत वा विकारत्वं पदानां प्रकृतित्वं संहिताया इति । उच्यते । संहितायाः प्रकृतित्वं ज्यायः । आह । किं कारणम् । उच्यते । मन्त्रो ह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते न पदैः । अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणा अधीयते चाध्येतारः । अपि च यज्ञकर्मणि संहितयैव विनियुज्यन्ते मंत्रा न पदैः । यदि हि पदानि प्रकृतिरभविष्यन्न संहिता पदैरेव मन्त्रोभिव्यज्येत पदान्येव च पूर्वमध्यापयिष्यन् ब्राह्मणा अध्येष्यन्त चाध्येतारः पदैरेव विन्ययोक्ष्यन्त मन्त्राः कर्मसु । न त्वेतत्सर्वमस्ति । तस्मादेतैर्विशेषैर्नूमिः संहितैव प्रकृतिर्न पदानीति पश्यामः । समयमात्रमितरत्स्वशास्त्रनियतमेव ।

---

a. b. d m. om. च after °रूढानां, bi. °रूढाणां; m. adds च after व्यञ्जनानां 2 त्रिविधा for द्विधा of a. b. d. m. 6. a. b. d. m. अस्याः for यस्याः of bi.; 7 नानि for संहन्यमानानि of the Mss. 7. b. d. add हि after पदान्येव 9 शाखान्तराणां. 10 bi. पदावग्रहप्रगृह्यक्रम° for पदावग्रहप्रगृह्याप्रगृह्यक्रम° 11 गृह्यं क्रम°; m. om. उच्यते. 13. m. अपश्य for उत वा 15. a. 16 तयैव. 16. m. अधीयंते for अधीयते; bi. om. अपि च &c. to 17 ad before पदैरेव by all our Mss.; a. b. read अध्येष्यन, d. अध्येष्यत, we read the form suggested grammatically.

---

of संहिता is the same as Pan. I. iv. 108.

'is'ikhya II. i.

मयमामेयो मन्त्रः । स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधानदेवतो विनियुज्यमान ऐन्द्रे वायव्ये वा कर्मणि कर्तुरभिप्रेतफलसिद्धये नालं स्यात् । कर्मवैगुण्याच्च कर्तुरपध्वंसाय स्यात् । तस्माद् विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिति ।

" अग्निरिव मन्यो त्विषितः सहस्व सेनानीनः सहुरे हूत एधि ।
हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ "

इति । यथा पूर्वस्मिन्नामेये वायुलिङ्गमिन्द्रलिङ्गं च तथैतस्मिन्नपि मान्यवे मन्त्रे अग्निः—अग्निलिङ्गं नैघण्टुकम् । एवमनेकदेवतालिङ्गसंकटेषु दुरवधारं दैवतात्त्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमयेन । यदुक्तं लिङ्गज्ञातारो वयमत्र लिङ्गत एव मन्त्रान् कर्मसु विनियोक्ष्यामहे न नो निरुक्तेन प्रयोजनमस्तीत्येतदयुक्तमिति ।

त्रिविधिरित्यप्यस्य दीप्तिनाम भवति अपठितमपि दीप्तिनामसु न केवलं यान्येव पठितानि अन्यान्यपीति ।

अथापीदमपरमारम्भप्रयोजनमस्य । आह । किमिति । उच्यते । **ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च** ज्ञानं च प्रशस्यते अज्ञानं च निन्द्यते । तत्रैवं सति वयमनिन्द्याः स्याम प्रशस्याश्चेति ज्ञेयं निरुक्तम् । अतो हि अध्यात्माधिदैवताधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति । तदेवमखिलपुरुषार्थोपकारसमर्थं शास्त्रमिति न्याय्यमारब्धुम् ॥ १७ ॥

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

स्थाणुस्तिष्ठतेरर्योर्तेरणस्थो वा ॥ १८ ॥

---

1. *bi* वेन्द्रे for वेन्द्रे 2. *bi* °फलसिद्धे for °फलसिद्धये. 7. *a. b. d. m.* om अग्निः. 8 *a.* °मंत्राख्यानसमयेन, *d* यदमत्रलिंगत एव ? 9. *m.* नैरुक्तेन for निरुक्तेन. 10. *a* त्रिविधित्यस्य ?, *d. m.* om. भवति, *m* दीप्तिनाम. 13. *b. m.* यद् कर्म नामानिन्दा for यदमनिन्दा 14. *bi.* स्यामः for स्याम, *a. d m.* परिज्ञेयं for ज्ञेयं, *m.* °विदेवाधि° for °विदेवताधि°. 16. *bi m* °कारसमर्थत्वाच्च°. 17. C. accents as न विजानाति 18. C. accents as ज्ञानविधूतपाप्मा 20 R. सु for तत्. 21. After अरणस्थो वा A. Bi. conclude *pâda* 6, sect. 2.

---

4 The quot. is RS. X. 84. 2.

क पुनर्ज्ञानं प्रशस्यतेज्ञानं च निन्द्यत इति। उच्यते। लोके शास्त्रे च। लोके तावद् यः कश्चिद्विद्वान्भवति स पूज्यते पुण्यफलैरभिर्जनैस्तदेतत्प्रत्यक्षत एव दृष्टम्। शास्त्रेपि स्थाणुरयं भारहारः इत्येवमादि। स्थाणुर्यथः स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव संबध्यते। न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः। एवं च किलाधीत्य वेदं न विजानाति योर्थम्। तस्य वेदस्याध्ययनं भारमात्रमेव ह्यसौ बिभर्ति। योर्थज्ञ इत् सकलं भद्रमश्नुते। य एवार्थज्ञो भवति न प्रत्यमात्राध्येता स एव सकलमनवखण्डितं भद्रमश्नुते अर्थपरिज्ञानफलमश्नुते-प्राप्नोति। किं पुनस्तत्। इह लोके पूज्यतामुपेत्य स्थितनामितो लोकादन्तकाले नाकमेति यत्रा-

---

1. m adds आह before क पुनः, m. देवे for लोके, a. d. देवे for शास्त्रे; m. adds अज्ञाननिन्दा ज्ञानप्रशंसा before शास्त्रे 3. bi. इत्यादि for इत्येवमादि. 5. d °ध्ययन भार° for °ध्ययनभार° of all others. 7. m. अर्थज्ञपरिज्ञान° for अर्थपरिज्ञान°. 8. bi. किं पुनस्त्व for किं पुनस्तत; a. यथा for यत्र.

---

3. The text beginning with स्थाणुरयं is accented in almost all Mss, except one, viz. B. Both the Mss. of the text and also the commentary accent it, none of the Mss., however, completely agree in the actual accents; and as the tradition of the Brâhmanas does not favour the recitation of the verse with proper accents we have omitted all accents in the pratikas here and below. We have printed the accents in the text above according to R. but it must be said that they are different from what we actually find in the Mss. We have given the variant of C. as a specimen. Properly speaking the text should not be accented at all. The accents printed in R. are grammatically correct, and hence are reproduced in our text above, but a difference, between the Mss. as here, is an indication of the accents being given to an apparently modern verse. The verses do not occur anywhere in the old Vedic texts and are referred to as Yâska's by some later writers. Durga's comment, however, indicates that it is a quotation from some old Smṛiti text, see below. All these verses are found in the *Saṁhitopanishad Brâhmaṇa* of the Sâmaveda, where they are introduced in the same way as here. There also they are not accented. That Brâhmaṇa text, however, does not appear from its language to be a production belonging to the age of the *Brâhmaṇa* literature.

सुखं किंचिदपि नास्त्याध्यात्मिकमाधिदैविकमाधिभौतिकं वा तत् स्थानमिति निश्चितम् । कस्मात् पुनरसावीदृशं स्थानमेतीति । इतः । यस्मादसौ ज्ञानविधूतपाप्मा । ये हि नाकगमनप्रतिबन्धिनः पाप्मानस्ते तस्य ज्ञानेन विधूताः । अतोसावेति नाकम् । उक्तं चान्यत्रापि " न हि ज्ञानेन सदृशं पवित्रमिह विद्यते " इति ।

अथवा स्थाणुर्गदेमः । स यथा चन्दनभारं वहत्येव तदुपभोगेनाभिसंबध्यते एवं किल्वासौ यो मन्त्रमात्राध्येता नार्थज्ञः । एवं तावदस्मिञ्ज्ञानं प्रशस्तम् ।

अथैतस्मिन्नज्ञानं निन्द्यते । **यद् गृहीतमविज्ञातम्** इति । यद् गृहीतं गुरुमुखाद् विज्ञातं चार्थतः । किं च **निगदेनैव शब्द्यते**-निगदमात्रेणैव नित्यकालं शब्द्यते-उच्चार्यते न पुनरर्थतो विचार्यते । आह । किं तस्य । उच्यते । **अनग्नावि॑व शुष्कैधो न तज्ज्वलति कर्हिचित्** । शुष्कं काष्ठमनग्नौ प्रदेशे नालं ज्वलनाय-प्रकाशाय । एवं यो वेदार्थमस्यानभिज्ञोध्येता स वेदाध्ययनभारमात्रेणैव संबध्यते न तु तदीयेन फलेन । परिज्ञानं तु श्रेयसा चाभ्युदयेन च युनक्तीति । तस्मादेतत्परिज्ञानाय अवश्यं निरुक्तशास्त्रमारब्धव्यमिति ।

स्थाणुशब्दमर्थशब्दं च उदाहरणप्रसक्तौ निर्वक्ति । **स्थाणुस्तिष्ठतेः** । स्थितोऽसौ नित्यकालमेव भवति न कदाचिदप्यासीदिति । **अर्थो॑ऽतिर्गतिकर्मणः** । अर्यते असद्भावैर्धिभिः । **अरणस्यो वा** यदा अस्य स्वामी अरति गच्छति इतो लोकादमुं लोकं तदायमिहैव तिष्ठति नानेनैव सहामुं लोकं गच्छति दीनारादिरर्थः तत्सामान्यादितरोपि शब्दार्थोर्थ उच्यते ।

एवं तावत् स्थियुगमस्तूतौ ज्ञानं प्रशस्यते अज्ञानं च निन्द्यते ॥ १८ ॥

---

1. *bi.* adds कमिति सुखनाम तत्प्रतिषिद्धं प्रतिषिध्येत &c. to पुण्यकृतो ह्येव तत्र गच्छन्ति (*Vide* Nir. II. 14.) after °धिभौतिकं वा. Evidently a marginal note is here included in the text. 2. *bi.* adds उच्यते before इत्. 4. *bi.* युक्तं for शुष्कं. 5. *m* न तदुपभोगे नाभिसंबध्यते. 6. *m.* अनर्थज्ञः for नार्थज्ञ. 8. *a b d.* अज्ञातं for अविज्ञात; *a. b. d. m.* किञ्चित् for किञ्चु of *bi.*, *a. b d m.* om. निगदेनैव शब्द्यते 9. *a d* add ते: after न पुनः, *b.* omits न पुनरर्थतो विचार्यते; *a. b. d.* अनग्नाविव शुष्कैधः शुष्कं काष्ठं अग्नौ &c. 13. *m.* om इति after आरब्धव्यम् । 14. *a.* °दाहरणप्रसक्तो ! for °क्तौ. 15. *b m.* कदाचिदप्यासीदिति, *bi.* कदाचिदप्यासीदिति. Our emendation is conjectural here. 16. *bi.* यदास्य for यदा अस्य of *a. b. d m*; *m.* अरति for अरति. 17. *a b. m.* दीनारादित्यर्थः for दीनारादिर्यः.

---

4. For quot. *vide* Bhag. Gitâ IV. 38.

"उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥"

अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्थमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते । ज्ञानं प्रकाशनमर्थस्याहानया वाचोपमोत्तमया वाचा । जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु । यथा स एनां पश्यति स शृणोतीत्यर्थवादप्रशंसा । तस्योत्तरा भूयसे निर्वचनाय ॥ १९ ॥

न केवलं स्मृतावेव ज्ञानप्रशंसाज्ञाननिन्दा च । किं तर्हि । वेदेपि प्रदर्शयति उत त्वः पश्यन् इति । विराजसूक्ते द्वे अप्येते ऋचौ बृहस्पतेरार्षम् । उत शब्दोपि शब्देन समानार्थः । त्वः—एक इत्यर्थः । बहूनामपि समानपृष्ठोदरपाणिपादानां समानमेवाध्ययनमधीयानानामेकः कश्चित्पश्यन्नपि वाचं मनसा सम्यक्साध्ययनोपि तत्त्वविद्यः सन् न पश्यत्येवार्थानभिज्ञत्वात् । स हि तां सम्यक् पश्यति यस्तया अर्थं विजानाति । अर्थपरिज्ञानफला हि वागित्यभिप्रायः । एवमेकः शृण्वन्नपि न शृणोत्येवैनां वाचम् । य एव ह्यर्थमवबुध्यते वाचस्तेनैव हि सा सम्यक् श्रुता भवति नेतरेण । इतरो ह्यविद्वान् ध्वनिमात्रमेवोच्चारयन्न शृणोति वाचमेवमनेनार्थवैनाविद्वांसमाह निन्दन्नन्यदृक् । सांप्रतमुत्तरेणार्थवैनार्थज्ञं प्रशंसन्नाह । उतो त्वस्मै—अप्येकस्मै—कस्मैचिदर्थज्ञाय तन्वं—शरीरं विसस्रे—विसंसयति—विवृणोतीत्यर्थः । अयं वाचः शरी-

---

4 A. आहार्षम° for आहार्थम°. 5. B. °पमोत्तरया for °पमोत्तमया. 6. A om. सुवासा: कल्याणवासा: कामयमाना ऋतुकालेषु 8. A. Bi. conclude sect. 8 after निर्वचनाय. 9. *bi.* om. प्रदर्शयति after वेदेऽपि 13. *bi.* adds न ददर्श between सन् and न पश्यत्येवा°; *m.* सहिता for स हि ता; *m* सः after पश्यति. 14. *bi.* अर्थपरिज्ञानफला for °ज्ञानफला, *m.* om. हि; *a. b d. m* न शृणोत्येवैनां वाचं, *bi.* om. पश्य. 15. *bi.* om. हि after तेनैव. 16. *bi.* ध्वनिमात्रमेवोच्चरत्यविद्वान् वाचम् अर्थम् अनेनार्थवैन &c., *a. d.* उच्चारयति for उच्चारयन् 17. *a. d.* अन्येकस्मैचिदर्थज्ञाय for अप्येकस्मै कस्मैचिद°.

---

1. The quot. is RS. X. 71. 4.

र[illegible]नं दर्शयत्येकस्मै कस्मैचिदर्थाय । अकाशनमयंस्यादानया व[illegible]र्णेन तृतीयेन पादेनेत्यर्थः । कथं पुनर्विज्ञाते तन्त्रमिति चेत् उपमो-त्तमया वाचा-उत्तमेन पादेनोच्यते **जायेव पत्य उशती सुवासाः**-इत्यनेन। यथा हि जाया विदितसर्वाङ्गविकृतिर्भूत्वा उशती-कामयमानेव भर्त्रे प्रेम्ण दर्शे-येदात्मानम्। कस्मिन्काले । यदा **सुवासा** भवति-निर्मितवासा भवति । निर्मित-वासा-नीरजस्का ऋतुकालेषु तदा ह्यतिवरं स्त्री पुरुषं प्रार्थयते । अत एतयोपमीयते । **यथा स पुरुषस्या यावत् पश्यति** स्त्रियं नेतरो वा घनवदाकृतसर्व-गात्रा । **एवं स** एवैतां वाचं यथावत्पश्यति यः पदशोविच्छ्यैतां विकृत्य वार्थमस्याः पश्यति समस्तव्यस्तम्। एवमस्यामृचीयमर्थवत्प्रशंसा ।

उपोपमया क्रमात्। एवोत्तरास्यैवार्थस्य प्रकृतस्य ज्ञानप्रशंसात्मकस्य फल-भिधानद्वारेण **मूयसे**-बहुतरयासुना फलेनाभिसंबन्धात्प्रतिविशिष्टं ज्ञानमित्येवं निर्व-चनाय । निर्विविच्य निर्धार्य वचनं-कथनं निर्वचनं तस्मै निर्वचनाय ॥ १९ ॥

"उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अघेन्वा चरति मापयैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥"

अप्येकं वाजसख्ये स्थिरपीतमाहू रममाणं विधीतार्थं देवसख्ये रमणीये स्थान इति वा विज्ञातार्थं यन्नाप्नुवन्ति वाग्वेगेषु बलवत्स्व-प्यघेन्वा ह्येष चरति मायया वाक्प्रतिरूपया नास्यै कामान्दुग्धे वाग्दो-

---

1 *a. d* विश्व्यात्मान for विश्वोत्पादान, *b.* दर्शयत्येकस्मै for दर्शयत्येकस्मै; *a. b. d. m.* अर्थमकाशनमस्यादानया वाचा 2. *m.* तृतीयपादेन, *b.* ताई for पुन; *b.* अतः for यत ; *d.* उपमा कर्तनया वाचा 4. *b.* adds पत्ये after कामयमाना 5. *a. d* om. निर्मितवासा भवति. 6. *b.* स्वपुरुषं for स्त्री पुरुषं. 7. *m* उपनिमीयते?, *b.* adds पत्या after तां, *a. b d. m.* read नेतरो वो घनपटप्रावृतसर्वगात्रा (*d* त्र). we read with *b.* as it makes better sense, but we read वा घनपट् for वा ऋनपट् of *b.* 8. *b.* शृणोतीति for पश्यति, *b. m.* विपृक्त वार्थं. 9. *b.* समस्तमेव, *m.* समस्तव्यस्त एव, we read with *a. b d.* 10. *m.* अप इव for अघेव; *b* तस्याः for अस्याः. 11 *b.* प्रतिविशिष्टज्ञानं, we read with our Mss. *a b d.* om. निर्वचनाय 12. *a.* वचनाय for वचनं कथनं निर्वचनं तस्मै.

13. The quot. is RS. X. 71. 5.

ह्यान्देवमनुष्यस्थानेषु यो वाचं श्रुतवान्भवत्यफलामपुष्पामित्यफलास्मा अपुष्पा वाग्भवतीति वा किंचित्पुष्पफलेति वार्थं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा।

साक्षात्कृतधर्माण ऋषयो बभूवुस्तेवरेभ्योसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्संप्रादुरुपदेशाय ग्लायन्तोवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च। बिल्मं भिल्मं भासनमिति वा। एतावन्तः समानकर्माणो धातवो धातुर्दधातेरेतावन्त्यस्य सत्त्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघण्टुकमिदं देवतानाम प्राधान्येनेदमिति। तद्यदन्यदेवते मन्त्रे निपतति नैघण्टुकं तत्।

"अश्वं न त्वा वारंवन्तम्।"

अश्वमिव त्वा वालवन्तम्। वाला दंशवारणार्था भवन्ति। दंशो दशतेः।

"मृगो न भीमः कुचरो गिरिष्ठाः।"

मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्दीप्मोप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सितमयं चेद्देवताभिधानं क्वायं न चरतीति। गिरिष्ठा गिरिस्थायी। गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान्पर्वतः पर्व पुनः पृणातेः प्रीणाते.

---

3. B. C. read याज्ञे दैवते; Durga's comm. below shows that he reads दैवताध्यात्मे; A. Bi. conclude sect. 4 after देवताध्यात्मे वा. 5. B. अप्राह्° for अप्राङ्. 6. R. brackets the derivations of बिल्मं and धातुः. 9. R. B. अन्यदेवते, Bi. अन्यदैवते; A. Bi. conclude sect. 5 after नैघण्टुकं तत्. 11. R. अश्वमिव त्वा वालावन्ते वाला. 17. A. पर्व for पर्व.

वार्धमासपर्वे देवानस्मिन्प्रीणन्तीति तत्प्रकृतीतरत्सन्धिसामान्यान्ये-
घस्थायी । मेघोऽपि गिरिरेतस्मादेव ।

तदानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह ॥ २० ॥

5 तद्यथा । उत त्वं सख्ये स्थिरपीतमाहुः इति । अप्येकमपि बहून्विदुः सख्ये-सखिभावे कतरस्मिन् देवसख्ये देवानां समानख्यानतायां-देवसायुज्य इत्यर्थः । वक्ष्यति हि । ' यां यां देवतां निराह तस्यास्तस्यास्ताद्व्यमनुभवति ' इति । अथवा **देवसख्ये रमणीये स्थाने** । यस्मिन् देवानां सखिभावः तद्देवसख्यं स्थानं तस्मिन् देवसख्ये रमणीये स्थाने देवलोक इत्यर्थः । कमिति । स्थिरम्-अविचालिनम् 10 -अप्रच्यवनधर्माणम् । कमेवमाहुः । **विपीतार्थमा**पीतार्थं गृहीतार्थमित्यर्थः । क एव-

---

4 B. नैगमानीह. After नैगमानीहेह A B_1 conclude sect. 6 but the former simply notes इति प्रथमोध्याय· without marking the pâda; B_1. concludes 6th pâda here. 6 *a*. adds रमणीये after देवसख्ये; *b*. om. देवानां of *a*. *b*. *d*, *m*. समानख्यातायां. 9 *m*. reads कमिति for किमिति of all other Mss., yet it is preferred as it alone corresponds to the answer that follows.

---

6. It almost looks as if *Durga* had a different text from ours, for, (i) he separates वाक्सख्ये in our text into two words; (ii.) he reads स्थिरं as if it is a word in the text which he explains by अविचालिनं &c.; (iii.) he does not notice the words रमणीये and विज्ञातार्थे. If, however, it be argued that he had the same text as ours, but he construed वाक्सख्ये as two independent words and not a compound, and स्थिरं was the sense of the word रमणीये in the text which he further explained by what followed, and that विज्ञातार्थे was implied in his word यः कामयते, we are at any rate obliged to assert that his method here of explanation of the text differs from what he usually follows. It may also be noted that the word सख्ये in the verse appears to be rendered by Yâska either as वाक्सख्ये or देवसख्ये. This would obviate the awkward and forced construction put on the word वाक् by दुर्ग.

7. वक्ष्यति i. e. in Nir. Pari XIII. 13.

माह। इयमेव वाक् ऋक्संज्ञिका। किं च नैनं हिन्वन्त्यपि वाजिनेषु। एनं-वागर्थं न हिन्वन्ति-नानुगन्तुं शक्नुवन्ति। केषु। वाजिनेषु-वाग्ज्ञेयेष्वर्थेषु बलवत्स्वपि-दुर्ज्ञेयेषु दुरवघटनीयेषु समुद्रपिहितरत्नसंनिभेषु देवतापरिज्ञानादिषु व्याकर्तव्येषु। स हि तान्व्याकर्तुं शक्नोति नेतरे मन्दबुद्धयो बहवोपि समागताः शक्नुवन्ति तानर्थान्व्याकर्तुं यानसौ व्याकरोति। अत एतदुक्तं नैनं हिन्वन्त्यपि वाजिनेषु इति। एवं तावदर्थशः प्रशस्तः।

अथेदानीमविद्वानुत्तरेणार्धर्चेन निन्द्यते। अधेन्वा चरति। अधेन्वा ह्येष चरति। न हि सा वाक् हिनोतीह न परत्र च यस्या अर्थो न परिज्ञायते। तया गृहीतयैव तामर्थीयान इतश्चेतश्चरति तत्प्रधान एव सर्वतः पर्यटतीत्यभिप्रायः। किं च माययैव चरति गृहीतया। यथा हि कश्चिन्मायया सुवर्णं बिभृयादेवमयमवाचमेतां बिभर्ति। सा तादृशी म्रियमाणा वाक्। किं करोति। नास्मै कामान् दुग्धे। कतमान्। ये तस्या वाचो दोग्धव्याः। क। देवतास्थानेषु मनुष्यस्थानेषु च। यः किं करोति। य एवं श्रुतवान् भवति। कथम्। अफलामपुष्पामिति। एवं यः श्रुतवान् भवत्यन्येभ्यः सकाशाच्छ्रुत्वा च दृढग्रहेण गृहीत्वावस्थितो भवति अध्ययनादृते नान्यदस्ति वाचि किंचिन्मृग्यमिति। तस्मै किमिति। अफलैवास्मा अपुष्पा च वाग् भवति। यथैव ह्यसौ पश्यत्यफलेयमपुष्पा चेति तथैव भवतीत्यभिप्रायः। अथवा किंचित्पुष्पफलेति वा। एतदुक्तं भवत्यल्पफलामल्पपुष्पामिति। किं कारणम्। अस्ति ह्यध्ययनमात्रे किंचिदल्पं फलं नासौ परिश्रमो व्यर्थ एवेति भाष्यकाराभिप्रायः। आह। किं पुनर्वाचः पुष्पफलमिति। उच्यते। अर्थं वाचः पुष्पफलमाहैतस्मिन्मन्त्रे मन्त्रदृक्। आह। कः पुनरसावर्थ इति। याज्ञं दैवतमध्यात्ममित्येव वाचः समासतोर्थः। स

---

1. *m.* वा for वाक्; *bi.* ऋक्संहिता for ऋक्संज्ञिका. 2. *bi.* नाननुगन्तुं. *m.* नानुगतं for नानुगन्तुं of *a. b. d.*; *d.* वाज्ञेयेषु for वाग्ज्ञेयेषु. 4. *m.* मन्दबुद्धयाया for मन्दबुद्धयो. 6. *bi.* अपि for इति. 7. *bi.* निन्द्यन्ते for निन्द्यते. 8. *a. b. d.* धिनोति for हिनोति (possibly the sandhi may have given rise to this reading); *m.* reads हिनोति हि for हिनोतीह. 9. *a. b. d.* इतश्चेतश्च चरति. 10. *a. b. d. m.* एवमयमवाचमेतां बिभर्ति, *bi.* एवमय वाचमेव पतां &c, both are construable; *b.* om. पतां. 11. *m.* म्रियमाणा for म्रियमाणा. 12. *m.* om. च. 13. *bi.* adds शुश्रुवान् before श्रुतवान्; *bi.* एभ्यः for अन्येभ्यः. 14. *m.* reads वा for वापि. 15. *m.* कस्मै for तस्मै; *d.* अफलैवास्मै अपुष्पा; *m.* एव for च; *bi.* इति after भवति. 18. *a. b. d.* add अपि after अध्ययनमात्रे; *a. d.* अल्पफलं for अल्पं फलं. 20 *bi.* याज्ञदैवतं for याज्ञं दैवतं.

पुनरेष रूपकल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते । याज्ञदैवते पुष्पफले दैवताध्यात्मे चेति । यज्ञपरिज्ञानं याज्ञं देवतापरिज्ञानं दैवतमात्मन्यधि यद्भवति तदध्यात्मम् । स एष सर्वोपि मन्त्रब्राह्मणराशिरेवं त्रिधा विभक्तः । तत्रैवं सति यदा अभ्युदयलक्षणो धर्मोभिप्रेयते तदा याज्ञं पुष्पं दैवतं फलम् । किं कारणम् । पूर्वं हि पुष्पं भवति फलार्थम् याज्ञमपि च पूर्वं तन्यते देवतार्थमित्येतस्मात्सामान्यायाज्ञं पुष्पं दैवतं फलम् । यदा पुनर्निःश्रेयसलक्षणो धर्मोभिप्रेयते तदोभे अपि याज्ञदैवते पुष्पत्वमेव बिभृतः । दैवते हि याज्ञमन्तर्भूतमेव तदर्थत्वात् । अतो न पृथगुच्यते । यत्पुनरधिदैवतं सर्वमपि प्रतिविशिष्टज्ञानेनोपासकेन मुमुक्षुणा निरूप्य चेतसा आत्मानमेव प्रत्यभिसंपादयते कार्यकरणाधिदेवताद्वारेण सोयमेवमधिदैवतमधियज्ञं चोच्छ्याध्यात्ममेवाभिसंपादयति यथा पुष्पभावमुच्छ्रय पुष्पं फलभावायेति । एवं सोयमात्मयाज्येवाभिसंपद्यते । तत्रैवं सति अध्यात्मार्थत्वादधिदैवतस्य अध्यात्मस्य च पुरुषार्थस्य निष्पन्नत्वात् दैवतं पुष्पम् अध्यात्मं फलमित्युक्तम् ।

आह । कुतः पुनरिदमायातं निरुक्तशास्त्रं प्रधानमितराणि चाङ्गानीति । उच्यते । **साक्षात्कृतधर्माण ऋषयो बभूवुः** । साक्षात्कृतो यैर्धर्मः साक्षाद्दृष्टः प्रतिविशिष्टेन तपसा त इमे साक्षात्कृतधर्माणः । के पुनस्त इति । उच्यते । ऋषयः । *ऋषन्त्यमुष्मात्कर्मण एवमर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवंलक्षणः फलविपरिणामो भवतीति पश्यन्ति ते ऋषयः । 'ऋषिर्दर्शनात्' इति वक्ष्यति । तदेतत्कर्मणः फलविपरिणामदर्शनमौपचारिक्या वृत्त्योक्तं साक्षात्कृतधर्माण इति । न हि धर्मस्य दर्शनमस्ति अत्यन्तापूर्वो हि धर्मः ।

---

1. *a b. d.* रूपककल्पनया; *a* द्विधा ग्रविभज्यते for द्विधा प्रविभज्यते. 2 *d.* देवताध्यात्मे for देवताध्यात्मे of others, the reading of *d.* is however favoured by the reading of the text, *m.* om. from तदध्यात्मम् to धर्मोभिप्रेयते in l 6. below. 3. *d* त्रेधा for त्रिधा 4. *b* याज्ञपुष्पे दैवतफले. 5. *b.* om. च after याज्ञमपि; *a. b. d.* add च after दैवतार्थं; *m* देवतार्थत्वे तस्मात् &c. 6 *b.* एव for अपि. 7. *a. d.* add एतत् after पुन . 9. *bi.* प्रतिसंपाद्यते for °त्यभिसंपाद्यते of all the Mss.; *a. d.* कार्यकरणाधिदेवताद्वारेण, *bi.* कार्यकरणाधि° *m.* सोममेव for सोपमेव. 10. *bi.* सथा for यथा. 11. *b d. m.* अधिदैवस्य for अधिदैवतस्य; *a. d.* om. च after अध्यात्मस्य, *m* add न after पुरुषार्थस्य 12. *a. b. d.* फलमित्येवमुक्तम् 13. *d.* निरुक्त शास्त्रप्रधानं. 16. *m.* एवमर्थवत्ता for °र्थवता; *bi.* एवलक्षणं for एवलक्षणः of *m* a. *b d*; *m* भवतीति पश्यन्ति ते ऋषयः. *bi a. b. d.* भवतीत्यृषय .

---

17. वक्ष्यति i. e. in Nir. II. 11.

आह। किं तेभ्यमिति। उच्यते। **तेवरेभ्योसाक्षात्कृतधर्मभ्य उपदेशेन मन्वान्संप्रादुः**। ते ये साक्षात्कृतधर्माणस्तेवरेभ्योवरकालीनेभ्यः शक्तिहीनेभ्यः श्रुतर्षिभ्यः। तेषां हि श्रुत्वा ततः पश्चाद्यत्नमुपजायते न यथा पूर्वेषां साक्षात्कृतधर्मणां अवगमन्तरेणैव। आह। किं तेभ्य इति। उच्यते। तेवरेभ्य उपदेशेन शिष्योपाध्यायिकया वृत्त्या मन्वान्ग्रन्थतोर्थतश्च संप्रादुः संप्रदत्तवन्तस्तेपि चोपदेशेनैव जगृहुः। 5

अथ तेपि **उपदेशाय ग्लायन्तोवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च** इति। उपदेशाय उपदेशार्थम्। कथं नामोपदिश्यमानमर्थमेते शक्नुयुर्ग्रहीतुमित्येतमर्थमविकृत्य ग्लायन्तः क्षियमाणास्तेष्वगृह्णत्सु तदनुकम्पया तपसायुः संकोचमवेक्ष्य कालानुरूपं च ग्रहणशक्ति बिल्मग्रहणायेमं ग्रन्थं गवादिदेवतान्यन्तं समाम्नातवन्तः। किमेतमेव। नेत्युच्यते। वेदं च वेदाङ्गानि चेतरांणीति। 10

कथं पुनः समाम्नासिषुरिति। आह। शृणु। वेदं तावदेकं सन्तमनिमहत्त्वाद्दुरध्येयमनेकशाखाभेदेन समाम्नासिषुः सुखग्रहणाय व्यासेन समाम्नातवन्तः। तद्यथा। एकविंशतिधा बाह्वृच्यम्। एकशतधाध्वर्यवम्। सहस्रधा सामवेदम्। नवधाथर्वणम्। वेदाङ्गान्यपि। तद्यथा। व्याकरणमष्टधा। निरुक्तं चतुर्दशधेत्येवमादि। एवं समाम्नासिषुर्भेदेन ग्रहणार्थम्। कथं नाम। भिन्नान्येतानि शास्त्रान्तराणि लघूनि सुखं गृह्णीयुरेते शक्तिहीना अल्पायुषो मनुष्या इत्येवमर्थं समाम्नासिषुरिति।

बिल्मग्रहणं भाष्यवाक्यप्रसक्तं निर्ब्रवीति। यदेतत् **बिल्ममित्युक्तमेतद्बिल्मं** वेदानां। भेदनम्। भेदो व्यास इत्यर्थः। **भासनमिति वा**। अथवा भासनमेव बिल्मशब्देन।

---

3. *d.* श्रुतऋषिभ्यः.; *m.* °कृतधर्माणा। 4. *a. b. d. m.* om. उच्यते; *m.* विशिष्यो° for शिष्यो°; *bi.* शिष्योपाध्यायिकया for शिष्योपाध्यायिकया of all Mss. 5. *m.* वत्या for वृत्या; *a. d. m.* संप्रत्तवन्त°; *a.* om. एव after उपदेशेन 6. *d.* °ग्रहणायेमे for °येमं. 7. *m.* om. इति; *c. d.* om. अर्थं after उपदिश्यमान. 8. *m.* ग्रहीतं for ग्रहीतुं; *m.* ग्रहीतुमित्येतमर्थमविकृत्य, *d.* °तुमित्येवमर्थमवि°, *a.* °मित्येवमर्थमवि°, *b.* °मित्येत। एवमर्थमवि°, *bi.* °मित्येतमवि°; *bi.* तेष्वनुगृह्णन्ति for तेष्वगृह्णत्सु of *a. d. m*, *b.* तेष्वनुगृह्णन्त. instead. 9 *m.* अवश्य for अवेक्ष्य; *m.* कालानुरूपा च, *d.* कालानुरूपं च 10. *d. m.* add च after वेद, *bi.* om. it. 12. *m.* सुखग्रहणाय for सुखग्रहणाय of others. 13. *bi.* बाह्वृच्यम् for बाह्वृच्यं of all the Mss, *m.* सहस्रा for सहस्रधा; *a* अथर्वण। 16. *d.* अल्पायुष°। 17. *b.* भाष्यवाक्प्रसक्तं, *a. d.* भाष्यवाक्यप्रसक्त, *b.* भाष्यकारप्रसक्त, *m.* भाष्यकारप्रसक्त & *bi* भाषण° for भासन°.

---

3. For a vedic illustration of one who got ऋषित्व after austerities *vide* PS. V. 61. 1–19. the story of त्रयारुण.

नोच्यते । वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इति । अत इदमुक्तं विल्ममिति । एवं भिदेर्भासतेर्वा बिल्मशब्दः । एवमिदमृषिभ्यो निरुक्तशास्त्रमायातमितराणि चास्त्रानीति परिशोधित आगमः ।

अथेदानीं निघण्टुसमाम्नायविरचना वक्तव्या प्रकरणत्रयविभागेन सुखव्याख्यानार्थमस्य शास्त्रस्य । सेयमुच्यते । **एतावन्तः समानकर्मणो धातवः । एतावन्त्यस्य सत्त्वस्य नामधेयानीति** । स एष पदराशिर्नैघण्टुकं नाम प्रकरणम् । एतावन्त इति या चैषु धातुषु चाख्यातपदेषु प्रतिनियता संख्या साभिप्रेयते । तद्यथा । 'गतिकर्मण उत्तरे धातवो द्वाविंशं शतम्' 'कान्तिकर्मण उत्तरे धातवोऽष्टादश' इत्येवमादि । एतावन्त्यस्य सत्त्वस्येति या नामसु प्रतिनियता संख्या साभिप्रेयते । तद्यथा । 'पृथिवीनामधेयान्येकविंशतिः' । 'हिरण्यनामान्युत्तराणि पञ्चदश' । इत्येवमादि । यत्रैतावर्थौ प्रायेण चिन्त्येते प्रसङ्गतोन्यद्यत्किंचित्तदेतदेवंलक्षणं नैघण्टुकं नाम प्रकरणं गवादि प्राग् जघनशब्दात् ।

अथ पुनर्यत्रैतावतामर्थानामिदमभिधानमित्यर्थः प्रायेण चिन्त्यते । तद्यथा । 'आदित्योप्यकूपारः' 'समुद्रोप्यकूपारः' इत्येवमादि । अनवगतसंस्कारत्वाच्च निगमाः । जघनादयः प्रायेण चिन्त्यन्ते प्रसङ्गतोन्यद्यत्किंचित्तदेतदेवंलक्षणमैकपदिकं नाम प्रकरणं जघनादि प्रागग्निशब्दात् । अथ पुनर्यत्र नैघण्टुकं देवतानामास्मिन्मन्त्र इदमन्यदत्र

---

2. *bi* आगत for आयातं of *a b d m*. 4. *m*. प्रकरणत्रयसविभागेन, and मुख व्याख्यानार्थं 5. *d* समानकर्मणो. 6. *m*, करण for प्रकरण. 7. *bi. m*. व्याख्यातपदेषु. *a. d*, ख्यातपदेषु, *b* appears to agree with *a d*. but is uncertain. 8. *bi*. द्वाविंशशतम् 9. *a d. m*. om. both या and सा; *m* नामधेयप्रतिनियता for नामसु प्रतिनियता 11. *m* चिन्त्यते!; *a. d* तदेतदेवंलक्षण *b* तदेतल्लक्षण, *m*. तदेव पलक्षणं, *bi*. पलक्षणं by omitting तदेत्र ___]d तदित्येवमादिरनवगत° 15 *a b*. अनुषङ्गतो for प्रसङ्गतो, *m* अन्यदपि for अन्यत्; *bi*. om. तदेतदेवंलक्षण 16 अग्निशब्दात्, *m*. तदेवंलक्षण for तदेतदेवंलक्षणं. 16 *bi*. add अप्राधान्येन after देवतानाम, *b*. अन्यत्र for अन्यदत्र; *d*. अग्निमन् for अस्मिन्

---

5 Nir. III. 9.

10. Nir. II. 7; II. 10

12. जघनशब्दात् i. e. Nigh. IV. 1., Nir. IV. 1.

14. Nir. IV. 18.

16. अग्निशब्दात् i. e. Nigh. V. 1., Nir. VII. 14.

प्राधान्येन वर्तत इत्ययं विभागः प्रायेण चिन्त्यते तदेतदेवंलक्षणं दैवतं नाम प्रकरणमिराब्दादि देवपर्यन्तम्। तान्येतानि त्रीणि प्रकरणानि नैघण्टुकमेकपदिकं दैवतमिति। अनेन प्रकरणत्रयविभागरूपेणेदमवस्थितं निरुक्तशास्त्रमिति।

तद्यदन्यदेवते मन्त्रे निपतति नैघण्टुकं तत्। इदमुक्तं नैघण्टुकमिदं देवतानाम प्राधान्येनेदमिति तत्र न ज्ञायते किमिदमुक्तं भवति तदेतल्लक्षणमत उत्तरिष्यते इति पर्युपयुक्तस्तच्छब्दः। यदभिधाननन्यदेवते अन्या यस्मिन् प्रधानदेवता सोयमन्यदेवतस्तस्मिन्नन्यदेवते मन्त्रे स्वमर्थमन्यस्यां प्रधानायां मन्त्रदेवतायां निपतति —निगमयत्यवतीति—प्रयुज्यमाननिष्ठभावं गच्छति मन्त्रवाक्ये नैघण्टुकं तदित्युच्यते गुणभूतमित्यर्थः। संज्ञा हि तस्येयमस्मिञ्छास्त्रे।

तद्यथा—

"अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः।
सम्राजन्तमध्वराणाम्॥"

अस्यानुष्टुब्भो नैघण्टुकोग्निः प्रधानम्। गुनःशेपस्यार्षम्। गायत्री। वारवन्तीयानुशंसने विनियुक्ता। सात्र वारवन्तीयस्यैषा योनिः। अश्वं न त्वा—अश्वमिव त्वां हे अग्ने। अग्निमग्रे नेतारं देवानां वारवन्तं—वालवन्तं—इषुमन्। स ह्यतितरां वालवान् भवति वन्यते परिचर्यते च न तथान्ये। तमिव त्वां वन्दध्यै—वन्दामहे—स्तुमः। नमोभिः—नमस्कारैरेवं हविर्भिरुद्यतैः। क्व पुनरवस्थितं कथं वा वन्दामह इति। सम्राजन्तं—दीप्यमानमध्वराणां—यज्ञानां मध्येवस्थितमुत्तरवेद्यादिषु शिल्पेष्वभिप्रेतार्थसिद्धये वन्दामहे।

---

1. b. m. तदेतदेवंलक्षणं, a. d. तदेवंलक्षणं; a. d. m. प्रकरणं before दैवतं नाम and not after. 5. a. d. तदेतल्लक्षणमत उत्तरिष्यते, m. तदेतल्लक्षणं तदोत्तरिष्यते। 6. a. b. d. m. read अन्यदेवते for अन्यदैवते of bi., and all except m. read अन्यदेवतः for अन्यदैवतः of bi. 7. bi. यत्रे for स्वयं of a. b. d. m.; m. मन्त्रे देवतायां; m. निगमयत्यवतीति प्रयुज्य°, a. b. d. bi. निगमयतीति for निगमयत्यवतीति; bi. अभिप्रयुज्य°. 14. m. वारवन्तीयानुशंसने॥; d. त्वा for त्वां. 15. m. om. अग्ने. 16. m. वन्दामहे for वन्दामहे.

---

1. देवतप्रकरणं from Nir. VII. to the end of XII.

11. The quot. is RS. I. 27. 1.

वालशब्दस्य निगमप्रसक्तस्य निर्वचनं वालो दंशवारणार्थो भवन्ति । तैर्हि दंशादयो निवार्यन्ते । दंशशब्दस्य प्रसक्तानुप्रसक्तस्य निर्वचनं दंशो दशतेरिति । दशति इसौ ।

द्वितीयमुदाहरणम् ।

" मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रूंस्ताड्हि वि मृधो नुदस्व ॥" 5

इति । गयो नामेन्द्रपुत्रस्तस्येयमार्षम् । त्रिष्टुप् । वैमृधस्य हविषो याज्या । इन्द्रोस्य प्रधानं मृगो नैघण्टुकः । मृगो न–मृग इव व्याघ्रो वा सिंहो वा । भीमो–भीषणः । कुचरः–कुत्सितचरणो हिंस्र- प्राणिवधजीवनः । गिरिष्ठाः–पर्वताश्रयः । स यथा कंचिदन्यं प्राणिविशेषं हन्ति । तेनानभिभूयमानः परावतः–परस्मात्–अतिदूरात्स्थानात्परस्याः–दिव सम्बन्धिन आजगन्थागच्छ । एतदर्थमागत्य चेह कर्मणि हे इन्द्र एतदस्मद्वचः कुरु । सृकं–यः शत्रुकार्येषु सर्तु शक्नोति तं पविं–वज्रं संशाय–तीक्ष्णीकृत्य तिग्मं–छेदनायोत्साहवन्तं सुनिशितं कृत्वा ततो वि ताड्हि–विताडयैतानस्मच्छत्रूनेक- 10

1. *a d.* दंशविनिवारणार्थाः; *m.* om. हि after तैः 2. *m.* विवार्यन्ते for निवार्यन्ते; *b.* प्रसक्तस्य for प्रसक्तानुप्रसक्तस्य of *a. b. d. m.* 4. After उदाहरणम् *a b. d b.* मृगो न भीम इति, *m* मृगो न भामि° °नुदस्व. But after उदाहरणम् adds

प्र तद्विष्णु- स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ (RS. I. 154. 2.).

किं च । and after this reads मृगो न &c. l. 5. We do not accept this verse in the text as Durga has not commented upon it. It however, contains the part quoted in the Nirukta text. 7. *m.* इन्द्रोस्य प्रधान मृगो नैघण्टुकः before गयो नाम and not afterwards; *a. b. d.* अस्या for अस्य. 8. *b* adds मृगो न भीम इति before मृगो न. 10–14. *bi.* reads these very badly as : तेनानभिभूयमान इह कर्मणि हे इन्द्र एतदस्मद्वच कुरु । सृकम् यः शत्रुकार्येषु सर्तु शक्नोति । परावतः परस्मात् अतिदूरस्थानात् परस्याः दिव सम्बन्धिन आजगन्थ आगच्छ । एतदर्थमागत्य च ते ' पर्वि वज्रं &c. This as it stands makes no sense. We read the text according to *b.*; *a. d.* apparently agree with *b m.* with a few omissions.- 13.-*bi.* adds (शत्रून्) after आस्मच्छत्रून्.

5. The quot. is RS. X. 180. 2.

7. The use of the verse is prescribed in Aś. Śr. Sū. II. 10.

प्रहारवर्जितदेहान् कुरुष्व । यानपि च न हिनस्सि कथंचित्तानपि मृधो-हिंसकान् विद्युदस्त्र-नानाप्रकारं प्रेरयस्त्र दूरमुपरागमनाय ।

अथ चेद् देवताभिधानमेतत्कुचर इति ततः क्वायं न चरतीति सर्वत्र चरतीति । गिरिष्ठा मेघस्थायी इति च । अनुरक्षणशक्त्यो हि विभवो वेदशब्दा यथाऽऽद्यं पुरुषाणामर्थाभिधानेषु विनियुज्यमानाः सर्वतोमुखा अनेकार्थान् प्रब्रुवन्तीत्येतदनेन प्रदर्शितं भवतीत्यथ चेद्देवताभिधानमिति ।

मृगादिशब्दान् निगमप्रसक्तान् निर्ब्रवीति । मृगो-मार्ष्टेर्गतिकर्मणः । नित्यमसौ गच्छति । भीमो बिभ्यत्यस्मात्-सर्व एव ह्यस्माद् बिभेति । भीष्मशब्दं सारूप्यप्रसक्तं निराह । भीष्मोप्येतस्मादेव इति । कुचर इति चरतिकर्म कुत्सितम् । चरति ह्यसौ कर्म कुत्सितं व्याघ्रो वा सिंहो वा । क्वायं न चरतीति देवताभिधानत्वे । गिरिः पर्वतः । समुद्गीर्णो भवति समस्तो ह्यसावुद्गीर्ण इव भूमौ भवति । पर्वतशब्दं पर्यायाख्यानप्रसक्तं निराह । पर्ववान् पर्वत इति । शिला-शिखरसन्धिभिरसौ तद्वान् भवति । पर्वशब्दं विग्रहप्रसक्तं निराह । पर्व पुनः पृणातेः पूरणार्थस्य । पूरयन्ति हि ते शिलाशिखरसन्धयोखिलं पर्वतम् । प्रीणातेर्वा तर्पणार्थस्य । तत् पुनरेतदर्धमासपर्व । किं कारणम् । देवानस्मिन् हविर्भिः प्रीणन्तीति । तत्प्रकृतीतरत् सन्धिमात्रसामान्यात् कालसन्धिश्च शिलासन्धिश्च समानं सन्धित्वमिति । देवताभिधानपक्षे मेघस्थायी गिरिष्ठाः । मेघोपि गिरिरेतस्मादेव । असावपि समुद्गीर्णो भवत्यन्तरिक्षलोके ।

तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते । तद्वपरिष्टाद्व्याख्यास्यामः । नैघण्टुकानि नैगमानीहेह । तदेतदुच्यते । सामान्यलक्षणोपलक्षितप्रकरणत्रयविभागेनावस्थितो गवादिर्देवपत्न्यन्तः समाम्नायोयमा-

---

1. *bi.* adds हि after यानपि च न; *a. d.* हिनस्सि, *b.* हिनस्ति, for हिनस्सि; *a. b. d.* omit एनो हिंसकान्. 4. *a. d.* अनुपक्षीणशक्त्योः 5. *b.* यथा मन्त्रपुरुषाणां; *bi.* अनेकार्थां न ह्युक्तो देवतदनेन &c. *b. m.* ह्युक्तीत्येवद् for मन्त्रप्रु°. 7. *bi.* adds इति after निर्ब्रवीति 10. *m.* om. वा after व्याघ्रः. 11. *a. d.* om. पर्वतः after गिरिः. 12. *b. m.* पर्यायाद्यानप्रसक्तं for पर्यायाख्यानप्रसक्तं. 13. *d.* adds हि after तद्वान्. 15. *m.* तर्पणार्थस्य for तर्पणार्थस्य. 16. *a. b. d.* om. इति after प्रीणन्ति; *bi.* सन्धिसामान्यात् for सन्धिमात्रसामान्यात् of *a. b. d. m.* 17. *b.* समानसन्धित्वमिति. 18. *m.* अन्तरिक्षे for अन्तरिक्षलोके.

नुपूर्व्या व्याख्यास्यत इति पर्युपयुक्तः तच्छब्दः । यानि नामानि प्राधान्यस्तुतीनाम-ङ्यादीनाम् । प्रधानभावेन याः स्तूयन्ते न निपानभाक्त्वेन ता एताः प्राधान्यस्तुतयो देवताः । तासां यानि नामान्यङ्यादीनि देवपत्न्यन्तानि तानि सर्वाण्यपि समुदितानि सन्त्येतयैकया सामान्यया प्रकरणसंज्ञयाचक्षत आचार्याः । कतमया । उच्यते । दैवत-मित्येतया । निरूढा ह्येयमेतस्मिन्नैघण्टुकशब्दसमुदाये संज्ञेत्यभिप्रायः । तत्पुनरेतद्दैवतं प्रकरणमुपरिष्टाद्व्याख्यास्यामोऽस्य शास्त्रस्य । आह । किं कारणम् । उच्यते । गुणपदेषु व्याख्यातेषु प्रधानदेवतापदानि सुखं व्याख्यास्यन्त इत्यनेनाभिप्रायेण । देवतापरिज्ञान-तत्फलाभिधाननिष्ठं च कथं नामेदं शास्त्रं स्यादिति । यानि पुनर्नैघण्टुकानि गवादीनि नैगमानि च जघन्यानि तानीह प्रकरणद्वये नैघण्टुके चैकपदिके च व्याख्यास्याम इत्येत-देवानुवर्तते । त एते गवादयो देवपत्न्यन्ता निघण्टवस्तदेकदेशो नैघण्टुकं प्रकरणम् । निघण्टुसञ्ज्ञया व्यवहारो लोके । निघण्टुमधीमहे निघण्टुमध्यापयाम इति । शास्त्रे

---

1 *m* यानि इमानि for यानि नामानि 2. *bi* om न after स्तूयन्ते; *b*. वा for या. 3. *b. d. m* add किल after तासां 4. *m*. पदया for पदया. 5. *b*. नैघण्टुकशब्दसमुदाये, *bi*. तत्पुनदेतत्, *d*. तत्पुनतदैवत। 6. *a. b. d*. add इति after किं कारणम्. 7. *a b d. m* °परिज्ञानतत्फला°, *bi* °परिज्ञानं तत्फला°. 10. *a. b* तदेकदेशे. *d m* तदेकदेशे; *m*. नैघण्टुकप्रकरण, *bi*. adds इति after प्रकरणम् omitted by all the Mss. 11. *bi*. अध्यामहे for अध्यापयाम: of *a. b. d. m*

---

6. उपरिष्टात् i.e. In the second half of Nirukta Adhyâyas VII. to XII.

8 नैघण्टुकानि–i.e All the words collected in Nigh. Adhyâyas I. to III.

9. नैगमानि–i. e. All the words collected in Nigh. Adhyâya IV.

प्रकरणद्वये First part Nir. II. & III. adhyâyas, second part Nir. IV. to VI. adhyâyas.

11. This is the popular name of the whole collection of words in five Adhyâyas from गौः to देवपत्न्यः printed at the beginning. Durga states, however, that the word निघण्टु, accurately speaking, denotes every word in this collection, and the first part including the first three adhyâyas of the collection is called the Naighaṇṭuka.

अल्पापि नैघण्टुकं प्रकरणमिति । नैगममित्येकपदिकम् । नैघण्टुकानि नैगमानि पदानि वेह प्रकरणद्वये व्याख्यास्यामः ।

अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास इति ॥ २० ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाभवासिन आचार्यभगवद्दुर्गस्य कृतौ प्रथमोऽध्यायः समाप्तः ॥ १ ॥ 5

(समाम्नायस्तत्र चतुष्टयतौन्येय निपाता वायुर्वा त्वा न नूनं नूनं सा त ऋचां त्वोक्षण्वन्तो निष्टक्त्रासो हविर्भिरितीमान्यथापि यो यथो हि न्वथापीदमर्थवन्तोथापीदं स्थाणुरयमुत त्वः पश्यन्नुत त्वं सप्तैते विंशतिः ॥)

इति निरुक्ते पूर्वषट्के प्रथमोऽध्यायः ॥ १ ॥

---

1. *d.* नैगमनित्येकपदिकम् ।; *a. b. d.* नैघन्टुकानि च पदानि नैगमानि चेह &c. 3. *m.* अध्यायपरिसमाप्तलक्ष°; *m.* omits इति; *a. b* conclude section as ते ॥ २० ॥ 4–5. *a. d.* इति ऋज्वर्थायां निरुक्तवृत्तौ, *b.* इति ऋग्वर्थायां निरुक्तवृत्तौ, *m. bi.* इति निरुक्तटीकायां, *bi.* first concludes Pâda as इति निरुक्तवृत्तौ षष्ठाध्यायस्य षष्ठः पादः, and then the adhyâya as इति निरुक्तटीकायां जम्बूमार्ग°...°दुर्गस्य कृतौ षष्ठाध्यायः (प्रथमाध्यायः) समाप्तः ॥ १ ॥; *a.* at the end gives the enumeration of parts &c. as:—॥ सं. २० मं. १० संख्या २१०० पाद ६ पत्र ७२.

---

5. In almost all the Mss. of Nirukta its adhyâyas are numbered in continuation of those of the collection of words; hence this is called the 6*th* adhyâya, but as the commentary of Durga begins from this adhyâya, we have disregarded the reading of the colophon as given by *bi.* and preferred that of *a.* & *d.* here as well as in the colophons that follow.

ह द्विविधाः शब्दाः समर्थस्वरसंस्काराश्चासमर्थस्वरसंस्काराश्च। तत् तत्रैवं सति तावत् पदेषु स्वरसंस्कारौ समर्थौ सङ्गतार्थत्वेनैवंरूपेण प्रादेशिकेन भान्वितौ स्यातां प्रदेशाभिधायिना धातुरूपेणान्वितौ संबद्धावनुगतत्वमिधेधातुरूपे स्यातां तानि तावत् तथा एव यथालक्षणमेव निर्ब्रूयात्। आह वा संशय इति। उच्यते। अर्थप्रधानत्वादनाद्रत्यैव लक्षणमेवमेषु नैरुक्तो निर्ब्रूया- 5
। भूदित्यत इदमुच्यते। येषु पदेषु स्वरसंस्कारौ समर्थौ स्यातां तथा ते निर्ब्रूयादिति।

यथान्वितेर्थेप्रादेशिके विकारेर्थनित्यः परीक्षेत केनचिद्वृत्तिसा-
मयेन। अथ पुनरनन्वितेर्थे न्याय्यस्वरसंस्कारयुक्तेन शब्देन यत्र निरुक्तमभ्य-
मानः शब्देर्थवान् कल्पयितुं न शक्यते अन्यथैवार्थो व्यवतिष्ठते अन्यथैव 10
दः। प्रादेशिकेन विकारेण विक्रियमाणोपि चार्थो शब्दो विपरिणम्यमानः अप्रादेशिक
स्वादसमर्थ एव तां प्रदेशाख्यामभिधेयसत्त्वस्य क्रियामभिधातुम्। आह। तत्र किं
व्यमिति। उच्यते। तत्रैव सत्यर्थनित्यो भूत्वार्थप्रधानः। तद्यथा। मुद्गनिल-
स्य भोजनमित्युक्ते मुद्गप्रधानमिति गम्यते एवमिहान्वयंनित्य इत्युक्तेर्थप्रधान इति
यते। अर्थप्राधान्येनानाद्रत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधान युक्ता केनचिदर्थ- 15
सामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थसामान्यमत्रास्तीति तद्वस्त-
व्या सामान्यं तेन निर्ब्रूयात्। अर्थो हि प्रधानं तद्गुणभूतः शब्दः। तस्मादर्थसामान्यं
यः शब्दसमान्यात्।

अथ पुनर्यत्रार्थसामान्यमपि नास्ति अत्र अविद्यमानेर्थसामान्येप्यक्षरवर्ण-
मान्यान्निर्ब्रूयान्न त्वेव निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि
यो भवन्ति यथार्थ विभक्तीः संनमयेत्। स्वरवर्णसामान्येनापि निर्ब्रूया-

---

: *b* m. दिवा for द्विविधाः of *a b. d*: m om च after °संस्काराः; *a. b d.* om तत् 2 *b.* om सङ्गतार्थो after समर्थौ, and add च after प्रादेशिकेन. m add गुणेन after प्रदेशाभिधायिना *a d.* add स्यातां after अन्वितौ. 4–5. *bi.* निर्ब्रूयात्। आह। &c to अनाद्रत्यैव लक्षणमेव, *a. d.* om. एव between लक्षण and 6. m om अर्थो 9. *d.* om अपि after निरुक्त. 10 *bi.* अर्थो अर्थवान् *d.* om न after कल्पयितुं *a. d* शक्यते for शक्यते m. om अन्यथैव : 11. *bi* विक्रियमाणेप्यपि for °माणोपि. 12 *bi.* समर्थो for असमर्थः *i.* प्रादेशाख्या, *b* प्रादेशिकाख्या. 16 *b d* m read इह for अत्र 17 *bi.* for °मूनः 20–21 m om यत्रेव न निर्ब्रूयात् to अनादृत्यैव 20 *bi.* यत्यो for विशयवत्यो. 21. *bi.* स्वरवर्ण सामान्येनापि.

देव। अमुष्मिन् धातावयं स्वरो वर्णो वा मया दृष्टः स एवायमस्मिन्नभिधाने दृश्यत इत्येवमुत्प्रेक्ष्य स धात्वर्थः सूत्रबद्ध इव तस्मिन्नभिधान आहृत्य स्फारीकृत्य कृत्स्नः प्रकाशयितव्यः। एवमविद्यमानेऽर्थसामान्ये स्वरवर्णसामान्यमात्रेणापि निर्ब्रूयादेव। न त्वेव न निर्ब्रूयात्। इतरथा ह्यनर्थकमेव निरुक्तशास्त्रं स्यात्। तन्मा भूदित्यत इदमुच्यते लक्षणपरामुखेषु शब्देषु न संस्कारमादियेत। किं तर्हि। अर्थसामान्यमादियेत शब्दसामान्यं वा। तद्यथा। प्रवीणोदारनिस्त्रिंशशब्दा उत्सृष्टस्वार्थाभिधेयसंबन्धाः सन्तः क्रियागुणसामान्यं हेतुमाश्रित्यान्येष्वेवार्थान्तरेषु वर्तन्ते। तद्यथा। प्रकृष्टो वीणायां प्रवीणो गान्धर्वे अत्र ह्यस्य मुख्या वृत्तिः। स एष स्वमर्थमभिधेयमुत्सृज्यैव गान्धर्वेऽभ्यासपाटवमात्रं सामान्यमाश्रित्य सर्वत्रैवाभिप्रवृत्तः। यो हि यस्मिन् कृतयत्न उत्पन्नकौशलो भवति स तत्रोच्यते प्रवीण इति। तद्यथा। प्रवीणो व्याकरणे प्रवीणो निरुक्त इति। एवमेवोदार इति। प्रागारसंनिपातादाकूतेनैव सारथेर्यो बहूत्स्थोनड्वान् वा स उद्वहतारत्वादुदार। तत्र हि समञ्जसा वृत्तिरस्य शब्दस्य। स एष उत्सृज्यैव स्वमर्थमाकूतानुविधायित्वमात्रमेव सामान्यमाश्रित्य प्रवृत्तो यो हि कश्चित् कस्मैचिदाकूतमेव लक्षयित्वा प्रागेव प्रार्थनाद्ददाति स उदार इत्युच्यते। एवमेव निस्त्रिंशः। त्रिभिः प्रदेशैर्द्वाभ्यां धाराभ्यामग्रेण च निशितः स्यतीति निस्त्रिंशः खड्गस्तत्र ह्यस्य शब्दस्य समञ्जसा वृत्तिः। स एष छेदनसमानरूपं क्रौर्यसामान्यमाश्रित्य सर्वत्रैव प्रवृत्तः। यो हि लोके क्रूरो भवति स निस्त्रिंश इत्युच्यते। एवमेते क्रियागुणसामान्यमात्रेण वर्तन्ते। यथैते एवमन्येऽप्यभ्यूहितव्याः। अभ्यूह्य चैवमर्थसामान्येन निर्वक्तव्यः। स्वरवर्णसामान्ये तु प्रचुराण्येवोदाहरणानि। सर्व एव हि नैगमाः शब्दा जहादवः स्वरवर्णसामान्यमात्रेणैव निहन्यन्ते।

---

1 *b* स एव यस्मिन् for स एवायमस्मिन, *f a b d. m* 4 *b. om* न after न त्वेव, *m* adds न संस्कारमादियेत after निर्ब्रूयात्, *b d m* (*m* इद after अत 5. *b* (*m* शब्देषु 7 *b* क्रियागुणसामान्य हेतु. *m* °सामान्यहेतु, *f r* सामान्यहेतुमात्र of *a b d*, *m* प्रवर्तन्ते for वर्तन्ते 8 *a d* प्रवृत्ति for वृत्ति, ष for पष 9 *m* पाटवमात्रसामान्य 11 *a d.* आकूतमात्रेणैव for आकूतेनैव (*b*; *a d.* आरोसनिपातात् for आरसनिपातात् of the rest, *b m* प्रागारसनिपातात् व्याहृतमात्रेणैव वाचमकेतेनैव सारथे &c 12 *m* उद्वहतरत्वात् for उद्वहतारत्वात् of the rest; *b* om पव after उत्सृज्य 13 *d* आकूतानुविधायित्वमेव, *b* om पव after आकूतं 14 *m* प्रार्थना for प्रार्थनात् 15. *m* adds स after स्यतीति, *f* adds मुख्यग्रहणात् after खड्ग and *r* मुखग्रहणात् for it 16 *a d* अभि for प्रवृत्त. 17 *a d.* om. इति after निस्त्रिंश. 18. *b. m.* om अपि after अन्ये, and च after अभ्यूह्य

न च निरुक्ते कार्ल्यवकादिशब्दा व्युत्पाद्यन्ते सुबोधैव हि तेषां व्युत्पत्तिः प्रसिद्धैव च व्याकरण इ एव तु दुर्बोधाः परोक्षातिपरोक्षवृत्तयः बिल्मकृदरोदर-वैतसर्वशब्दादयस्त एकुत्पाद्य निरुच्यन्ते । तेषु हि विशेषेणार्थवत्ता निरुक्तस्य । तान्येवार्थसामान्येन वा [मान्येन वा निर्ब्रूयान्न तेषु संस्कारमादियेतेति ।

आह । किं कारणमिदुच्यते । विशयवत्यो हि वृत्तयो भवन्ति । हियं हेत्वर्थे । यस्माद्विशद्वहुसंशयवत्यः शब्दानामर्थेषु वृत्तयो भवन्ति नानाभावे-नार्थेष्ववस्थिता प्रवृत्तिएवं स्यान्नैवं स्यादिति विचारयन्तः सन्तः प्रतिपक्षसंमो-हाच्छेरत इवास्मिन्नितियः संशय इति ।

अत्र । केचिदर्थसाम्येन क्वचिद्वर्तन्ते शब्दाः केचित्स्वरसामान्येन केचिद्वर्णसामा-न्येन यत एवमतो ऽपीह यथार्थमेव संनमयेद्विपरिणमयेत्पूर्वोत्तरपदप्रकरणाविरोधेन । किं कारणम् । अपि हि व्यत्ययो भवत्येव । सुवां स्थाने सुवो भवन्तीति हि वैया-करणाः पठन्दर्शयिष्यति चायमपि विभक्तिविपरिणामम् । तद्यथा । "हृत्सु शोकैः हृदयानि शे" इत्येवमादि ।

अधुनोक्त्वा विशयवत्यो भवन्तीत्यर्थवशेन व्याकरणेपि शब्दविपरिणामो भवती-त्येवं[14]यति । प्रत्तमवत्तमिति धात्वादी एव शिष्येत इत्येवमादि । "डुदाञ्[15] दाने तस्य प्रपूर्वस्य प्रतमिति । अत्र दकार आकारश्च धातुः परो निष्ठाप्रत्ययस्तकारः । एवं सति "दो दद् घोः" (पा० ७, ४, ४६) इति वर्तमाने "अच उपसर्गात् :" (पा० ७, ४, ४७) इति आकारस्य तकारो भवति "झरो झरि सवर्णे" पा० ८, ४, ६५) इति धात्वन्त्यस्य तकारस्य लोपे कृते "खरि च" (पा० ८,

---

2. *m.* सिद्धैव for प्रसिद्धैव; *bi.* om. तु; *a d.* °कृतरोदर°, *m.* °कृदनोदर°, *bi.* कृदरोदार°; *b.* विल्व for विल्म।. 3 *d.* om. हि after त एव. 4. *b.* ।. om वा after अर्थसामान्येन; *a d.* स्वरसंस्कारं for सस्कारं; *d m.* om. इति after गाद्रियेत. 5. *bi.* विषयवत्यो for विशयवत्यो; *m.* adds यथार्थे विभक्तीः सन्नमयेत् fter भवन्ति. 6. *bi. a b.* तस्मात् for यस्मात् of *d m*; *bi* विषय° for विशय°. . *b.* व्यवस्थिता for अवस्थिता; *d.* om. न before एवं, and reads विचारयन्नप्रतिपन्न : मोहो. 8. *bi.* विषयः for विशयः; *d.* adds नानाभावेनार्थेषु again by mistak- fter संशय. 14. *bi.* विषय° for विशय°. 17. *a. d.* अत for अच. 19. *bi.* धात्वन्तस्य for धात्वन्त्यस्य of *b. d. m.*

---

12. दर्शयिष्यति i. e. in Nir. IX. 33.

15. डुदाञ् - Dhâtupâṭha जुहोत्यादि (9).

४, ५५) इति दकारस्य चर्त्वे कृते "परः संनिकर्षः संहिता" इति धातुतकारः प्रत्ययतकारेण संयोगतामुपैति। "हल्ोनन्तराः संयोगः (पा० ८, २, १) इति ततः प्रादिसमासे कृते **प्रत्तमिति** भवति। एवमेवा चैतमावयोरित्यस्यावपूर्वस्य **अवत्तमिति**। अत्रापि दकार ओकारस्य धा[1] अत्र "आदेच उपदेशेशिति" (पा० ६, १, ४५) इत्योकार[5] पचर्त्वपरगमनप्रादिसमासाः पूर्ववदेव। एवमनयोर्धात्वोरादौ एव रेवमन्येषामपि दृष्ट्वा यथासंभवमनुविधेयम्।

अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः भुवि' इत्यस्य निवृत्तिस्थानेषु गुणवृद्धिनिवृत्तिस्थानेषु ङितीति वर्तम[10] (पा० ६, ४, १११)" इत्यादिलोपो भवति। योयं धात्वादाव तस्मिँश्छमे प्रयोग. स्तः सन्तीति। एवमन्येषामपि दृष्ट्वानुविधेयं यथासंभवम्।

अथाप्यन्तलोपो भवति गत्वा गतमिति। अत्र गमेः क्त्वाप्र प्रत्यये च परतोनुनासिकलोपो भवति "अनुदात्तोपदेश[13]" इत्यधिकृत्य एवमन्येष्वपि द्रष्टव्यमनुविधेयं च यथासंभवम्।

अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति। अत्र गमेरलोपः। "अन्त्यात् पूर्व उपधा" (पा० १, १, ६५) इत्यकारस्योपधासंज्ञा तस्य "गमहनजनखनघसां लोपः (पा० ६, ४, ६८)" इत्युपधालोपः। एवमन्येषामपि द्रष्टव्यमनुविधेयं यथासंभवम्।

---

1. *b* तकारस्य for दकारस्य 2. *d m* add साक after प्रत्ययतकारेण. 5 *m.* आदेश for आदेच, *d.* आचेद. 8 *a. d.* read अमु भुवि. 10. *d m* एव for एव, *d.* लुप्यते for लुप्यते 11. *m* adds कर्त्र after लुप्ते; *m.* द्रष्ट्वा यथा सम्भवमनुविधेयम्. 12. *a.* om गत्वा गतमिति to भवति in l. 13. 14 *m* om. च, and reads द्रष्टव्यं यथासम्भवमनुविधेयम्. 15. *b.* अलोप· for अलोपः. 16 *b.* *m* इत्युपधाश्रज्ञा, we read with *a d* अन्येषामपि, and adds च after अनुविधेयं. 17. *b* om लोप, *m.* अन्येष्वपि for

---

3. दो- धा० पा०-दिवादि (42).

8. अस्-धा० पा०-अदादि (55)

13 *अनुदात्तोपदेश etc. vide Pāṇini VI. iv. 37.*

याच्यसे तत् एवायमपि यजमानो हविर्भिः—संस्कृतैः सोम[1] ” राः स
तावावां भवन्तमेकमेवार्थं याचावहे स्तुतिभिर्हविर्भिश्च। स त्वमहेड एवमे
हि याच्यमान· क्रुध्यतीत्यत एवमुच्यते । हे वरुण बोधि—बुध्यस्व धातु
नोस्माकं याचमानानामायुः प्रमोषीः । कुरु नोभिप्रेतार्थसिद्धिमित्येव कार
दरं कृमिवदनुप्रविष्टो द्रष्टव्यः । स लुप्यते ऋवर्णेन साकम् ।

अथापि द्विवर्णलोपस्तूच इति । अत्र ऋवर्णरेफयोर्लोपः

अथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाट्य इति[8] विदारणे[9] तस्य
तस्यादिव्यापत्त्या ज्योतिः। ‘हन हिंसागत्योः’ तस्य घन इति। ‘भिदिर् पृ
0 बिन्दुः । ‘भट भृतौ’ तस्य वाट्यः।

3. *b* बोधस्व for बुध्यस्व; *m* पत्नं for पतं. 4. *m* एकपद for एकं पदं. *d.* अभिप्रायसिद्धिं for अभिप्रेतार्थसिद्धिं. 6 *bi*. om. रेफ एव &c. to द्रष्टव्यः; *a.* read ऋवर्णोदरः, *b. m* read ऋवर्णं उदरं instead, and add उदरं कृमिवत् after. कृमिवत्. 8, 10. *bi*. *b*. वाट्यः for वाट्यः of *a*. *d*. *m* 10. *d*. om. तस्य before वाट्यः

6 The whole passage is very doubtful. Again it does not give a good explanation of द्विवर्णलोपः Evidently both the र् and ऋ are not elided as it is written here, for, in that case the form should have been तिच्; but it is तृच्; and hence one ऋ must be retained Siddhânta-kâumudî on Pâṇini VI i 34 in the *6th* adhyâya of Vaidikîprakriyâ perhaps supplies a better explanation. Under the above sûtra a *Vârtika* is quoted as ऋचि नेकुत्तरपदादिलोपश्च छन्दसि which means “In Vedic language, if नि is followed by ऋच्, the initial vowel of the *2nd* member is dropped”, and since नि itself takes समप्रसारण by the rule here cited the vowel इ is elided in this change, and hence two letters are elided altogether in the formation of तृच .

8. घुट्-धा० पा०—स्वादि (742).

9. हन्-धा० पा०—अदादि (2); भिद्-धा० पा०—रुधादि (2).

10. भट—धा० पा०—स्वादि (818).

अथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तार्किति । 'क्युतिर् क्षरणे' तस्याद्यन्तविपर्ययेण स्तोकाः । 'ष्टज विसर्गे' तस्य रज्जुः । 'कस विकसने' तस्य सिकता । 'कृती छेदने' तस्य तर्कु ।

अथाप्यन्तव्यापत्तिर्भवति ॥ १ ॥

ओघो मेघो नाघो गाघो वधूर्मध्विति । अथापि वर्णोपजन आस्य- 5
द्वारे भ्रूर्जोति । तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्विग्र-
हणानां स्थानमिति प्रदिशन्ति तत्र सिद्धायामनुपपद्यमानायामितर-
योपपिपादयिषेत्तत्राप्येकेलपनिष्पत्तयो भवन्ति तद्यथैतद्भूतिर्मृदुः पृथुः
पृषतः कुणारुमित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते
दमूनाः क्षेत्रसाधा 'इत्यथापि नैगमेभ्यो भाषिका उष्णं घृतमिति । 10
अथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु । शवतिर्गतिकर्मा
कम्बोजेष्वेव भाष्यते । कम्बोजाः कम्बलभोजाः कमनीयभोजा वा
कम्बलः कमनीयो भवति । विकारमस्यार्येषु भाषन्ते शव इति ।
दातिर्लवनार्थे प्राच्येषु दाम्नुदीच्येषु । एवमेकपदानि निर्ब्रूयात् ॥

अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं 15
प्रविभज्य निर्ब्रूयाद्दण्ड्यः पुरुषो दण्डपुरुषो दण्डमर्हतीति वा दण्डेन

---

2. d. om. तस्य before रज्जुः. 11. A. B1. conclude sect 3 after विकृतय एकेषु. 15. R. omits चानेकपर्वसु. 16. A. B1. R. (Rec. II) om दण्डपुरुषो read by all others; R remarks in the notes that the word is an unnecessary addition. We let it stand in the text as it is the current reading in these parts of the country.

---

1. क्षुत्-धा० पा०-स्वादि (41).

2 सृज्-धा० पा०-दिवादि (72) & तुदादि (133). कस्-धा० पा०-भ्वादि (885) but the meaning here given is गतौ instead of विकसने.

3. कृत्-धा० पा०-तुदादि (154).

6. R. reads अस्तार्षी द्व as two words. I do not believe it necessary nor quite natural and hence I read it as one word.

संपद्यत इति वा दण्डो ददतेर्घारयतिकर्मणोऽङ्कुरो ददते मणिमित्यभिभाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतीति गर्हायाम् । कक्ष्या रज्जुरश्वस्य कक्षं सेवते । कक्षो गाहतेः । क्ष इति नामकरणः । ख्यातेर्वा-नर्थकोभ्यासः । किमस्मिन् ख्यानमिति । कषतेर्वा । तत्सामान्यान्मनुष्य-कक्षो बाहुमूलसामान्यादश्वस्य ॥ २ ॥

ओघो मेघो नाघो गाधो वधूर्मध्विति । 'वह प्रापणे' तस्यान्तव्यापत्त्या ओघः । 'मिह सेचने' तस्य मेघः । 'णह बन्धने' तस्य नाधः । 'गाहू विलोडने' तस्य गाधः । 'वह प्रापणे' तस्य वधूः । 'मद तृप्तौ' तस्य मधु ।

अथापि वर्णोपजनः । आस्यद्वारो भरूजेति । 'असु क्षेपणे' तस्य आस्य-वर्णोपजनेन । 'द्वृङ् संवरणे' तस्य द्वारः । 'भ्रस्ज पाके' तस्य भरूजा ।

एवं व्याकरणेपि लक्षणप्रधाने सत्यर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः किमुत 'निरुक्ते यदर्थप्रधानमेव । तस्मात्साधूक्तम् 'अथानन्वितेर्थेप्रादेशिके विकारे-र्थेनित्यः परीक्षेत केनचिद् 'वृत्तिसामान्येनाविद्यमाने सामान्येप्यक्षरवर्णसामान्यानि-र्ब्रूयात् । विभक्तीरपि यथार्थं संनमयेत् ' इति । एवमयमादिमध्यान्तलोप आदिमध्यान्त-विकारो वर्णलोपो द्विवर्णलोप आदिविपर्यय आद्यन्तविपर्ययो वर्णोपजन 'छन्दसि भाषायां च द्रष्टव्यो दृष्ट्वा च यथासंभवमनुविधेयः ।

---

2. A Bi. conclude sect. 4 after गर्हायाम्. 7. *b.* reads नह for णह. 9. *bi* अस् for असु 10 *bi*. om. वर्णोपजनेन after आस्यत्; *a. d.* read द्वृञ् for द्वृङ्, *a b. d* read तस्य द्वारः for तस्य वारः of *bi*; *a*, reads भ्रस्जो and *d*. भ्रस्जो for भ्रस्ज. 12 *m* नैरुक्ते for निरुक्ते 15 *m*. reads °विकारा for °विकारो. 16. *a. b. d. m.* read द्रष्टव्यः, *bi*. द्रष्टव्याः; *a. b. d.* read अनुविधेयः, *m.* अनुसंधेय', for अनुविधेयम् of *bi*.

6, 8. वह्-धा. पा.-भ्वादि (1029) Sivadatta remarks वहतेरादिव्यापत्तेरप्य-स्वीकरणीयत्वेन चिन्त्यमेतत् । तस्माद् 'ओख' धातुरेव स्वीकार्यः ।

7. मिह्-धा पा-भ्वादि (1017). णह्-धा. पा.-दिवादि (60) -गाह्-धा पा-भ्वादि (650).

8. मद्-धा. पा.-चुरादि (172).

9. अस्-धा.-पा -दिवादि (103).

10. भ्रस्-धा० पा०-क्र्यादि (37), भ्रस्ज्-धा. पा -चुरादि (4).

अतः परं संप्रसारणचिन्ता वर्तिष्यते तदर्थमिदमारभ्यते । तत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्विप्रकृतीनां स्थानमिति प्रदिशन्ति । संप्रसारणप्रकृतयश्चासंप्रसारणप्रकृतयश्च धातवः । तत्रैवं सत्युभयप्रकृतिषु स्वरादिविषयगतं यद्वक्तव्यं तत् इदमुच्यत इति पुंसुक्तस्तच्छब्दः ।

आह । इदमेव तावदुच्यतामुभयप्रकृतीनां किं लक्षणमिति । उच्यते । यत्र यस्मिन् धातौ स्वरादिकारादेरनन्तरानन्तर्हितान्येन व्यञ्जनेन परा वा पूर्वा सान्तस्था यरलवानामन्यतमो वर्णोन्तर्धातु धातुमध्ये भवति । किं तत्र । तदेतदेवंलक्षणं धातुरूपं हि द्विप्रकृतीनां द्विस्वभावानां शब्दानां स्थानमाश्रय इत्येवमाचार्याः प्रदिशन्ति प्रविभागेनोपदिशन्ति ।

तद्यथा । 'यज देवपूजासंगतिकरणदानेषु' इति । अत्र द्वे शब्दप्रकृती भवतः । संप्रसारणपक्षे तावत् इष्टवान् इष्टः इष्ट्वा एताः शब्दप्रकृतयो भवन्ति । असंप्रसारणपक्षे पुनः यष्ट्वा यष्टुं यष्टव्यमित्येताः ।

तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत् । तत्रैवं सत्येकप्रकारेण सिद्धायामर्थसिद्धावनुपपद्यमानायामितरयोपपिपादयिषेदुपपादयितुमिच्छेदर्थम् । द्वयोः संप्रसारणासंप्रसारणप्रकृत्योर्यथैवोपनयतेर्यस्तथैवोपपादयेत् । उभयथाप्यनुपपद्यमानेषु स्वयमुत्पाद्य निर्धार्य यथा यथोपनयेतार्थस्तथा तथोपपादयेदर्थलक्षणशास्त्रविहितेनार्थसाधनोपायेन । अर्थस्य प्रधानत्वात् ।

---

2. a. adds इति after प्रदिशन्ति. 3. bi. शास्त्र° for स्वशास्त्र°. 4. a. omits तावत् 5. d. reads इदमेवमुच्यता? 7. m. मध्ये for धातुमध्ये; a. b. d. m. omit तत्; bi. reads पतदेव for °देव°; b. m. add तत् after धातुरूपं; 8. m. omits हि; a, b, d. m. read शास्त्रये for आश्रय; a. b. d m. omit प्रदिशन्ति. 10. m. omits इति. 11. a, d. add इष्टिः after इष्टः, m. reads इष्टिः for इष्टः and omits इष्ट्वा 12. bi. यष्ट्वा for यष्टा. 15. bi. reads अर्थे for अर्थे and joins it with the following sentence.; m. यदेव for यदेव of the rest; bi. °पद्येऽर्थस्य° for °पद्येऽर्थस्य°, m. तदेव for तदेव of the rest, bi. adds अपरा before उभयथापि. 16. b. m. अनुपपद्यमानोऽर्थः for °द्यमानेऽर्थे; bi. तथोपपादयेत् अपि लक्षण° for °पपाद-येदर्थलक्षण°.

---

10. यज-धा. पा.-स्मादि (10०7).

तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति । एतस्मिन्नपि संप्रसारणलक्षणे सत्येके धातवः अल्पनिष्पत्तयो भवन्ति। अल्पेषु शब्दरूपेषु संप्रसारणप्रकृतिरभिनिष्पद्यते। तदप्युपेक्षितव्यम् ।

तद्यथैतदुतिर्मृदुः पृथुः पृषतः कुणारुमिति । तद्यथैतदुदाहरणजातम् ऋतिः मृदुः पृथु- पृषतः कुणारुम् इति। अवतेर्गत्यर्थस्य क्तिप्रत्यये परतः "च्छ्वोः शूडनुनासिके च" इति वर्तमाने "ज्वरत्वरस्रिव्यविमवामुपधायाश्च" इत्यूठ्भावः क्रियते तत ऊतिरिति भवति। 'मृद मर्दने' तस्य मृदुः । रेफः संप्रसार्यमाण ऋकारो भवति । एवमेव 'प्रथ प्रख्याने' तस्य पृथुः । 'पृषु दाहे' तस्य पृषतः । कृणः शब्दार्थस्तस्य कुणारुम् ।

एवमयमपि संप्रसार्यासंप्रसार्यविशेषः परिज्ञेयः शब्दानिर्वक्तुकता पुंसा । अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते । अथापीदमपरमुपेक्षितव्यमनेन शब्दानिर्वक्तुकता । आह किमिति । उच्यते भाषिकेभ्यो धातुभ्यो भाषायां

---

1 *b* adds तत्रापि before एतस्मिन्नपि 4. *a d.* omit the pratika तद्यथा &c 5. *b.* reads क्तिप्रत्यये, *b m* परे for परतः; *a b d.* read छ्वोः, *b* च्वो. 6 *b* ज्वरत्वरश्रिव्यवि°; *b* ऊठ्भावः. 8. *bl.* प्रुष दाहे, *a. d.* read पृषि सेहने, *b. m.* पृष सेहने, *b* कुणार, *a* कुणार, for कुणारुम् 9 *bl.* एवमपि for एवमयमपि, and °विशेषपरिज्ञेयश्च° for °विशेष परिज्ञेय. श्च°; *a. b d* omit पुंसा. 11. *bl.* आगमशब्दान् for अनेन शब्दान् ; *m.* शब्दानिर्ब्रुवता ।

---

5 ऋ-धा० पा०-स्वादि (601) अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु ।

7 प्रद्-धा० पा०-स्वादि (768). प्रथ-धा० पा०-स्वादि (766).

8 प्रुष्-धा पा०-स्वादि (704) The readings of the Mss tend to show that the root is rather पृष् which they give as bearing the sense of सेहन. In the धातुपाठ however this root is given as bearing the sense of सेचन which answers very well since पृषत् means a drop. But as the word is given in the section of roots undergoing Samprasâraṇa in their derivative forms we have evidently to reject this derivation and prefer the one from पृष् as the one intended by the author of Nirukta.

9 कॄण-धा० पा०-स्वादि (451)

ये प्रायेण प्रसिद्धप्रयोगास्ते भाषिकास्तेभ्यो नैगमाश्छन्दोविषयाः कृतः कृत्प्रत्ययान्ताः शब्दा भाष्यन्ते विविच्यन्ते निरुच्यन्त इत्यर्थः।

तयया दमूनाः क्षेत्रसाधा इति। 'दमु उपशमे' तस्य भाषायां दाम्यत्यनड्वान् दमयत्यनड्वाहं दान्तोनड्वानित्येवमादयः प्रयोगा भवन्ति। छन्दसि पुनर्दमूना अभिरुच्यते स भाषाशब्दसामान्येन केनचिन्निर्वक्तव्यो दममना इत्येवमादिना। एवमेव साध्यतेर्भाषाप्रयोगवृत्तेः "मित्रं न क्षेत्रसाधसम्" इत्येवमादयो मित्रमिव क्षेत्रसाधयितारमित्येवमादिना प्रकारेण निर्वक्तव्याः।

अथापि नैगमेभ्यो भाषिकाः। निगमे छन्दसि ये प्रायोवृत्त्या प्रसिद्धास्तेभ्यः सामान्यं गृहीत्वा भाषिकाः कृत्प्रत्ययान्ता भाष्यन्ते विविच्यन्ते। तयया उष्णं घृतमिति। 'उष दाहे'। एष प्रायेण छन्दसि प्रसिद्धः। "प्रत्युष्ट रक्षः प्रत्युष्टा अरातयः" इत्येवमादि। भाषायां पुनरुष्णमिति श्रूयते। स एष नैगमशब्दसामान्येन निर्वक्तव्यः। एवमेव 'घृ क्षरणदीप्त्योः' तस्य छन्दसि "आ त्वा जिघर्मि" इति प्रसिद्धः प्रयोगः। भाषायां पुनर्घृतमिति श्रूयते। स एवं जिघर्तेरेव छान्दसस्य सामान्येन निर्वक्तव्यः। एवं भाषाविषयेभ्यश्छन्दोविषया निर्वक्तव्याश्छन्दोविषयेभ्यश्च भाषाविषयाः।

---

1. *a d.* येषां प्रायेण प्रसिद्धयोगः, *b. m.* येषां प्रायेण सिद्धः प्रयोगः; *a. d.* कृत्प्रयताः for कृत्प्रत्ययान्ता. 2. *b.* विक्रियन्ते for विविच्यन्ते of *a b. d. m.* 4. *b.* omits दमयत्यनड्वाह, *m.* reads दमयन्त्यनड्वान्। 5. *b.* भाषासामान्येन for भाषाशब्दसामान्येन. 6. *b.* adds साधा इति after °प्रायोवृत्तेः; *a d. b.* क्षेत्रसाधसं for क्षेत्रसाधयितारं of *b. m.* 11. *b.* एषो for एष. 12 *b.* इत्यादिषु सिद्धः for इति प्रसिद्धः, *d.* सिद्धः for प्रसिद्धः. 13. *b.* adds च after भाषायां; *b. m.* स एष for स एवं; *b.* सामान्ये for सामान्येन.

---

3. दमु-धा. पा०-दिवादि (97)

6. मित्रं न-RS. VIII. 31, 14.

10. ओष्-धा० पा०-स्वादि (697). प्रत्युष्ट-VS. I. 7.

12. घृ-धा० पा०-स्वादि (953); आ त्वा-VS. XI. 23. The whole text is:—

आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्ने नमसा दशानम्॥

अथापीदमपरमुपेक्षितव्यमनेन शब्दानिर्ब्रुवता । आह । किमिति । उच्यते अथापि **प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु** । एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दाना भाष्यन्ते विकृतय एकेषु । धातोराख्यातपदभावेन यः प्रयोगः सा प्रकृतिः । नामीभूतस्य तस्यैव यः प्रयोगः सा विकृतिः ।

शवतिर्गतिकर्मा—गत्यर्थो धातुः **कम्बोजेष्वेव भाष्यते** म्लेच्छेषु प्रकृत्या प्रयुज्यत आख्यातपदभावेन । शवति गच्छतीत्यर्थः । उदाहरणविशेषप्रसक्तः कम्बोजशब्दो निरुच्यते । **कम्बोजाः कम्बलभोजाः** । ते हि प्रायेण कम्बलानुपभुञ्जते हिमप्रायत्वात्तस्य देशस्य । **कमनीयभोजा वा** कमनीयानि प्रार्थनीयानि चैते हि द्रव्याण्युपभुञ्जते प्रचुररत्नो हि स देश इति । कम्बलशब्दं विग्रहप्रसक्तं निर्ब्रवीति । **कम्बलः कमनीयो भवति** प्रार्थनीयो हि स शीतार्तैर्भवति । **विकारमस्यार्येषु भाषन्ते शव इति** । आर्येषु जनपदेष्वस्यैव शवतेर्विकारं भाषन्ते मृतकनामधेयमुतमेतं प्रयुञ्जते । कथम् । शव इति । एवमेकेष्वाख्यातस्य एव प्रयुज्यते नामीभूत एकेषु । इत्येतत्प्रकृतित्वं विकारत्वं च । अथवा चेतनावत्येकेषु गमनक्रियायोगिनि द्रव्ये प्रयुज्यत एकेषु पुनश्चेतनारहित एवेत्येतत्प्रकृतित्वं विकारत्वं च ।

द्वितीयमुदाहरणम् । **दातिर्लवनार्थे प्राच्येषु** । दातिर्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते । तथथा । व्रीहीन् दाति यवान् दाति । अयमेव नामीभूत **उदीच्येषु** जनपदेषु प्रयुज्यते **दात्रमिति** । दायते अनेनेति दात्रं लूयत इत्यर्थः ।

एवमेकपदानि निर्ब्रूयात् । अनेन प्रकारेणैकपदानि निर्ब्रूयात् । भाषानिगमव्यवस्थया रूढिव्यवस्थया वा देशभाषाप्रसिद्धिविभागेन वा ।

---

1. *a. d.* omit अपापि after उच्यते. 2. *m.* reads देशेषु for प्रदेशेषु, and एक° for पद. 3. *a.* omits च. before प्रयोगः 4. *a.* adds after विकृतिः —स पद—सूत्रं ॥ १ ॥, *d.* adds स पद only and reads it along with शवति· &c. *m.* reads स पद सूत्र शवतिर्गतिकर्मेति &c. 7. *b.* reads तेषि for ते हि; *bi.* उपभुञ्जन्ते and *m.* उपभुजते। 8. *a. b. d.* ते for पते. 10. *bi.* शीतार्ते for शीतार्तैः, *d.* शीतार्ते. 12. *bi.* पदं for पतं, *b.* मृतकनामधेयमुते मेते प्रयुञ्जते. 13–14. *b.* omits from अथवा to विकारत्वं च 14 *m.* पुनश्चेतद्वित इव. 16. *m.* ददाति for दाति, and adds दात्रं before उदीच्येषु. 17. *a. d.* omit जनपदेषु; *bi.* दीयते for दायते of *a. c. m.*, *d.* दयते. 18. *b. m.* add पद after अनेन 19. *a. b. d. m.* read रूढिव्यवस्थया वा before देश°, *bi.* omits it; *a b d. m.* read वा after विभागेन; *bi.* reads च instead.

आह । एवं तावत्तद्धितयुक्तेषु पदेष्वसमासयुक्तेषु च निर्वचनम् । अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि तानि कथं निर्वक्तव्यानि । किं तद्धितयुक्तेषु पदेषु पूर्वं पदार्थो निर्वक्तव्य उत तद्धितार्थः । समासयुक्तेष्वपि किं पदार्थः पूर्वमुत समासार्थो वा पूर्वमिति । उच्यते । अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् । अथशब्दो विशेषाधिकारार्थः । "तद्धिताः" (पा॰ ४, १, ७६) इत्यधिकृत्य ये प्रत्यया विहितास्ते तद्धिताः । "समर्थः पदविधिः" (पा॰ २, १, १) इत्यधिकृत्य ये विहितास्ते समासाः । तेषूभयेष्वपि तद्धितसमासेष्वविशेषेणैकपर्वसु चानेकपर्वसु चैकपदेषु चानेकपदेषु च । तद्यथा । दण्ड्यः इत्येकपदस्तद्धितः । वार्ष्यायणिरित्यनेकपदः । अनेकानि ह्येष पदानि स्वात्मन्यन्तर्गीय प्रवर्तते । तद्यथा । कृपस्यापत्यं वार्ष्यः वार्ष्यस्यापत्यं वार्ष्यायणः तस्यापि वार्ष्यायणिरिति । एवं समासेष्वप्येकपदेषु चानेकपदेषु चैवं निर्ब्रूयात् । यथा वक्ष्यामः । एकशेष एकपदः समासः "सरूपाणामेकशेष एकविभक्तौ" (पा॰ १, २, ६४) इति । तद्यथा । पुरुषश्च पुरुषश्च पुरुषौ पुरुषश्च पुरुषश्च पुरुषश्च पुरुषा इत्येवम् ।

"द्विगुर्द्वन्द्वोव्ययीभावः कर्मधारय एव च ।
षष्ठस्तत्पुरुषः स्मृतः ॥"

एतेनेकपदाः समासाः । तत्र । "संख्यापूर्वो द्विगुः" (पा॰ २, १, ५२) । पञ्चपूली पञ्चरयी दशरयी इत्येवमादि । "चार्थे द्वन्द्वः" (पा॰ २, १, २८) । स च पुनर्विभाषयैकवद्भवति । तद्यथा । प्रक्षन्यग्रोधौ अक्षिनक्षुकं मीमार्जुनवासुदेवा इत्यादि । उपसर्गनिपातपूर्वकोव्ययीभावः । तद्यथा । उपमणिकम् अनुसमुद्रम् व्यभ्रम् इत्येवमादि । तुल्यविभक्तिलिङ्गयोरुभयोः पदयोः समानाधिकरणः कर्मधारयः । तद्यथा । कृष्णमृगः

---

1. *a.* अतद्धितेषु युक्तेषु पदेष्वसमासयुक्तिषु च etc., *b. m.* om. च, *d.* अतद्धिते युक्तेषु. 2. *bi.* adds तानि after निर्वक्तव्यानि. 3. *m.* om. पदेषु; *bi.* पूर्वपदार्थो for पूर्वं पदार्थो; also तद्धितार्थसमास° for तद्धितार्थः समास°. 7. *a. b. d.* omit च after एकपदेषु; *b.* and *m.* omit it also after अनेकपदेषु; after अनेकपदेषु *m.* adds इत्यधिकृत्य ये विहितास्ते तद्धितसमासाः (mistake); *m.* इत्येतत्पदः वार्ष्यायणस्तस्यापि for इत्येकपद°. 8.–10. *m.* omits अनेकानि ह्येष etc. to निर्ब्रूयात् 'through error in copy.'; *m.* एकपदसमास. for °पदः स°. 15. *bi.* *b. m* 'read पाणिनेः सूत्रम् for तत्र of *a. d*; *b. m.* read तत्र after सूत्रम्; *bi.* पञ्चमूली for पञ्चपूली of all others. 16. *bi.* adds सूत्रम् after इत्येवमादि. 17. *b.* reads पुरुषन्यग्रोधम्; *b. m.* इत्येवमादि for इत्यादि. 18. *m.* उपमाणिकम्

रक्ताश्वः श्वेतपताका इत्येवमादि । एतेष्वेकपर्वसु चानेकपर्वसु च तद्धितसमासेषु पूर्वं पूर्वमेव निर्ब्रूयादपरमपरमेव प्रविभज्य विगृह्येत्यर्थः । पूर्वं तद्धितार्थं निर्ब्रूयात्पश्चात्पदार्थम् । समासेष्वपि पूर्वं समासार्थं पश्चात्पदार्थम् ।

तदेतत् उदाहरणैरेव दर्शयति तद्यथा । **दण्ड्यः पुरुषो दण्डपुरुषो दण्डमर्हतीति वा दण्डेन संपद्यत इति वा ।** दण्ड्य इत्येष तद्धितः पुरुषशब्दविशेषणम् । पूर्वं तावत् तद्धितार्थं निर्वक्ष्यति ततः पदार्थं निर्वक्ष्यति । कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः दण्डेन वा कार्षापणादिना यः संपद्यते संयुज्यते स दण्ड्यः । अधुना पदार्थनिर्वचनम् । **दण्डो ददतेर्धारयतिकर्मणः**-ददतेर्धारयत्यर्थे वर्तमानस्य । धार्यते ह्येषोपराधेषु राजभिः ।

आह । दृष्टः पुनः क्वचित्प्रयोगो ददतेर्धारयत्यर्थ इति । उच्यते । दृष्टो वेदे लोके च । वेदे तावत् ।

"विश्वे देवाः पुष्करे त्वा ददन्त ।"

इति । तथा लोके

"अक्रूरो ददते मणिम्"

इत्यभिभाषन्ते अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः स ददते मणिं स्यमन्तकनामानं शिरसा । लोकेप्येवं ददतिर्धारणार्थे भाष्यते ।

दमनादित्यौपमन्यवः । दमनाद्दण्ड इत्येवमौपमन्यव आचार्यो मन्यते । तेन यदान्तो दम्यते राजभिः । "तेनादान्तान् दमयेत्" इत्युक्तम् । लोके हि प्रसिद्धम् । यः

---

1. *bi.* रक्तोष्टः for रक्ताश्वः of all. 2. *m.* पूर्वं for पूर्वमेव 4 *m.* adds दण्डपुरुषो after दण्ड्यः पुरुषो; *a b d.* read the मतीक as दण्ड्य पुरुष इति. 6. *bi.* निर्वक्ष्यति for निर्वक्ष्यति and omits तत पदार्थं निर्वक्ष्यति, we read with all our Mss. 8. *a. b. d. omit* the मतीक दण्डो ददते *etc. read by bi ; a. b. d. m.* add दण्डो before ददते. 10. *bi* omits प्रयोगो read by all our Mss. 14. *a b d. m.* omit अक्रूरो etc. read by *bi*. 15. *a b. d. m.* add इत्यभिभाषन्ते after मणिम्, which is omitted by *bi* 16. *a d.* read धारयत्यर्थे ददति.; *b.* भाषन्ते for भाष्यते 17. *a. b.* omit the मतीक; *a. b. d. m.* add दमनाद्दण्ड इत्यौपमन्यव before आचार्यो, omitted by *bi*. 18. *bi.* प्रसिद्धो for प्रसिद्धम् of *a. b. d. m*; *a d.* add दान्तो before यत्.

---

12. The quot. is from RS. VII. 33. 11.

18. Possibly तेनादान्तान् etc. is a quotation from memory from some वर्तसूत्र.

कश्चिदन्तो भवति तमधिकृत्य वक्ष्यते भवन्ति। दण्डमस्याकर्षतीति गर्ह्यायाम्। दण्डमस्याकर्षत हे समासदः। तेन संवदतामयं ततो दान्तो भविष्यतीत्येवनयं गर्ह्यायां दृष्टः। एवं च दमनाद्दण्ड इत्यौणादिक एव आचार्यो मन्यते।

तद्धितस्यैव द्वितीयमुदाहरन्। कस्या रज्जुरश्वस्य इति। कस्या इत्येष तद्धितः। आह। का पुनरियं कस्येति। उच्यते। यस्य संनाहरज्जुः सा कस्येत्युच्यते। एवं कस्याश्चिदस्य तत्त्वमुक्त्वाधुना तद्धितार्थं ब्रवीति। कक्षं सेवते। सा हि कक्षं सेवते। कक्षसंयुक्ता भवति कक्षे भवा वा कक्ष्या। अधुना पदार्थं निर्वक्ति। कक्षो गाहतेर्विलोडनार्थस्य। कक्षयोरेव हि बलेन विलोडयति शो दय्यादि द्रव्यम्। अथ पुनः कस्य इति नामकरणः। सर्वनन्दायन्तनिर्वचादि यथोपदर्शितं यथासंभवं योज्यं तत्र तत्र। ख्यातेर्वानर्थकोभ्यासः ककारः कल्पः सन् कक्ष इत्युच्यते। अर्थवानेव वा ककारः। कथम्। किमस्मिन् ख्यानमित्येवम्। किमस्मिन् ख्यानमस्ति। न किंचिदपि। अदर्शनीयत्वाद्गर्हणीयोयमित्यर्थः। स एव एवं कृत्वा किल्पः सन् कक्ष इत्युच्यते। कषतेर्वा नित्यकलं हसौ स्वेदशीलत्वात्कण्डूं ददाति ततो नखैः कष्यते यतस्तस्मात् कषणक्रियायोगात् कक्ष इत्युच्यते। तत्सामा-

---

1. a. d. omit the प्रतीकः m. reads क्षाकर्षतीति for °तेति. 2. a. omits इति before दण्. 3. b. omits च after दण् read by all our Mss. 4. m. एव for इत्येव. 5. bi. कः for का of a. b. d. m.; d. पुनरदण् for पुनरिदण्. 6. m. प्रक्षयतीति for क्षयतीतिः a. d. omit सा हि कक्षं सेवते. 7. a. omits वा after दण्. 8. b. omits वक्ष्ये and reads द्रुदण् for क्षी दय्यादि द्रव्यम्, bi. gives other variants as क्षीरंग्यादि द्रव्यम् and क्षी दंग्यादि-द्रव्यम्. Even as it is in the text the reading is very doubtful, yet we accept it as it makes some sense in the absence of anything better. 9. a. d. दधोपदर्शीते for दधोपदर्शितम्. 10. b. adds ऋदम् before तत्र तत्र; a. d. read दोग्धम्। तत्र ख्यातेः etc.; m. adds ख्यातेरनर्थकोभ्यासः after कल्पाः, and reads ख्यः for कल्पः. 11. a. omits वा after अर्थवानेव; bi. reads ख्यातनिति। पत्र किमस्मिन् etc., a. d. read पद for पदम्. 13. bi. खेद् for खेद्°. 14. m. कृष्यते and कर्षण° for कष्यते and कषण°; a. d. omit इत्युच्यते.

---

7. The word कक्ष्या is formed according to दक्षिणापश्चात् (Pāṇ. IV. 3. 55.)

न्यान्मनुष्यकक्षः। स्त्रीकक्षस्य सामान्यात् मनुष्यकक्षोपि कक्ष इत्युच्यते। बाहुमूलसामान्यादश्वस्य। अश्वस्यापि यो बाहुमूलप्रदेशः स कक्ष इत्युच्यते। तं सेवत इति कक्ष्या।

अन्ये तु ब्रुवते। पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्। पूर्वं पदं पूर्वमेव प्रविभज्य निर्ब्रूयात् अपरं पदमपरमेवेति। एतस्मिन्नर्थे कल्प्यमाने पदानामेव पौर्वापर्यम्। निर्वचने तद्धितसमासयोस्त्वनियमः पूर्वं वा पश्चाद्वेति। पूर्व एव त्वर्थः साधीयान् ॥२॥

राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य।

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्॥

इत्यपि निगमो भवति॥

विश्वकृद्विकर्मा वीति चकद्र इति श्वगतौ भाष्यते। दातीति गतिकुत्सना कदातीति दातिकुत्सना चकदाति कदातीति सतोनर्थकोभ्यासस्तदस्मिन्नस्तीति विश्वकृद्रः॥ कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेः। एवं

---

2 *a b* omit अश्वस्य in the प्रतीक, *m* स॰ for तम् 4 *a. b. d. m.* add इति after निर्ब्रूयात् 5 *a d.* पतस्मिन्नेवार्थे, *b. m.* पौर्वापर्य॰ for °पर्यम्. 6. *b. d. m* read वा after पूर्वम्, *a b.* omit it. 9 The text is accented by B1. Π and A though with a few mistakes, B. C. D. do not accent it, A. B1. read किंचित् for कश्चित् 11. A. B1. conclude II. i. 5. after निगमो भवति 12, 14 B1 विश्वकद्रा॰, and विश्वकद्रः.

---

1 The reading स्त्रीकक्षस्य etc is very doubtful and looks to be inconsistent तम्॰ can hardly refer to स्त्रीकक्ष which is nowhere spoken of in the text, but rather to अश्वकक्ष as is seen from the context and expressly stated next in the text बाहुमूलसामान्यादश्वस्य.

3. This verse is quoted by Rámánuja as a variant in कठोपनिषद्. It, however, occurs in S'wetás'wátara (III. 9.) where it is not marked with accents.

तद्धितसमासाभिर्भूयात्। नैकपदानि निर्भूयाभावैयाकरणाय नानुपसन्नायानिदंविदे वा। नित्यं ह्यविज्ञातुर्विज्ञानेनूपोपसन्नाय तु निर्भूयाद्यो पालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ॥ ३ ॥

यस्मान् परमपरं वा न किंचिदस्ति यस्माच्च न किंचिदप्यणीयो नापि ज्यायोन्यदस्ति स एव सर्वमित्यभिप्रायः । वृक्ष इव स्तब्धो निरवयवसंकोचविनाशधर्मा दिवि द्योतनवति स्वात्मनि सर्वद्विभावेन तिष्ठति यस्तेन पुरुषेणेदं पूर्णं सर्वं जगदिति ।

समाप्तस्यैव द्वितीयमुदाहरणं **विश्वकद्राकर्ष** इति । विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः ।

आह । कः पुनरयं विश्वकद्र इति । **वीति चकद्र इति श्वगतौ भाष्यते ।** श्वभिः साकं यो गच्छति मनुष्यस्तस्मिन् भाष्यते । **द्रातीति गतिकुत्सना ।** अत्र पुनर्द्रातीति गतिकुत्सना । 'द्रा कुत्सायाम् गतौ'–इत्युक्तम् । इदं हि तस्य कुत्सितगतित्वं यदस्य श्वभिः सह गमनम् । **कद्रातीति द्रातिकुत्सना ।** इदानीं कद्रातीति द्रातिकुत्सना कुत्सितकुत्सनेत्यर्थः । इदमेव तावत्तस्य कुत्सितत्वं यदसौ श्वभिः सह गच्छति । इदमपरं कुत्सिततरं यद् गत्वा श्वभिः सह निहन्ति तस्मात्कद्रातीति कुत्सितकुत्सनेत्युपपद्यते । **चकद्राति कद्रातीति सतोनर्थकोभ्यासः ।** अथेदानीं च इत्येव कद्रातीति एवमेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः । यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति । **तदस्मिन्नस्तीति विश्वकद्रः ।** तदस्मिन् द्वितयमप्यस्ति–कुगतित्वं कुत्सिततरगतित्वं च नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः । तमपराधे कस्मिंश्चिद्वर्तमानमन्यो य आकर्षति स विश्वकद्राकर्षः ।

अन्ये तु ब्रुवते । श्वैव विश्वकद्रः । अस्येव हि स्वभावत एव द्विपत्वाद्गतिः कुत्सिता । स च पुनः पादविकलः । अतस्तस्य कुत्सितकुत्सितत्वम् । द्वौत्युभयोरर्थयोर्मत्वर्थः । तमाकर्षति यः पुरुषः स विश्वकद्राकर्षः ।

---

1. *m.* adds इति निगमो भवति before यस्मात् and reads तस्मात् for यस्मात्; *n. b. d.* किंचिदप्यस्ति for किंचिदस्ति 2. *bi.* reads निरवयवसंकोच°. 3. *bi.* reads सर्वद्विभावेन; *m* om. पूर्णं. 4. *bi.* here as well as below reads विश्वकद्र for विश्वकद्र of all our mss. 6, 8. *a. d.* omit the प्रतीक 9. *bi* om. गतौ after कुत्सायाम्; *a. d.* read गमनम् for द्राति of *bi.*; *b. m.* यदसौ for यदस्य, and गच्छति for द्राति of *bi.*; *a. d.* omit the प्रतीक 10. *bi.* omits इदमेव तावत् तस्य कुत्सितत्वं यदसौ श्वभिः सह गच्छति read by all our Mss. before इदमपरम् 11 *b.* कुत्सिततरत्वम् for °तरम्; *d* omits सह. 12. *b. d.* add सरमाणि before निहन्ति. 12. 14. *a. d.* omit the प्रतीक. 15. *d.* विश्वकद्रम् for °कद्र. 16. *bi.* reads अन्योन्य for अन्यो य of all our mss., *m.* आकर्षति for आक°. 18. *a b. d.* तस्येव for अस्येव; *d.* यवप् for यद 19 *m.* reads इति for वीति.

---

8. द्रा–पा० धा०–अदादि (44)

अधुना रूपसमासं दर्शयति **कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपम्।** कल्याणवर्णं सुवर्णम्। तस्येव यस्य रूपं स कल्याणवर्णरूपः। अग्निरन्यो वा कश्चित्।

कल्याणादिशब्दान् विग्रहप्रसक्तान् निर्ब्रवीति। **कल्याणं कमनीयं भवति।** प्रार्ग्यते हि तत् सर्वेणैव। **वर्णो वृणोतेः।** आवृणोति हि स आश्रयम्। **रूपं रोचतेः।** तद्धि रोचिष्णु भवति। एवं **तद्धितसमासाभिर्ब्रूयात्** इत्युपसंहारवचनम्॥ 5

नैकपदानि निर्ब्रूयात् प्रकरणोपपदरहितानि सन्ति केवलान्येव परेणाभिद्रोहबुद्धया पृच्छ्यमानानि न निर्ब्रूयात् न निर्वक्तव्यानीति। किं कारणम्। तेषां प्रकरणादुपपदाद्वार्थः शक्यतेऽवधारयितुम्। सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात् ततश्च प्रत्यवायेन योगादपद्वारश्च स्यात्। तद्यथा जहीत्येतदेकं पदं प्रकरणोपपदरहितं न विज्ञायते किं हन्तेरुत "ओहाक् त्यागे" इत्यस्य धातोः स्यादिति। तन् पुनरेतन् "मा न एकस्मिन्" इत्येतस्यां पूर्वस्यामृचि यदेतन्मा वधीरिति पदमेतस्माद्गम्यते हन्तेः स्यादिति। किं कारणम्। विज्ञातप्रकरणोपपदस्य हि समञ्जसं ह्यर्थकरणं न्याय्यमित्येवमनवगतसंस्काराणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा शक्यते कर्तुम्। अत इदमुक्तं नैकपदानि निर्ब्रूयादिति॥

नावैयाकरणायेति। उक्तं निर्वचनलक्षणम्। अधुना यस्मै निर्वक्तव्योयमुक्तनिर्वचनलक्षणः समाम्नायस्तस्य लक्षणं वक्तव्यमिति तदर्थमिदमारभ्यते नावैयाकरणाय। 15

I. *a. b. d.* read कल्याणवर्गरूपः only in the प्रतीक. 4 b_1. omits हि after प्रार्ग्यते read by all our Mss. 5 b_1. adds तद्धि रोचते after the प्रतीक. b_1. रोचिष्णु for रोचिष्णु 6. b_1. °विहितानि for °रहितानि. b_1 adds तानि after सन्ति, and its variant gives सदिग्धानि instead; *d* अभिद्रोद्धि° for अभिद्रोह°. 7. All Mss., except *m*, and printed editions read पृच्छमानानि which is grammatically incorrect. 9. *b* योगादपद्वारस्य° for योगादपद्वार°. The reading of the text hardly makes any meaning though supported by the Mss. and the editions. If possibly °दप° in *b* be read as °द्रुप° some sense is made out. b_1. इत्येकं for इत्येतदेकम्. 10. The Mss. and b_1. do not read the whole verse as read by Jîvânanda. 11. b_1. om. पूर्वस्या°. 12. *a. d.* read ह्युपाक्रणम्, *m.* उपाक्रणम्, b_1. उपंक्रणम्, and the variant shown by b_1. उपाक्रणम्; *b.* reads समञ्जस यपार्थं व्याकरणं न्याय्यम् which perhaps makes better sense, but it is not introduced in the text as it is supported by no other Mss.

---

10 हा-चा० पा०-ओहोत्यादि (8)
For quot. *cnde* VIII. 45 34 :—

मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु।
वधीर्मा शूर भूरिषु॥

यस्तावद्वैयाकरणस्तस्मै न निर्ब्रूयात्। अयं समाम्नायो न तावल्लक्षणज्ञत्वात् व्युत्पाद्य निरुच्यमानमेतद्दुष्येत्। ततो व्यर्थ एव श्रमः स्यादिति।

किं च **नानुपसन्नाय**। किमीतिमद्दद्भुतमनेन कृतं यद्व्याकरणमधीतमित्येतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात्। धर्मो हि सर्वैरेवापरित्याज्यः। तस्माद्वैयाकरणायापि सम्यगुपसन्नाय परां शिष्यवृत्तिमास्थितायैव निर्ब्रूयात्।

नैवमेव। किं च **अनिदंविदे वा**। वैयाकरणोपि जडः कश्चिदसमर्थ एव वेदितुं स्यात् बहु वेदितव्यमस्ति देवतादि किंचित्। तस्मै वैयाकरणायापि इदं वेदितुमसमर्थायानिदंविदे नैव निर्ब्रूयात्। अथवा। इदमित्यात्मपर्यायवाचि। इदंविदे आत्मविदे योगिने। स ह्यात्मज्ञानविधूताकल्मषोल्पेनैव यत्नेन वोढुं सूक्ष्मानर्थान् शक्त इतीदंविदे निर्ब्रूयात्। अथवा यत्किंचिच्छास्त्रमिदमिति निर्दिश्यते। येन ह्यन्यत्किंचिदश्रुतपूर्वं शास्त्रं तस्मै न निर्ब्रूयादिदं निरुक्तशास्त्रमनास्फालितहृदयकुड्मलाय।

किं कारणम्। **नित्यं ह्यविद्वानुविज्ञानेसूया**। यो हि न विजानाति नावबुध्यते तस्याविद्वानुनित्यकालमेव विज्ञाने असूया। स ह्यनवबुध्यमान आत्मीयं दोषमाचार्य एवावसृजति स्वयमेव तावदयं नावबुध्यते किमस्मान् बोधयिष्यतीति। एतस्मात्कारणादश्रुतपूर्वान्यशास्त्राय खिन्नमनसे नेदं निर्ब्रूयात्॥

उपसन्नाय तु निर्ब्रूयात् यो वालं विद्वातुं स्यान्मेधाविने तपस्विने वा। य एव तु मेधावी स्यात् अन्यजन्मान्तरानुभावितया प्रज्ञया युक्तो यो वा तपस्वी कामं ताभ्यामवैयाकरणाभ्यामपि निर्ब्रूयादेव। न हि तयोरसाध्यं किंचिदस्ति। तपसा हि स्वयमपि वेदार्थैः प्रादुर्भवेदेव यथा मन्त्राः प्रादुरभूवन् पूर्वेषामृषीणाम्। मेधाव्यपि च स्वयमुत्प्रेक्षितुं शक्नुयात्किमुतोच्यमानमवबोद्धुम्। यो वान्यः कश्चिदलं पर्याप्तो विज्ञातु-

---

3. *a. d.* किमपि for 'किमिति'. 5 *m.* उपपन्नाय and a variant of *bi.* उपसन्नाय. 6. *bi.* अवैयाकरणो for वैयाकरणो. 7–8. *a. d.* first read तस्मै to निर्ब्रूयात् and then अनिदंविदे to किंचित्, which is not correct 10. *bi.* अश्रुतं पूर्वशास्त्र for अश्रुतपूर्वं शास्त्रम् of all our Mss. 11. *a. b d.* apparently add अनास्फालितहृदयकुड्मलाय after 'कुड्मलाय'. 14. *a. b.* अवसज्जति, *d m.* व्यसज्जति, *bi.* अवसृजति; *bi.* न बुध्यते for नावबुध्यते. 15 *a d.* apparently अखिन्नमनसे, *bi.* अखिन्नमनसे, *m.* विन्नमनसे. 19. *bi.* omits यथा मन्त्राः प्रादुरभूवन् read by all our Mss.

मेनच्छास्त्रं मवेदृढप्रहीं स्यिणुद्दिस्तस्मै निर्ब्रूयादेव सर्वया । अनुपसन्नाय नैव निर्ब्रूया-
दपीपि सपस्वी मेधावी दृढप्रहीं वा । उक्तं हि

" यथान्यायेन निर्ब्रूयाद्यथान्यायेन पृच्छति ।
तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति " ॥ ३ ॥

विद्या ह वै ब्राह्मणमाजगाम् गोपाय मा शेवधिष्टेहमस्मि । 5
असूयकायानृजवेयताय न मां ब्रूया वीर्यवती तथा स्याम् ॥
यं मातृणत्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाह ॥
अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ 10
यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥
इति । निधिः शेवधिरिति ॥ ४ ॥

अथाप्येतमर्थमधिकृत्योदाहरन्ति । विद्या ह वै ब्राह्मणमाजगामेति । विद्या किल
कामरूपिणी भूत्वा विद्याधिदेवता वा संयतात्मानं विदितवेदाङ्गवेदार्थं ब्राह्मणं प्रति कंचिदा- 15

---

1. a. d. add यतात्मानं विदितवेदांगवेदार्थं ब्राह्मणम् after संपन्न, b. adds यतात्मने विदितवेदांगाय वेदार्थं ब्राह्मणाय, d. reads अनुपसन्नाय नैव निर्ब्रूयात् । 2. m. omits अके हि. 5. et. seq. This text, known as विद्यासूक्त, is not found elsewhere in the vedas. According to the custom of the Vedic students it is generally recited without accents. B. does not accent it, C. D. do so imperfectly, leaving generally second lines without accents, A. accents it but not very correctly; E. Bi. accent it but the last line is not accented. We print accents according to these, but it seems that these accents are musical and not grammatical. 13. A. Bi. conclude sect. 7 after शेवधिरिति and then read इति द्वितीयाध्यायस्य प्रथमः पादः. 14. m. उदाहरति for °रन्ति and reads प्रतीक up to स्याम्. 15 La. omits वा after विद्याधिदेवता, b. adds तम् after वा, b. °वेदार्थंब्राह्मणम्.

---

3. [illegible]

जगाम। तमेत्य प्रह्वीभूतोवाच। किमिति। गोपाय मा-रक्ष माम्। ततः ते अहं गुप्ता सती त्वोवधिः भविष्यामि सुखनिधानमित्यर्थः। आह। कुतः पुनस्त्वां रक्षामि। असूयकायानृजवेयतायै। असूयकः-परापवादशीलः। अनृजुर्यस्य मनोवाग्देहेष्वसमाः प्रवृत्तयः। अयतो-विप्रकीर्णेन्द्रियः यत्किंचनकार्यशुचिः। एवंलक्षणाय न मा ब्रूयाः त्वम्। किं तथा भविष्यति। वीर्यवती तथा अहं तव स्यां-भवेयमित्यर्थः।

य आतृणत्त्यवितथेन कर्णौ। अधुना शिष्योपदेशमाह। य आतृणत्ति-आभिनत्ति अपिहिताविव सन्तौ कर्णौ विवृणोति। अवितथेन सत्येन ब्रह्मणा। कथं पुनरातृणत्ति। अदुःखं कुर्वन्नमृतं संप्रयच्छन्। यो हि किंचिदातृणत्ति स दुःखयति। अयं पुनः सुखमातृणत्ति। किं च अमृतत्वप्राप्तिहेतुं ज्ञानं संप्रयच्छन् य आतृणत्ति तस्मै किमिति। उच्यते। तं मन्येत पितरं मातरं च नेतरौ मातापितरावित्यभिप्रायः। उक्तं च

" उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् " ॥

तस्मै मातापितृभूताय गुरवे न दुह्येत् कतमच्चनाह-कदाचिदपि। आपद्यपि कष्टायामित्यभिप्रायः।

अधुना इतरान् दुष्टशिष्यानभिशपन्ती विद्या इदमाह। अध्यापिता ये गुरुं नाद्रियन्त इत्यादि। अध्यापिताः सन्तो ये गुरुं प्रति नाद्रियन्ते नादरं कुर्वन्ति। के पुनस्त इति। उच्यते। विप्राः-मेधाविनः सन्तो गृहीतविद्याः। कथं पुनर्नाद्रियन्ते। वाचा मनसा कर्मणा वा। आह। किं तेषामिति। उच्यते। यथैव ते तस्य गुरोः न भोजनीयाः-न भोज्या न भोजनार्हाः तथैव तान् तत् श्रुतम् अपि न मुनक्ति न पालयति श्रुतफलेन न संयुनक्तीत्यर्थः।

---

2 *d* *b*ı सेवधिः; *b* *m*. कपम् for कुतः,; *b* *m* add उच्यते after रक्षामि. 3. *m*. omits the प्रतीक. 4. *m*. विप्रकर्णे[3] for विप्रकीर्णे[3]; *b*ı यत्किञ्चन कार्या शुचिः, we read with our Mss.; *b*. *d*. read माम् for मा 6. *d*, omits कर्णौ. *m* reads the प्रतीक to कतमच्चनाह 8. *d*. *m*. read अदुःखं कुर्वन् only as the प्रतीक. 9. *m*. [c]हेतुम् for [c]हेतु 13. *a* *d* read प्रेत्य चेह च विप्रस्य ब्रह्मजन्म हि शाश्वतम्. 16 *a* *d*, read विद्याभिशपन्ती आह; *a*. *d*. omit the प्रतीक. 17. After कुर्वन्ति, *b*. *m*. read-आह कतमस्ते इति उच्यते. 19. *m* omits वा after कर्मणा, *d*. अथैव for यथैव; *a* omits तस्य 20. *b*. *m*. omit न भोज्या. 21. *b*ı. पालयन्ति, *b*. *m*. read श्रुतं फलेन for श्रुतफलेन.

---

19. For the quot see मनुसंहिता. II. 146.

अधुना यस्मै वक्तव्या तस्य लक्षणं ब्रवीति। यमेव विद्याः-जानीयास्त्वं शुचिमप्रमत्तं यमनियमेषु। मेधाविनं च ब्रह्मचर्येणोपपन्नम्। किं च यस्ते न द्रुह्येत्-न द्रोहमुपगच्छेत्। कतमच्चनाह-कदाचिदपि सर्वास्वप्यापत्सु गोपायमानः। तस्मै मा ब्रूयास्त्वं निधिपाय-गोप्त्रे ब्रह्मन्।

आह निधिः क इति। उच्यते। शेवधिरिति। शेव इति सुखनाम सुखनिधानमित्यर्थः। ब्रह्मलोको हि निधिः सुखानां कृत्स्नस्य जगतो यज्ञद्वारेण अत इदमुक्तं निधिः शेवधिरिति ॥ ४ ॥

अथातोनुक्रमिष्यामः। गौरिति पृथिव्या नामधेयं यद्दूरं गता भवति। यच्चास्यां भूतानि गच्छन्ति। गातेर्वैकारो नामकरणः। अथापि पशुनामेह भवत्येतस्मादेव। अथाप्यस्यां ताडितेन कृत्स्नवन्निगमा भवन्ति।

"गोभिः श्रीणीत मत्सरम्"।

इति पयसः। मत्सरः सोमो मन्दतेस्तृप्तिकर्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति। पयः पिबतेर्वा प्यायतेर्वा। क्षीरं क्षरतेर्घसेर्वेरो नामकरण उशीरमिति यथा।

"अंशुं दुहन्तो अध्यासते गवि"।

इत्यधिषवणचर्मणः। अंशुः शमष्टमात्रो भवत्यघनाय शं भवतीति वा। चर्म चरतेर्वोच्चृत्तं भवतीति वा। अथापि चर्म च श्लेष्मा च।

"गोभिः संनद्धो असि वीळयस्व"।

इति रथस्तुतौ। अथापि स्नाव च श्लेष्मा च।

"गोभिः संनद्धा पतति प्रसूता"।

इतीषुस्तुतौ। ज्यापि गौरुच्यते गत्या चेत्ताडितमथ चेन्न गत्या गमयतीषूनिति ॥ ५ ॥

---

1. *bi.* तम् *for* त्वम्. 3. *bi.* omits गोपायमानः after आपत्सु read by *a. b d. m.* 4. *a. b. d.* माम् for मा. 5. *d.* here as well as in the following lines reads सेवधिः. 6. *a. d* read ब्रह्मकोशो हि निधिः सुखानाम् (better). 13. A. D. एतेन for एनेन. 16. B. marginally reads घर्मिष्टमात्रो.

'समाम्नायः समाम्नातः स व्याख्यातव्य' इति प्रतिज्ञातम्। सा च पुनरियं व्याख्या सामान्या वैशेषिकी च। तत्र सामान्या सर्वेषा नाम्नामिदं सामान्यलक्षणमिदमाख्यातानामिदमुपसर्गाणामिदं निपातानामिति। सोयमनयैवप्रकारया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः। तदनुपपन्नान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि। आगमश्च परिशोधितः। वेदो वेदाङ्व्यूहश्च सप्रयोजन उक्तः। निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयविभागेन। निर्वचनलक्षणं चानेकप्रपञ्चमुक्तम्।

अथेदानीं विशेषव्याख्यया प्रतिपदमयं समाम्नायो व्याख्यातव्यः। तदधिकारार्थोयम् अथशब्दः। अतःशब्द क्रमे हेतौ वा। सामान्यव्याख्यानादनन्तरं विशेषव्याख्यानमेवावसरप्राप्तमित्येवं क्रमे। अथवा हेतौ। यस्मात् सामान्यतः समाम्नायो व्याख्यानोत इदानीं विशेषतोनुक्रमिष्याम आनुपूर्व्येण क्रमिष्यामो-वर्णयिष्यामः। व्याख्ययेति शेषः।

आह। किलक्षणा पुनरसौ व्याख्येति। उच्यते। तत्त्वपर्यायभेदसंख्यासंदिग्धसंदिग्धोदाहरणनिर्वचनविभागेन यदाख्यानं सा व्याख्या नैघण्टुके प्रकरणे। तद्यथा। तत्त्वम् 'गौरिति पृथिव्या नामधेयम्' इत्येवमादि। पर्यायवचनं-प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनम्। तद्यथा। पृथिव्या नामधेयं गौरिति। भेदो-व्युत्पत्तिरिति समानार्थः। तद्यथा। 'यद्दूरं गता भवति' इत्येवमादि। संख्या। तद्यथा। 'पृथिवीनामधेयान्येकविंशति.'। संदिग्ध 'तत्र निर्कृतिर्निरमणाद्वृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या संदिह्यत' इत्येवमादि। सदिग्धोदाहरणं 'य ईं चकार' इत्येवमादि।

---

1 *d m.* read अथातोनुक्रमिष्याम before समाम्नाय, *d* ज्ञानम् for प्रतिज्ञानम् 2. *d m* सर्वनाम्नाम् for सर्वेषा नाम्नाम् 3 *b* अनयैव प्रकारया, *a d* एवंप्रकारया. 5. *d m* वेदवेदाङ्ग° for वेदो वेदाङ्ग° of others, *d* चोद्दिष्टा for चोपदिष्टा, and °प्रतिभागेन for °विभागेन 10. *m* omits क्रमिष्याम, *b h* व्याख्ययेति, *a d. m.* व्याख्यायेति 11. *a b d m.* omit °सदिग्ध° after °संख्या°, 12. *b m.* नैघण्टुपकरणे for नैघण्टुके प्रकरणे of *a b. d*; *m.* यदाख्यान for यदाख्यानं; *m.* omits तत्त्वम्.

---

1. प्रतिज्ञात in Nir. I. 1.

2. The लक्षण of नाम and आख्यात in Nir. I. 1., उपसर्गलक्षण in Nir. I. 3, and that of the निपाता in Nir I 4–11.

4. सर्वोनिगदि in Nir I. 12–14, आगमशुद्धि Nir. I. 15–16.

5. वेदः in Nir. I. 17–19; प्रकरणत्रयविभागः Nir. I. 20

6. उक्तं Nir. II 1–4

15. ff. For the quotations after संख्या see Nir. II, 7–8.

ग्रहतामुपगतम् । घृतशीतेन तृतीयसवने वा पूतभृत्याशिरेण ततोनतिक्रान्तकालं जुहुत । एव मन्त्रविधानादशक्नुवतश्च गोभिः क्रयणस्य गव्येन पयसेति गम्यते ।

मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः । तृप्यन्ति ह्यनेन देवताः ।

शब्दसामान्यप्रसङ्गप्रसक्तमुच्यते । **मत्सर इति लोभनामाभिमत एनेन धनं भवति** । तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति ।

पर्यायाख्यानप्रसक्तं निरुच्यते । **पयः पिवतेर्वा** पानार्थस्य । पीयते हि तत् । **प्यायतेर्वा** वृद्ध्यर्थस्य । तेन हि वर्धन्ते प्राणिनः ।

प्रसक्तानुप्रसक्तं निरुच्यते । **क्षीरं क्षरतेश्चोतनार्थस्य** चोतते हि तद्घसः । **घसेर्वैरो नामकरणः** । अदेर्घस्लृ आदेशः क्रियते अतस्तेनैव सिद्धरूपेण निर्दिश्यते । धात्वन्तरमिति वा केचित् । ज्ञापकं च ददाति । **उशीरमिति यथा** । वश कान्तौ तस्य कृतसम्प्रसारणस्य ईरप्रत्ययेनोशीरमिति भवति । तद्धि सौगन्ध्यात्कान्तं भवति ।

अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः कृष्णवदभिधायकः ।

" ते सोमादो हरी इन्द्रस्य निसतेंशुं दुहन्तो अध्यासते गवि ।
नेमिर्दुग्धं पपिवान्सोम्यं मधिन्द्रो वर्धते प्रयते वृषायते ॥"

एषा जगती । अर्बुदो नाम काद्रवेय ऋषिस्तस्यार्षम् । प्रावस्तुतो विनियुक्ता । त एते प्रावाणः सोमादः—सोमभक्षयितारो यदाभिषवकर्मणि प्रवर्तन्ते अथ तदा हरी—इन्द्रस्याश्वौ यज्ञागमनार्थमेतेषा शब्दमुपश्रुत्य संस्कृत सोम मन्वानौ रथे योगमिच्छन्नावात्मन

---

1. *b* °ब्रह्माणामुपगतम् for °ग्रहतामु°, *b m* °सवनेन for °सवने; *b* जुह्वत for जुहुत 2 *a d*. पव for पवम् 3. *m* reads from पयस to वशीरमिति यथा as the प्रतीक before मत्सरः 4. *a b d* omit the प्रतीक 8 *m* सद्घस. 9. *a. d* नामकरणप्रत्ययः for नामकरण, *b* घस् for घसृ; *a b. d m* add घसेर्वैरो नामकरण इति after निर्दिश्यते. 10 *a. b d m* omit यथा 11 *b. m* सौगन्ध्याकान्तम्, *a d*. सौगन्ध्यात्कान्तम् 15 *a b d m* add सर्प before ऋषि· *m*. omits ते. 16. *m* अभिषव° for अधिषव° 17. *a*. omits यज्ञा° of यज्ञागमनार्थम्

---

6. पिबते.-धा० पा०-स्वादि (950)
7 प्यायते'-धा० पा०-स्वादि (483)
8. क्षरते'-धा० पा०-स्वादि (876)
10 वश-धा० पा०-अदादि (70).
13. The quot. is RS X. 94. 9.

ऋजीषं मक्षयिष्यन्ताविन्द्रं च सोमं पाययिष्यन्तौ स्वयमेव निंसते–नीचैर्नमेते । युक्ता-वावां हे इन्द्र गच्छ यज्ञायतनं संस्कृतः सोम इति । तदेव च ऋत्विजोपि त्वरमाणा-इन्द्रोपस्थानकालमभ्यर्णं मन्वानाः अंशुं–सोमांशमभिषुत्य दुहन्तः–प्रपूरयन्तः । गवि अधि–गोरुपरि गोरवयवेविपवणचर्मणि एतत्कर्म कुर्वाणा इन्द्रं प्रतीक्षमाणा आसते । अय स इन्द्र एत्य तेभिर्दुग्धमृत्विग्भिः प्रक्षारितं पपिवान्–पीतवान् सोम्यं मधु–सोम- 5 मयं । तेन तृप्तस्ततोनन्तरं वर्धते वीर्येण प्रथते च शरीरेण विस्तीर्यते विस्तीर्णश्च स्वेन वीर्येण मेघं विदार्य वृषायते वर्षं प्रवर्तयते । तदिदं सर्वमपि वर्षादि जगदनुग्राहकमेन्द्रं कर्माभिषवद्वारेण सोमाभिषवप्रवाधीनमित्येवं प्रावस्तुतिः ।

निगमप्रसक्तं निरुच्यते । **अंशुः शमष्टमाग्रो भवति** । व्याप्तमांग्रो हि स यज-मानेन तस्यैव शं भवति–सुखो भवति । इष्टसोमो ह्यनृणोहमिति विगतमनोदुःखो 10 भवति । **अननाय शं भवतीति वा** । अननाय–जीवनाय शं सर्वेषां भूतानां भवति सुखो भवतीति वा । यज्ञो हि वर्षे प्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुखं जीवन्ति ।

व्याख्यानप्रसक्तं निरुच्यते । **चर्म चरतेर्वा** चरितं हि तत्सर्वस्मिन् शरीरे गत-मित्यर्थः । **उच्चृत्तं भवतीति वा** । उच्चृत्तं–उत्कर्तितं शरीरादिति वा ।

अथापि चर्म च श्लेष्मा च गोशब्देनोच्यत इति शेषः । **गोभिः संनद्धो** 15 **असि वीळयस्वेति स्तुतौ** । स हि चर्मणावनद्धो भवति श्लेष्मणा च तस्या-वयवः संश्लेषितो भवन्ति ।

---

1. *a. b d.* नमेते, *b.* नामेते, *m.* नमते; *b.* युक्तो आयाहि इन्द्र for युक्तावावां हे इन्द्र of all our Mss. 2. *a. d* तयेव for तदेव. 3. *b.* इन्द्रो स्थान° for इन्द्रोपस्थान°, *a b d. m.* अभ्यग्र, *b.* अभ्यर्ण°, for अभ्यर्णम्, *a. m* सोमांशुम् and *b.* सोमांशून् for सोमांशम्. 5. *b. m.* प्रक्षान्तितं, *b.* प्रचारितम्. *a. d.* प्रक्षारितम् 6. *a. b, d m* तत्पश्चानन्तरम् for ततोनन्तरम्; *b.* वर्द्धते वीर्येण । अथ तेन च शरीरेण प्रथते विस्तीर्यते for वर्धते वीर्येण प्रथते च शरीरेण विस्तीर्यते of *a. b. d. m*; *d.* वीर्येभिः for वीर्येण; *b* विस्तार्यते for विस्तीर्यते 7 *m* पेयम् for मेघम् 8. *b.* °विषवोमा° for °सिषवया° of *a b. d m* 9. *a. b. d.* read स. after हि; *b.* omits it. 10. *b.* reads मृदी for मृखो. 11. *a. d. m.* omit the प्रतीक. 12. *m.* मृदा for मृखो, *a b. d.* वर्षप्रवृत्ति° for वर्षे प्रवृत्ति°. 13. *a b. d. m.* omit the प्रतीक 14. *b.* उत्कीर्तितम् for उत्कर्तितम्. 16. *d.* तस्य अरादयः. 17. *a. d.* सश्लेष्मका for संश्लेषिता

---

15. The quotation occurs in RS. VI. 47. 26, VS. XXIX. 52; and AS. VI. 125. 1:—

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः ।
गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि ॥

अथापि स्राव च श्लेष्मा च गोशब्देनोच्यत इति शेषः । "गोभिः संनद्धा पतति प्रसूता" इतीषुस्तुतौ सा हि स्नाय्ना वेष्टिता भवति श्लेष्मणा च संश्लेषिता । अथापि गौरुच्यते । सा पुनश्चेद्यदि गत्र्या तद्धितमभिधानम् । अथ पुनर्न चेद्गव्या गमयतीपूनिति गोरन्यद्द्रव्यमयी ॥ ५ ॥

"वृक्षेवृक्षे नियतामीमयद्गौस्ततो वयः प्रपतान् पुरुषादः ।"

वृक्षे वृक्षे धनुषि धनुषि वृक्षो वध्नातीद्वृत्वा क्षां तिष्ठतीति वा । क्षा क्षियतेर्निवासकर्मणः । नियतामीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्मा । ततो वयः प्रपतन्ति पुरुषानदनाय । विरिति शकुनिनाम वेतेर्गतिकर्मणः । अथापीषुनामेह भवत्येतस्मादेव । आदित्योपि गौरुच्यते ।

"उताद्यः पुरुषे गवि ।"

पर्ववति भास्वतीत्यौपमन्यवः । अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोस्य दीप्तिर्भवतीति । "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व" इत्यपि निगमो भवति सोपि गौरुच्यते "अग्राह गोरमन्वत" इति तदुपरिष्टाद्व्याख्यास्यामः । सर्वेपि रश्मयो गाव उच्यन्ते ॥ ६ ॥

---

1 *a b d m* omit इति शेष, *m* reads सक्लेशिताषो° for श्लेष्मा च गो°. 3. *a b d m* omit चेत् 4. *d* omits न चेत्, *a b d* अन्यद्द्रव्यमपि, *m.* अन्यतरद्द्रव्यमपि. *b* अन्यद्द्रव्यमपि. 6. B C. D R *m*. read वध्नाद् वृत्वा क्षां तिष्ठतीति वा । क्षा क्षियतेर्निवासकर्मण । नियता &c, B₁ A omit it 9. A. reads °पि पशुना° for °पीषुना° 13. B₁ सुषुम्ण, B. C D R सुषुम्र 16. B C. D.R. conclude section ॥ ६ ॥, A. B₁ section ॥ २ ॥ after उच्यन्ते

---

1 The quot occurs in RS VI 75 11; and VS. XXIX. 48:—

सुपर्णं वस्ते मृगो अस्या दन्तो गोभि. संनद्धा पतति प्रसूता ।
यत्रा नरः सं च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म यंसन् ॥

15 व्याख्यास्याम-in Nir. IV. 25.

"वृक्षेवृक्षे नियतान्मिमयद् गोस्ततो वयः प्रपतान् पुरुषादः।
अथेदं विश्वं भुवनं भयात इन्द्रायेन्दवे सुन्वते शिक्षत् ॥"

वसुकस्येन्द्रपुत्रस्येदमार्षम्। त्रिष्टुबैन्द्री। महाव्रते मरुत्वतीये शस्त्रे। इन्द्रो भगवानैश्वर्ययोगात् संग्रामेष्वनेकबाहुर्भूत्वानेकानि धनूंष्यादत्ते तानि मन्त्रदृष्ट्येवनाह। वृक्षे-वृक्षे-वृक्षावयवे धनुषि धनुषि यावन्तीन्द्रेण गृहीतानि धनूंषि तेषु सर्वेषु प्रत्येकं नियता निबद्धा गौः गव्या गवनयित्री वा ज्याऽनिन्द्यवाक्कृत्यमिमयत्। मीमयति -शब्दं करोति। जात्यभिप्रायेणैकवचनं ततः शब्दकरणानन्तरमेव प्रपतान्-प्रपतन्ति वयः। अथवा ततस्तनो धनुषो वयः पक्षिवद्वयवसम्बन्धात् इषवोपि वयः -पक्षिण-। अथवा वेतैर्गतिकर्मभि. शरादेव इषवो वयो न गुणद्वारा। ते प्रपतान् -प्रपतन्ति पुरुषादनाय-भक्षणाय। ते हि शत्रूणा प्राणान्भक्षयन्ति। अथादने-वमतिप्रभाव इन्द्र इति ज्ञात्वा विश्वं-सर्वं भुवन-भूतजातं यावत्किंचिदधिकृते कर्मणि भयाते-बिभेति। अथ बिभ्यत् कि करोति। इन्द्रायेन्द्रार्थं सुन्वते-अभिषवमुचिते काले कुर्वते ऋत्विजे शिक्षत्-दक्षिणा ददाति। इन्दोन्दुसंज्ञादरवदास्ते सर्वमन्यत् परिहाय। य एवंप्रभाव इन्द्रस्य वचनमित्येतार्थमिदमे स्तुतः।

निगमप्रसक्तं निराह वृक्षो वृक्षेत्यादि। स हि दृश्यते छिद्यत इन्धनार्थम्। मन्त्रव्याख्याने गवार्थत्वान्न शेषो विद्यते। एव तावदेकदेशे कृत्स्नवदभिधानं भवतीति प्रदर्शितम्।

अथेदानीमन्येष्वर्थान्तरेषु गोशब्दोभिप्रेतो बहुविधेतरलक्षणो दर्शयति। एतदर्थैकपदिके वक्तव्यमिह तु गोशब्दप्रसक्तमुच्यते। आदित्योपि गौरुच्यते एतस्मिन् मन्त्रे

---

1. m. reads the प्रतीक from वृक्षे °० इषुनम्मि मयति (?) to the 2nd वृक्षे a. b. d. पुरुषादेषनाय m. d. मन्त्रदृक् for मन्त्रदृष्ट्या c. d. add वृक्षे before वृक्षावयवे 6. m. निबद्धानि for निबद्धा c. d. m. omit the प्रतीक इषवो for इषवोपि 9 a d. m. तेन for ते. m. प्रपतन for प्रपतान् 11. a. b. d अविकृतम्. b. अविकृतम् 12-13 m. कुर्वते and कुर्वन् for सुन्वन् and कुर्वन् 13 m. ऋत्विजम् for ऋत्विजे, b. ददते for ददाति of a. b. d. m. 14. m. परिहारार्थ for परिहाय. 16. b m. मन्त्रव्याख्याने, a. d. अत्र व्याख्याने, for अत्र व्याख्याने of b.; m. विशेष for शेष. 18 c. d. add अपि after अन्येषु 19 b. पठ्यते, b. पठ्यते, for पठ्यते of others; m. reads the प्रतीक आदित्योपि °° to औपमन्यव.

---

1. The quot. is RS. X. 27, 22.

" उतादः पूषणे गवि सूरयक्कं हिरण्ययम् ।
न्यैरयद्रथीतमः ॥

भरद्वाजस्येयमार्षम् । गायत्री । पोष्णी । पूषा पुनरादित्यो नैरुक्तानां दृष्टया अन्यत्र इयं वै पूषेति भूमिरुच्यते । उतादः । उत 'अपि अथ इति छन्दसि समानार्थाः । अपि चक्रमीरयति । अपि रसानादत्ते । अपि तमांस्यपहन्ति । अदः-अमुष्मिन्नादित्य-मण्डले परुषे-पर्वभिस्तद्वति । 'अथवा भास्वति-भासा तद्वतीति । 'अहोरात्रादि पर्व तद्वतीत्यौपमन्यवः । 'गवि -गमनशीले मुहूर्तमप्यनवस्थायिनि 'सूरः-सूर्यः अवस्थितः पूषादित्यमण्डलान्तःपुरुषः । तदेव पर्ववद्वास्वद्वा । चक्रं-चक्रनं 'क्रमणं वा गमनशीलं मण्डलं हिरण्ययं तेजोमयं चक्रं चक्राकृति न्यैरयत् नियतगमनवृत्तिना 'मार्गेण नित्य-कालमीरयन्नुदयास्तमयमध्यंदिनकालोपलक्षणार्थम् । अथवामुष्मिन् मण्डलेवस्थितः 'पर्ववति मण्डलान्तःपुरुषः सूर्यो भगवान् चक्र लक्षणनिमेषत्रुटिमुहूर्ताहोरात्रार्धमास-मासर्त्वयनसंवत्सरलक्षणं कालचक्रं सर्वभूतद्वारि हिरण्ययं हिरण्मयं सर्वभूतविनाशस्थिति-हेतु न्यैरयन्नित्यमीरयति । कीदृशः पुनः स सूर्यो य ईरयति । रथीतमः अन्येपि रथिनः सन्ति अयं तु मुहूर्तमप्यनवस्थितस्य इत्यतो रथीतमः । यः एवंगुणयुक्तः पूषा तं वयमभिप्रेतार्थसिद्धये स्तुमः ।

'अथाप्यस्यैको 'रश्मिश्चन्द्रमसं प्रति दीप्यते । एको रश्मिरादित्यस्य सुषुम्णो नाम चन्द्रमसि प्रत्यवस्थितो दीप्यते । तदेतेन मन्त्रार्थविदा मन्त्रानुपेत्यै-

---

8. a. b d. m. पौष्णे सूक्ते for पौष्णी of bi. 4 m अद for अथ; m समानार्थं. 5. m ईरयत् for ईरयति, bi. अपित्वक्रमीरयः for अपि चक्रमीरयति 6 bi. पवधि for परुषे, a. reads वर्तति अहोरात्रादि पर्वभिस्तद्वति, b d. पर्ववति अहोरात्रादिपर्व-भिस्तद्वति, m पर्वणि for पर्ववति otherwise like b. d; a. d मासा तद्वतीत्यौपमन्यवः. 7. b m. पर्ववती° for पर्व तद्वती°. 8. d पूषामादित्य° for पूषादित्य°. 9. a b. d. read हिरण्ययम् for हिरण्ययम्, bi चक्राकृतिः for °कृति of a b d. m.; b. d. °गगन° for °गमन°. 10 m मण्डलेनवस्थितः 11. a. d. क्षणलव° for लवक्षण°. 12. bi काल चक्र for कालचक्रम् of a. b. d. m.; m omits हिरण्ययम्; b reads हिरण्मयं हिरण्मयम् for हिरण्ययं हिरण्ययम्, d. apparently agrees; bi. °स्थितिहेतु for °स्थितिहेतु of a b d. m. 13. d. यः for यः, m omits यः. 14. bi. स for यः. 16. m takes प्रतीक upto मवतीति. 17. bi चन्द्रमसम् for चन्द्रमसि of a b. d. m; m सुषुम्ण for सुषुम्णो

---

1. The quot. is RS. VI. 56. 3.

श्रितव्यं-द्रष्टव्यम् । येयमस्य चन्द्रमसो दीप्तिः-ज्योत्स्ना इयमादित्यरश्म्यनुग्रहादेवास्य भवति । अब्मयं हि चन्द्रमसो मण्डलं तत्तेजःसंबन्धादीप्तिमद्भवति । ततः सर्वा दिशः प्रकाशयति ।

यथा चैतदेवं तथा **सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति** राष्ट्रभृत्सु । अप्ययमप्यन्ये बहव इत्यपिशब्दः । **सुषुम्णः** सुष्ठुसुस इत्यर्थः । 5
सर्वाणि भूतानि नित्यमसौ हादयति । कोसाविति । **सूर्यरश्मिः** सूर्यान्निःसृत्य चन्द्रमसं प्रति गतः । **चन्द्रमा गन्धर्वः** । सति सुषुम्णगमने गोशब्दवाच्यता । तस्य गन्धर्वस्य सनः चन्दो धारयिता गन्धर्वः । स हि तस्य प्रतिष्ठा । म न इदं-सोस्माकमिदं ब्रह्म क्षत्रं च पातु-रक्षतु । किं च तस्मै सुषुम्णाय सूर्यरश्मये स्वाहा सु-शोभनमिदमाभिमुख्येनाह हविराज्यलक्षणमस्तु । स चेदं वाट्-वेतु पिबत्वित्यर्थः ॥ 10

सोपि सुषुम्णो रश्मिरेक एव **गौरित्युच्यते** यथासौ गौस्तथेदमुदाहरणमन्नाह **गोरमन्वतेति** । **सत्** पुनरेतत् **उपरिष्टात्** ऐकपदिके व्याख्यास्यामः ।

सर्वेपि रश्मयो गाव उच्यन्ते । यथैतदेवं तथेयमुदाहरणम् ॥ ६ ॥

1–2. *bi* सेयमस्य for येयमस्य of a *b. d.*, *bi.* इत्यय for इयम्; *bi.* आदित्यत आदित्यस्य अनुग्रहादेव for आदित्यरश्म्यनुग्रहादेव, and अस्मदुपरि यत् for अब्मय हि of *a. b. d.* 5. *m.* reads pratika upto गोरुच्यते, *b m* add हस्तग्रहोमे after राष्ट्रभृत्सु; *b m.* add सुष्ठुसुस before सुष्ठुसुसः. 6. *d.* सर्वभूतानि. 7. *a.* ons सति सुषुम्ण°.....धारयिता गन्धर्वः. 8. *bi* गन्धर्वसहितस्य for गन्धर्वस्य स हि तस्य of *b d. m.* 9 all omit सु before शोभनं, *a. d.* read आहा before हविः, *bi. m.* आह. 10. *m.* चेदेवं for चेद्. 13. *b.* उदाहियते for उदाहरणम्.

---

4. The full text is as follows :—

सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो मेकुरयो नाम ।

स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा ॥ VS. XVIII. 40

7. The sense of the commentary as it stands here from सति सुषुम्णगमने to प्रतिष्ठा is not clear even as read by *bi*. As I understand it, I believe it should read गोशब्दवाच्यस्य सतः for गन्धर्वस्य सतः here, or the words should be left out altogether. Either way the sense becomes clear and consistent. I suspect there is some omission here.

" ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।
अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥ "

तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गाः । भूरीति बहुनो नामधेयं प्रभवतीति सतः । शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा । अयासोऽयनाः । तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि । पादः पद्यतेस्तन्निधानात्पदम् । पशुपादप्रकृतिः प्रभागपादः । प्रभागपादसामान्यादितराणि पदानि । एवमन्येषामपि सत्त्वानां संदेहा वियन्ते । तानि चेरसमालकर्माणि समाननिर्वचनानि नानाकर्माणि चैतानानिवचनानि यथार्थं निर्वक्तव्यानि इतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि । तत्र निर्क्रमतिर्निरमणाद्वच्छतेः कृच्छ्रापत्तिरितरा । सा पृथिव्या संदिह्यते तयोर्विभागस्तस्या एषा भवति ॥ ७ ॥

ता वां वास्तूनीति । दीर्घतमस आर्षम् । वैष्णवी । त्रिष्टुप् । यूपावधाने विनियुक्ता सोमातिरेकशेषे च । वामिति दम्पती अभिप्रेत्य द्विवचनम् । ता-तानि वां-युवाभ्यामर्थाय वास्तूनि-निवासस्थानान्युश्मसि-कामयामहे गमध्यै-गमनाय यत्रयेषु स्थानेषु । किम् । गावो-रश्मयः । भूरिशृङ्गाः-बहुशृङ्गा.-बहुदीप्तयः । अयासः-अयनाः-मुहूर्तमप्यनवस्थायिनः । किं च अत्राह-तेषु स्थानेषु तत् पदमुरुगायस्य

1. B does not accent the text, all others do. 2. B. C. D. R. add भूरिशृङ्गा before बहुशृङ्गा. Bi. omits it. 7. Bi. marks a variant as पशुपाद प्रकृति which is inadmissible. 12. A. Bi conclude II. ii. 3 after पदानि 13. m. reads pratika upto अवभाति भूरि and omits इति; m यूपविधाने for यूपावधाने. 14 a. m. दपती अभि°, b. दम्पत्यभि°; b. द्विवचनम्, a b. d. m. omit ता and वां. 16. a. b. d. m. read बहुदीप्तयः for °दीप्तय, and omit बहुशृङ्गा 17 a d स्थानेषु तेषु.

1. The verse is Rv. I. 154. 6.

—उरुगमनस्य महागतेर्भगवतो वृष्णो—विष्णोः परमं पदमादित्यमण्डलस्थानम्। स्थाने हि पदसंज्ञा। पदस्य इति लोकेऽपि वक्तारो भवन्ति। अवभाति—अर्वाग्इदं सर्वं कृत्वा भाति—दीप्यते। भूरि—बहित्यर्थः। इति समस्तार्थः।

अथैकपदनिरुक्तम्। भूरीत्येतद्बहुनो नामधेयम्। प्रभवति हि तद्बहुधापि दीयमानम्। शृङ्गं श्रयतेस्तद्व्याश्रितं भवति शिरसि। शृणातेर्वा हिंसार्थस्य तेन हि हिनस्ति। शिरसो निर्गतमिति वा शृङ्गम्। परमेर्धे स्थितं परार्ध्यस्थम्। अथवा परमद्व्यां युक्ते स्थाने स्थितं परार्द्धयंस्थम्। पादः पद्यतेर्गत्यर्थस्य। पद्यते हि तेन। तन्निघानात् पदम्। यदुत्पद्यते तत्सरूपमेव पांसावन्यत्र वा तत्पदमित्युच्यते पशोर्मनुष्यस्य वा। पशुपादप्रकृतिश्चतुर्भागसामान्यात्प्रभागपादौ दीनारादिपादः। प्रभागपादसामान्यादितराणि पदानि ग्रन्थपदानि क्षेत्रपदानि वा। विभागो हि तेष्वपि समान एव। प्रसक्तानुप्रसक्तमिदमुक्तम्।

अधुनोपसंहरति। एवमन्येषामपि सत्त्वानां संदेहा विद्यन्ते न केवलं गोशब्दे पदशब्दे वा। तेषु हि स्वेतरौत्सर्गिकं निर्वचनलक्षणं द्रष्टव्यम्। तानि चेत् समानकर्माणि—यदि सामान्यक्रियया युक्तानि ततः समाननिर्वचनान्येव कर्तव्यानि। अथ पुनर्नानाकर्माणि ततो नानानिर्वचनानि। एवं यथार्थं निर्वक्तव्यानीति।

अधुनैवमुक्त्वोदाहरणैरेव तत्र संदेहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शयन्नाह। इमान्येकविंशतिः पृथिवीनामधेयान्यतिक्रान्तानि। तत्र निर्क्रतिर्निरमणाद्वच्छतेः कृच्छ्रापत्तिरितरा। लोकेषु हीदं सर्वं भूतजातमन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते तेषां च पृथिवी प्रथमा तस्मात्तत आरम्भः। एक-

---

1. *a. d. m.* omit वृष्णः, *b.* reads महागते वृष्णः कामानां वर्षितुः भगवतो विष्णो; *a. d.* omit °स्थानम्; *b.* reads °मण्डलस्थानम्. 3. *b.* omits इति समस्तार्थः. 4. *b.* भवति for प्रभवति; *b. m.* omit अपि after बहुधा. 5. *m* omits हि 6. *a. b. d* पराध्यंम् for पराध्यंस्थम्; *b. d. m.* परमपद्व्यां for परमद्व्यां 7. *a. d.* परार्धंस्थम् for पराध्यंस्थम्, *m.* reads the प्रतीक from पाद. to पदम् 9. *a. d* read पशुपाद° प्रकृतिः; *m.* दिनारा°. 10. *m.* adds प्रभागपादः before प्रभाग°, *a. b d.* omit पदानि after इतराणि. 12. *a. b. d.* add यानि नामानि तेषु after सत्त्वानाम् while *m.* adds the same after विद्यन्ते. 13 *a. d.* omit हि; *bi.* निर्वचनं लक्षणम्, *m.* °लक्षणात्; *a. b d.* omit चेत्समानकर्माणि. 15. *m.* reads प्रतीक to the end before अथ. 17. *b. m* °नुक्रमग्मन्त्रेषु for °नुक्रम्य. 19. *bi* लोके for लोकेषु and सर्वंभूत° for सर्वं भूत°. 20 *a.* omits प्रथमा

विंशतिरिति संख्या। पृथिवीनामधेयानि स्वार्थे धेयप्रत्ययः। नामैव नामधेयम्। अनुक्रान्तान्यानुपूर्व्येण पठितानीत्यर्थः। एकविंशतिर्यान्यनुक्रान्तान्येभ्योन्यान्यपि यानि कानिचित् स्युस्तान्युपलभ्य निर्वक्तव्यानि। तद्यथा। कु इत्येतदसमाप्तं पृथिव्या नामधेयम्। उक्तं हि—

" नाग्निचिन्नरकं याति न सत्पुत्रो न कुमदः "

इति। तत्रैतस्मिन्नेकविंशके नामगणे निर्ऋतिरित्येतदभिधानं निरमणात्। निविष्टानि रमन्तेस्यां भूतानीति निर्ऋतिः—पृथिवी रमेर्धातोः। ऋच्छतेरितरा कृच्छ्रापत्तिः दुःखसंज्ञा निर्ऋतिः—पाप्मा। सा पुनरियं समाननामधेयत्वात्समानश्रुतित्वात्पृथिव्या संदिह्यते। तयोः समाननामधेयत्वेपि सति एव कर्मकृतो भेदो विभागः। एका निविष्टना भूतानां रमयित्री एका पुनः कृच्छ्रमापादयित्री। एवं नानाकर्मण्यभिधानानि निर्वक्तव्यानि।

तस्याः कृच्छ्रापत्तेः पृथिव्या अपि **एषा** निर्ऋतिका **ऋग् भवति** ॥ ७ ॥

" य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमाविवेश ॥"

बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ताः। य ईं चकारेति करोतिकिरती संदिग्धौ वर्षकर्मणा। न सोस्य वेद मध्यमः। स एवास्य वेद मध्यमो यो ददर्शादित्योपहितं स मातुर्योनौ मातान्तरिक्षं निर्मीयन्तेस्मिन्भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुना-

---

2 *m* घटितानि for पठितानि 5 *m* reads यान्ति for यानि, *a d* सद्वादि for सत्पुत्रो 6 *b. m* एकविंशतिके for °विंशके, *b.* गणे for नामगणे of *a b. d m* 8. *a* दुःखसञ्ज्ञिका for °संज्ञका 9. *b* omits भेदो before विभागः read by *a b d m*, *d.* omits अपि before सति, and reads एव for एष. 12 *a d* omit अपि.

---

1 मानरूपनामभ्यो धेय. (Vâr. on Pân V. 4, 25.)

13. The quot. is RS. I. 164. 32.

यमपीतरो योनिरेतस्मादेव परियुतो भवति। बहुप्रजा भूमिमापद्यते वर्षकर्मणा।

शाकपूणिः संकल्पयांचक्रे सर्वां देवता जानामीति। तस्मै देवतोभयलिङ्गा प्रादुर्बभूव। तां न जज्ञे। तां पप्रच्छ विविदिषाणि त्वेति। सास्मा एतामृचमादिदेशैषा महेवतेति ॥ ८ ॥

य ईं चकार इति। दीर्घतमस आर्षम्। निचृत्। महाव्रते वैश्वदेवे शस्त्रे शस्यते। अयं स शिङ्क्ते इतीयमप्यनयैव समानार्षविनियोगा। जगती। द्वे अप्येते अस्यवामीये। कश्चित् बहुप्रजाः-बहुपत्यो दरिद्रः पुरुषः स दुष्कृतत्वादपत्यानां व्यापन्नत्वात् कृच्छ्रं-दुःखमापद्यते। सा या तस्य कृच्छ्रापत्तिः सैवैनस्यामृचि निर्ऋतिशब्देनोच्यते। इत्येष परिव्राजकाः परिव्राजकानामस्यामृचि संक्षेपार्थः।

स एष विस्तरेण प्रदर्श्यते। यश्चकार-करोति ईं-गर्भं न सोस्य गर्भस्य तत्त्वं वेद केवलं त्वसौ कामार्तिः पुत्रार्थी वा करोत्येव गर्भम्। य ईं ददर्श-यश्चैनं पश्यति हिरण्यगर्भतामेतमेतस्मिन्वा शरीरे जन्तुम्। तस्मात् तस्यैवैष गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या नेतरस्य गर्भकर्तुः। स पुनरेष गर्भो मातुर्योनौ-गर्भाशयस्थाने अन्तरुदरे पुष्यति मातुरशितपीतलीढभक्षितेन चतुर्विधाहारपरिणामेन। ततः परिवीतो-जरायुणा परिवेष्टितो यथाकालं जायते। अथैवं बहुप्रजाः-बहुशः प्रजायमानः स गर्भकर्ता गर्भतत्त्वमजानानो निर्ऋतिं-दुःखमाविवेशातिशयेनेत्यर्थः। एवं गर्भतत्त्वापरिज्ञानाद्यो गर्भं करोति स दुःखमापद्यते यस्त्वध्या-

---

3. A reads जानातिति 5 B. reads तस्या for सास्मा, ABi. conclude II. ii 4 after महेवतेति. 6. m. ᶜदेवशस्त्रे for ᶜदेवे शस्त्रे. 7. a b, d m. अनपेत्र for तपेत्र of b. 8. a. b d m. omit बहुप्रजा. 9. a. b. d m. दुःख कृच्छ्रं for कृच्छ्र दुःखम्; m स वै तस्याम् for सैवैनस्याम् 10. a b d. m. omit परिव्राजका. b. सङ्क्षेपोऽर्थः for सङ्क्षेपार्थः cf a, b. d. m 11. a. b. d m omit चकार ईम्; a. d. read गर्भश्च for गर्भस्य 13. bi. reads ईं नु before जन्तुम् 14. m. omits ᶜशास्त्रᶜ and स; a d. read एवम् for एष, b reads एव and m. omits it. 15 We omit स as it is superfluous after पुष्यति, some Mss. omit स before पुनरेष, according to a. स may be retained as it omits ततः. 15–16. a. d. चतुर्विधाहारेण, b. m चतुर्विधाहारपरिणामेन, bi. ᶜहारपरिणामे; a. omits ततः before परिवीतो; a b. d. m. omit बहुप्रजा

तमद्दृष्टया गर्भतत्त्वं वेद स गर्भकर्मणो निवर्तते स निर्ऋतिं नाप्नुते। एवमस्यामुचि निर्ऋतिर्देवतेत्येष परिव्राजकार्थः।

अन्ये तु ब्रुवते। यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहुषु प्रजायमानो जन्ममरणसंतानानुबद्धा निर्ऋतिमाविशति। यो रेतः सिञ्चति स भूयो भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसंतानाननुभवतीत्युक्तम्।

वर्षकर्मेति नैरुक्ताः। वर्षकर्मैतदुच्यते। निर्ऋतिश्चात्र भूमिरुच्यते। एवं नैरुक्ता मन्यन्ते। यः करोति वर्षं यो वा किरति-क्षिपति। कः पुनरसौ। मेघः। स हि वर्षस्य कर्ता विक्षेप्ता वा। मेघाद्धि वर्षं प्रवर्तते। किं तस्य। न सोऽस्य वर्षस्य तत्त्वं वेद। कुतोऽप्येतदुदकं मय्यागच्छति यन्मया विसृज्यते किं वोदकस्य तत्त्वमिति। केवलं त्वसौ विसृजत एवोदकम्। य ईं ददर्श-य एव पश्यत्येनद्वर्षं दिवगिव्रु तस्मादन्तरिक्षमन्तरिक्षलोके। तस्मात्तस्येत्यर्थः। तस्यैव प्रत्यक्षं तथाभ्यतो वर्षं नेतरस्य मेघस्य मध्यस्थानस्य। स एव ह्यस्य वर्षस्य तत्त्वं वेद यो ददर्श-यः पश्यत्यादित्यरश्म्यन्तर्गतं वर्षमनभिव्यक्तम्। कथासौ इन्द्रः। असावपि हि मध्यम एव। तत इदमुक्तं न सोऽस्य वेद मध्यमो मेघः स एवास्य वेद मध्यम इन्द्र इति। स एव महानुदकसंस्थाय इन्द्रः प्रत्यक्षो मातुरन्तरिक्षलोकस्योदकमभिव्यक्तयाशयस्थाने परिवीतः-परिवेष्टितः सौरेण रश्मिजालेन वायुना च मेघोदरान्तर्गतः प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजाः-बहुनाः प्रजायमानो निर्ऋतिं-भूमिमाविशतीति समस्तार्थः।

अथैकपदनिरुक्तम्। करोतिकिरती संदिग्धौ धातू वर्षकर्मणा संबध्येते। उभयथा हि दृश्यते यः करोति यो वा किरति। मातान्तरिक्षमेतस्मिन् हि भूतानि निर्मीयन्ते। एतद्ध्यवकाशदानेन विशिष्टमुपकारं करोति। भूतानां जायमानानां योनिरन्तरिक्षमाकाशस्यैव प्रदेशविशेषः कश्चित्। स वायुसंयुतः सदुदकयोनिभावं पद्यते। तदेतद्वायुना तस्य संयुतं दृष्ट्वोक्तं परियुतो भवतीति। सदृक्षरूपप्रसङ्ग-

---

2 *m* देवतेत्यैच्छत् for देवतेत्येष 4 *b* सन्तानानुभवविद्धाम् for सन्तानानुबद्धाम् of *a b d m* 4–5. *a d*, read यो रेत. सिञ्चति तद्धय एव भवतीत्युक्तम्। *b. m* स भूयो for तद्भूयो of *b*; *b m*, °सन्तानान्यनुभव° for °सन्तानानुभव° of *b*. 8 *b*. omits कुतोऽप्येतदुदक ....to तत्त्वं वेद. 14. *b*. omits इन्द्रः to मेघोदरान्तर्गतः. 18. *m* reads the मतीक upto वर्षकर्मणा 19. *a. b. d*, add अपि after उभयथा. 20 *d*. एतद्भव° for एतद्धव°. 22. *b*. सयुक्तम् for सयुतम् of *a b d*; *a. b d* परियुतो for परिवितो of *b*. *m*

---

2. For this view of Sāyaṇa's Bhāshya on the verse which gives it as the आत्मविदां मतम्.

मुच्यते । अयमपीतरः स्त्रीयोनिरेतस्मादेव । असावपि परियुत एव भवति याज्ञा-मांसेन च ।

एवमेतस्मिन्मन्त्रे नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते परिव्राजुकानां कृच्छ्रापत्तिः । तदेवं मन्त्रेषु शब्दगतिविभुत्वादुभयमप्युपपद्यत एव । तद्यथा । दधिक्राव्णो अकारिषमित्येष मन्त्रोऽग्न्युत्थानेऽग्निहोत्रे । अयमेव चाग्निष्टोमे

" दधिक्राव्णो अकारिषमित्याग्नीध्रीये दधिद्रप्सान्न्यस्य "

इति दधिभक्षणे । तथा चात्रमेधे " दधिक्राव्णो अकारिषमित्युत्थितायां सर्वा जपन्ति " इत्यभ्यनिधावेनं पत्न्यो जपन्ति महिष्यामुत्थितायाम् । तत्रैवं सति प्रतिविनियोगम-स्यान्येनार्थेन भवितव्यम् । त एते वक्तुरभिप्रायवशादर्थान्यत्वमपि भजन्ते मन्त्राः । न ह्येतेष्वर्थस्येयत्तावधारणमस्ति । महार्था ह्येते दुःपरिज्ञानाश्च । यथाभारद्वैशिष्ट्यादभ्यः साधुः साधुतरश्च वदत्येवमेते वक्तृवैशिष्ट्यात् साधून् साधुतरांश्चार्थान् ब्रुवन्ति ।

तत्रैवं सति लक्षणोद्देशमात्रमेवैतस्मिञ्शास्त्रे निर्वचनमेकैकस्य क्रियते । क्वचिदाध्या-त्माधिदैवाधियज्ञोपदर्शनार्थम् । तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्नधिदैवाध्यात्माधियज्ञा-श्रयाः सर्व एव ते योज्या नात्रापराधोऽस्ति ।

---

4. *b.* तस्मादेव for तदेवम् 6 *d* अकार्ष for अकारिष; *m.* आग्नीधीये for आग्नीधे of *b*1. *a. b. d.*; *a. d.* omit दधि° after आग्नीधे. We read the text here according to Âs'. S'r. Sû. 7. *d.* इत्युत्थायाम् सर्वा जपन्ति. 8, *d.* *m.* पत्न for पत्नं; *m.* जपन्ति for जपन्ति; *m.* °विनियोगस्य for °विनियोगमस्य; 9. *a. d.* अन्येनान्येन for अन्येन; *b*1. °वशादन्यत्व for °वशादर्थान्यत्वम्; *b.* य एते for त एते 10. *m* °मास्ने for °मस्नि; *a. d.* वैशेष्यात् for वैशिष्ट्यात्. 12–13. *m.* °मात्रेत° for °मात्रमेत°; *d.* °मेवैकस्य for °मेकैकस्य; *a. b. d. m.* अध्यात्मा° for आध्यात्मा° and °पदर्शनार्थम् for °पदर्शनार्थः of *b*1; *m. a. b. d.* अधि-दैव° for आधिदैव° of *b*1. 13–14. *m.* °यज्ञाश्रयाः for °यज्ञाश्रयाः, *a. d.* omit ते; *d.* नात्रापराधोऽस्ति.

---

6. The full text is:—

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत्प्रण आयूंषि तारिषत् ॥ Rs. IV. 39. 6.

This text is prescribed by Âs'. S'r. Sû. II. 12 as दधिक्राव्णोअकारिष-मारुषिका: वयमा पशुकृष्टीः ।

7. Vide Âs'. S'r. Sû. VI. 12.

8. महिषीमुत्थाप्य पुरस्ता दधिक्राव्ण इत्याहुः (Kâty. S'r. Sû. XX. 6. 21.)

Cf. also S'atapatha Br. XIII. 5. 2. 9. The exact text as quoted above is not available in either of these books.

एतमेव संदेहाधिकारमुपजीवन्नाह । **शाकपूणिः संकल्पयांचक्रे सर्वा देवता ज्ञानमिति** । शाकानि यः पूणयति संहन्ति स शाकपूणः तस्यापत्यं शाकपूणिराचार्यः । स **संकल्पयांचक्रे**-संकल्पं कृतवान् । किमिति । **सर्वा देवता जानामीति । तस्मै** संकल्पमेवं कृतवते **देवतोभयलिङ्गा**-स्त्रीपुल्लिङ्गा अथवा मध्यस्थानलिङ्गा शुस्थानलिङ्गा च **प्रादुर्बभूव** । **तां** पुरतोवस्थितां सतीं **न जज्ञे**-न ज्ञातवान् किमियं स्त्री स्यादथवा पुरुष इति । अथवा किमियं मध्यस्थानाथवा शुस्थानेति । तामजानन् **पप्रच्छ किमिदमाणि त्वा**-वेदितुमिच्छामि त्वा किमसि पुरुषः अथवा स्त्रीति । अथवा किमस्यन्तरिक्षस्थानाथवा शुस्थानेति । **सा** एवं पृष्टा सत्यस्मै शाकपूणये **एतामृचमादिदेशादिष्टवती** । किमिति । **एषा महेयतेति** । अस्यामृचि, अह देवतेति त्वं च नैरुक्त. मामेतस्या ऋच सकाशादर्थावगत्यावधारयेति ॥ ८ ॥

अयं स शिङ्क्ते येन गौरमीमेदनृक्तं किमिदन्ति मायुं ध्वंसनावधिश्रिता ।
सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥

अयं स शब्दायते येन गौरमिमवृक्तं किमिदन्ति मायुं शब्दं करोति मायुमिवादित्यमिति वा । वाग्वेषा माध्यमिका ध्वंसने मेघेधिश्रिता । सा चित्तिभिः कर्मभिर्नानाचित्तिकरोति मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिम् । वव्रिरिति रूपनाम वृणोतीति सतः । वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ॥ ९ ॥

---

1 *a d* एतमेव for एवमेव of *b c*. *m* संदेहोविकार°, *m* reads the प्रतीक to महेयतेति. 2 *m* omits स°. 4. *a b d* add द्विलिङ्गा after उभयलिङ्गा; *b* च for चम् 5. *a. d.* omit शुस्थानलिङ्गा, *m* omits स्त्रीपुल्लिङ्गा and adds स्त्रीपुल्लिङ्गा द्विलिङ्गा after मध्यस्थानलिङ्गा, and reads शुस्थानलिङ्गाश्च; *a b. d m.* add प्रादुर्भूतवती after प्रादुर्बभूव 7 *a b d m.* omit स्वा 8. *m* किमस्यान्त° for किमस्यन्त°. 9. *a d* add स्वा after स्वादिदेश. 10. *m* नैरुक्त for नैरुक्त, *a d* अर्थगत्या for अर्थावगत्या. 11. Bi. R. read ध्वसना°, A. B C D *m* ध्वसना°. 15. Bi. reads स्वा चित्तिमिर्निकरोति. We give the reading of B C D.R *m*. 17. A. Bi. conclude II. st. 5 after आदत्ते and after that adds इति द्वितीयाध्यायस्य द्वितीय° पाद° ।

---

11 The quot is RS. I. 164. 29.

कतमा पुनरसावृगिति। उच्यते। **अयं स शिङ्क्ते** इति। **अयं स-मेघः शब्दायते**–शब्दमिव करोति। न च तावदसौ शब्दं करोति। अयं च तान्मान्त्रिकायां वाचि तत्स्थायां शब्दं कुर्वत्यां तत्साहचर्याद्विज्ञायते स एव शब्दं करोतीति। येन मेघेन किं कृतमिति। **येन गौरभीवृता**। येन मान्त्रिका वागभिप्रच्छादिता-सतो **मिमाति मायुं**–निर्मिमीते निर्वर्तयति मायुं शब्दं करोतीत्यर्थः। **'मायुः काकुत्'** इति च वाङ्नामसु पठितम्। अथवा मायुरादित्यो भवति सर्वभूतनिर्माता। तमिवात्मानं निर्मिमीते। **क्षयति**। **ध्वंसने**–उदकध्वंसने उदकसंसने मेघे **अधिश्रिता**। अयं तावदर्थचों मेघान्तर्वर्तिन्या वाचोऽभिव्यक्तविद्युद्रूपाया अभिधायको मेघरूपत्वात् पुरुषत्वाभिप्रायः। अथ चायमुत्तरः स्त्रीत्वाभिप्रायः। यैवंलक्षणा वाग् मेघरूपा मेघशरीरा वा। **सा चित्तिभिः**–स्वैश्चटत्वदाशब्दकर्मभिः। **नि हि चकार**–नीचैः करोति **मर्त्यं**–मनुष्यम्। सर्वो हि बिभ्यत्तस्या आसीदति अवनमति च। कदा पुनर्निकरोति मर्त्यमिति। उच्यते। **विद्युद्भवन्ती**ति। विद्युदात्मना ख्याख्येनाभिनिर्वर्तमाना। तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयंकरो न तथा विद्युदहितः। सैवमात्मानमाविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीम्। ततो वर्षव्युपरमे **प्रतिसौहत-ऊहते वर्त्रिम्**–प्रत्युपसंहरति रूपमात्मीयमदृश्यं करोतीत्यर्थः। **वर्त्रिरिति** रूपनाम तद्व्यावृत्त्य स्वमाश्रयं वर्तते। यस्मिंस्तु पक्षे मन्त्र्यस्थानलिङ्गा युस्थानलिङ्गा

1–2. *bi* अथ स शब्दायते स एव मेघ शब्द करोति for अथ स मेघः शब्द to शब्द करोतीति read by *a. b d m.* 5. *d.* निर्वर्तयति for निर्वर्तयति; *a.* ककुद् for काकुत्. 7. *d.* निर्मिमीयते for निर्मिमीते, *bi.* क्षावस्थित. for क्षावस्थिता of *a. b. d. m*; and *a. b. d. m.* अध्याश्रिता for अधिश्रिता of *bi.* 8. *bi* वाचो व्यक्त° for वाचोऽभिव्यक्त° of *a. b. d. m.*; *m.* °रूपामि° for °रूपाया अभि°. 9. *bi.* अथवा° for अथ वा°; *m.* °मुत्तरत् for °मुत्तरः; *bi.* यैवंलक्षणा वा कर्मस्वरूपा for यैवंलक्षणा वाङ्मेघरूपा of *a. b. d. m.* 10. *bi.* omits स्वे after चित्तिभि° read by *a. b d. m.* 11. *d.* तस्या आसीदति for तस्या आसीदति; *b.* reads असंजयति for आसीदति; *a. b. d. m.* वा for च. 12. *a. d* अभिनिवर्तमाना for अभिनिर्वर्तमाना; and *a.* reads हि तदा for तदा हि; *d.* adds च after दारुणः. 13. *bi.* भयंकरम् for भयकरः of *a. b. d. m.* 14 *d.* दीक्षात्मानम् for दिक्ष्वात्मानम्; *m.* आविष्कृष्य for आविष्कृत्य. 15. *a. b. d. m.* omit सौहत. 16. *a. b. d m.* तद्व्यावृत्य, *bi.* तद्व्यावृत्या. Probably it should be तद्व्यावृत्य; *m. b* समाश्रयम् for स्वमाश्रयम्; *a. d.* omit व and read च for वा of *bi.*

---

6. मायुः–Nigh. I. 11.
15–16. वर्त्रि–Nigh. III. 7.

चेति तस्मिन् पक्षे मेघकर्तृत्वमविवक्षितं मेघवाचो विद्युद्रूपत्वं च किंत्वेतावद्विवक्षितम्। मेघाश्रया शब्दवती भूत्वा माध्यमिका वाग्विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्यश्चादित्यात्मना स्थित्वा पुनरादत्ते विद्युदात्मना मध्यस्थाने स्थित्वा वर्षत्यादित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः । वक्ष्यति हि

" तमकुर्वन्नेघाभावाय पृथिव्यामन्तरिक्षे दिवि "

इति ।

सेयमेकैव देवता मध्यस्थाना विद्युद्रूपा द्युस्थाना चादित्यरूपेत्ययमेवंलक्षणो देवता-तत्त्वसंदेह उपेक्षितव्यो मन्त्रदर्शनाच्च निर्वक्तव्य इत्यं मन्त्रसंक्षेपार्थः ।

सा पृथिव्या संदिशत इत्यनेन संदेहसामान्येनोदाहृतमिदमग्र मतं शाकपूणेरित्येवमादि । अनुक्रमणं स्वविकृतम् । तस्मिन् गोशब्द एको निरुक्तः प्रकाशोपदर्शनार्थम् । इतराण्यप्यभ्यूह्य निर्वक्तव्यानि—तद्यथा—ग्मा गमनात् । अस्यां गच्छन्ति भूतानि । जमा जमनात् । जगन्ति गच्छन्त्यस्यां भूतानीत्येवमादि ।

नेघण्टुकांस्तु याञ्छब्दान् प्रत्यर्थं गणशः स्थितान् ।
छन्दोभ्योन्विष्य तत्त्वार्थान् निर्ब्रूयाद् योगतस्तु तान् ॥ ९ ॥

हिरण्यनामान्युत्तराणि पञ्चदश । हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मणः ॥ अन्तरिक्षनामान्युत्तराणि षोडश । अन्तरिक्षं कस्मादन्तरा क्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा । तत्र समुद्र इत्येतत्पार्थिवेन समुद्रेण संदि-

---

1 *a d m* अविवक्षितमेव वाचो for अविवक्षितं मेघवाचो of *b*. *a*. पदावक्षितम्, *d*. पदावक्षितम्, for पदावद्विवक्षितम् of *b*. 5. *b*. omits तमकुर्वन् read by *a b*. *d*. *m*. 7. *b*. मध्यस्थाना for द्युस्थाना. 11. *b* omits अपि after इतराणि read by *a*. *b*. *d*. *m* ; *a*. adds इति after भूतानि but *d*. इति ग्मा after भूतानि. 13 *b*. प्रत्यर्थंगणसंस्थितान् for प्रत्यर्थं गणशः स्थितान् of *a*. *b*. *d*. *m* 16. B. C. D R. after भवतीति वा, add हृदयरमणं भवतीति वा omitted by Bi. 16 B. D षोडश for षोडश. 19. A. शरीरेष्वन्तरिक्षमिति वा for °ष्वन्तरक्षयमिति वा.

---

5. The quot occurs in Nir. VII. 28 to which may be compared Nir. XII. 19.

ऋते। समुद्रः कस्मात्समुद्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेस्मिन्भूतानि समुदको भवति समुनत्तीति वा। तयोर्विभागः। तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शान्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शान्तनुः कनीयानभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे। ततः शान्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति। स शान्तनुर्देवापिं शिशिक्ष राज्येन तमुवाच देवापिः पुरोहितस्तेसानि याजयानि च त्वेति। तस्यैतद्दर्पकामसूक्तम्। तस्यैषा भवति ॥ १० ॥

हिरण्यनामान्युत्तराणि पञ्चदश। हिरण्यस्य नामान्युत्तराणि। कुतः प्रकृतेभ्यः पृथिवीनामभ्यः। पृथिव्यामेव हिरण्यमुत्पद्यत इत्यतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि। कियन्ति पुनस्तानि। पञ्चदश। पञ्च च दश च पञ्चदश। औदुम्बरे समाम्नातानि। अन्यसमाम्नातान्यपि सन्ति—हाटकसुवर्णचामीकरजातकुम्भादीनि। रूपनामानि पुनस्तानि समाम्नातानीति। उच्यते—'हेम चन्द्रं रुक्मम्'—इत्येवमादीनि। हेतं ममेदमिति सर्व एवैतन्मन्यते तस्माद्धेम। चन्द्रं चन्द्रतेः कान्तिकर्मणः सर्व एव कश्चैतत् कामयते। रुक्मं रोचतेर्ज्वलनार्थस्य तद्धि रोचिष्णु भवतीति एवमूहितव्यं सर्वत्र निर्वचनम्।

---

9. *d.* adds हिरण्यनामानि after हिरण्यस्य नामानि; *m.* reads हिरण्यनामानि. 10. *a. d.* omit इति before अत्; *m.* उपपद्यते for उत्पद्यते. 11. *a. d.* omit पञ्च च दश च पञ्चदश। 12. *d. m* read °चामीकरयात°; *bi.* चामीकरणयात. 14. *a. b. d. m.* चन्दतेः; *bi.* चदतेः. 15. *a. b. d. m.* ज्वलत्यर्थस्य for ज्वलनार्थस्य of *bi*; *b.* तद्धि for तद्धि°; *a. b. d. m.* रोचिष्णु, *bi.* रोचिष्णुः.

---

13. For हेम etc. *vide* Nig. I. 2.

14. Dhâtupâṭha gives the root as चदि आह्लादे (स्वादि-68) The Mss. all read चन्दतेः; but *bi.* reads चदतेः. M. W. Dictionary derives it from चन्द् to shine. It is possible to connect the word with चदतेः in sense, but we follow our Mss.

आह । **हिरण्यं कस्मात्** । उच्यते । **ह्रियते आयम्यमानमिति वा** । आयम्यमानं ह्रियत एव शिल्पिभिः कटकरुचकस्वस्तिकादिभावेन विस्तीर्यमाणम् । **ह्रियते जनाज्जनमिति वा** । तेन हि व्यवहारः क्रियते । ततस्तेनैकत्रावतिष्ठते ह्रियत एव सर्वदा । **हितरमणं भवतीति वा** । यस्य हि तद्भवति तस्य हितं च दुर्भिक्षादिषु तद्भवति रमणं चेति । तेन गृहीतेन मूषिकोऽपि रमते किमुत मनुष्यः । **हर्यतेर्वा स्यात्प्रेप्साकर्मणः** तद्धि सर्वैरेव प्रार्थ्यते ॥

लोकानुक्रमेणैव **अन्तरिक्षनामान्युत्तराणि षोडश** । पर् च इश च षोडश कतमानि पुनस्तानि । 'अम्बर वियद् व्योम'–इत्येवमादीनि । अम्बरमम्बुमद्भवति । नानाभावेन सर्वतो वियातमिति वियत् । नानाप्रकारमेतदवति भूतानीति व्योम । एवमाद्यभ्यूहितव्यम् ।

आह–**अन्तरिक्षमेव** तावत् **कस्मादिति** । उच्यते–**अन्तरा** ह्येतद् द्यावापृथिव्योरवस्थितं **क्षान्तं** च **भवति** पृथिव्यन्तमित्यर्थः । अथ **वा अन्तरा** इमे द्यावापृथिव्यौ क्षियति निवसति **इति** अन्तरिक्षम् । अथ **वा शरीरेषु** एतदेव अन्तर् मध्येवस्थितम् **अक्षयम्** । इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम् ।

तत्र तस्मिन् षोडशके अन्तरिक्षनामसमुदाये **समुद्रः** इत्येतदभिधानमुभयाभिधानम् । उभयाभिधायित्वात् **पार्थिवेन समुद्रेण** एतेन जलाशयेन **संदिह्यते** । एतदत्र संदेहपदम् ।

आह–**समुद्रः कस्मादिति** । उच्यते–**समुद्रवन्त्यस्मादापो** वीचितरङ्गशीकरादिभावेन । **समभिद्रवन्त्येनमापः** सर्वा एव ह्यापो निम्नानुसारित्वात् समुद्रमेवाभिमुख्येन द्रवन्ति स हि निम्नो भवति । **संमोदन्तेऽस्मिन् भूतानि** संहृष्यन्ति

---

1. *m* हियते for ह्रियते *b a d* add हि after तेन, *m*. मूषको. 6. *a. b d m*. read प्रेप्सार्थस्य for प्रेप्साकर्मणः; *a. d* omit पद्. 8. *m* इत्यादि for इत्येवमादीनि; *a b d*. read अम्बुवत्. 9. *a. b. d. m* वियाते, *bi*. वियतम्; *m* यावत् for वियत् 11 *bi*. omits इति after कस्मात् 11–12. *a b d. m*. द्यावापृथिव्यौ इमे. 13. *m* स्वियति for क्षियति । 17. *a d*. omit उभयाभिधानम्, *b* reads उभयाभिधायकम् instead.

---

8. For अम्बर् etc. *vide* Nig. I. 3

जलचराणि सत्त्वानि बहूदकत्वात्। **समुदको भवति**। उद इत्युदकनाम तदस्मिन् संहतमिति समुद्रः। **समुनत्तीति वा** संक्लेदयतीत्यर्थः। अतो हि प्रकृतैरन्नोभिः सर्वमिदं संक्लिद्यते। **तयोर्विभागः** यस्मिन्नुदाहरणे लक्ष्यते **तत्रेतिहासमाचक्षत** आचार्याः। निदानभूतः इति देवमासीदिति य उच्यते स इतिहासः। कतमः पुनरसाविति। उच्यते-**देवापिश्चार्ष्टिषेण** इत्येवमादि। देवापिश्चार्ष्टिषेणः **शान्तनुश्चार्ष्टिषेण** एव **कौरव्यौ** कुरुवंशप्रभवौ **भ्रातरौ बभूवतुः**। तयोरको यः **कनीयान् शान्तनुर्नाम स** आत्मानमभिषेचयांचक्रे अभिषेचितवानित्यर्थः। सोभिषिक्तः सन्राजा बभूव। इतरः पुनर्ज्येष्ठो **देवापिस्तपः प्रतिपेदे**। स किल तीव्रेण तपसा ब्राह्मण्यमापेदे विश्वामित्रवत्। **ततः** तेनापचारेण ज्येष्ठातिक्रमजेन **शान्तनो राज्ये राष्ट्रे द्वादश वर्षाणि देवो न ववर्ष**। अवर्षति देवे तं शन्तनुमूचुरुक्तवन्तो **ब्राह्मणा अधर्मस्त्वया चरितो-ज्येष्ठं भ्रातरमन्तरित्यातिक्रम्याभिषेचितम्**। अभिषेकं चात्मनः कारितो यतस्त्वया **तस्मात्** तेन मर्यादातिक्रमेण **ते**-तव **राज्ये देवो न वर्षति** प्राप्तकालं प्रतिपद्यस्वेति। **स** एवमुक्तः **शान्तनुर्देवापिं शिशिक्ष** पुनः पुनः शशासाभिगमितवानित्यर्थः। कथम् **राज्येनाभ्युद्यतेन**। अर्थ्यमानो **देवापिरुवाच** काममदं **पुरोहितस्ते असानि** भवानि **याजयानि च** त्वा-त्वां वार्त्विकेन कर्मणा। न च राजा भविष्यामि भवानेवास्तु राजेत्यभिप्रायः।

---

1. *a. d.* read समुद्रको for समुदको, and *a. d. m.* read उद इति for उद इति. 4. *m* निदानभूतं for °भूतः. 4–5. *a. d. m.* read कथ्यते for उच्यते. 5. *a. b. d. m.* इत्येवमादि for °मादीनि of *b*. 7. *m.* reads शंतनुर्नामवान् and omits स°. 9. *a. b. d. m.* read ब्राह्मणत्वम् for ब्राह्मण्यम् of *b*.; *m.* ज्येष्ठाभिक्रम for ज्येष्ठातिक्रम; *a. d.* omit राज्ये. 10 *b. d. m.* omit तं after देवे. 11. *a. b. d. m.* omit अधर्मस्त्वया चरितो. 13. *a.* adds इति after वर्षति. 14. *b.* omits one पुन; *d.* reads पुनः पुनरशशास्त्व अभिगमितवान् इत्यर्थः। 14–15 *a. b. d. m* add तेन before अर्थ्यमानो. 16. *a. b. d. m.* omit त्वा

---

1. Cf. समुद्रिणमुदकवन्तं Nir. X. 13.

4. आचार्या –Who are exactly referred to is uncertain. Sâyaṇa refers the story to यास्क. Bi. gives a reference to Sa'ta. Br. XIII. 3. 6. 1. but it speaks of देवापः शौनक इद्रोत and not of देवापि. Cf. बृहद्देवता VII. 155 to VIII. 6.

तस्य देवापेरेतद् वर्षकामसूक्तमाविरभूत् । तत्र तस्य समुद्राभिधानस्य संदिग्धस्य प्रविभागोपदर्शनाय एषा निर्वाचिका ऋग् भवति ॥ १० ॥

आष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥

आष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा । सेना सेश्वरा समानगतिर्वा पुनः पुरु श्रायते निपरणाद्वा पुनरकं ततस्त्रायत इति वा । होत्रमृषिर्निषीदन्नृषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत् ऋषयोभवंस्तद्दर्षीणामृषित्वमिति विज्ञायते । देवापिर्देवानामाप्ता स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान् । स उत्तरस्मादधरं समुद्रमुत्तर उद्धततरो भवत्यधरोधोरः । अधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा । तस्योत्तरा भूयसे निर्वचनाय ॥ ११ ॥

"आष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा" । अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शन्तनोर्वैपोयीये कर्मणि होतृत्वे वृतः होत्रं कर्म प्रति निषीदन्नुपविष्टवान् । ततो देवापिर्नाम नाम्ना देवसुमतिं देवानां कल्याणीं मतिमुदकसंप्र-

---

1 a. b d. m. read वर्षकामस्यैतत् सूक्तम् ; b. m. omit एतत् ; b1. समुद्राभिधानसंदिग्धस्य for the text above according to a. b. d m. 8 B1 omits ऋषयोभवन्" after अभ्यानर्षत् read by B. C. D R ; B1 notes another variant as ऋषयो भवन्ति. 10. A. R. and the variant noticed by B1. have चेतनवान् for चेतनावान्. 11. The variant given by b1. is भवत्यधरोधो न धावति &c. 13. a. b d. m. read आष्टिषेण इति । त्रिष्टुप् । एतया देवानस्तौत् । before आष्टिषेण &c. 15 b1. adds अपि after स्तुत..

---

1. Vide also अनुक्रमणी given in सायणभाष्य on Rig. Sam. X. 98.

4. *Nig Sam X. 98. 5.*

दानाभिमुखो कर्तुं चिकित्वान्-जानानः। स हि तथास्तौत् यथा देवानामुदकसंप्रदानाभिमुखी मतिरभूत्। ततः परिष्टेषु देवेषु स देवापिरुत्तरस्मादधरमुत्तरस्मादन्तरिक्षाख्यात्समुद्रादधरं समुद्रं पार्थिवं प्रति। एष विभागः समुद्रयोः। अपो दिव्याः प्रशस्ताः अस्यसस्यकरीरसृजदक्षायत। किंलक्षणाः। वर्ष्या वर्षभूता अभि सर्वभूतानामुपरि। स देवाप्यधिकारे वर्तमान एतदकरोदन्यस्मिन् कल्पे देवापिर्ममाप्येतदेवमेवास्त्विलेवं वर्तमानेनाभिसंबध्यत इति समस्तार्थः।

अथैकपदनिरुक्तम्।-ऋष्टिरायुधविशेषस्तद्बहुला सेना यस्य सोयमृष्टिषेणः। इषितसेनो वा नित्यमेव प्रेषितसेनः शत्रूनिति। **सेना सेश्वरा।** इन इतीश्वरनाम तेन हि सा नित्यमेव संयुक्ता भवति। **समानगतिर्वा** समानमेकमर्थमुद्दिश्य जयाख्यमेतीति सेना। **पुत्रः पुरु त्रायते** बह्वपि यस्मिन्ना पापं कृते भवति ततोयं त्रायत इति पुत्रः। **निपरणाद्वा** निपृणाति-ददाति ह्यसौ पिण्डान् पितृभ्य इति पुत्रः। अथवा पुदिति नरकं नरकस्थानमुच्यते **ततस्त्रायत इति वा** पुत्रः। **ऋषिर्दर्शनात्** पश्यति ह्यसौ सूक्ष्मानर्थान्। **स्तोमान् ददर्शेत्यौपमन्यवः।** मन्त्राः स्तोमाः। तानसौ तारकेण ज्ञानेन पश्यतीत्यौपमन्यव आचार्यो मन्यते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति-**तद्यदेनांस्तपस्यमानान् ब्रह्म०** इत्यादि। **तदेतदुच्यते** यत्कृतमृषीणामृषित्वम्।
यद्यस्मादेनांस्तपस्यमानांस्तप्यमानान् ब्रह्म कृत्स्नः प्रपञ्चः **स्वयंभु**-अकृतकमभ्यागच्छदनर्थीतमेव तत्त्वतो दृष्टश्रुतमोविशेषेण **तद्ऋषीणामृषित्वमित्येवं** ब्राह्मणेपि

---

1. *m.* तान्यस्तौत् for तथास्तौत् 2. *d.* रति° for मति°. 2–3. *a. b. d. m.* उत्तरस्मादधरमुत्तरस्मादन्तरिक्षाख्यात्समुद्रादधरं समुद्रं पार्थिवं प्रति। *bi.* उत्तरस्मादन्तरिक्षात्समुद्रादधरं समुद्रं पार्थिवं प्रति 5. *bi.* adds अपि after कल्पे. 6. *a. b. d. m.* °तदेवमेवास्त्वि° for तदेवास्त्वि° of *bi.*; *b. m* अभिसंपद्यते. 8. *bi.* इनेति° for इन इति of *a. b. d.* 9. *d. m.* जयाख्यमिति for जयाख्यमेतीति of *bi.* 10 *bi.* त्रायति for त्रायत इति. 11. *bi.* निदद्यात् for ददाति. 11–12. *bi.* पुम् इति for पुदिति of *a. b. d.*; *a b. d.* omit नरकं. 12. *d. om.* वा before पुत्रः. 13. *b. m.* add अपि after सूक्ष्मान्. 14. *a. d.* add एव after इति 15. *a. b. d, m.* इत्येवमादि for इत्यादि of *bi.*; *b. m.* omit पुनर् after तत्. 16. *m.* अपस्मात् for यस्मात्. 16–17. *b. m.* adds आदिर्मृतमित्यर्थः; after अभ्यागच्छत्-17. *m.* इत्यर्थं for इत्येवं; *bi.* ब्राह्मणेपि for ब्राह्मणेपि of *a. b. d. m.*

---

12. Cf. मनुसंहिता IX. 138—

पुत्रार्थे नरकाद्यस्मात्त्रायते पितरं सुतः। तस्मात्पुत्र इति प्रोक्त स्वयमेव स्वयंभुवा॥

वि विचार्यमाणे ज्ञायते । देवापिर्देवानामाप्या स हि स्तुतिभिर्देवानप्रीति - हविःसंप्रदानेन च । उत्तर उद्गततर उद्गततरो भवति -उपरिष्टादवस्थानात् । अधरोधरः । किमुक्तं भवति अध एवासौ अवति । अधः पुनर्नधावति । तस्य ह्यधोगतित्वादेवोर्ध्वगतिः प्रतिषिद्धा ।

तस्योत्तरा भूयसे निर्वचनाय । किमुक्तं भवति । तस्यैवार्थस्य प्रकृतस्य यथोत्तरस्मात् समुदायवृष्टिमयाचत देवेभ्यो देवार्थिया च पौरोहित्यमकरोद्यया वाया-जयच्छन्तनुं वर्षार्थीयेन कर्मणा । भूयसे बहुतराय निर्वचनायोत्तरैषा ॥ ११ ॥

यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ॥

शन्तनुः शं तनोस्त्विति वा शमस्मै तन्वा अस्त्विति वा । पुरोहितः पुर एनं दधति । होत्राय वृतः कृपायमाणोन्वध्यायद्देवश्रुतं देवा एनं शृण्वन्ति वृष्टिवनिं वृष्टिप्राप्तिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मा-सीत्सोस्मै वाचमयच्छद्बृहदुपख्याख्यातम् ॥ १२ ॥

यद्देवापिरिति । यद्यस्माद्देवापिः शन्तनवे राजे पुरोहितः । पुरोहितो ह्येवाग्नि-कर्मणि व्याश्रियते । स पुरोहितः सन् देवापिर्होत्राय होतृकर्मणे वर्षार्थीये कर्मणि वृतः

---

1 *b.* विचार्यमाणं for °माणे of *a. b. d. m.* 2. *a. b. d m.* add असौ after भवति 3 *a. d* read आधारः for अधोर° ; *a. b. d.* read अध एवासौ अवति (perhaps better) *b.* अध एवासौ चवति. 6. *m.* probably adds एनं after वा. 7. *a. b. d. m.* शन्तनुं, *b.* शन्तनु ; *a. d.* add निर्वक्ष्यवचनाय, *m.* निर्विविक्ष्यमानय. *b.* निर्विवक्ष्यवचनाय after निर्वचनाय, *a. m* omit अस्मा एषा. 12 *B. C. D. R. m.* read वृष्टिवनिं before वृष्टिप्राप्तिनम् omitted by *B.*

---

9. Rig Sam X. 98. 7.

12. व्याख्याख्यातम् i. e. in Nir. I. 7.

सन् कृपयन् कृपायमाणो राज्ञोद्दीधेदन्वध्यायदृष्टिर्मेवेति । तं देवश्रुतं देवापिमेनं वृष्टिवनिं वृष्टियाचिनं रराणो ददद्बृहस्पतिस्तस्मिन्नेव कर्मणि बह्वासीद्बह्वत्वेवस्थितः । सोस्मै वर्षसाधिकां वाचमयच्छददादित्यर्थः । तया वाचा तदनुगृहीतया देवान् स्तुत्वा तेभ्यो वर्षमलभतेति समस्तार्थः ॥

अथैकपदनिरुक्तम् ।-शन्तनुः कस्मादिति । उच्यते-स हि कंचिद्रोगार्तं दृष्ट्वा ब्रवीति हे तनो शं तवास्त्विति ततोसावगदो भवति । अथ वा शमस्मै तन्वा अस्त्वित्येवमसावाशास्ते । शमिति सुखनाम । तनुः शरीरं । तदसौ नित्यं शरीराया-शास्ते । पुरोहितः शान्तिकपौष्टिकाभिचारिकेषु कर्मसु पुर एनं दधति राजानः पुरस्कुर्वन्तीत्यर्थः । देवश्रुतं देवा हि एनं स्तुतीरुद्गायन्तं शृण्वन्तीति देवश्रुत् तं देवश्रुतम् । रराण इति दातिर्दानार्थोभ्यस्तः ॥

बृहद्दिवाभीतम् । " बृहदिति महतो नामधेयं परिषद् भवति "

इति । मन्त्रनिदानद्वारेण धर्मोयमत्र दर्शितः । ज्येष्ठे सिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमः । धर्मातिक्रमे च देवो न वर्षतीति । निरुक्तपक्षे-ऋष्टिषेणो मध्यमः तदपत्यमयमग्निः पार्थिव आर्ष्टिषेणो देवापिः स शान्तनवे सर्वस्मै यजमानायेति योज्यम् । बृहस्पतिरिति मध्यमः । स्तनयित्नुलक्षणां वाचमित्यर्थः ॥ १२ ॥

---

1. *a. b. d. m.* omit कृपयन्, *m.* reads राज्ञे for राज्ञो. 1–2. *m.* omits तं ; *b m.* add after देवश्रुत and before देवापिमेन '—देवे' श्रुतं वृष्टिवनिं । वनु याचने । चतुर्थ्यर्थे चोमयत्र द्वितीया । देवैः श्रुत्वा [ता] य वृष्टिवनये वृष्टियाचिने । रराण. । रातेर्व्यत्ययो बहुलमिति शपः लुः । ददद्वृष्टिमित्यर्थः । 2. *a. b d. m.* add मत्वा after वृष्टियाचिनं, *a. d. m.* add इह before ददत्; *bi.* reads अददत् for ददत्. 3. *a. b. d. m.* omit अध्यासीत्; *m.* omits सः and reads तस्मै for अस्मै *bi* अददत् for अददात् of *a. b. d. m.* 5. *b, m.* add after उच्यते—

यं यं करेण स्पृशति जीर्णं स सुखमश्नुते ।
पुनर्युवा च भवति तस्मात्तं शंतनुं विदुः ॥

इति भारते.

5–6. *d.* किंचित् for केचित्; *m.* omits हि after ब्रवीति; *bi.* reads ब्रवीति हि तनोः यं तव &c, *a. b. d.* read ब्रवीति हे तनो यं तव &c; *b.* reads शंतनो for तनो. 7. *a. b. d m.* omit अस्तु before इति. 8. *m.* शान्तिकपौष्टिकेषु. 11. *a. d.* परिषद्वं for परिषद्. 13. *a. d.* omit च before देवो; but *d.* reads अत्र instead of it; *a. d.* नित्यपक्षे and *m.* नैरुक्तपक्षे for निरुक्तपक्षे. 14. *m.* omits सः. 15. *a. b, d.* read बृहस्पतिर्वाचस्पतिरिति.

---

11. *Vide* Nir. I 7.

साधारणान्युत्तराणि षड्दिवश्चादित्यस्य च । यानि त्वस्य माधान्ये-नोपरिष्टात्तानि व्याख्यास्यामः । आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामदीप्तो भासेति वादितेः पुत्र इति वा । अल्पप्रयोगं त्वस्यैतदार्चाभ्यासाये सूक्तभाक् सूर्यमादितेयमदितेः पुत्रम् । एवमन्या-सामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येत्यथापि मित्रावरुणयोः ।

आदित्या दानुनस्पतीं ॥

दानपती । अथापि मित्रस्यैकस्य ।

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्तं आदित्य शिक्षति व्रतेन ॥

इत्यपि निगमो भवत्यथापि वरुणस्यैकस्य ।

अयं वयमादित्य व्रते तव ।

व्रतमिति कर्मनाम निवृत्तिकर्मे चारयतीति सत इदमपीतरद्-तमेतस्मादेव वृणोतीति सतोऽन्नमपि व्रतमुच्यते यदावृणोति शरी-रम् ॥ १३ ॥

योगाभिधानाधिकारेणेदमुच्यते—साधारणान्युत्तराणि षड् दिवश्चादित्यस्य चेति । समानं धियन्ते इति साधारणानि नामानीत्यधिकारो वर्तत एव । उत्तराणि

S. A. adds च after अल्पप्रयोग 4–5. B. C. D R. read आदितेय-मदितेः पुत्रम् । एवमन्यासामपि; A. Bi. read आदितेयमन्यासामपि. 12–13. Bi. reads व्रतमिति कर्मनाम वृणोतीति सत इदमपीतरद्वृतमेतस्मादेव निवृत्तिकर्म वारयतीति सतोऽन्नमपि &c. we read with A. B. C. D. R. Durga follows Bi. in his commentary, but the reading given above is supported by all mss and is the traditional reading, and I believe it makes better sense than the one preferred by the commentator. R. reads निवृत्तिकर्म Bi. notes variants as निवृत्ते कर्म । A. Bi. conclude II. iv. 1. after शरीरम्. 15. m. reads the whole section for योगेति. 16. a. b. d. m. read वर्तत एव, b. वर्तते अत एव

---

*. व्याख्यास्यामः *i. e.* in Nir. XII. 15. *et seq.*

प्रकृतमपेक्ष्य । किं चात्र प्रकृतम् । अन्तरिक्षनामानि तेभ्य इमान्युत्तराणि । कियन्ति पुनस्तानि । षट् । कयोः पुनः साधारणानि । **दिवश्चादित्यस्य च** । कतमानि पुनस्तानि । 'स्वः पृश्निः नाकः'-इत्येवमादीनि । "**यानि त्वस्यादित्यस्य प्राधान्येन वर्तन्ते प्रधानस्तुतिमाञ्जि नामानि-सविता भगः सूर्यः पूषा** इत्येवमादीनि तान्युपरिष्टाद्व्याख्यास्यामः" सप्तदशोध्याये । इमानि तु नैघण्टुकानि संहृष्टरूपाणि च द्युनामभिः साकमित्यत इह नैघण्टुकप्रकरणे निरुच्यन्ते ॥

आह-**आदित्य एव तावत् कस्मादिति** । उच्यते-शृणु । **आदत्ते ह्यसौ रसान् रश्मिभिरित्यादित्यः** । **आदत्ते भासं ज्योतिषां तदुदये हि चन्द्रादीनां प्रभानाशो भवत्यन्यग्रहापेक्षमेतत् । आदीप्तो भासेति वा** सर्वतो ह्येष भासा आदीप्त आवृतो भवति । **अदितेः पुत्र इति वा** । अदितिर्देवमाता तस्याः पुत्रः सोयमादितेयः सन्नादित्य इत्युच्यते ।

अल्पप्रयोगं त्वस्यैतदार्चाभ्यान्नाये सूक्तभाक् सूर्यमादितेयमिति । अल्पप्रयोगमल्पविषयम् । तुशब्दो विशेषणार्थः । एतदेवाल्पप्रयोगविषयमितराणि सवितृभगपूषादीनि बहुप्रयोगविषयाण्यस्यादित्यस्य । अल्पप्रयोगविषयम् । **आर्चाभ्यान्नाये** । ऋचो यस्मिन्भ्युर्युपर्यान्नाताः सोयमार्चाभ्यान्नायो दाशतयः । तस्मिन्नल्पप्रयोगविषयम् । एतदादितेः पुत्रत्वाभिप्रायमभिधानम् । आदितेय इति । **सूक्तभागेव**

---

3. *a d.* omit तु before अस्य. 4. *a. d.* omit सूर्यः. 5. *b.* omits तु after इमानि. 7. *a. b. d. m.* read आदित्यः for इति after कस्मात्. 9. *a. b. d. m.* read भवति । अव [न्य *b. m.*] ग्रहापेक्षमेतत् । *bi.* भवत्येव । ग्रहापेक्षं²; *a. d.* आत्तो for आदत्तो 12. *a. d* अल्पप्रयोगविषयं and *m.* °प्रयोगस्य विषयम् for अल्पप्रयोगं अल्पविषयम् 14. *a. d* °पूषाप्रभृतीनि for °पूषादीनि. 14–15. *m.* अर्चाभ्या° for आर्चाभ्या°. 15. *a. d.* add आम्नाये after यस्मिन्. 16 *m.* °आपाभिधानम्.

---

3. For स्वः etc. *Vide* Nigh. I. 4.

5. सप्तदशोध्याये, *i. e.*, the 12th adhyâya of Nirukta. Some writers as also *Durga* number the adhyâyas of Nirukta in continuation to those of Nighantu which is in five chapters. Hence the 17*th* chapter means the 12*th* of the Nirukta.

10. अदितिर्देवमाता, *Vide* Nir. IV. 22.

चैतदभिधानं न हविर्भाक्। न ह्यादितेय इत्यनेन नाम्ना हविराध्वर्यवे चोदितपूर्वमस्ति। यथा त्वेतत् सूक्तमेव नैघण्टुकवृत्त्या भजते तथेदमुदाहरणम्-सूर्यमादितेयमिति

"यदेदेनमदधुर्यज्ञियासः"

इत्यस्यामृचि। अन्ये तु मन्यन्ते-आदित्य इत्येतदेवाल्पप्रयोगमिति। तत्र त्वेतद् विरुद्ध्यते-सूक्तभागिति। हविरपि ह्यनेनाभिधानेन चोद्यते—

"आदित्यं बहुरूपमालभत"

इति।

"तस्य च पशोरेतत् पल्चेमादित्यो देव उदगात् पुरस्तात्"

इति। अथ चैवमन्यथा वाक्यद्वयविभागेन स्यात्-अल्पप्रयोगं त्वद्येतदार्चाभ्याम्नाय आदित्य इति हविर्भाक् सूक्तभाक्च। अल्पं हविः सूक्तभागित्यर्थः। इदं त्वन्यत्-सूक्तमेव नैघण्टुकवृत्त्या भजते न कदाचिदपि हविः। तद्यथा-"सूर्यमादितेयम्"-इति॥

आदित्यशब्दप्रसक्तमाह-एवमन्यासामपि देवतानामिति। देवताभेदपक्षमपेक्ष्येदमुच्यते-आदित्यामिधानप्रवादाः स्तुतयो भवन्ति। तद्यथैतदुदाहरणजातं-मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्य इति"।

---

1 *m* आदितेयमित्यनेन 2. *a. d.* यथाचैतत् for यथा त्वेतत्; *d.* तथेतदुदाहरणम्. 6. *m* आलभेत. 8. *a. b. d. m.* यदेदं; *m.* उदगात् for उदगात्. 9. यथवैवम् for अथ चैवम् and *a. d.* °द्वयप्रविभागेन. 10. *a b. d. m.* read after हविर्भाक्, सूक्तभाक्च [*b m.* च च अ] ल्पहविः सूक्त [*b.* क्च्, *m.* माक्] विषयमित्यर्थः। *b.* न सूक्तभाक्। अल्प हवि- सूक्तभागित्यर्थं. । Both these are not clear, but the former makes some sense and hence I adopt it in the text. 11 *b.* omits न before कदाचिदपि. 12. *m.* इत्यर्थः for इति 13 *b.* देवानां for देवतानाम् 13–14. *b.* देवतामक्षमपेक्ष्य for देवताभेदपक्षमपेक्ष्य of *a b. d, m.* देवतामेदमपेक्ष्य.

---

4. इत्यस्यामृचि-Vide Nir. VII. 29. RS. X. 88. 11. The full text is as follows:—

यदेदेनमदधुर्यज्ञियासो दिवि देवा सूर्यमादितेयम्।
यदा चरिष्णू मिथुना चरन्तावादिन्नाभा पतथः पतङ्गौ विभो॥

6. The quot. is not traced.

अथापि मित्रस्यैकस्यादित्यप्रवादा स्तुतिर्भवति । तद्यथा—

"प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन ।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्" ॥

अयमप्यन्ये बहवो निगमा इत्यधिशब्दः । प्र स मित्रेति विश्वामित्रेण दृष्टं मैत्रस्य चर्षणिसूक्तस्यानुवाक्या । प्र अस्तु-प्रकर्षेणास्तु भवतु । हे मित्र आदित्य-अदितेः पुत्र । स मर्तः-स मनुष्यः 'प्रयस्वान्' अन्नवान् । यः किं करोति । यः ते-तुभ्यं शिक्षति-ददाति व्रतेन-कर्मणा निर्वपणश्रपणादिना संस्कृत्येदं हविरन्नजातम् । किं च एवमतिप्रभावस्त्वं येन स मर्तो यस्तव यज्ञ त्वोतः-त्वदीयेऽहे वर्तमानः त्वया रक्षितः न केनचित् अन्यनिकृष्टेनापि शत्रुणा हन्यते-हिंस्यते । न चाद्यापि जीयते-वशीक्रियते केनचित् । न च केवलं शत्रूणामनाधृष्यः । न एनं त्वोतं सन्तम् अंहः अपि पापमपि अश्नोति-व्याप्नोति यत् अन्तितः-अन्तिकात् समीपात् यत् स्वदीयादेव वाङ्मनश्चेष्टानिमित्तमुत्पद्यते पापं तदुत्पत्तिसमकालमेव त्वदनुग्रहादपध्वस्यते तावत्त्वेतं न व्याप्नोति । न च केवलं यदन्तिक इत्यपदे तदेवैनं न व्याप्नोति । किं तर्हि । यदपि दूरात् पुत्रभ्रातृजायादिद्वारेणेन्मामाक्रन्दनि रुदति न एनमभिव्याप्तुं शक्नोति त्वोतं सन्तम् । एवं महानुभावस्त्वं तवस्त्वां स्तुम । इत्यभिप्रायः ॥

अथापि वरुणस्यैकस्यादित्यप्रवादा स्तुतिर्भवति । तद्यथा—

---

a. d adds अपि *b-L in* अयम्; *m.* omits प्र स मित्रेति. 5 *m.* reads मित्रस्य *for* मित्र *a-d* omit आदित्य. 6 *a. b, d, m.* omit ते. 7. *b. m.* add यागदेन after कर्मणा; *m.* संस्कृत्येदं *for* संस्कृत्येदम् 8. *a. b. d. m.* यदमनिष्टप्रवादा; *a. b, d.* read मर्त्यो *for* मर्तो; *m.* omits स मर्तो. 9. *m.* प्रत्यर्पितमनुग्रहा इत्यते *etc*; *a. d* न चादयो *for* न चाद्यो; *b. m.* न चाद्य. 10. *b.* सन् *for* सन् *of a. b. d. m*; *a b d. m.* omit च after न; *a. b. d. m.* add च after न and before पनं. 11. *a. b. d. m.* add न before व्याप्नोति. 12. *a* reads नावस्त्वेनं, *b* तदस्त्वेन न; *b. m.* तदस्त्वेनं नः; *d* तदेवेनं *for* तदेवैनम् 14. *b.* एवं before आक्रन्दनि *for* पनं *of a. b, d. m.*

---

2. The quot. is RS. III. 59. 2.

" अथा वयमादित्य व्रते तव " इति ।

" उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।

अथावयमादित्य व्रते तवानागसो अदितये स्याम " ॥

अनया स्तुभोपाकृतः शुनःशेपो वरुणं स्तुतवानात्मानं मोचयिष्यन् । वरुण-
प्रघासेष्वपधृषेष्टौ, वारुण्यामिक्षायां हविषः पुरोनुवाक्यायाम् । हे वरुण स्तुतु स्थानेषु- 5
अधो मध्ये उपरिष्टाच्च वयं त्वया बद्धाः स्मैः पाशैर्यतोतो ब्रूमः ।-स्तुत्या हविषा
चोपगृहीतत्वमस्माभिरतस्तावत् उत्तमं पाशमुपरिष्टादवस्थितमस्मदस्मत्तः उत्प्रथाय-ऊर्ध्वं
श्लथय । उच्छ्थ्य च विमुञ्चास्मानपीडयन् । योपि चायं अधमस्ते पाशोस्मासु वर्तत
एनमप्यवाग्रम् अव श्रथय-अवमुञ्च । तथा च योप्ययं मध्यमस्ते पाशोस्मन्मध्ये
वर्तत एनमपि तथैवावस्थितस्तमभिसर्पयन् ऊर्ध्वमधो वा अदुःखयन्नस्मान् वि श्रथय- 10
विमुञ्च । अथैवं त्वया वयं सर्वविमुक्तपाशाः सन्तो हे आदित्य-अदितेः पुत्र
वरुण अनागसोपापाः संशुद्धसर्वकिल्बिषाः । एतदेव हि यौष्माकीणं पाशत्रयमाग-
स्तेनावमुक्ताः सन्तस्तवैव व्रते-तवैव परिचरणकर्मणि अदितये-चात्मनोदीनत्वाय
अनुपक्षयायादरवन्तः स्थिताः स्यामेत्याशीः ।

निगमप्रसक्तमुच्यते ।-व्रतमिति कर्मनाम वृणोतीति । एवं कर्तरि कारके 15
सतः वृणोतेः । तद्धि कर्म शुभं च कृतं सदावृणोति कर्तारम् । इदमपीतरद्व्रतमे-

---

1. *m.* omits अथा वयमादित्य व्रते तव इति, *d* reads उदुत्तम वरुणेति अनया स्तुभा etc. 4–5. *a. d* omit वरुणप्रघासेषु, and *a b d m* read वरुणस्य निष्कासहविष· for वारुण्यामिक्षायाम्. 6. *bi.* omits स्तुत्या after वयम्; *d.* omits अतो. 7. *d.* अतस्यावदुत्तमं । 7–8. *a. b. d m.* उत श्रथय अधं [*a. b. d* पत्र] च [*m.* अ] धय । उच्छ्थ्य. 8. *bi.* उच्छ्रित्य for उच्छ्थ्य; *d.* अधस्ते for अधमस्ते. 9 *a. b. d. m.* पनमप्यवाग्रम् for पनमर्वाग्रम् of *bi*, and *d. m.* पत्र for अत्र. 10. *a b. d.* पत्र for पनम् *bi.* अभिसर्जयन् for अभिसर्पयन् of *a. b. d. m.* 13. *b. d m.* तेन विमुक्ता for तेनावमुक्ता of *bi*; *d.* तत्र for तव in both places. 14. *b.* adds च after अनुपक्षयाय, *d.* reads अनुपक्षया·. 16. *a. b. d. m.* शुभमशुभं वा कृतम् for शुभं च कृतम् of *bi.*

---

3. The quot is RS. I. 25. 15

4 मोक्षयिष्यन्—Vide Ait Br. XXXIII. 4.

तस्मादेव निवृत्तिकर्म यमनियमाद्यं बहिर्वेदिकमान्तर्वेदिकं वा यदग्निसन्निधावुपेयते तस्मात् वारयतीति एवं सतः तद्विषयेषु प्रवर्तमानं पुरुषस्तयादिषु वारयति तदनुस्मृत्य स पुरुषो निवर्ततेऽवकीर्णी भविष्यामीत्येतस्माद्भयात् । अन्नमपि एतमुच्यते यदाप्नुणोति शरीरम् । रसशोणितमांसमेदोमज्जास्थिभावेन विपरिणममानम् । आदित्यशब्दप्रसक्तानुप्रसक्तमिदमुक्तम् ॥ १३ ॥

स्वरादित्यो भवति सु अरणः सु ईरणः स्मृतो रसान्स्मृतो भासं ज्योतिषां स्मृतो भासेति वैतेन द्यौर्व्याख्याता ॥ पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्पृष्टा रसान्संस्पृष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च ॥ नाक आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयोथ द्यौः कमिति सुखनाम तन्मतिषिद्धं प्रतिषिध्येत ।

न वा अमुं लोकं जग्मुषे किंच नाकम् ।
न वा अमुं लोकं गतवते किंच नाशुखं पुण्यकृतो ह्येव तत्र गच्छन्ति ॥

गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेथ द्यौर्यदनयिव्या अधि दूरं गता भवति यच्चास्यां ज्योतींषि गच्छन्ति ॥ विष्टबादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषामाविष्टो भासेति वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च ॥ नभ आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां प्रणयोपि वा मन एव स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥ १४ ॥

---

1 *m.* अभिवृत्ति° for निवृत्ति°, and adds वा before बहिर्वे°, *d* बाह्यवे° for बहिर्वे°, *b* उपपद्यते for उपेयते. 2. *a b* वर्तमान for प्रवर्तमान. 2–3. *a d.* अनुस्मृत्वा, *b. m* अनुस्मृत्य, *bi* अनुश्रुत्य, *b.* अवकीर्णो for अवकीर्णी°. 4 *a. b. d* तदप्याप्त°, *m.* तदस्याप्त°, *bi.* तदाप्त° 5. *a d m* आदित्यशब्दे for °शब्द°. 8 Bi notes variant as संस्पृष्टा 10. A. Bi. omit नेता रसानां before नेता भासां read by B. C D. R. 12. A. Bi. read जग्मुषे for गतवते of B. C. D. R 17 A. Bi omit नेता रसानां before नेता भासां read by B C D R. 18. A reads भमयोपि for प्रणयोपि A. Bi. conclude II iv. 2. after व्याख्याता.

अधुना प्रकृतमेवोच्यते–स्वरादित्यो भवति। सु अरणः–सुगमन इत्यर्थः। अथवा सुष्ठु तमांसि ईरयति नाशयतीत्यर्थः। अथवा विशेषणविशेष्यभावेनैते वाचये स्याताम्। किमुक्तं भवति–सु अरण इति। उच्यते–सु ईरणः इत्येव। स्वृतो रसान् सुष्ठु रसानादातृभूतो भौमानान्तरिक्षांश्च। स्वृतो भासं ज्योतिषां सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भासनादातृभूतो–गतः। स्वृतो मासेति वा सुष्ठु पारंगतो मासेति वा सर्वतो ह्येष परिगतो दीप्त्या भवति॥

एतेन द्यौर्व्याख्याता। उक्तं हि "तानि चेत् समानकर्माणि समाननिर्वचनानि"–इति। सापि हि सु अरणा शोभनगमना भवति शोभनं वा अस्यामर्यत इत्येवमादि यथासंभव योज्यम्॥

पृश्निरादित्यो भवति। आह–कस्मात्। उच्यते–प्राश्नुत एनं वर्ण इति नैरुक्ताः। प्राश्नुते–प्रकर्षेण व्याप्नोति एनमादित्यं वर्णः प्रोज्वल इति नैरुक्ता मन्यन्ते। संस्पष्टा रसान्–स हि नित्यकालमेव रसानां संस्प्रष्टा भवति। तस्य तदेव कर्म। वक्ष्यति— "अथास्य कर्म रसादानम्" इति। संस्पष्टा मासं ज्योतिषाम्। आदित्यसंस्पर्शादेव ग्रहनक्षत्रचन्द्रमसां भासो नश्यन्ति। संस्पष्टो मासेति वा–दीप्त्या एष सर्वतः संस्पृष्टे भवति॥

आह–अथ द्यौः कस्मात्पृश्निः। उच्यते–सापि हि संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च॥

---

1. m omits अधुना प्रकृतमेवोच्यते and takes the whole section as *pratika*; a. d. add इति after भवति. 2. a b. d. m. add नाशयति after ईरयति; bi. omits it; b. वाक्येन for वाक्ये. 3–4. a b. d m. इत्येवं for इत्येव; a. d सुष्ठु रसानादातृ। क गतौ। भौमान् &c. b. m. सुष्ठु रसानादातृभूतो गतौ भौमान् &c. 5. a. d. omit मासम्, and read गतिः for गतः. 8. a. d. शोभनयना for शोभनगमना

11. m. आदित्यवर्णः for आदित्यं वर्णः. 12. a. d. omit एव after नित्यकालम्; a. b. d. m. add हि after तस्य. 16. bi. omits अथ before द्यौः; d. adds इति after पृश्निः.

---

7. For तानि चेत् etc. *vide*, Nir. II. 7.

13. वक्ष्यति *i. e.* in Nir. VII. 11.

नाक आदित्यो भवति । आह-कस्मात् । उच्यते-नेता भासां सर्वासु दिक्षु । ज्योतिषां च प्रणयः । अस्यैव हि भगवतो रश्मिजालप्रान्तोपलब्धं ज्योतिष्कं संप्रमीति ॥

अथ द्यौः कस्मादौक इति । उच्यते-कमिति सुखनाम । आह ततः किमिति । शृणु-तत्प्रतिषिद्धं यत्पुनरपि प्रतिषिध्येत । किमिति । उच्यते-तत्प्रतिषिध्यमानमकं भवति असुखमित्यर्थः पुनरपि च प्रतिषिध्यमाने नाकं भवति । द्विः प्रतिषेधः प्रकृतमापादयति । ततो नाकमित्युक्ते सुखमिति प्रतीयते । ब्राह्मणमपि चैतस्मिन्नर्थे भवति-न वा अमुं लोकं जगमुषे किंच नाकम्-इति । आह-किमुकं भवति । अमुमेव लोकं-द्युलोकं जगमुषे-गतवते न किंचन किंचिदकं नासुखमित्यर्थः । किं कारणम् । य एव हि पुण्यकृतो भवन्ति त एव हि तत्र गच्छन्ति न च पुण्यकृतां दुःखेन भवितुं न्याय्यम् ॥

गौरादित्यो भवति । आह-कस्मात् । उच्यते-गमयति ह्यसौ रसानात्मानं प्रति उपक्षयं वा गमयति । किं च गच्छत्यन्तरिक्षे स एवात्मना ॥

अथ द्यौः कस्माद् द्यौरिति । उच्यते-द्यत् यस्मादियं द्यौः पृथिव्या अधि-उपरि दूरमध्वानं गता भवति । किं च द्यत्-यस्मात् च अस्यां ज्योतींषि-प्रहनक्षत्रतारकादीनि गच्छन्ति तस्माद्यौः ॥

विष्टवादित्यो भवति । आह-कस्मात् । उच्यते-आभिमुख्येन हि एष रसान् भौमानान्तरिक्षांश्च आविष्टः-प्रविशो रश्मिभिरादातुम् । किंचाभिमुख्येन आविष्टो भासं ज्योतिषां ग्रहादीनाम् । अथवा अयमेवाभिमुख्येन आविष्टो भासितिवा-सर्वतो ह्येष सदीप्तो भवति ॥

---

1. a. b. d. m. उच्यते नेता भासां ज्योतिषाम् । नेता अग्नौ भासां सर्वासु दिक्षु etc. 3. a b. d. m. अमुष्मादिति for अमुमेवेति. 5 a b. d. m. read प्रतिषिध्यते for प्रतिषिध्येत and a. b. d. m. add आह before किमिति; a. d. किमिदं for किमिति. 7. m. adds ह्येव after अर्थे. 9. a. b. d. m. omit लोक before द्युलोकम्. a. b d. न किंचन नाकं किंचिन्नासुखमित्यर्थः; m. किं च नाकं किंचिन्नासुखमित्यर्थः; bi. किंच किंचित् नाकं नासुखमित्यर्थः; the reading given above is conjectural from all these. 14. a. b. d. omit यत्; b. reads गौः for द्यौः of a. b. d. m. 18. a. d. विष्टः for आविष्टः. 18–9. a d. विष्टः for आविष्टः, and a. b. d. m. add प्रविशो after it and before आदातुम्.

अथ द्यौः कस्माद्दिवतीति । उच्यते-इयमपि हि आविष्टा ज्योतिर्भिः ग्रह-नक्षत्रादिभिर्ये चान्ये पुण्यकृतस्तैश्च तस्माद्दिवतीति ॥

अथ आदित्यो भवति । आह-कस्मात् । उच्यते-नेता ह्येष भासां सर्वासु दिक्षु ज्योतिषां च प्रणयः व्याख्यातमेतत् । अपि वा भन एव स्याद्विपरीतः । भनः-मासनः सन्नभ इत्युक्तो विपर्ययेण । न न भातीति वा । न न भाति भात्येवेति नभः ॥

"एतेन द्यौर्व्याख्याता" द्यापि चादित्यवन्नेत्री भासामित्यादि योज्यम् ॥ १४ ॥

रश्मिनामान्युत्तराणि पञ्चदश रश्मिर्यमनात्तेषामादितः साधारणानि पञ्चाश्वरश्मिभिः ॥

दिङ्नामान्युत्तराण्यष्टौ । दिशः कस्माद्दिशतेरासदनादपि वाम्यधनात् । तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य नाम भवति काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्त्यादित्योपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्याज्यन्तोपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्यापोपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति स्थावराणाम् ॥ १५ ॥

आदित्यसंबन्धेनैव रश्मिनामान्युत्तराणि पञ्चदश । रश्मिर्यमनात् उदकस्याक्षानां वा । तेषां पञ्च यान्यादितस्तानि साधारणानि पञ्चरश्मिभिः । कतमानि पुनस्तानि । "खेदयः किरणाः"-इत्येवमादीनि । खे दयन्ते-खे गच्छन्तीति खेदयः । किरणा विक्षिप्ता भवन्ति ॥

---

1. *a. b. d. m.* add आह before अथ द्यौः. 2. *d.* ये वान्ये for ये चान्ये; *m.* सुपुण्य° for पुण्य°. 5. *m.* omits न न भातीति वा. 7. *m.* omits हि. *d.* इत्येवमादि. 11. B. C. D. R. add नाम after सत्त्वस्य, Bi. omits it. 15. A. Bi. conclude IL v. 1. after स्थावराणाम्. 18. *a. b. d.* read दयन्ति for दयन्ते. 19. *a. b. d. m.* add ते हि after किरणाः.

---

18. For खेदयः किरणाः etc. *vide* Nigh. I. 5.

दिङ्नामान्युत्तराण्यष्टौ। आदित्योपलक्षणा एव हि दिश इत्यादित्यनामभ्यः उत्तराणि दिङ्नामानि। कियन्ति पुनस्तानि। अष्टौ। कानि पुनस्तानि। "आताः आशाः उपराः"-इत्येवमादीनि। आता आगता ह्येतास्तं समर्थं प्रति भवन्ति। आशा अभ्यश्नुवते ह्येताः सर्वमेव यदस्ति किंचित्। उपराः सर्वमेव ह्येता उपगम्य रता भवन्तीति उपराः॥

आह-दिशः कस्मात्। दिशतेरतिसर्जनार्थस्य। अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम्। अथवा आसदनात् तं तमर्थं प्रत्येता आसन्ना भवन्ति आपि वाभ्यशनात्। अभ्यश्नुवते ह्येतास्तं समर्थम्॥

तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति। तत्र तस्मिन्नष्टके दिङ्नामगणे काष्ठा इत्येतन्नामानेकस्यापि सत्त्वस्य भवति। तद्यथा-काष्ठा दिशो भवन्ति। आह-किं कारणमिति। उच्यते क्रान्त्वा स्थिता भवन्ति क्रान्त्वा ह्येतास्तं तमर्थं प्रति गत्वा स्थिता भवन्ति न हि तदस्ति यत्रैता न सन्ति। काष्ठा उपदिशो भवन्ति। इतरेतरं क्रान्त्वा स्थिता भवन्ति। ता अपि ह्येतरेतरं क्रान्त्वा दिग्भिः सार्कं स्थिता भवन्ति। आदित्योऽपि काष्ठोच्यते। क्रान्त्वा स्थितो भवति। असावपि स्वस्थानं क्रान्त्वा गत्वा स्थितो भवति। आज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवति। आज्यन्तोऽपि शरपर्यन्तः काष्ठोच्यते असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति। आपोऽपि काष्ठा उच्यन्ते। ता पुनर्द्वेधाः-स्थावराश्चास्थावराश्च। तत्र क्रान्त्वा-गत्वा जलाशयमेताः स्थिता

---

1. *a d. m.* read पत for पते of *bi*, *b.* reads इव. *m* omits हि. 2. *m.* omits अष्टौ कानि पुनस्तानि. 4. *a. b d. m.* आयत for यत्; *a b. d m.* उपगम्य, *bi* उपरम्य 6. *m.* अतिसृजन्ते for अतिसृज्यन्ते 8. *a. d.* add प्रति after ते तमर्थम् 9-10 *b m* add नाम after सत्त्वस्य *bi.* omits तत्र तस्मिन्नष्टके दिङ्नामगणे काष्ठा इत्येतन्नामानेकस्यापि सत्त्वस्य भवति, read by *a b d. m.* before तद्यथा. 11. *a. d.* omit क्रान्त्वा स्थिता भवन्ति. 12. *a. b. d. m.* एनेता for एतेमा. 13. *a. d* omit इतरेतरं क्रान्त्वा स्थिता भवन्ति. 14. *a. d.* omit क्रान्त्वा स्थितो भवति. 15. *b* adds च after असावपि; *d.* reads संस्थानम् for स्वस्थानम्. *b.* omits गत्वा. 16. *d.* omits the पर्तीक. *m.* omits क्रान्त्वा स्थितो भवति. 18. *m.* ह्यप्यो for ह्यप्य; *b.* omits गत्वा.

---

3. For आताः etc. *vide* Nigh. I. 6.

भवन्तीति स्थावराणां काष्ठात्वम्। अस्थावराणां पुनः क्रामन्ते चेताः। न क्वचित् तिष्ठन्तीति काष्ठा मेघ्या आपः ॥ १५ ॥

मन्त्रोपि चैतस्मिन्नेवार्थे भवति—

" अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्।
वृत्रस्य निण्यं विचरन्त्यापो दीर्घं तम् आशयदिन्द्रशत्रुः " ॥ 5

अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः। शरीरं शरीरं शृणातेः शम्नातेर्वा। वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्दोस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः। तत्को वृत्रो—मेघ—इति नैरुक्तास्त्वाष्ट्रोसुर इत्यैतिहासिका अपां च 10 ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्त्यहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च विवृद्ध्या शरीरस्य सोतांसि निवार्यांचकार तस्मिन्हते प्रसस्यन्दिरे आपस्तदमिवादिन्येपगर्भवति ॥ १६ ॥

---

1. *a. b. d* m. क्रामन्त्येवेता. for क्रामन्ते चेता. 2. *d.* मेघ्या, all others मेघ्या. We have followed *d.* above, as its reading suits the context better. 7. A. B. C. read मेघः शरीरं शरीरं शृणातेः. D. agrees with the text of Bi. which has only one शरीरं. Bi. gives another variant as मेघशरीरं शृणातेः; A. omits निण्यं before निर्णाम. 8. A. reads °शयदाशयते. 10. A. omits त्वाष्ट्रोसुर इत्यैतिहासिकाः. 13. B. C. D. R. read प्रसस्यन्दिरे; Bi. प्रणस्यन्दिरे. 14. A. Bi conclude II. v. 2. after भवति.

---

5. The quot. is RS. I. 32. 10.

अतिष्ठन्तीनामिति। हिंस्यस्वरूपस्येदमार्षम् दाधवीतिति च। त्रिष्टुभावेते। अग्निष्टोमे निष्केवल्यं नाम शस्त्रं तत्र निविद्धानीयमेतत् सूक्तम्। तत्र द्वे अपि शस्येते। न तिष्ठन्तीत्यतिष्ठन्त्यः। तासामतिष्ठन्तीनां मेघोदरान्तर्गतानामपाम्। ता हि मेघे गच्छति गच्छन्त्येव तदाधारत्वात्। अनिवेशनानामनिविशमानानां न हि ताः क्वचिन्निविशन्ते यावद्व्यवसायं नानुवन्ति। तासामेवंविधानां काष्ठानां मध्ये-ऽस्पिलानां बाढतो मेघाख्यं निहितमवस्थापितं धात्रा दार्ढीमावृत्य अपलासामेव गुप्तये। ताः पुनरापस्तस्य वृत्रस्य मेघस्य निण्यं निर्णामं येनाधो भीचैर्नमति तं प्रदेशं विजानन्ति इव। यवस्तेन प्रदेशेन विचरन्ति प्रचरन्ति निम्नानुसारिण्यो हि ताः। असावपि वृत्रस्ताासु भसरन्तीषु तत्प्रसरणनिरोधं चिकीर्षुः स्वशरीरविस्तृतया दीर्घं तमः। स हि तमः सतत्व एव धूमादिभ्रमवत्त्वात्। यावन्तं प्रदेशं निम्नमनुसरन्त्यो मेघस्य ताः क्षुण्णा भवन्ति निपिन्वन्त्यस्ततो बहुतरमधो वर्षते तदवष्टम्भया एवं दीर्घं तम आतत्य आशायदाशेत इत्यर्थः। कः पुनरेवमाशायत्। इन्द्रशत्रुः इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—दार्णिं शृणातेर्हिंसार्थस्य। हिंस्यते हि तत्। दार्ढीं दाधातेर्वा हिंसार्थस्य। दीर्घं दाशतेः वृद्ध्यर्थस्य। वृद्धं हि तद्भवति। तपस्तनोतेः। तेन हि

---

2. *m.* omits पत्तत् before सूक्तम् and reads शस्यते for शस्येते. *a. b. d.* add ते after तत्र and read यत् सूक्त for पत्तत् सूक्तम् 3. *b.* reads मेघोदरगतानाम्. 4. *a d.* अनिवेशमानानाम् for अनिवेशनानाम् 6. *m.* अस्थितानाम् for अवस्थितानाम् read by others. The reading of *m.* perhaps brings out the sense of काष्ठानां better; *m.* आढ्य for आढत्य, not good; *b.* आप· for आपः 7. *a, b, d* omit आपः; *a. d.* read मेघस्य वृत्रस्य. *b. m.* omit तस्य after आपः; *d.* यत्राधो for येनाधो and *m.* सः for तत् 9. *a. b. d. m.* प्रसरन्तीषु for प्रचरन्तीषु of *bi*; *a. b d. m* प्रसरण° for प्रचरण° of *bi*. 10. *a d.* तमः सन्तत्वः; *bi.* *m.* तमः सन्तत्व एव 11. *b d.* ता· क्षुण्णा; *m.* ता क्षिप्ता. *bi.* ता. क्षुण्णाः; *m.* निपिन्वन्त्यस्ततो for निपिन्वन्त्यस्ततो. 12 *a. d.* आढत्य; *m.* आर्ढ; *bi.* आढत्य. 13. *m* omits इति. 14. *a. d. m.* add एव after हिंसार्थस्य. 15. *a. d.* add हि after वृद्धम्.

5–7 दाधार्ढेर्.....दाधारेव गुप्तये। Durga appears to put a very tortuous construction on the words of Yāska here. This sentence is, however, the most unsatisfactory, and makes hardly any reasonable sense.

सर्वमेव ततं भवति । आ शपत् आदर्भूस्य शेतेः । इन्द्रशत्रुः इन्दोस्य शमयिता वा-इन्तेत्यर्थः शातयिता वा-इन्तेव । धातवन्यत्वमर्थैक्यम् ॥

इह मन्त्रे यत्र इत्येतच्छ्रुतं तदेतन्निगमानुप्रसक्तं विचार्यते इत्युपयुक्तस्तच्छब्दः । आह-को वृत्रः । उच्यते-मेघ इति नैरुक्ताः त्वाष्ट्रोसुर इत्यैतिहासिकाः । निरुक्तमधीयते विदुश्च ये ते नैरुक्ताः । आह-यदि मेघो वृत्रो य एष मन्त्रेषु संश्रुतः श्रूयते तत्र कः समाधिरिति । उच्यते-अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति । अपां च मेघोदरान्तर्गतानां ज्योतिषश्च वैद्युतस्योद्भूतवृत्तेर्मिश्रीभावकर्मणो वर्षकर्म जायते तेन हि वैद्युतेन ज्योतिषा वायुवेष्टितेन इन्द्राख्येनोपतप्यमाना आपः प्रस्यन्दन्ते-वर्षभावाय कल्पन्ते । तत्र एवं सत्युद्भूतेजसोरितरेतरप्रतिद्वन्द्वभूतयोरुपमार्थेन रूपकल्पनया युद्धवर्णा भवन्तीति युद्धे रूपकाणीत्यर्थः । न त्वत्र यथामूतं युद्धमस्ति न चेन्द्रस्य शत्रवः केचन सन्ति । मन्त्रोपि चैतस्मिन्नर्थेस्ति नेन्द्रस्य शत्रवः—

"यद्वंरस्त्वा वावृधानो बलंनेन्द्र प्रव्रवाणो जनेषु ।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न शु पुरा विवित्से ॥"

वामदेवपुत्रस्य बृहदुक्थस्यार्षम् । त्रिष्टुप् । व्यूढस्याष्टमेहनि निष्केवल्ये शस्यते । यद् अवरः त्वं नानाप्रकारं तन्वा वावृधानः-शरीरेण विप्रहवान् भूत्वा वावृधानः-

---

2. a. b. d. इन्तेव; m. इन्तेवः; bi. इन्ता वा. a. b. d. omit वा after शातयिता. 3. a. b. d. m. तदेव तन्निगमानुप्रसक्तं, bi. तदेतन्नैगमानुप्रसक्तम्. 4. a. d. add तत् before को. b. m. add इति after इत्यः. 5. bi. omits विद्युश्च ये ते after अधीयते read by a. b. d. m.; m. पशु for एष. bi. reads यत्र after मन्त्रेषु; a. d. omit it, m. reads तत्र instead. m. संग्रामः for संश्रुतः of bi. 6 a. b. d. तत्र तत्र for तत्र. 9. bi. अपताप्यमाना, a. b. d. अपतान्यमाना, m. अपतप्यमाना; m. प्रस्यन्दन्ते for प्रस्यन्दते of bi. 10. a. b. d. कल्पन्ते for कल्प्यन्ते of bi. 11. a. d. युद्धरूप° for युद्धे रूप°. 13. a. वृद्धवप्य° for वृद्धवप°.

---

6. श्रूयते-*Cf.* Ait. Br. XII. 9. The verses celebrating this are too many to refer to.

14. The quot. is RS. X. 54. 2.

पुनः पुनर्वर्धमानः। कथं पुनरवरः। बलानीन्द्र प्रब्रुवाणो जनेषु। बलानि-आत्मीयानि वीर्याणि हे इन्द्र प्रब्रुवाणः इव-प्रकथयन्निव। क। जनेषु। किं त्वं तथैव। न। मायेत्सा ते यानि युद्धान्याहुः। यानि युद्धान्याहुरैतिहासिका नानारूपाण्युपप्रदर्शयन्तः सा अपि च ते-तव माया इत् मायैव। किं कारणम्। नाय शत्रुस्तवास्ति प्रत्यनीकभूतः न नु पुरा-नापि पुरा कश्चिदासीत्। यावद्वीर्यं किंचित्-क्वचिदस्ति सर्वं तत्त्वमेव। "वीर्यं वै प्राणो वीर्यमिन्द्र इति ह विज्ञायते"। क ते शत्रुर्येन साकं युयोधिथ। एतत्त्वमपि विचिन्त्ये-वेत्त्येव न केवलमहमेवेत्यभिप्रायः। एवमेतस्मिन्मन्त्रे मायामात्रमेव युद्धमिति श्रूयते। विज्ञायते च "तदाहुर्नैतदस्ति यदेवासुरमिति"। तस्मात्साधूक्तम् अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति॥

अह-किं वृत्रवदेव युद्ध-रूपाणि भवन्ति। नेत्युच्यते-अहिवत्तु खलु मन्त्रवर्णो ब्राह्मणवादाश्च। तुशब्दः समुच्चयार्थो द्रष्टव्यः। वृत्रवच्चाहिवच्चेति मन्त्रवर्णो मन्त्र-

---

1 *b.* कथमूतम् for कथम्. after प्रब्रुवाण इव, *b*₁ does not read it. 2. *a.* adds प्रथयन्निव, *a b d. m.* प्रकथयन्निव, [*b m.* omit] अवधृतमस्तीत्यभिप्राय॰ 1, *a b d.* read यानि च यानि and *m* यानि च यु॰ for यानि यु॰ of *b*₁ इत्. 3. *a. b. d. m.* add after युद्धान्याह -माया सा तव ऐश्वर्ययोगात्तथा वान्यथा वा मघवन्। न ते तव निजरूपं एकं reads प्रावीर्य for प्राणो वीर्यं of all the Mss; *a. b. d. m.* कुतः for क of *b*₁.; *a.* 5. *d.* omits कश्चित्; *m.* reads वर्णम् for वीर्यं; *a. b.* omit तव. 6. *b*₁. *d.* युद्धचेषा for युयोधिथ. 7. *a b. d* add च after एतत् and omit एव after अहम्; *m.* अहंचैत्य॰ for अहमेवेत्य॰ of *b*₁; *a. b. d. m.* एतस्मिन्मन्त्रे मायामात्रमेव for एवमेतन्मन्त्रे मायात्वमेव of *b*₁ 8. *b. m.* तस्मादाह for तदाहुः. neither. 11. *a. b d. m.* युद्धरूपाणि for रूपाणि of *b*₁. 12. *a. d.* 9 *a d* read वर्षं and *b.* वर्षकर्म before जायते, Jîvânanda's edition has read वृत्रवद्, *m.* च, *b*₁. च, before समुच्चयार्थो; *a b d. m.* add मन्त्रलिङ्गानि after मन्त्रवर्णो; *b*₁. omits it.

---

6 विज्ञायते–Ait.–Br.!
8. विज्ञायते च!

लिङ्गानि ब्राह्मणवादाश्च शाखान्तरेषु भवन्ति तदप्युपेक्षितव्यम्। तस्मिन्नहिभाख्ये मेघे हते प्रसस्यन्दिरे प्रस्यन्दितवत्य आपः।

तदभिवादिनी एषगर्भवति। तदभिनादिन्येषा तस्यार्थस्याभिमुख्येन वादिनी एषा गर्भवति॥ १६॥

"दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार॥"

दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः। अहिरयनादेतयन्तरिक्षेयमपीतरोहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग्भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेर्वृत्रं जघन्वानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा। यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते॥ १७॥

दासपत्नीरहिगोपा अतिष्ठन्निति। दासपत्नीरापः। अहिगोपा मेघगोपा। अतिष्ठन्निपतवत्यो निरुद्धास्ता दासपत्नीरापः। यथा केनचित्पणिना वणिजा

---

1. *a. b. d. m.* शाखान्तरेषु. *bi.* शाखान्ते *a. b d. m* तस्मिन्नहिभाख्ये for तस्मिन्हते भाख्ये of *bi.* 2. *a. b. d. m* add प्रसस्यन्दितवत्यः after प्रसस्यन्दिरे, *b.* omits it. 3. *bi.* तदभिवादिनी एषा and omits the following up to गर्भवति in the next sentence. 14. *A. Bi.* conclude II. v. 3. after विज्ञायते. 15. *bi.* दासपत्नीति। अपां यद् बिलं निर्गमद्वारं for दासपत्नीरहिगोपा etc. to निर्गमद्वारम्.

---

6. The quot. is RS. I. 32. 11.

कस्मिंश्चिद्गुहान्तरे विक्रयार्थं गावो निरुद्धास्तिष्ठेयुरेव स्थितवत्यस्ताः पुनरेव निरुद्धाः सत्यतेन मेघेन। तासामपां बिलं निर्गमनद्वारमपिहितमासीत् तेन मेघेन तत् यदा इन्द्रस्तं वृत्रं मेघं जघन्वान् निर्जघानवान्हत्वा च अपव्रणवारणापावृतवान्। अथ तदा तस्मिन्निहतेपावृते च द्वारे ता आपः प्रसस्यन्दिरे वर्षभावेनेति समस्तार्थः।

अथैकपदनिरुक्तम्।-दासपत्नीर्दासाधिपत्न्यो। दासः कर्मकरस्तं हि ता अधिष्ठाय पान्ति रक्षन्ति। स हि कर्मणा श्रान्तस्तासु पीतासु विश्रान्त आप्यायितो भवति। विग्रहप्रसक्तं निरुच्यते-दासो दस्यतेः। स हि उपदासयति-उपक्षपयति कृष्यादीनि कर्माणि। अहिगोपाः अहिना गुप्ताः। अहिः कस्मात्। उच्यते-अयनात्। एति असौ अन्तरिक्षे। शब्दसामान्यान्निरुच्यते-अपमपीतरोहिः-सर्पः एतस्मादेव। असावपि हि एति। अथवा निर्हसितोपसर्गः स्यात्। कथम्। आदत्ते-असौ भोगेनेत्यादि। आङ्पूर्वस्य हन्तेः। स पुनरयमुपसर्गं निरस्य हसं कृत्वा अहिरुच्यते। पणिर्वणिग्भवति-इति पर्यायेण तत्त्वकथनम्। पणिः पणनात् पणति असौ व्यवहारं करोति। पर्यायप्रसक्तं निरुच्यते-वणिक् पण्यं वणिजो यद्द्रव्यं तत्पण्यं तदसौ नेनेक्ति-नित्यकालं शुचीकरोति मूल्यार्हं स्यादिति। बिलं मरं भवति बिभर्तेर्धातोः भृतं हि तद्दुदकादिभिः। वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा-इत्येषां धातूनामन्यतमस्य। ब्राह्मणमपि चैतस्मिन्नर्थे भवति-यदवृणोत् अन्तरिक्षमुदकं वा महत्त्वात् तद्वृत्रस्य वृत्रत्वमिति एवं ब्राह्मणेपि विज्ञायते विचार्यमाणे ह्यायते। अथवा यदवर्तत इन्द्रेण हतो वृत्रो मेघोपां बिलेपावृतेपो वृष्टिभावेनावर्तयत्प्रावर्तयत् तद्वृत्रस्य वृत्रत्वम्। अथवा यत् अवर्धत असावतिमात्रप्रमाणं तद्वृत्रस्य वृत्रत्वं स्यादिति ॥ १७ ॥

---

3. *a b d m.* मेघं वृत्र for वृत्रं मेघम्; *a b d. m* omit जघन्वान्; *d.* अहन्, *m.* अहनत्, *b.* अहत 4 *a. d* सस्यन्दिरे, *b. m* प्रसस्य°, *b* प्रस्य°. 8. *a. b d.* भवति, *c.* भवन्ति; *a. b d.* उपक्षपयति, *b* उपक्षयति. 12. *m* उपसर्गो for उपसर्गम्. 13. *b* omits निरुह्य 14 *b d.* पणति, *b* पणिति. 16. *a.* reads म्रियते for मृतम्. 17. *b. m.* इत्येतेषां for इत्येषाम्. 18. *b* ब्राह्मणोपि for ब्राह्मणेपि of *a b, d m.* 19. *b* विचार्यमाणो for विचार्यमाणे of *a b. d m*; *b. m.* add after यदवर्तत and before इन्द्रेण हतो, :-तद्वृत्रस्य वृत्रत्वमिति। स्वष्टा वज्रमपूर्वमेवेत्यनेनालक्ष्यमाण सोमो यस्मुरूपेणा [*m.* ण] वर्तत [*m.* ते] [*m.* अथवा] यदवर्तयत्।

रात्रिनामान्युत्तराणि त्रयोविंशतिः । रात्रिः करमात्प्ररमयति भूतानि नक्तंचारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयन्तेस्यामवश्यायाः ॥

उषोनामान्युत्तराणि षोडश । उषाः करमाद्वच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति ॥ १८ ॥

"काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति" इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्तमुक्तम् । प्रकृतमिदानीमुच्यते—**रात्रिनामान्युत्तराणि त्रयोविंशतिः** । रात्रेर्नामानि **रात्रिनामानि** । **उत्तराणि** इति प्रकृतेभ्यो दिङ्नामभ्यः । तमःसत्त्वा हि रात्रिरतस्य च तमसो दिक्षेवात्मलाभो भवत्यतो दिङ्नामभ्य उत्तराणि रात्रिनामानि । कियन्ति पुनस्तानि । **त्रयोविंशतिः** । त्रीणि च विंशतिश्च त्रयोविंशतिः । कतमानि पुनस्तानि । "श्यामा क्षपा शर्वरी"—इत्येवमादीनि । श्यामवर्णा हि रात्रिरिति श्यामा । स्वैः स्वैः कर्मभिरतनि क्षीणान्प्राणिन इयं स्वापेन पातीति क्षपा । अस्यां हि मुक्ताः पुनर्नवा इव प्राणिनः प्रातरुत्तिष्ठन्ति । शरणमस्यां स्वापार्थं क्रियत इति शर्वरी । इत्येवमादि सर्वत्र योज्यम् ।

आह—**रात्रिः करमादिति** । उच्यते—इयं आगच्छन्ती प्रकर्षेण रमयति । **भूतानि** कानि । **भूतानि नक्तंचारीणि**—पिशाचादीनि । तानि हि विगतेदनि राज्यामुपस्थितायां प्रायेण विहाररामय इति प्रकर्षेण रमन्ते । **उपरमयतीतराणि ध्रुवीकरोति** इतराण्यपि दिवाचारीणि तेनोपरमयति । तस्यां हि सुप्तोपस्थितायां दिवाचराणि भूतानि मनुष्यादीनि इतिकर्तव्यताभ्य उपरमन्ति । उपरम्य च स्थिरीभवन्ति निशायाम् । **रातेर्वा स्याद्दानकर्मणो**—दानार्थस्य । आह—किमस्यां प्रदीयते । उच्यते—**प्रदी-**

---

4. B. C. D. read षोडश for षोडश. 5. A. Bi. conclude II. vi. 1. after भवति 7. *b. m* add इदम् before नक्तम् 8. *a. d.* omit रात्रिनामानि. 9. *bi.* तम सतत्वा for तम सतस्या of *a. b d. m.* 11. *m.* omits त्रीणि च विंशतिश्च त्रयोविंशतिः. 12. *m.* श्यामवर्णानि for श्यामवर्णा हि. 16. *a. d.* नक्तंचराणि for नक्तंचारीणि; *a. d.* read तानिह for तानि हि

---

5. For काष्ठा इत्ये° etc. *Vide* Supra II. 15.

12. For श्यामा क्षपा etc. *Vide* Nigh. I. 7.

यन्तेस्यामवश्यायाः । अवश्यमायन्तीत्यवश्यायास्तुषारा इत्यर्थः । ते हि रात्रौ निपतन्ति ॥

उषोनामान्युत्तराणि षोडश । उषसो नामानि । रात्रेरेव ह्यपरः कालः उषआख्यो भवतीति रात्रिनामभ्य **उत्तराणि उषोनामानि ।** **कियन्ति पुनस्तानि ।** षोडश षट् च दश च षोडश । **कतमानि पुनस्तानि ।** "विभावरी सूनरी"-इत्येवमादीनि । विविधामियं भासं धृणोतीति विभावरी । शोभनं नराणामस्यामुत्थान भवतीति सूनरी । इत्येवमादि निर्वचनं योज्यम् ।

आह-**उषाः कस्मादिति** । उच्यते-**उच्छतीति सत्याः** । उच्छी विवासे । विवासयति ह्ीयं तमांसि तस्मादुच्छतीत्येवमस्या एतस्मिन्कर्मणि **सत्याः** कर्तरि कारके उषा इत्येतदभिधानं भवति । आह-का पुनरियमुषा इति । उच्यते-**रात्रेरपरः कालः** स उषा इत्युच्यते । आह-कथमेतदुच्यते रात्रेरपरः काल उषा इति । उच्यते-**तस्या उपसो रात्र्यपरकालत्वे एषा** निर्वाचिका **ऋग् भवति** ॥ १८ ॥

"इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥"

इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानम् । स्त्रीयोनिरमिगुत एनां गर्भः । तस्या एषापरा भवति ॥ १९ ॥

---

1. *a. d.* add विप्रुषः before तुषाराः. 5. *a. d.* omit षोडश after च 6. *d.* विविध for विविधा 8 *a d* omit इति after कस्मात्; *b m.* omit इति उच्यते 10. *b.* add भास after कारके 11. *a d* गम्यते for उच्यते, *b* adds स after कालः; *m.* पनत् for पनद् 12. *b.* राज्यपरकालत्व । एषा निर्वाचिका for the reading given above of *a. b. d m* 18. A. B. conclude II. vi. 2. after भवति

---

5. For विभावरी, सूनरी etc. *Vide* Nigh I. 8.

8. उच्छी-पा० पा०-प्यादि (216)

14. The quot. is Rs. I. 113. 1.

इदं श्रेष्ठमिति। आङ्गिरसस्य कुत्सस्येयमार्षम्। उत्तरा च। उभे अपि त्रिष्टुभावेते। प्रातरनुवाकाश्विनयोः शस्येते। इदम्-उपोल्लक्षणं ज्योति श्रेष्ठमादित्यादीनां ज्योतिषामिति निर्धारणे षष्ठी। आदित्यो हि तापकः प्रकाशकश्च। चन्द्रमा अप्यतिशीतः प्रकाशकश्च। इदं पुनर्नातिशीतं प्रकाशकं च। इत्येवमादित्यादीनामिदमेव श्रेष्ठम्। आगात्-आगमत्-आगच्छतीत्यर्थः। चित्रं-चायनीयं पूजनीयं वा श्रेष्ठत्वादेव। प्रकेतः-प्रकेतनं-प्रज्ञाततममज्जनिष्ट-जातमित्यर्थः। जातं सदागच्छति सर्वासु दिक्षु। विभ्वा-विभूततममिदमतिमहत्त्वाद्विभूततमं-विस्तीर्णतमामितराणि परिच्छिन्नतराणि ज्योतींष्यपेक्ष्य। किं च यथा प्रसूता प्रकर्षेण सूता प्रसवमनुप्राप्ता। सूतिशब्दः प्रसवार्थः। रात्रिः सवितुः-आदित्यस्य सवाय-प्रसवाय-आदित्योत्पत्तौ देशे जायते। एवमेव रात्री रात्रिरपसो जन्मार्थं योनिं स्थानमवकाशमुषस आत्मलाभाय आरैक्-अरिचत्-आरेचयति-ददातीत्यर्थः। यथोषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वादेवं रात्रिरपसो जन्मनो हेतुः। इत्येवमस्यामृचि गत्रेरेवापरः काल उषःसंज्ञित इति गम्यते। स्थानं योनिशब्देनोच्यते। यद्धि यस्मिन्निर्धीयते तत्तेन साकं युतं भवति मिश्रीभूतमित्यर्थः। इयमपीतरा-स्त्रीयोनिः एतस्मादेव। किं कारणम् अभियुतो हि गर्भ एनां भवति-आमिश्रीभूत इत्यर्थः। पूर्वत्र-"अयमपीतरो योनिः एतस्मादेव। परियुतो भवति"

---

1. *m.* reads आङ्गिरस° for आङ्गिरसस्य, and omits उत्तरा च 2. *b.* adds शस्यते: before शस्येते. *m.* reads शस्यते, *a d.* add च after इदम् 3. *a.* omits प्रकाशक. to नातिशीतम्; *b. d m.* add and *a. b.* omit च after first प्रकाशकः and *a. d m.* अप्यतिशीतः for अथ निशीतः of *b.* 5. *a. b. d. m.* omit आगमत् 6. *a b. d m.* add दर्शनीयम् after पूजनीयम् and omit प्रकेत; *a. b. d. m.* add प्रकाशतमम् after प्रज्ञाततमम्; *m.* जात सत् for जातं सत्. 8 *m.* प्रसूता for सूता. 9. *a. b d m.* omit सवितुः; *a b d. m.* omit सवाय. 10 *a. b. d. m* omit रात्री. *b d. m* add अपि after उषस. 11. *a.* उषस लामाय, *b.* उषसः आत्मलामाय, *d. m.* उषस आत्मलामाय, *bi.* उषसे आत्मला°; *a. b. d. m.* omit अरिचत्. 13 *bi* रात्रेरेव वापरः for रात्रेरेवापरः of *a. b. d. m*; *b.* उषःसंज्ञ for उष संज्ञित.. 14. *a. d.* निधीयते, *bi.* विधीयते, *b. m.* धीयते. 15. *a. d.* omit from स्त्रीयोनि to परियुतो भवति.

---

9. सवाय-For the gr. &c. *Cf.* सायणाचार्य on the verse. (उषाय, रात्री).

16. पूर्वत्र-*Vide* Supra II. 8.

इति पारियवनक्रियासामान्येन निरुक्तो योनिशब्दः । इह पुनः अभियुत एनां गर्भ इति मिथीभावसामान्येन । उभयलिङ्गत्व वास्योपदर्शितम्-इह स्त्रीलिङ्गं तत्र पुलिङ्गमिति । तस्या उषस एषा अपरा ऋग् भवति-अस्यैवार्थस्य दृढतायै रात्रेरपरः काल उषा उच्यत इति ॥ १९ ॥

"रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥"

रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः । सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा । रुशती श्वेत्यागात् । श्वेत्या श्वेततेरश्विवत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः । कृष्णं कृष्यतेर्निकृष्टो वर्णः । अथैने संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची अनूच्यावितीतरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे ॥

अहर्नामान्युत्तराणि द्वादश । अहः कस्माद्वपाहरन्त्यस्मिन्कर्माणि । तस्यैष निपातो भवति वैश्वानरीयायामृचि ॥ २० ॥

रुशद्वत्सेति । रुशद्वत्सा रोचिष्णुवत्सा । सूर्यो हि रोचिष्णुस्तं सूर्यमस्या वत्समाह मन्त्रदृक् । साहचर्यात् । सूर्यसहचरो हि वत्सो भवति । अयमपि चानयो-

---

1. *m.* omits इह, *a.* अभियुत for अभियुतः. 2. *m* °पदर्शियितुम् for °पदर्शितम् 11 B. C. D R. *m* add अनूच्यौ after अनूची Bi omits it. *Durga* also takes no notice of it. 12 B, C. D R *m*, add सह after तया, Bi. omits it 13 B C. D. R. *m*. add आमिन्वाने after आमिनाने; Bi. omits it. 15 A Bi. conclude II. vi. 3. after ऋचि 16. *a* omits रुशद्वत्सेति, *a. b. d m*, omit सूर्यम् 17. *b*. omits हि before वत्सो

---

6 The quot. is Rs. I. 113. 2.

यसा सह चरतीत्येतस्मात्सामान्याद्वत्सा उच्यते । रसहरणाद्वा । यया हि मातुरूधसः क्षीराख्यस्य रसस्यादर्ता भवति वत्स एवमेतोप्योषधिकानामवयवायाह्यानां रसानामादर्ता भवति रश्मिभिरित्येतस्मात्सामान्याद्वत्सत्वम् । रुशती-रोचनशीलात्मनापि । श्वेत्या श्वेततेर्धातोः । श्वेतो वर्ण एतस्यां सा श्वेत्या-श्वेतवर्णेत्यर्थः । या चैवलक्षणा उषाः-सा आगादागच्छति । आगतायाञ्च तस्याः आरैक्करिचदारेचयति । कृष्णा-कृष्णवर्णा रात्रिः । किमारेचयति । सदनानि-स्थानानि । अस्या उषसः । येष्वियमुषाः स्थानेष्वागता सत्यासीदनि तान्यारेचयति रात्रिः । एवं तावदयमर्धर्चो रात्र्युषसोर्विभक्तस्तुतिः । अथ अनेनोत्तरार्धर्चेन पने रात्र्युषसी संस्तौति । समानयन्धू एते रात्र्युषसी समानयन्धने समानमनयोर्बन्धनम् । आदित्यस्येयं वस्तमयं प्रति रात्रिर्वेद्वा-संश्लिष्योदयं प्रत्युषाः । एवं समानयन्धू । अमुते-अमरणधर्माणौ ; न हि रात्र्युषसौ म्रियेते । अनूची इतीतरेतरमभिप्रेत्य । इतरेतरं संश्लिष्टे स्तेते । द्यावा वर्णं चरतः । ते एव रात्र्युषसौ द्यावौ द्योतनाद्युषा हि स्वेन प्रकाशेन द्योतते रात्रिरपि स्वेन तमोवीर्येण नक्षत्रगणेन वा स्वमधिकारं प्रति द्योतते । एवं हि द्यावेति द्विवचनम् । अपि वा तृतीयान्तमेकवचनमेतत्स्यात् । द्यौलया द्यावा । " सहयुक्ते " तया सह स्पर्धमाने चरतो-गच्छतः । कथं पुनरेतः । आमिनाने । आङ् अभ्यर्थे । उषा अपि रात्रेरधि आत्मानं निर्मिमीते रात्रि-

---

1. *m* सहचरीति for सहचरतीति; *a. d* add इति after वत्सः. 2 *a d* read क्षीराख्यसहयाह्यानां, *m.* क्षीराख्यस्य सस्य ह्यानां. 3 *a. d* read रोचनशीला 4. *a. d* read श्वितोवर्णं श्वेतया श्वेतवर्णे स्यर्थे, *b.* श्वेतोवर्णं इत्यस्या सा श्वेत्या श्वेत्यवर्णेत्यर्थः, *m.* श्वेतोवर्णा एतस्या असौ श्वेत्या श्वेतवर्णेत्यर्थे, *bi.* श्वेतोवर्णं एत्यस्या श्वेतवर्णेत्यर्थः 5-6. *a d.* add अपि after तस्याः; *a. b d. m* omit मरिष्णू and कृष्णा. 7. *a, d.* read येष्वेव for येष्वियं. 8. *a b. d. m* read उत्तरेणार्धर्चेन for उत्तरार्धर्चेन of *bi.*; *a. d.* omit एने, *b. m.* read एते. 11. *m.* इतीतरेऽभिप्रेत्य ; *a. b., d, m.* read इतरेतरसंश्लिष्टे. 12. *d.* द्यौमे for द्यौते; *m.* एवं for एव. 13. *b, m.* स्वं स्वमधिकारं प्रति 14 *a, b d. m* अपरा for अपिवा. 15–16. *a. d. m.* add च after कथम् 16. *b. m* add वर्णं रूपं before आमिनाने, *j.* adds after अभ्यर्थे the reference in Nir. V. 7.

---

15. For 'सहयुक्ते' *Vide* Pân. II. 3. 19.

16. For आङ् अभ्यर्थे *Vide* Nir. V. 7. *infra* तोरस्येव वरुत्र मा मदस्व । वृत्रस्येव वरुत्रेति मद्रन्. इति.

रप्युपसः इतरेतरसंश्लिष्टे द्वीमे राज्युषसौ । तस्मादेवमुच्यते-अन्योन्यस्याघातं कुर्वाणे इति ॥

उषःशब्दतत्त्वावधारणार्थं प्रपञ्चार्थेतौ मन्त्रावुपवर्णितौ । प्रकृतमिदानीमुच्यते-अहर्नामान्युत्तराणि द्वादश । अहो नामानि अहर्नामानि । उत्तराणि प्रकृतेभ्य उषोनामभ्यः । उषस एवानन्तरमहर्भवति तस्मादुषोनामभ्य उत्तराण्यहर्नामानि । कियन्ति पुनस्तानि । द्वादश । द्वे च दश च द्वादश । कानि पुनस्तानि ।" वस्तोः शुः भानुः"-इत्येवमादीनि । वस्ते ज्योतिरेतदिति वस्तोरित्युच्यते । यथैव हि शुक्लं मन्त्रे तथैवेह समाम्नातम् । शुः-द्योतते ह्येतत् ज्योतिषा । भानुः--भासते ह्येतत् ज्योतिषेत्येवमादि योज्यम् ।

आह--अहः करणात् । उच्यते-उपाहरन्त्यस्मिन्कर्माणि न हि तया राज्या वतुतिष्ठन्ति कर्माणि कर्मकरा यस्मादहनि । तस्य-अहः पद निपातो भवति मैघण्डुकहृत्या वैश्वानरीयायां-वैश्वानरदेवतायामृचि-॥ २० ॥

" अहंश्च कृष्णमहरर्जुनं च विवर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि ॥"

अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनं विवर्तेते रजसी वेद्याभिर्वेदितव्याभिः मन्त्रसिभिर्वैश्वानरो जायमान इवोद्यन्नादित्यः सर्वेषां ज्योतिषां राजावाहन्नग्निर्ज्योतिषा तमांसि ॥

मैघलायान्युत्तराणि त्रिंशत् । मेघः करणान्मेहतीति सतः । या उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिः । उपर

1. *b.* reads उच्येते for उच्यते 2. *b. m.* omit इति alter कुर्वाणे. 3. *m.* °पचारणार्थं. 4. *m. om.* प्रकृतेभ्य . 6. *d* भानु for भानुः; *m.* द्योतन for द्योतत्. 10. *b m.* omit अहः 11 *m.* निपाता भवन्ति. 16. *b.* notes variant as मद्धिमि- 18. *Bi* notes variant as मेहयतीति

7 For वस्तो etc. *Vide* Nigh. I 9.

14. The quot. is Rs. VI. 9, 1.

उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा तेषामेषा भवति ॥ २१ ॥

अहःशब्दो हि रात्रिमहश्चोभयमभिधत्ते अतः संदेहपदम् ॥ तस्यैष विभागोऽस्या-मृच्युपदविशेषात्प्रदर्श्यते-अहश्च कृष्णमिति । भरद्वाजस्येयमार्षम् । त्रिष्टुप् । पृष्ठ्यस्य षष्ठेऽहन्यग्निमारुते शस्त्रे शस्यते । अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जु-नम् । अर्जुनशब्दो हि शुक्लपर्यायः । विवर्तेते विपर्ययेण वर्तेते । रात्रिरतीता अहरायातम् । अहरतीतं रात्रिरायाता इत्येवम् । रजसी-रञ्जके । ज्योतिषा हि भूता-न्यहो रञ्जयति तमसा रात्रिः । वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिः न हि तासां प्रवृत्तीनामन्तोऽस्ति अहनि च रात्रौ च प्राणिनामतस्ता वेदितव्या एव भवन्ति बहु-त्वात् । न हि विदिता नाम ताः कदाचित् । किं च वैश्वानरोऽग्निरवातिरद्-धाहन्नपहन्ति स्वेन ज्योतिषा तमांसि । कथं पुनरपहन्ति । जायमानो न राजा-जायमान इव उदन्सर्वेषां-सर्वभूतानां राजा आदित्यः । यथा ह्युदयमादित्यस्तमास्यपहन्ति दिवा एवमग्निरपि रात्रावपहन्तीत्यग्निरादित्येन तमउपघातं प्रत्युपमीयते ॥

मेघनामान्युत्तराणि ब्रिंशत् । मेघानां नामानि मेघनामानि तानि उत्तराणि प्रकृतेभ्योऽहर्नामभ्यः । मेघा ह्यहनि च रात्रौ चाविशेषेण भवन्त्यतो रात्र्यहर्नामभ्य उत्तराणि मेघनामानि । कतमानि पुनस्तानि । 'अद्रिः ग्रावा गोत्रः'-इत्येवमादीनि ।

---

2. A. Bi. conclude II. vi. 4. after भवति. 4. *bi.* प्रदर्श्यन्ते for प्रदर्श्यते of *a. b. d. m.* 5. *bi.* reads पृष्ठस्य for पृष्ठ्यस्य of *a. d. m.* 6. *a. d.* विवर्तेते and वर्तेते, *m.* वर्तेते, for विवर्तेते and वर्तेते of *bi.* 9. *bi.* प्राणिनामन्तस्ता for प्राणिनामतस्ता of *a. b. d. m*; *m.* omits पव after वेदितव्या. 10. *bi.* विदितानामन्ताः, *a. b. d.* न हि विदिता [ना *b. d. m.*] मताः (ता *m.*) कदाचित्. 10-11. *a. b. d.* omit अवातिरत् and *a.* reads व्यपाहरत् for अवाहन्, *m.* reads अपाहरत् अपहरन्ति for अवातिरत् अवाहन् अपहन्ति; *j.* adds one more न after जायमानो. 12. *a. b. d. m.* add इव after उद्यन् and omit सर्वेषां. 13. *a. d.* read यथाम्युदयन्नादित्यः; *a. b. d. m.* तमोपघातं for तमउप°. 15. *a. b. d. m.* read मेघनामानि omitted by *bi.* after मेघानां नामानि; *a. b.* omit तानि. 16. *a b. d. m.* add च after अहनि; *bi.* चारोषेण for चाविशेषेण of *a. b. d. m.*; *a. d.* रात्र्युषोहर्नामभ्य°.

---

17. For अद्रिः ग्रावा etc. *Vide* Nigh. I. 10.

आदिरादरयितव्यो भवति ह्रसावुदकार्थमित्यद्रिः । आवा गृणातेर्वा गृह्णातेर्वा । गृणात्यसौ शब्दं करोति गृहीतं चोदकमनेनेति । गौर्वागत्रेति गोत्रः इत्येवमाचार्यव्यूहितव्यम् । पर्वतनामत्वेपि यथासंभवं योज्यम् ।

आह-मेघः कस्मात् । उच्यते-मेहतीति सत्यसौ । एवं कर्तरि कारके सतः अस्येतदभिधानं भवति मेघ इति । तेषां मेघनाम्नाम् आ उपर उपल इत्येताभ्यां प्रागुपर उपल इत्येताभ्यां यानि नामानि तानि साधारणानि पर्वतनामभिः । तदेषां प्रकरणोपपदाभ्यां विशेषोवधार्यः । आ उपर इत्येतस्मात्-इति वक्तव्ये आ उपर उपल इत्येताभ्यामित्युक्तम् । उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन् निरुक्ते निरुक्तौ भविष्यत इति रलोश्चाविशेषख्यापनार्थम् । उपर उपलो मेघो भवति उपर इति च उपल इति च मेघ उक्तो भवति । उपरशब्दादारभ्य मेघनामान्येव न पर्वतनामानि ॥

आह-उपरः कस्मात् । उच्यते-उपगम्य रमन्ते अस्मिन्नप्राणि । अथवा । उपगम्य रता आपो भवन्तीति । उपलोप्येतस्मादेव रलोरविशेषेण ॥

---

1. *a. b. d. m.* आदारयितव्यो for आदरयित° of *b1*; *d.* ह्रसौ भवति. 2. *a d. m* वा for च after गृहीत, *a. b. d.* add आवा after अनेनेति; *a. d. m.* गौर्वागत्रेति गोत्र, *b1.* गोत्र· गोर्वागत्र. 4. *b. d m.* omit इति after मेहति 5. *a. b. d. m.* add मेघ इति after भवति, *b1.* omits it. 6. *a. b. d. m.* omit एताभ्यां, *a. b. d. m.* read साधारणानि तानि 8. *m* omits इति after एताभ्याम्, *b1.* reads इत्येताभ्यां युक्तम्. We read with *a. b. d* 9-10. *a.* omits उपर उपलो etc. to मेघ उक्तो भवति. 10. *d.* omits च after उपर इति. 12 *a. b d. m* उपगम्य उपगम्य. 13. *a. b d. m* add अस्मिन् after उपगम्य; *a d m.* add उपरः after भवन्तीति, *d* omits इति after भवन्ति.

---

9. रलोश्चाविशेषख्यापनार्थम्'—देवराजयज्वा in his comm. on Nigh I. 10. thus quotes Skanda-Swâmi on this text:-आ उपर उपल इति । आङ् अभिविधौ मर्यादायामित्यर्थे विना उपर उपल इत्येताभ्यां साधारणानीत्यर्थः । आ उपरादिति वक्तव्ये उभयोरुपादानं रलयोरविशेषप्रदर्शनार्थम्। तयोरेवनिर्वचनत्वप्रदर्शनार्थमेकयोगपक्षत्वं चाङ्गीकृत्याह उपर उपलो मेघो भवति ।

आह-कथं पुनर्गम्यते उपरशब्देन मेघ एवोच्यते न पर्वत इति । उच्यते-तेषां मेघानामुपरशब्दवाच्यत्वे विशेषलिङ्गवाचिका एषा ऋक् भवति ॥ २१ ॥

"देवानां मानें प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन्।
त्रयस्तपन्ति पृथिवीमनूपा द्वा वृबूकं वहतः पुरीषम् ॥"

देवानां निर्माणे प्रथमा अतिष्ठन्माध्यमका देवगणाः । प्रथम इति मुख्यनाम प्रतमो भवति । कृन्तत्रमन्तरिक्षं विकर्तनं मेघानाम्। विकर्तनेन मेघानामुदकं जायते । त्रयस्तपन्ति पृथिवीमनूपाः । पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुवपन्ति लोकान्स्वेन स्वेन कर्मणा। अयमपीतरोनूप एतस्मादेवानूप्यत उदकेनापि चान्वाविति स्याद्यथा प्रागिति । तस्यानूप इति स्याद्यथा प्राचीनमिति। द्वा वृबूकं वहतः पुरीषम्। वायुादित्या उदकम्। वृबूकमित्युदकनाम प्रवतेर्वा शब्दकर्मणो भंशतेर्वा। पुरीषं पृणातेः पूरयतेर्वा ॥ २२ ॥

---

1. *m* उपरशब्दो for उपरशब्देन; *a d.* omit इति after पर्वतः. 5. A. B. C. D. read माध्यमका. R. Bi. माध्यमिका. We read with all our mss. which are unanimous here Sâyaṇâchârya reads the word as माध्यमिका. 6. A. reads प्रथमो for प्रतमो. Bi. omits कृन्तत्रमन्तरिक्षं विकर्तनं मेघाना after प्रतमो भवति. Durga takes no note of it. Yet we read it, as the mss. and R. are unanimous. 12. Bi. notes variant as प्रवतेः शब्दकर्मणो. A. Bi. conclude II. vi. 5. after पूरयतेर्वा.

---

1. न पर्वत इतिः-देवराजयज्वा in his commentary on Nigh I. 10. remarks that the word उपर may be met with in the sense of पर्वत and supports his statement by RS. I. 167. 3. where the word उपरा is explained by अस्माच्छिला दीर्णा. by Mâdhava He also quotes Mâdhava for another derivation of the word :—उपरो जलवापनादिति माधवः । यथे. कृदरादित्वात् अरन् द्रष्टव्यः सम्प्रसारणे च बाहुलकात् । उपरमिव हि नमस्यप्रे भूमौ पर्वतमेति माधवः.

4. The quot. is RS. X. 27. 23.

देवानां यान इति । वसुक्रस्येन्द्रपुत्रस्येयमार्षम् । त्रिष्टुप् । महाव्रते मरुत्वतीये शस्यते । देवानां दानादिगुणयुक्तानां याने विमाने निर्माणे । यदा देवाः षष्ठाः प्रजापतिना तदेत एव माध्यमका देवगणाः प्रथमा अतिषुन्नेतेपि हि दानादियोगा-देवा उच्यन्ते । प्रथमाः प्रतमाः प्रकृष्टतमा मुख्या इत्यर्थः । मेघाभावे हि सर्वमेवेदं जगद्वर्षाभावान्न स्यात् । तस्मादेत एव प्रकृष्टतमा अतिष्ठन् स्थितवन्तः । षष्ठो हि सर्वदेवानामेत एवाग्रे षष्ठा इत्यभिप्रायः । किं च कृन्तत्रात् उत्कृत्तात् प्रदेशादेषां मेघानामिन्देव उपरा आप उदायन् आगतवत्य आगच्छन्ति च । किं कारणम् । विकर्तनेनैव हि मेघानामुदकं जायते । उपरशब्देनात्रोदकमुक्तम् । तास्थ्यात्तच्छब्दो मञ्चाः क्रोशन्त इतिवत् । उपरेषु मेघेषु या आपः ता उपचारादुपरा इत्युच्यन्ते । किं च यदा ताभिः उपराभिरद्भिरोषधयः प्रोक्षिता भवन्त्यथ तदा त्रयस्तपन्ति । त्रयः पर्जन्यादयः तपन्ति । पृथिवीं पृथ्वीलोकम् । अनूपास्ते अनुवपन्ति लोकास्तेन तेन कर्मणा यथाकालमनुगृह्णन्ति । एतदनुवपनं लोकानां यद्वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति । किं च द्वा वृकं वहतुः पुरीषम् । द्वौ वायुादित्यौ वहत आक्षिपत इतः पृथिवीलोकाद्वृकमुदकम् । किंलक्षणम् । पुरीषं प्रीणयित्रं पूरयित्रं वा ।

---

1 *a d* इन्द्रस्य for इन्द्रपुत्रस्य; *a. d.* omit मरुत्वतीये. 2. *a d.* omit विमाने. 3 *a b. d. m* read माध्यमका, *b.* माध्यमिका, *b.* reads एतेन for एतेपि. 4. *b.* omits प्रतमाः after प्रथमाः, read by *a. b. d. m* 5. *d.* अवस्थितवन्तः for स्थितवन्तः. 6. *a.* प्रदेशादुत्कृन्तात्, *b.* उत्कृतात्प्रदेशात्, *m.* उत्कृष्टात्प्रदेशात्, *d.* प्रदेशादुत्कृत्तात्, *h.* उत्कृन्तात्प्रदेशात्. We accept the reading of *d.* as it is correct. 7. *a. d.* read आगता for आगतवत्यः. 8. *a. d.* omit एव हि before मेघानाम् and read उपरशब्देन for उपरशब्देन, *a. b. d. m.* read तास्थ्यात् तच्छब्द् [तास्थ्यच्च *d*] मंचक्रोशनवत्, [क्रोशन्त इतिवत् *d.*] 10. *a. d.* read पुरोहिता for प्रोक्षिता and अय for अस्य of *b*. 11. *d.* omits पृथ्वीलोकम् and reads लोकम् instead. 13. *b. m.* omit द्वौ. 15. *j.* omits पूरयित्र after प्रीणयित्र read by all others; *b* and *j* add अत्· after वा; *a. d.* do not read अत ; *b. m.* read अत· for अतः and join it with the next.

14–15. Durga appears to read the *Nirukta* text as प्रीणातेर्वा पूरयतेर्वा ।

अयमपीतरोनूपो नद्यनूपः समुद्रानूपो वा । एतस्मादेव वपतेर्यातोरप्यर्षि अनूप्यतेनुप्रकीर्यते नित्यकाल्मुदकेन । अपि वा एवमन्यथा स्यात्-आप्नोतेः । अन्वाप्यतेसाउदकेनेति अन्वाप् । यथा-पुरस्तादवतीति प्राक् । तस्य अन्वाप्नित्येतस्य सतः अनूप इति एष शब्दः स्यात् यथा प्राचीनमिति प्राग्गित्येवं गतः प्राचीनम् । वृवूकमिति उदकनाम इति । पर्यायवचनेन तत्त्वाभिधानम् । अवीतेर्वा शब्दार्थस्य शब्दकर्मा हि तद्भवति । भ्रंशतेर्वा । भ्रंशति हि तन्मेघादिति ॥ २२ ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत् । वाक् कस्माद्वचेः । तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति तद्देवतावदुपरिष्टात्तद्व्याख्यास्यामः । अथैतन्नदीवत् ॥ २३ ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत् । मेघनामप्रयुक्तो देवानां मानें-इत्येष मन्त्रो व्याख्यातः । प्रकृतमिदानीमुच्यते-वाङ्नामानीति । वाचो नामानि वाङ्नामानि । उत्तराणि प्रकृतेभ्यो मेघनामभ्यः । मेघेष्वेव हि भूयसी वाग्भवति इति मेघनामभ्य उत्तराणि वाङ्नामानि भवन्ति । क्रियन्ति पुनस्तानि । सप्तपञ्चाशत् । सप्त च पञ्चाशच्च सप्तपञ्चाशत् । कानि पुनस्तानि । 'श्लोकः घोष इळा'-इत्येवमादीनि । श्रूयते इति श्लोकः । क्रियते तं तमर्थमवधारयितुमिति घोषा । तं तमर्थं प्रति इष्टे गच्छतीति इळा । इत्येवमाद्यभ्यूहितव्यम् ।

---

1. *a. b. d.* omit अनूप. after इत्: 2 *d* omits हि after अपि; *a. d.* read प्रकीर्यते for अनुप्रकीर्यते; *b. m.* read अपिच for अपिवा 3. *b.* reads इत्युक्तत्वात् for इति अन्वाप्; *a. d.* add यथा before पुरस्तात्, *bi.* does not read it. 4. *a. d.* read एव for एष; *b.* reads तथा for यथा and एव for एष before सतः 8 *B.* reads वक्तेः for वचेः of all others Bi notices this as variant of two of his mss. 10. *A. Bi* conclude II. vii. 1. after नदीवत्. 11. *a. d.* °प्रसक्तो, *bi.* °प्रसक्तौ 12. *d.* omits वाङ्नामानि after नामानि. 14. *bi.* ततो for मेघनामभ्य उत्तराणि of *a. b. d. m.*; *a. b. d. m* omit सप्त च पञ्चाशच्च सप्तपञ्चाशत् । 15. *bi.* कतमानि for कानि of *a b. d. m*; *a. d.* read इला, *b. m.* इळा. 16. *b. d.* add इयं before इष्टे.

---

10. व्याख्यास्यामः, *i. e.*, in Nir. XI. 26–27.

15. For श्लोकः घोषा etc. *vide* Nigh. I. 11.

आह-वाक् कस्मात् । उच्यते-वचेर्धातोः । उच्यतेनयेति वाक् । तत्र सरस्वतीत्येतस्य तत्र तस्मिन्सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम्नो नदीवद् देवतावच्च निगमा भवन्ति नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः । तत्-तत्रैवं सति यदभिधानं देवतावत् तदधिकृत्य उपरिष्टाद् व्याख्यास्यामः षोडशेऽध्याये

"पावका नः सरस्वती"—

इत्येतस्मिन् मन्त्रे । अथ पुनर्यत् एतत् नदीवत् तदाख्यायते—॥ २३ ॥

"इयं शुष्मेभिर्बिसखा इवारुजत्सानुं गिरीणां तविषेभिरूर्मिभिः ।
पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः ॥"

इयं शुष्मैः शोषणैः शुष्ममिति बलनाम शोषयतीति सतो बिसं बिस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा सानु समुच्छ्रितं भवति समुच्छ्रयणाद्वा मद्भिरूर्मिभिः पारावतघ्नीं पारावाप्यातिनीं पारं परं भवत्यवारमवरमवनाय सुप्रवृत्ताभिः शोभनाभिः स्तुतिभिः सरस्वतीं नदीं कर्मभिः परिचरेम ॥

उदकनामान्युत्तराण्येकशतम् । उदकं कस्मादुनत्तीति सतः ॥

---

2. *b* नाम for नाम्न of *a b d m*. 4. *a. b. d.* omit तत् 7. *a. d* अथ पुनर्यच्च नदीवत्, *b.* अथ पुनर्यन्नदीवत् 10 B. reads शुष्मेभिः for शुष्मैः of all our mss. Bi notes this variant in the foot-note. 13. B. C D. R *m* read शोभनाभि before स्तुतिभिः; A Bi omit it; so also Bi omits नदीं after सरस्वतीं read by all others Should सुप्रवृत्ताभिः be सुप्रावृताभिः? B. notes this variant in a foot-note and is supported by two mss. of दुर्गवृत्ति below. 15 Bi reads वनन्तीति for वनतीति of all others.

---

7. तस्मिन्मन्त्रे-*vide* Nir XI. 26, 27. (RS. I. 3, 10.)

9. The quot. is RS. VI. 61. 2.

नदीनामान्युत्तराणि सप्तविंशत्। नद्यः कस्मान्नदना इमा भवन्ति शब्दवत्यः। बहुलमासां नैघण्टुकं वृत्तमाश्चर्यमिव प्राधान्येन। तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव। विश्वामित्रः सर्वमित्रः सर्वं संवृतं सुदाः कल्याणदानः पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः स्पर्धनीयजवो वाभिश्रीभावगतिर्वा। स वित्तं गृहीत्वा विपाट्छुतुद्र्योः संभेदमाययावनुययुरितरे। स विश्वामित्रो नदीस्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत्तद्यद्विवट्परिष्टात्तद्व्याख्यास्यामोथैतद्बहुवत्॥ २४॥

इयं शुष्मेभिरिति। भरद्वाजस्यार्षम् जगती। इयं-सरस्वती नदी शुष्मेभिः-बलैः। किं करोति। विसृजा इवारुजत् यथा विसृजानको विसमनादरेणैव मृदुत्वात्सनत्येवमियमनादरेणैव यदपि सानु भवति समुच्छ्रितं पक्वसंघातकल्पं गिरीणां सानु-शिखरं तदपि तविषेभिर्महद्भिरूर्मिभिर्विसृजानक इवानादरेणैव रुजतिभनक्तीत्यर्थः। येयमेवंगुणविशिष्टा तामेता वयं पारावतघ्नीं-पारावारघातिनीम्। सा हि ऊर्मिभिः पारं पावारं च उभे अपि हन्ति। अवसे-अवनाय-रक्षणायात्मनः। कथं नाम रक्षेदसावस्मानित्येवमर्थं पुरस्कृत्य सुवृक्तिभिः-सुप्रवृत्ताभिः स्तुतिभिः स्वरूपोक्तिविमुक्ताभिः। किं सरस्वतीमाविवासेम धीतिभिः सरस्वतीमाभिमुख्येनावस्थिताः परिचरेम धीतिभिः-कर्मभिः-स्तुतिभिर्वानेकप्रकाराभिरित्यर्थः। एष समस्तार्थः।

---

1. Bi. omits इमा after नदना read by all others. 8 A. Bi conclude II. vii 2. after बहुवत्. 9. *b. m.* add after जगती, :-[छन्दः *m.*] पूर्वतः षड्जे चतुर्थेऽनि मध्यमवृषे विनियुक्तेयम्. 11. *d.* समुच्छ्रितं for समुच्छ्रितं of all others. 12. *a b. d. m.* omit सानु and *a. d. m.* add महद्भिरूर्मिभिः after तविषेभिः omitted by *b.* 14. *d* सह for सा हि; *m.* पावरं for पावारं and *a. d.* omit च after पावारं. 15 *a. b. d. m.* इत्येतदर्थं; *a. b. d. m* all सुप्रवृत्ताभिः after सुप्रोक्ताभिः. 16–17. *m* आनिमुक्तेन संस्थिताः; *a. b. d. m.* omit च before इत्यर्थः.

---

8. व्याख्यास्याम, *i. e.*, in Nir. IX. 39.

अथैकपदनिरुक्तम्।—शुष्मामिति बलनाम तद्धि शोषयतीति सतः। सत इति कारकावधारणम्। विपर्ययेणापि ह्यभिधानानामर्थो भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि सदेतदभिधानमेवमाह शुष्मामिति बलनामेति। मिसं विस्यते-र्भेदसकर्मणस्तद्धि मिद्यते। वृद्धिकर्मणो वा वर्धते हि तत्। सानु समुस्तं हि तत् उच्छ्रितं भवति समुच्छ्रयमिति वा। अथवा समस्तमूर्ध्वं नुन्नं प्रेरितं भवति। पारं परं भवति, अवरस्मात् कूलात् आवारम् अपरम् भवति परस्मात् कूलात्।

अस्यामृचि तविषेभिरूर्मिभिः पारावतघ्नीमित्येतद्विशेष्यलिङ्गं नदीसत्त्वं पश्यता भाष्यकारेण अथैतन्नदीवत्-इत्युक्त्वेयमृगुपात्ता सरस्वतीशब्दस्य नद्यभिधायकत्वे। इयं पुनर्मैत्रायणीयके

उतस्यानः सरस्वती—

इत्यस्य षडर्चस्योत्तमा। एतच्च पुनः षडर्चानुक्रमेण पञ्चानुक्रमेण च

"सारस्वतीं धेनुटरीमालभेत यः क्षेत्रे पशुषु वा विवदेत"—

---

3. *m.* अभिधानमेवाह. 4. *d.* तद्विभिद्यते 5. *a. d* read उच्छ्रितं for उच्छ्रितं, *a, b, d. m.* omit समुच्छ्रयमिति वा; *bi* अर्वं for समस्तमूर्ध्वं of *a. b d m* 6. *d.* अपरस्मात् for अवरस्मात् 7. *a. d.* विषयलिंग; *b* विशेषलिंग for विशेष्यलिंगं of *bi.* 8 *a.* reads इत्युक्ते यैयमृगुपात्ता, *b.* इत्युक्तेयमृगुपात्ता; *b. m.* तदभिधायकत्वे for नद्यभिधायकत्वे. 9. *a. d.* read मैत्रावरुणीयके. 11. *b d. m.* add षड्वं after पुन; *bi. m.* omit षडवानुक्रमेण after षडर्चानुक्रमेण read by *a. b. d.*; *bi.* न for च of *a. b. d. m.* 12 *b.* reads आलभते for आलभेत

---

9. मैत्रायणीय is a शाखा of Yajurveda, and the verse in question is there according to दुर्ग the last of a collection of six ṛiks beginning with उतस्यानः सरस्वती. In Rigveda, however, this verse occurs as second in VI. 61. which begins with इयमददात्. There are two verses in Ṛigveda Saṁhitâ beginning with उतस्यानः सरस्वती, and hence to distinguish them one more word should be added. (1) उतस्यानः सरस्वती घोरा is VI. 61.7. i. e. occurring in the same Sûkta as the verse in question; while (2) उतस्यानः सरस्वती सुपाणा is VII. 95.'4. This latter is used as अनुवाक्या in सारस्वतपशु (Âś. Ś'r. Sû. III. 7. 6.)

12. The g[illegible] is [illegible]

इत्येतस्य पदोः संपद्यते । सेयमनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति । एवं च सतीयमपि देवतावदित्येव सनुपपद्यते न त्वदेवता इज्यते । तदेवं कृत्वा भाष्यकारेण यदुक्तं तयदेवतावदुपरिष्टित्तद्याख्यात्यामोयैतमदीवदिति तद्विरुध्यते । तत्रोक्तः समाधिः -विभवो ह्यनुपक्षीणशक्तयो मन्त्रशब्दाः । प्रदर्शनमात्रमेतत्क्रियते । सर्वथैव मन्त्रशब्दानां योर्थ उपपद्यते स योज्यो यथासंभवमिति । देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक् । सा गिरीणां मेघानां सानूनि भज्रयत्यूर्मिभिः पारावारे यावापृथिव्यौ हन्तीति योज्यम् । तविषेभिर्ऊर्मिभिः महद्भिरित्येवमादि च योज्यम् । सुप्रवृक्तभिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरेम गतार्थम् ॥

उदकनामान्युत्तराण्येकशतम् । उदकस्य नामानि उदकनामानि । उत्तराणि प्रकृतेभ्यो वाङ्नामभ्यः । मेघाभया हि वाक् मेघोत्थं चोदकं स्तनयित्नुशब्दपूर्वकं चेति वाङ्नामभ्य उत्तराण्युदकनामानि । कियन्ति पुनस्तानि । एकशतमेकं च शतं च एकशतम् । कतमानि पुनस्तानि । 'अर्णः स्रोदः सृत्र'-इत्येवमादीनि । अरणशीलमर्णः । स्रिप्रमुनत्तीति स्रोदः । क्षीणमनं करोतीति क्षत्र । इत्येवमाद्यभ्यूहितव्यम् ।

---

2. a. d. इदमपि for इयमपि; a. b. d. m. देवतादेवेत्येतदपपद्यते नदेवता इज्यते तदेतदेवं [m. तदेवं] कृत्वा, bi. देवतादेवेत्येव सनुपपद्यते etc. as the text above. 4–5. bi. सर्वैतन्मंत्रशब्दानां for सर्वथैव मंत्रशब्दानां of b. d. m. 6. a. b. d. m. मन्त्रति for मन्त्रयति of bi. 6–7. a. b. d. m. add स्तनयित्नुभिः after ऊर्मिभिः. 8. a. b. d. m. omit च before योज्यम् and a. d. add सुप्रवृक्तभिः after सुप्रवृक्तभिः. 9. m. गतार्थो for गतार्थम् 13. a. d. omit एकशतम् after एवं च. 14. a. d. read क्षीणम् for क्षीणम् of bi. m. b.

---

1. सारस्वतस्य पशुहविषो याज्या भवति, :—This, I believe, is in accordance with the directions of मैत्रायणीयशाखा. According to Rig. Sam. arrangement the hymn VI. 61. is otherwise used:—

इयमित्येतदादि तु सूक्ते सारस्वते जपेत् ।
द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमान् ॥ Rig-vidhâna II. 23 and
इमामदत्तमसपृनच्छुतर्विमि प्रवत् (Âs'. Sr. Sû. VIII. 1–12.).

13. For अर्णः क्षोदः etc. cf. Nigh. I. 12.

आह-उदकं कस्मात् । उच्यते-उनत्तीति सतः । तद्धि यत्र गच्छति तत्र उनत्ति क्लेदयति । 'उन्दी क्लेदने' । सत इति कारकाक्षरणं पूर्ववत् ॥

नदीनामान्युत्तराणि सप्तत्रिंशत् । नदीनां नामानि नदीनामानि । उत्तराणि इति प्रकृतेभ्य उदकनामभ्य उत्तराणि नदीनामानि । कियन्ति पुनस्तानि । सप्तत्रिंशत् । कानि पुनस्तानि । 'अवनयः यव्याः खाः सीराः'-इत्येवमादीनि । अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः । यातव्या भवन्तीति यव्याः । खातव्या भवन्तीति खाः । सरन्तीति सीराः । एवमादि योज्यम् ।

1–2. *a d* omit from आह to पूर्ववत्–probably a mistake in copying. 3. *a d.* omit नदीनां नामानि 4. *a m.* omit इति after उत्तराणि. 5. *bi* reads यह्वयः. 6. *a. b d. m.* read यातव्या भवन्तीति यव्याः, *bi. j* ह्वयन्त्यो यान्तीति यह्वयः; *bi.* notes variant as यावयन्त्यो यान्तीति and *bi. j.* read ख्यातव्या for खातव्या as read by *a, b. m.* We follow the reading of the Mss. as it is the more general one. 7. *a, d* read सरस्वतीति for सरन्तीति

---

2. उन्द्-चा० पा०-रुधादि (20).

5. यव्याः -All our Mss support the reading यव्या ; it is also the reading of R. in Nigh. I. 13 देवराजयज्वा the commentator of Nigh. appears, however, to explain यह्वयः and refers to यव्या as a reading found in some collections References to Rigveda are cited for both the readings and the whole would show that both the readings are allowable.

6. For अवनयः यव्याः etc. *cide* Nigh. I. 13.

7. The word whether it is to be read as यव्याः or यह्वयः is derived in the first place from the root या. Other derivations also are suggested as will be evident from the extracts of the commentary of देवराजयज्वा on Nigh I 13 :—यह्वयः । या प्रापणे । शेवयह्वजिह्वाग्रीवाप्वामीवा इति निपातनात् अमत्ययो धातोर्ह्रस्वत्वे ह्वागमश्च । बाहुलकात्.. .. ङीप् पिप्पल्यादित्वाद्द्रष्टव्यम् । याति ताँस्तान्देशान् प्राप्नुवन्ति वा प्राणिभिः । यद्वा यह इति महन्नाम पूर्ववत् ङीप् । यह्वयः महत्यो नद्य । द्विधातुज वा इद नाम यातेर्हेञ.. .. । याताश्च प्राणिभिः हूताश्च यज्ञेष्वित्यर्थ ।.. ... केषुचित्कोशेषु यव्याः इतीद नाम दृष्टम् । यु मिश्रणे पृथग्भावोप्यस्यार्थ इति नैगमकाण्डे विप्रुष इत्यस्य निर्वचने स्कन्दस्वामिना प्रतिपादित.।. .. वर्षासु मेघोदकेन मिश्रणीया अन्येषु सूर्यरश्मिभिराकृष्टेन पृथग्भवन्तीति वा । अथवा युज् बन्धने .... बद्धयते आसु सेतुरिति यव्याः । यद्वा एवेभ्यो धान्यविशेषेभ्यो हिताः.....नदीजवेनापि वर्धन्ते यव्याः.....अनयोर्युक्तं पृथग्व सृप्यः.

It should be observed that the above extracts would derive यव्याः from यु rather than from या, which derivation is given for यह्वयः. But it appears that the derivation of the reading of all our mss. here taken explains यव्याः from यातव्याः.

आह-नद्यः कस्मात्। उच्यते- नदना ह्येता भवन्ति-शब्दवत्यः-शब्दसंयुक्ताः। किं च बहुलमासां नदीनामन्यदेवतेषु मन्त्रेषु नैघण्टुकं सूक्तमप्रयानम्। आश्चर्यमिव प्राधान्येन क्वचिदेव नदीदेवतो मन्त्रः स्यात्। तन्नेतिहासमाचक्षते। यस्मिन्सूक्ते प्रधाना नद्य एव तन्नेमं निदानभूतमितिहासमाचक्षत आचार्याः। 5

विश्वामित्रो नाम ऋषिः। सुदासः पैजवनस्य राज्ञः पुरोहितो बभूव। विश्वामित्रः सर्वमित्रः सर्वस्यैव हि स मित्रं सर्वमेव वा तस्य मित्रमिति विश्वामित्रः। सर्वमिति किमुक्तं भवति। उच्यते-तद्धि संस्कृतं भवति संगतं भवत्येकस्मिन्। सुदाः कल्याणदानस्तस्य हि नित्यमेव प्रशस्तं दानं भवति। पैजवनः पिजवनस्य पुत्रः। पिजवनः पुनः स्पर्धनीयजवस्तस्य हि सर्वाहौ जवो वेगः। अथ वा अमिश्रीभावगतिर्वा न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिरतिशय्यात्। तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव। स पौरोहित्योपार्जितं वित्तं धनं गृहीत्वा विपाडछुतुद्र्योर्नद्योः संभेदं-संगममायायावागतवान् यत्र विपाडछुतुद्र्यौ इतराभिः सिन्ध्वादिभिर्नदीभिः संभिन्ने एकीभूते इत्यर्थः। अनुययुरितरे-तदनुयायिनस्तत्करा वा। स विश्वामित्रस्तास्तितीर्षुर्नदीरस्तुष्टाव गाधाः स्वल्पोदका यूयं भवतेति एतमर्थं पुरस्कृत्य। कथं पुनस्तुष्टव-। -अपि-द्विवत्-द्विवचनसंयुक्तैर्मन्त्रैः। अपि बहुवत्-बहुवचनसंयुक्तैर्मन्त्रैः। तत्-तन्नेवं सति यद्द्विवत्-द्विवचनवत् तत् उपरिष्टात् चतुर्दशाध्याये

---

4. a. m. add पदन्ति after आचक्षते and m. omits इति before आचार्याः read by *bi*. We omit it as it looks superfluous. 9. m. सुदासः for सुदाः; m. प्रशस्तदान. 10. a. *d*. add तव्यत्तव्यानीयर इति स्पर्धनीयः शब्दो निष्पन्नः between स्पर्ध and नीदजवो here. Probably it is a marginal note added in body through the mistake of the copyist. This shows by the bye a. and *d*. are similar copies. *d*. adds वा after स्पर्धनीयजवः. 13. a. *b*. omit वित्तम्; m. omits धनं and नद्यो; a. *d*. omit आदधौ 14. a. *b*. *d*. read सिन्ध्वादिभिः. 16. a. *b*. *d*. m. read गाधोदकाः for गाधाः स्वल्पोदकाः of *bi*. 17. *d*. adds अपि before द्विवचन°; a. *b*. *d*. m. omit तत् before तत्र. 18. *d*. omits द्विवत्; *d*. reads द्विवचन for द्विवचनवत् and चतुर्दशाध्याये for चतुर्दशाध्याये.

---

8. विश्वामित्र-" विश्वस्य ह वै मित्र विश्वामित्र एवास्य।" Ait. Br. 29. 4.

18. चतुर्दशाध्याये *i. e.* in Nir. IX. 39. (RS. III. 33. 1.)

"प्रपर्वतानाम्"—

इत्येतस्यामृचि व्याख्यास्यामः । अथ पुनरेतद्बहुवत् व्याख्यायते— ॥ २४ ॥

"रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥"

उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा । मुहूर्तो मुहूर्नेतुर्नेतुरर्तेर्गतिकर्मणो मुहुर्मूढ इव कालो यावदभीक्ष्णं चेति । अभीक्ष्णमभिक्षणं भवति क्षणः क्षणोतेः प्रक्षुतः कालः । कालः कालयतेर्गतिकर्मणः । प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः । कुशिको राजा बभूव कोशतेः शब्दकर्मणः कंशतेर्वा स्यात्प्रकाशयतिकर्मणः साधुविकोशयितार्थानामिति वा । नद्यः प्रत्यूहुः ॥ २५ ॥

रमध्वं मे वचस इति । त्रिष्टुभ एताः । उपरमध्वं मे । उपेत्ययमुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्वमित्यनेन क्रियापदेन योजितः । उपरमध्वं मम वचसे सोम्याय सोमसंपादिने सोमा हि अनेनास्मद्वचसा देवतानामनभूता

---

7 C. D R. मूढ, B मूल्ह, B1 मूल्ह 8. A. क्षणः क्ष्णोते for क्षणः क्षणोतेः 9. D. omits महत्या and reads मनीषा for मनीषया. 12 A. Bi. conclude II vii 3 after प्रत्यूहु. 13. m omits इति after वचसे. 14. m. मन्त्र-मध्यात् for मन्त्रस्य मध्यात् 15. a. b. d. m. read मे before मम; a. b d m. read सोमस्य सपादिने.

---

3. The quot. is RS. III. 33. 5,

13 त्रिष्टुभ एता', i, e, this and the Riks in the two following sections.

14. भाष्यकारेण.....योजित'—On the authority of the two Sûtras of Pâṇini [I. 4. 81, 82] छन्दसि परोपि । व्यवहितात्र ।

बहवः संपादिताः । ता यूयमस्मै प्रतिविरिञ्चाय वचसे सत्यतार्यं कर्यं नाम सत्यमिदं स्यादित्येवमर्थमुपरमध्वं मन्दवेगा गाधाश्च भवतेत्यभिप्रायः । हे ऋतावरीरुदकवत्यः । कियन्तं पुनः कालमुपरमध्वम् । मुहूर्तं न च नित्यमेव मन्दवेगतां गाधोदकतां वा प्रार्थये । किं तर्हि । यावदुत्तरेयमहं तावदेवेत्यभिप्रायः । एवैः एभिरुदकैरतिप्रवृद्धैरुपरमध्वम् । अवनैर्वा कामैरेतैरस्मत्प्रार्थनाविशेषैः—उत्तरेम गृहान्गच्छेम वित्तं प्रापयेम इत्येवमादिभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम् । अथ वा अयनैः चित्रैर्गमनैर्वर्द्धिर्यूयमभिप्रवृत्तास्तैरुपरमध्वं मुहूर्तम् । यदैवमविशेषेणोच्यमाना न शुश्रुवुस्तदैकामुद्दिश्य प्रवृत्ते वक्तुम् । सिन्धुमच्छ । अच्छाभेः स्थाने । अह्वे—इत्येतदमाकृत्य प्र अभि ह्वयामि इत्येवं योजितं भाष्यकारेण । किं प्राभिह्वयामि । सिन्धुम् । कया । बृहती मनीषा—बृहत्या मनीषया—मनस ईषया—मनःपूर्विकया स्तुत्या इत्यर्थः अथवा प्रज्ञया । कमर्थमिच्छन्नभिह्वयामि । अवस्युरवनमिच्छन् गमनमित्यर्थः । कुशिकस्य सूनुरहमिति । पितुरपि गौरवान्मम गौरवमेताः कुर्युः इति समस्तार्थः ।

अथैकपदनिरुक्तम् ।—ऋतमित्युदकनाम । तद्धि देशं देशं प्रत्यृतं भवति गतमित्यर्थः । मुहूर्तो मुहुर्ऋतुः एवं विपृच्य ऋतुशब्दं तावन्निर्ब्रवीति—ऋतुरर्तेर्गतिकर्मणो गत्यर्थे वर्तमानस्य । स हि गच्छत्येव । अधुना मुहुःशब्दं निर्ब्रवीति—मुहुर्मूढ इव कालोल्पत्वात् । मूढ इव यः काल ऋतुः स मुहूर्त इत्युच्यते । किं च यावत् एव च अभीक्ष्णं तावानेव मुहूर्तः । यावांश्च मुहूर्तस्तावदेवाभीक्ष्णमित्यर्थः । सारूप्यप्रसक्तं निरुच्यते—अभीक्ष्णमाभिक्ष्णं भवति तद्धि क्षणमाभिमुख्येन स्थितं भवति । क्षणः क्षणोतेर्हिंसार्थस्य । स हि प्रक्षणुतः प्रकर्षेण हिंसितः कालोत्यत्वात् । कालः कालयतेर्गतिकर्मणः । स हि सर्वान्येव भूतानि कालयति क्षयं

---

3. *a. b. d. m.* read मुहूर्तमेवैः मुहूर्तम् for मुहूर्ते of *bi.* 8. *a. d.* read प्रवर्तने for प्रवृत्ते; *a. b. d. m.* read प्रसिषु for सिषु; *m.* omits अच्छ before अमेः 9. *a. b. d. m.* read केन for कया 10. *a. d.* add बृहत्या after बृहत्या. 11. *a. b. d. m.* read प्राभिह्वयामि for अभिह्वयामि of *bi* 12. *bi.* गौवर् for गौरवं. 16. *a. b d. m.* omit गतिकर्मणः. 17. *a.* omits सः. 18. *b. d. m.* omit च before अभीक्ष्ण; *bi.* तावर् for तावानेव of *b. d. m* 20. *bi.* reads सर्ग for क्षणः of *a. b. d. m.* 21. *m.* adds हि after सर्वान्येव.

---

8. अच्छाभेः स्थाने—" अच्छाभेराभुमिति शाकपूणिः " [Nir. V. 5. 4.].

9. किं—Should it be rather का for किम् ?

नयतीत्यर्थः । कुशिको राजा—इति तत्त्ववचनम् । क्रोशतेर्वा शब्दार्थस्य स हि साध्वेव क्रियतामिति नित्यकालमेव क्रोशयति । क्रंशतेर्वा स्यात्प्रकाशयत्यर्थस्य स हि प्रकाशयिता साधूनां धर्माणामात्मनैव प्रकाशकः । अथवा साधुविक्रोशयितार्या-नामिति-साधुषु ब्राह्मणेषु विक्रोशयिता अर्थानां दातेत्यर्थः ।

एवमुक्तवन्तं नद्यः प्रत्यूचुः-॥ २५ ॥

"इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन्वृत्रं परिधिं नदीनाम् ।
देवोनयत्सविता सुपाणिस्तस्य वयं प्रसवे याम उर्वीः ॥"

इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनतिकर्मापाहन्वृत्रं परिधिं नदीनामिति व्याख्यातम् । देवोनयत्सविता सुपाणिः कल्याणपाणिः । पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान्पूजयन्ति । तस्य वयं प्रसवे याम उर्वीः । उर्व्य ऊर्णोतेर्वृणोतेरित्यौर्णवाभः । प्रत्याख्याया-न्तत आयुश्शुवुः ॥ २६ ॥

इन्द्रो अस्माँ अरददिति । अरदत्-अखनदित्यर्थः । रदतिः खनतिकर्मा । कथं पुनरखनत् । अपाहन् वृत्रमपावधीन्मेघम् । परिधिं नदीनां-परिधारयितारं नदीनां-नदनानामपाम् । स हि निपतन्तीरापो निरुणद्धि तमिन्द्रो वज्रेण हन्ति । तस्मिन्हते

---

2 *a. d.* add एव after इति, *b. m* read एव for इति, *a. b. d. m.* read क्रोशयति for क्रोशति of *b*. 3 *a d* प्रकाश° for प्रकाशक. and *a. b d. m.* omit साधुविक्रोशयितार्यानामिति. 5. *b m* add विश्वामित्र before एव. 12. A. Bi. conclude II vii. 4. after आयुश्शुवु. 13. *b. m.* add after खननिकर्मा, - वज्रबाहु । वज्रयुक्तौ बाहुर्यस्यासौ । बाहुनात्र हस्तो लक्ष्यते वज्रहस्त इत्यर्थः 14. *a d.* read अभ्रन् for अपावधीत्, *b* omits परिधारयितार नदीना before नदनानाम् 15. *b*. स हि निपत तीरयोर्निरुणद्धि. We read above with *a. b. d. m.*

---

2. क्रयतेर्वा स्यात् etc. किशुक is derived from the same root in Nir. XII, 8.

7. The quot is RS. III. 33 6.

पृथिवीं प्राप्यापो यथानिम्नानुसारिण्यः खातानि कुर्वत्यो वहन्ति तैः खातैर्वयं गच्छामः । एवं कृत्वा अस्मान् इन्द्रः अरदत् । एवं च कृत्वा स॰पव॰इन्द्रो देवः सविता॰सर्वार्थ॰ प्रसविता॰ वर्षद्वारेणास्मान् अनघत्वमुदम् । सुपाणिः-प्रशस्तपाणिरित्यर्थः । यत एव सोस्माकं खनिता नेता च अतः तस्य इन्द्रस्य प्रसवे अनुज्ञायामादेशे वर्तमाना वयं याम:-गच्छामः दर्वीः-कर्णवत्यः संमजमाना वा तानि तानि देशान्तराणि अंभोभिः । सोस्माकमीश्वरः । स एवास्मानाज्ञापयितुमर्हति न त्वमित्यभिप्रायः ।

पाणिः पणायतेः पूजार्थस्य । प्रगृह्य पाणी संयतौ कृत्वा ततो देवान् पूजयन्ति इति ।

प्रत्याख्याय एवं तमृषिं ततसूक्तस्य अन्ततः अन्ते अनयर्चा आशुश्रुवुस्ता नद्यः श्रुतवत्य इत्यर्थः-॥ २६ ॥

"आ तें कारो शृणवामा॰ वचाँसि ययाथ॰ दूरादनसा॰ रथेन ।
नि तें नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै तें ॥"

आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा ॥

---

1. *bi.* कुर्वन्त्यो for कुर्वत्यो; *b.* गच्छाम for गच्छामः. 2. *a. d.* add च after स पव; *b. m.* सर्वार्थस्य प्रसविता. 3–4. *d.* य पव for यत पव. 4. *m.* अनुज्ञानायां for अनुज्ञायां. 6. *a. d.* स पवे for स पव; *b. m.* add च after स पव. 9. *a. d.* add अन्ततः before सूक्तस्य instead of तत्; *b. m.* omit अन्ते; *a. d.* read प्रतिशुश्रुवुः for आशुश्रुवुः.

---

7. For पणायतेः पूजार्थस्य *Cf.* उणादिसूत्र 4. 134. "अशिपणाय्यो रुचायलुकौ च" ।

9. तत्सूक्तस्य–Properly it should be तद्वर्गस्य as the verse next quoted is not the last of RS. III. 33, but is the last of the वर्ग, 13, of the second Adhyâya of the third Ashtaka.

12. The quot is RS. III. 33. 10.

अश्वनामान्युत्तराणि षड्विंशतिः । तेषामष्टा उक्तानि बहुवत् । अश्वः कस्माद्दशुतेर्ध्वानं महाञ्जनो भवतीति वा । तन्न दधिक्रा इत्येतद्यत्क्रामतीति वा दधत्क्रन्दतीति वा दधदाकारी भवतीति वा । तस्याश्ववद्देवताश्च निगमा भवन्ति । तद्देवतावद्वयरिष्टात्तद्व्याख्या-
5 स्यामोयैतदश्ववत् ॥ २७ ॥

आ ते कारो इति । तदा श्रुतं भवति यदा तद्वचः क्रियते श्रूयमाणमपि हि तत्रैव श्रुतं भवति यत्र क्रियते । आ ते कारो शृणवाम । आभिमुख्येनावस्थिताः सत्यः शृणवाम हे कारो स्तोमाना कर्तः । किमाशृणवाम । वचांसि । अतो ब्रूमः यथाथ याहि त्वम् । अनसा-शकटेन सह- रथेन च । कस्मात्पुनरेवमादरवत्यो
10 ब्रूमो याहीति । इतो यस्माद् दूरात् आयातस्त्वं परिश्रान्तस्तस्मात्कारण्यं नस्त्वयि । तेन वयमेता सि ते नंसै-निनमाम ते-नीचैर्नमाम-गाधोदका भवामेत्यर्थः । कथं पुनर्निननाम । पीप्यानेव योषा-पाययमानेव योषा पुत्रं यथा निनमेदेवं वयं तव निनमाम । एवमुक्त्वा पुत्रोपमया कदाचिदयं क्रोधमियादिति मन्वानाः सत्यः पति-कन्यासंबद्धामन्यामुपमामुपादिरे-मर्यायेव कन्या शश्वचै ते । मर्याय-मनुष्याय
15 कन्या-नवोढा शश्वचै ते-परिष्वजनाय कथं नाम परिष्वजेत मामयमित्य-भिप्रायेण यथा सा निनमेदेवं वयं तव निनमाम । निनमा इति वा । यदि वा निनमाम इत्येवं विपरिणामो निनंसै इत्येतस्य पदस्य । अथ वा निनमे इति ॥

---

5. A. B1. conclude II vii. 5 after अश्ववत्. 6. a b. d. m omit आ ते कारो इति. 8. a b. d m add after वचांसि,—वचनानि श्रुतानि चैतानि तावकानि [m. कानि] वचांसि यतो ब्रूय. 9 a. d. add च after शकटेन. 10 a. b. d. m. यथाथेति for याहीति. 11. b. नवेम for मनाम. 12. m. adds ते after निनमाम. 16–7 b. निनयेत् for निनमेत्; m. निनमे इति वा। यदि वा निनयाम इत्येष परिणामः। निनंसै इति वा निनंसै इत्येतस्य पदस्य &c., b. निनमे इति वा। यदि वा निनमाम इत्येव विपरिणाम निनंसै इत्येतस्य पदस्य &c, a. निनमै इति वा। यदि वा निनमा इत्येष विपरिणामः निनंसै इत्येतस्य पदस्य &c., d निनमे इति वा। यदि वा निनमाम इत्येव परिणामः निनंसै इत्येतस्य पदस्य &c., b1. निनमा इति वा। यदि वा निनया इत्येष परिणामः निनंसै इत्येतस्य पदस्य &c.

अश्वनामान्युत्तराणि पङ्क्तिरातिः । अश्वस्य नामानि अश्वनामानि । उत्तराणि प्रकृतेभ्यो नदीनामभ्यः । अज्जा एव ह्यश्वाः । एवं ह्युक्तम्—

" अप्सु जाता अश्वाः स्वादेवैतान योनेर्जनयन्ति "

इति । तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि । कियन्ति पुनस्तानि । पङ्क्तिरातिः षडधिका विंशतिः । कतमानि पुनस्तानि । " अत्य हयः अर्वा "—इत्येवमादीनि । अतति गच्छतीत्यत्यः । हयति गच्छतीति हन्ति वाध्वानमिति हयः । ईरणवानर्वा गमनवानित्यर्थः । एवमादि ।

तेषामश्वनाम्नामष्टौ यानि उत्तराणि अव्ययय इत्येवमादीनि तानि बहुवत्—बहुवचनसंयुक्तानीत्यर्थः ।

आह—अश्वः कस्मात् । उच्यते—अश्नुतेर्व्यानं—व्याप्नोतीत्यर्थः । महाज्ञानो वा भवति इति स हि बहु भुङ्क्ते । तत्र—तस्मिन् पङ्क्तिराके अश्वाभिधानगणे दधिक्रा इत्येतत् पदं संदिग्धम् । तत्पुनरेतत् दधत् क्रामतीति—धारयन्नयमश्वारोहं क्रामतीति दधिक्राः । अथवा दधत्—धारयन्नयमश्वारोहं क्रन्दति—शब्दं करोति इति दधिक्राः । अथ वा दधत्—धारयन् अयमश्वारोहम् आकारी—आकारवान् भवतीति दधिक्राः । स हि अधिरूढेश्वारोहे आकुञ्चितग्रीवो विपुञ्छितसर्वगात्र आकृतिमान् भवति ।

तस्य—दधिक्राशब्दस्य अश्ववत्—अश्वसंयुक्ताः देवतावत्—देवतासंयुक्ताः च निगमा भवन्ति । तत् एतदुच्यते— यद्देवतावत अस्य दधिक्राशब्दस्य तत् उपरिष्टात्प्रदर्शयिष्याये

---

3. *a. b. d. m.* पनान् for पतान्; *d. m.* जनयतीति. Is this not better? 6. *a. b.* गच्छतीत्यर्थं for गच्छतीत्यत्य'; *d.* इयगच्छति for इयति गच्छति, *a. d.* omit इति after गच्छति. 8 *a. d.* अव्यय for अव्ययप, *a b. d m.* omit बहुवत्. 10. *b. d. m.* add स हि after उच्यते. 11. *b. m.* महाज्ञानो भवतीति वा. 12. *b. d. m.* add [*m.* वा] अथवा after क्रामतीति and before धारयन्. 13. *a. b. d. m.* omit दधत् before धारयन् 14. *a. b. d. m.* omit अयम् after धारयन्. 15. *m* °सर्वगात्राकृतिमान्; 16. *m.* दधिक्राशब्दस्य; *m.* देवतासंयुक्तानिगमा।

---

3. It is not certain whether this is a quotation. Bṛ in the foot-note refers the reader to RS. I. 163, where the *Aṅgas* is said to be born of water.

5. For अत्यः हयः etc *vide* Nigh. I. 14.

'18. पञ्चदशेऽध्याये, *i. e.*, in Nir. X. 31. (RS. VI. 33. 10.)

"आ दधिक्राः शवसा"

इत्यस्यामृचि व्याख्यास्यामः । अथ पुनर्यत् अश्ववत् अस्य तत् एतत् व्याख्यायते ॥ २७ ॥

"उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि ।
क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् ॥"

अपि स वाजी वेजनवान्क्षेपणमनु तूर्णमश्नुतेऽध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापिकक्ष आसनीति व्याख्यातम् । क्रतुं दधिक्राः कर्म वा प्रज्ञां वा अनुसंतवीत्वत् । तनोतेः पूर्वया प्रकृत्या निगमः । पथामङ्कांसि पथां कुटिलानि पन्थाः पततेर्वा पद्यतेर्वा पन्यतेर्वाङ्कोञ्चतेरापनीफणदिति फणतेरर्थकरीतन्नुत्तम् ॥

दशोत्तरपण्यादिष्टोपयोजनानीत्याचक्षते साहचर्यज्ञानाय ॥

ज्वलतिकर्माण उत्तरे धातव एकादश ॥

सावन्त्येवोत्तराणि ज्वलतो नामधेयानि नामधेयानि ॥ २८ ॥

मि- निनमाम

उत स्य वाजीति । गोतमपुत्रस्य वामदेवस्येयमार्षम् । जगती । वाजपेये परं रथमधिष्ठाय यजमानोनुवाक जपति तत्रेषा । उत स्यः—अपि सः वाजी—वेजनवान् । ओविजी भयचलनयोः । भयवान् प्रेम्यो

5. A. Bi. आ ते कारो इति. कानि [m. कानि] Bi conclude II. vii C. after नामधेयानि R omits one b d. m. यथायेति. 14. a. b. d. m गौतम² for गोतम² of bt ; a. d omit इयं निनमाम. 16–ं परिणामः । निनसै इ

इत्येव विपरिणामः नि
विपरिणामः निनसै इत्ये
णामः निनसै इत्येतस्य
निनसै इत्येतस्य पदस्य

ot. is RS. IV. 40 4, Yaj. Vâj. Sam. IX. 14. The latter
न
तथाहि काल्पादन- –'देवस्याहर्यिति यजुर्युक्तमारोहति यजमान' । (XIV.
नुवाक consists of three mantras of which this is the last
–क्षादि (23).

b. व्याख्यास्यामः, i. e.,

भयदाता परेषां हि तं दृष्ट्वा भयमुत्पद्यते। चलनवान् वा स हि नित्यं चलनशीलः। क्षिपणिं-क्षेपणमनु-कशाघातमनु तूणमभ्येतेर्वानं-व्याप्नोतीत्यर्थः। अपि कशाप्रहारमनु तुरण्यति अप्यनादृत एवेत्यपिशब्दः। किंच ग्रीवायामुरसि वज्रेण बद्धः। अपिकक्षे कक्ष्यया। अथ आसनि-मुखे खलीनेन बद्धः। एवमनेकेषु स्थानेषु बद्धः। तथापि तुरण्यत्येव। अन्यो ह्येकस्मिन्नपि प्रदेशे बद्धश्चलितुमपि न शक्नोति किमुत त्वरितुम्। किंच ऋतुमात्मीयं गमनं कर्म वा प्रज्ञां वा अश्वारोहस्य संतनोति काममभिप्रेतार्थेन शीघ्रगामित्वात् दाधिक्राः अश्वोनुसंतनोतीत्यर्थः। किंच यान्यपि च कानिचित् पथां-मार्गाणामङ्कांसि-अवितानि-कुटिलानि सन्ति तान्यपि अनुलोमानीव कुर्वन्नाशुगामित्वात् आभिमुख्येन पुनः पुनर्भूयं वा फणति गच्छतीत्यर्थः। एष समस्तार्थः।

अथैकपदनिरुक्तम्।-ग्रीवा गिरतेर्वा गिलनार्थस्य। तया हि गिलत्यन्नम्। गृणातेर्वा शब्दार्थस्य तया हि शब्दो गीर्यते। गृह्णातेर्वा तया ह्युदकादि गृह्यते तस्यामेव वा गृह्यते यः शृङ्खलीक्रियते। अनुसंतवीत्वत् इति तनोतेर्धातोः पूर्वया प्रकृत्या निगमः। षड्विधो हि धातुः।

" प्रकृत्यन्तः सनन्तश्च यङन्तो यङ्लुगेव च।
ण्यन्तो ण्यन्तसनन्तश्च षड्विधो धातुरुच्यते॥ "

---

2 *a b d m* add तुरण्यति after कशाघातमनु 3 *a.* उरसि वस्त्रद्-वयवद्ध?, *d.* उरसि वस्त्रद्वयवद्ध?, *b. m.* उरसि वस्त्रेण बद्धः, (Mahidhara in his commentary on Yaj. Vaj Sam. IX. 14. renders this by ग्रीवायां उरोवस्त्रेण बद्ध). We give the reading of *b.* as it makes the same sense as that of *b. m*, though वस्त्र appears to be a preferable reading to वज्र It may be noticed that M W.'s dictionary gives वस्त्रा as a fem. word only. 4. *a b. d. m* कक्ष्यया for कक्षाया of *b*: *a. d.* अपि for अथ. 5 *a d* स्पन्दितुं for चलितुं 6. *a. b d. m* read गमनकर्म for गमन कर्म, and omit वा after it. 7. *b. d. m.* अभिप्रेतेनार्थेन. 8 *d* यान्यपि च कानिचिद्यथा कुटिलानि मार्गाणा &c; *d.* reads सन्ति after तान्यपि and not before it. 9. *a d m.* add वा after पुनः पुन 11. *a. d.* गिलनेन्नं. 13. *b.* omits तस्यामेव वा गृह्यते before यः शृङ्खलीक्रियते read by *a. b. d. m*

---

16. The quotation is not traced.

आसां षण्णां धातुप्रकृतीनां या पूर्वी प्रकृतिस्तयैव निगमः न सन्प्रकृतीत्यादीनामन्यतमया । **पन्याः पततेर्वा पद्यतेर्वा पन्यतेर्वा** त्रयोपि एते गत्यर्था एषामन्यतमस्य । **अङ्कः अञ्चतेर्गत्यर्थस्य** । **आपनीफणदिति फणतेर्गत्यर्थस्य** चर्करीतान्तत्वेन वृत्तम् ॥

5 **दश यानि उत्तराणि नामानि तान्यश्वनामसंबन्धेनोच्यन्ते तान्यपि** तथानामेवेति । तानि पुनरादिष्टोपयोजनानि इति एवमाचक्षते आचार्याः । इदमिन्द्रस्याश्वानां नाम इदमग्नेः इदमादित्यस्य–इत्येवमादिष्टोपयोजनानि । कतमानि पुनस्तानि । " हरी इन्द्रस्य "–इत्येवमादीनि । हरी हरितवर्णौ इन्द्रस्याश्वौ । " रोहितोग्नेः " रोहितवर्णौ इत्येवमादि ॥

10 **ज्वलतिकर्माण उत्तरे धातव एकादश** । य एव अश्ववन्तो भवन्ति त एव ज्वलन्तीव तेजसा ततोश्वनामभ्य उत्तरे ज्वलत्यर्था धातवः । कतमे पुनस्त इति । " अजते अशते अश्नुते "–इत्येवमादयः ॥

---

2 *d* reads पन्थतेर्वा before पद्यतेर्वा and not after it. 3. *j.* सञ्चतेः for अञ्चते, *k.* अपनीफणत् । 5–6 *d.* omits इति after अश्वानामेव. 9. *a d* रोहितावग्ने (not supported by Nigh. I. 15.), *b* reads रोहितोऽग्निः । It is doubtful whether the dual वर्णौ is right, but that is the reading of all and hence retained. 12. *a. d.* read म्लायते, *b.* आयते, both unsupported by Nigh. I. 16. which reads आयाति more generally. The Nigh. reading however is no where found used in the Samhitá, while these are met with

---

8. For हरी इन्द्रस्य etc *vide* Nigh. I. 15.

12. For अजते etc *vide* Nigh. I. 16.

तावन्त्येवोत्तराणि "जमत् कल्मलीकिनम् जङ्गनाभवन्"-इत्येवमादीनि ज्वलतो नामधेयानि । जमति गच्छतीति जमत् । कमहं मलिनं शोधयामीति कल्मलीकिनम् । जनं भावयतीति जङ्गनाभवन् । इत्येवमादि ॥

अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः ॥ २८ ॥

इति ऋग्वेदभाष्ये निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य ५

कृतौ द्वितीयोऽध्यायः समाप्तः ॥ २ ॥

(अथ[1] निर्वचनपथोरात्रोविद्याहवा[2][3][4] अयातोनुक्रमिष्यामोवृक्षेवृक्षेता[5][6][7]
वांवास्तूनियईचकारायंसशिङ्के[8][9][10] हिरण्यनामान्यार्ष्टिषेणोयद्देवापिः[11][12][13] साधा-
रणानिस्वरादित्यो रश्मिनामान्यतिष्ठन्तीनांदासपत्नीरात्रिनामानीदंश्रेष्ठं-
रुशद्वत्साह[14][15][16]श्वकृष्णंदेवानांमानेवाद्नामानीयंशुष्मेभीरमध्वंम[17][18][19] इन्द्रो[20][21][22] अ-10
स्मानातेकारो[23][24][25] उतस्योष्टाविंशतिः[26][27][28] ॥)

इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः ॥ २ ॥

---

3. *d* *m.* जन जन भावयतीति (perhaps better); *a. d. m* इत्येवमादि [दोनि m] ज्वलतो नामधेयानीति ।

---

2. For जमत् etc. *vide* Nigh. I 17.

अथ तृतीयोऽध्यायः ।

ॐम् । कर्मनामान्युत्तराणि षड्विंशतिः । कर्म कस्मात्क्रियत इति सतः । अपत्यनामान्युत्तराणि पञ्चदश । अपत्यं कस्मादपतनं भवति नानेन पतन्तीति वा । तद्यथा जनयितुः प्रजनयमर्थीये ऋचा उदाहरिष्यामः ॥ १ ॥

कर्मनामान्युत्तराणि षड्विंशतिः । कर्मणो नामानि **कर्मनामानि** । उत्तराणि-इति प्रकृतेभ्यो ज्वलन्नामधेयेभ्यः । ज्वलत्येवाग्नौ कर्माणि क्रियन्त इति ज्वलन्नामभ्य उत्तराणि कर्मनामानि । कियन्ति पुनस्तानि । **षड्विंशतिः** षडधिका विंशतिः । कतमानि पुनस्तानि । " अपः अग्नः हंसः "-इत्येवमादीनि । आप्यते पुरुषेणेदन्नोति वा पुरुषमेनदिति अपः । अग्न -इत्येतदप्यन्नोतेरेव । एवमादि योज्यम् ॥

आह-**कर्म कस्मात्** । उच्यते **क्रियत इति सतः** । सत इति कारकावधारणार्थमिति ॥

अपत्यनामान्युत्तराणि पञ्चदश । अपत्यस्य नामानि **अपत्यनामानि** । उत्तराणि-इति प्रकृतेभ्यः कर्मनामभ्यः । सर्वकर्मणां ह्यपत्योत्पादनकर्मैव प्रधानमृगापाकरणद्वारेणेति कर्मनामभ्य उत्तराण्यपत्यनामानि । कियन्ति पुनस्तानि । **पञ्चदश** । कतमानि पुनस्तानि । " तुक् तोकम् तनयम् "-इत्येवमादीनि । तुक् तकतेर्वा तोदतेर्वा । तोकं तुदतेस्तनयं तनोतेरिति वक्ष्यति ॥

---

2 D हरि ॐम्; R omits it altogether 5. A. B. conclude III. 1 after उदाहरिष्याम. 7 *d* omits कर्मनामानि, *a. b d* read ज्वलनिनामधेयेभ्य [*m* as text] after प्रकृतेभ्य., *b*. omits it, *b*. अग्नौ for अग्नौ of *a. b. d m*, *m* adds हि after ज्वलत्येव 9 *a b. d.* add षड्विंशतिः after विंशतिः; *d* आप for अपः 18. *m* omits तुदतेर्वा.

---

2. For अपः अग्नः etc *vide* Nigh. II. 1.

17. For तुक् etc *vide* Nigh II 2,

18 पक्ष्यति, i. e., in Nir X 7.

आह-अपत्यं कस्मात्। उच्यते-अपततं भवति। पितुः सकाशादेत्य पृथगेव ततं भवति। अथ वा अनेन जातेन सता पितरो नरके न पतन्तीत्यपत्यम् ॥

अत्र पुनर्विवदन्ते-द्वयोः संनिपाते किं क्षेत्रिणोपत्यमुत बीजिन इति। तदेतदुच्यते-यथा जनयितुरेव प्रजा भवति एवमर्थीये ऋचावुदाहरिष्यामः-॥ १ ॥

" परिपदं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥"

परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोरणोपाणों भवति रेक्ण इति धननाम रिच्यते प्रयतः। नित्यस्य रायः पतयः स्याम पितृपस्यैव धनस्य। न शेषो अग्ने अन्यजातमस्ति। शेष इत्यपत्यनाम शिष्यते प्रयतोचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदुक्ष इति तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

परिपदं हि, न हि प्रमाय, इति च एते त्रिष्टुभौ वसिष्ठाग्निसंवादे। वसिष्ठेन हतपुत्रेणाग्निरभ्यर्थितः पुत्रं मे देहीति। तेन किलासौ प्रत्युक्तः क्रीनकट्टत्रिमदत्तक्रयदीनां पुत्राणामन्यतमं कुरुष्व पुत्रमिति। स एवमुक्त एताभ्यामृग्भ्यामन्यजान्पुत्रान्निन्दन्नौरसं पुत्रं ययाचे परिषद्यमिति। परिषद्यं हि परिहर्तव्यं-परिहरणीयं-परित्याज्यमित्यर्थः।

---

1. *b.* पत्य for अपेत्य of *a b d.* m. 2. *a. b. d.* पृथगेव for पृथगिव of *b.* 3. m. adds इति after मवति. 10 C and *a* ms used by Bt. read रिच्यते. 11. Bt. अस्ति for अस्ति. 13. A Bt. conclude. III. 1. 2 after निर्वचनाय. 14 *g* omits हि before प्रमाय 15. *a. b d.* read अभ्यर्थितः for अभ्यर्थित. 17. *bf.* m. read परिषदं.....वि दुक्षः for परिषद्यमिति, *b.* omits हि after परिषद्; *a. b. d.* omit परिहर्तव्यं after परिषदं हि and add it after परित्याज्य.

---

8. The quot. is RS. VII. 4. 7.

14. For न हि प्रमाय etc. see next section

किं पुनस्तत्। **अरणस्य रेक्णः**। अरणस्य-अपगतार्णस्य-अपगतोदकसंबन्धस्य परकुलजातस्य रेक्णः-यद्यत्स्वं धनं तत्परिहर्तव्यं न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः। न हि तत्पुत्रत्वेन कल्प्यमानमपि पुत्रकार्येष्ववतिष्ठते परकीयत्वात्। यत एवमतो ब्रूमः-**नित्यस्य रायः पतयः स्याम पित्र्यस्येव धनस्य**। यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति तस्यैव ह्युपर्यगौणं स्वामित्वं भवति। एवं यदेव स्वयंजातमपत्यं भवति तदेव मुख्यं भवति नेतरत्-क्षेत्रजं वा मौतकं वा। यत एवमतो ब्रूमः-यदेव नित्यमात्मीयमगौणं स्वयमुत्पादितं पुत्राख्यं रायः-धनं तस्यैव वयं पतयः-पालयितारः स्याम मा परकीयस्येत्यभिप्रायः। कस्मात्पुनरेवं ब्रूमहे। इतो यस्मात् **न शेषो अग्ने अन्यजातमस्ति**। नास्ति शेषो-नास्त्यपत्यमन्येन जातं हे अग्ने य एव जनयति तस्यैव हि तद्भवति नेतरस्येत्यभिप्रायः। **अचेतानस्य** य एव हि अचेतयमानो भवत्यविद्वान्प्रमादी तस्यैव **अचेतयमानस्य-प्रमत्तस्य**-अश्रुतवतो धर्मान्पारितोषमात्रं **भवति**-ममेदमपत्यमिति नापत्यकार्येवतिष्ठते। यत एवमतो ब्रूमः-**मा पथो विदुक्षः** मास्मानेतस्मात्पितृपितामहप्रपितामहानुसन्ततात्पथो-मार्गेण केनचित्प्रत्याख्यानद्वारेण **विदुक्षः**। त्वं देहि नः पुत्रमौरसमित्यभिप्रायः। इति समस्तार्थः।

अथैकपदनिरुक्तम्। **अरणोपार्णः** अपगतोदकसंबन्ध इत्यर्थः। **रेक्ण** इति धननाम। तद्धि **रिच्यते**-अतिरिच्यते इतो लोकादमुं लोकं **प्रयतो** म्रियमाणस्येत्यर्थः। **शेष इत्यपत्यनाम**। तद्धि **शिष्यते**-इहैव लोकेवतिष्ठते पितुरमुं लोक प्रयतः गच्छत इत्यर्थः॥

एवमस्यामृचि न शेषो अस्मे अन्यजातमस्तीत्यनेन विशेषलिङ्गेनोपपन्नमेतद्भवति-जनयितुरेव प्रजा भवति न क्षेत्रिणो नापि भर्तुरन्यस्य वा कस्यचिदिति। एवं चैष शब्दार्थ उपपद्यते-यस्मादेवापत्यं तनं भवति तस्यैवापत्यमिति।

---

2. *d m* परकुलजस्य for परकुलजातस्य. 3. *d m* अवतिष्ठते; *b* अवतिष्ठति 7. *a. b d m* रायो धन for रा धनं of *b*. 8. *a b d*, पालयितार [स्याम *b*.] पतय स्याम; *m* इत्यर्थः for इत्यभिप्रायः 10 *a b d* read अचेतानस्य for अचेतनस्य of *j*. 11. *d* तस्य वा for तस्यैव; *a. b d. m* अचेतानस्य for अचेतयमानस्य of *b*. 12. *a. b d* धर्म, *m* धर्मान् for धर्मान् of *b*. 13 *b*, प्रतिपित्[ ] for पतस्यापित्[ ] of *a. b d. m*; *j*. पितामानु[ ]. 14, *j*. इति समाप्तार्थः।

अनेनैव चाप्त्यशब्देनिर्वचनप्रसङ्गेनैव मन्त्रो व्याख्यातः । उत्तरं च सावशेषम-
प्त्यशब्दे प्रसक्तानुप्रसक्तमेवोच्यते ।-तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

"न हि ग्रभायारणः सुशेवोन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित्स पत्या नो वाज्यभीषाळेतु नग्नः ॥"

न हि गृहीतग्योरणः सुशेवतमोप्यन्योदर्यो मनसापि न मन्तग्यो ममायं पुत्र इत्यथ स ओकः पुनरेव तदेति येते[1] आगतो भवत्योक इति निवासनामोच्यते । ऐतु नो वाजी वेजनवानभिपद्यमाणः सपत्नाव-वजातः स एव पुत्र इति । अथैतां दुहितृदायाद्य उदाहरन्ति पुत्र-दायाद्य इत्येके ॥ ३ ॥

न हि ग्रभायेति । न हि ग्रहीतग्यः—नार्ङ्कर्तव्य'—पुत्रो ममायमित्यनेनाभि- 10
प्रायेण । कः पुनरसौ नात्मीयीकर्तव्यः । अरणः—अपार्णः—अपगतोदकसंबन्धः—
अन्यकुलज. । यद्यपि सुशेव एव स्यात्सुखतमः परिचारता दिनैषी तथा अपि
अन्योदर्यः—अन्येनोदीरनादितमो जातोन्यजायोदरसंभूतो वा । यो हि स्वस्या
जायाया संभवति स स्व एवोदरे संभूतो भवति ।

"अधो ह वा एष आत्मनो यज्जायेति विज्ञायते" । 15

तस्माद्योन्यजायोदरसंभूतः स मनसापि न मन्तव्यो ममायमिति किं पुनः
पुत्रत्वेन परिकल्पयितव्य इति । किं कारणं मनसापि न मन्तव्य इति । अधा चिदोकः
पुनरित्स पति । अधराब्दोयशब्दस्यार्थे वर्तते स च हेत्वर्थः । यस्मान् ओकः-स्वं

---

1. *m.* वा for च after अनेनैव 2. *a b. d.* अपदशब्दप्रसक्तानु°. 4. *f.* अधीपालेतु for अभीषाळेतु. 6 B. C D. R. *m.* add पुत्र after ममाय, In. omits it. 9 A. Bl. Conclude III i. 3. after इत्येके. 10. *a. f d. m.* नात्मीयीकर्तव्यः for नार्ङ्कर्तव्यः 12. *b* reads परिचरितो for परिचारिता of *a. b d. m.* 14 *m.* स स्वस्य पत्र for स स्व पत्र. 17. *m* पुत्रत्वे for पुत्रत्वेन. 18 *j.* अध शब्द° for अधराब्दो of *b a. b d. m.*

---

1. The quot. is RS. VII. 4. 8.
17. ?

निवासस्थानं-स्वं वेशं बहुनापि कालेन स एति-तद्वश्य एव भवति तस्मादपुत्र एवासौ। यत एवमतो ब्रवीमि-**आ नो बाज्यभीषाळेतु** नर्य्यः। **एतु**-आगच्छतु नः वाजी वेजनवान्-परेभ्यो भयदाता **अभीषाट्**-अभिषहमाणः-अभिभवन्सपत्नान्-**नर्य्यः**-नरजातः-शिशुरित्यर्थः। **स एव पुत्र** आगच्छतु किं नः परकीयैः पुत्रैः संकल्पितैरित्यभिप्रायः।

अथैतां दुहितृदायाय उदाहरन्ति। इदमुक्तम्-अपेत्य यस्मात्पितुः सकाशात्तत्तं भवति तस्मादपत्यमिति तदिदमुभयोरपत्यत्वं प्राप्नोति दुहितुः पुत्रस्य च। दुहितापि अपेत्यैव ततो भवति पितुः सकाशात्। तत्रैवं सति उभयोर्दुहितृपुत्रयोरपत्यकार्याणि दायाद्यादीनि अविशेषेण प्राप्नुवन्ति तदिदं विचार्यते तदभिप्रायोऽयमध्यारूढः। एतामृचं शासद्वह्निरित्यादि या वक्ष्यमाणा तां दुहितुर्दायाये अर्थे उदाहरन्ति धर्मविदः। अस्यामृचि वक्ष्यमाणायां दुहितुरपि दायाद्यत्वमस्तीति दृश्यते।

पुत्रदायाय इत्येके। एके पुनर्धर्मविदो मन्यन्ते यत्पैतृकं वित्तं तत्पुत्रस्यैव दायाद्यं न दुहितुरिति।

यथा दुहितापि दायादमर्हति तथेयमृग् निदर्श्यते—॥ ३ ॥

"शासद्वह्निर्दुहितुर्नप्त्यं गाद्धितः क्रतस्य दीधितिं सपर्यन्।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शाम्न्येन मनसा दधन्वे ॥"

यशास्ति चोढा संतानकर्मणे दुहितुः पुत्रभावम्। दुहिता दुर्हिता दूरे हिता दोग्ध्रेर्वा। नप्तारमुपागमद्दौहित्रं पौत्रमिति। विद्वान् प्रजननयज्ञस्य रेतसो धाङ्गादङ्गात्संभूतस्य हृदयादधिजातस्य मातरि

---

4. *b.* reads न for किं *v. l.* of *a. b. d. m.* 5. *b.* इत्यभिप्रायः, *a. b d. m.* इत्यर्थः - 7. *a. b. d. m.* उभयोरपत्यत्वं दुहितृपुत्रयोः प्राप्नोति, *b.* उभयोरपत्यं प्राप्नोति दुहितुः पुत्रस्य च. 8. *b.* अपेत्येव for अपेत्यैव of *a b. d. m.* 9. *a b. d. m.* add इति after दायाद्यादीनि. 10. *b. d. m* दुहितृदायाद्येऽर्थे. 12 *d.* पैतृकवित्तं. 17. *b.* बोल्हा, R. and the Mss. बोढा.

---

16. The quot. is RS. III. 31. 1.

प्रत्यृतस्य विधानं पूजयन्। अविशेषेण मिथुनाः पुत्रा दायादा इति। तदेतदृक्-श्लोकाभ्यामभ्युक्तम्।

अङ्गादङ्गात्सं भवसि हृदयादधिजायसे।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्॥

इति।

अविशेषेण पुत्राणां दायो भवति धर्मतः।
मिथुनानां विसर्गादौ मनुः स्वायंभुवोऽब्रवीत्॥

न इतर इत्येके। तस्मात्पुमान्दायादोदायादा स्त्रीति विज्ञायते। तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसमिति च । स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः। पुंसोपीत्येके शौनःशेपे दर्शनात्। अधा-10 नृमतीवाद इत्यपरम्।

अमूर्या यन्ति जामयः सर्वा लोहितवाससः।
अघातरं वृषा योषास्तिष्ठन्ति हतधर्मनः॥

1². A. omits the first line अमूर्या.....to लोहितवाससः, all others have it.

---

². The following verses are written with accents in some Mss. and are so printed in Bi. and J. as well as in R. Many mss. accent the first line only of the first verse. Vaidic recitation does not retain the tradition of accents here. Yet, since the first verse is referred to by Yâska as ऋक्, and the second as श्लोक, I print the first with accents and the second without them. The first verse is referred to in गोभिलगृह्यसूत्र II, 8. 21, and occurs in आश्वलायनगृह्यसूत्र I. 15. 11. I cannot yet trace the source of the second.

8. पुत्रदायादोदायादा स्त्री ति विज्ञायते ।

9 तस्मात्स्त्रियं .....न पुमांसमिति च । *cfr* Taitt. Sam. VI. 5. 10.

1². अमूर्या etc. – this verse occurs with slight variation in Ath. Sam. I. 17. 1.

अभ्रातृका-इव- योषास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय हतवर्मान इत्यभ्रातृकाया अनिर्वाह औपमिकः । तस्योत्तरा भूयसे निर्वचनाय ॥ ४ ॥

शासद्वहिरिति । एषा त्रिष्टुप् । ऐन्द्रे सूक्ते विश्वामित्रेण दृष्टा । माध्यन्दिने सवने उक्थपर्यायेष्वच्छावाकस्य यच्छस्त्रमभिजिद्विश्वजिदादिष्वहीनकेष्वहःसु अहीनसूक्तं नाम तत्रेयं शस्यते । "न जामये तान्वे"—इतीयमपि अनयैव समानार्षविनियोगदैवतच्छन्दस्का । **शासद्वहिः-प्रशास्ति**-प्रख्यापयति-प्रशापयतीत्यर्थः । कः पुनरसौ प्रशास्तिः । किं वा प्रशास्तीति । **वोढा** य उद्वोढा स्त्रियो भवति स तस्यां या जायते दुहिता तस्या पुत्रभावं प्रशास्ति-**संतानकर्मणे** अर्थाय । **दुहिता दुर्हिता** । सा हि यत्रैव दीयते तत्रैव दुर्हिता भवति । **दूरे** वा सती सा पितुः **हिता**-पथ्या भवतीति दुहितेत्युच्यते । **दोग्धेर्वा** । सा हि नित्यमेव पितुः समाशाद्व्यं दोग्धि प्रार्थनापरत्वात् । आह-कथं पुनर्गम्यते प्रशास्ति वोढा संतानकर्मणे दुहितुः पुत्रभावमिति । उच्यते-इतः । यस्मात् **नप्तृं** गात्-**नप्तारमुपागमत्**-उपागच्छति चेतसा । **दौहित्रं**-दुहितृपुत्र **पौत्रमिति** । पौत्रो ममायमित्येवमुपागच्छति । न चापुत्रस्य पौत्रः स्यात् । उपागच्छति च दुहितुः पिता पौत्रो ममायमिति दौहित्रम् । तस्माद् दुहितापि पुत्र एव यस्याः पुत्र पौत्रो ममायमित्येवं चेतसा उपगम्यते । **विद्वाँ ऋतस्य दीधितिं सपर्यन्** । **विद्वान्** कश्चित् । **ऋतस्य**-प्रजननयज्ञस्य । ऋत इत्येतदपठितं यज्ञनाम । **दीधितिं**-विधानमित्यर्थः । प्रजननयज्ञविधानमविशेषेण **सपर्यन्** पूजयन्नित्यर्थः । यथैव हि पुत्रजनने प्रजननयज्ञः क्रियते तथैव हि दुहितृजननेऽपि-यैरेव मन्त्रैर्यैरेव च विधानेन पुत्रगर्भ आधीयते

तैरेव मन्त्रैस्तेनैव च विधानेन दुहितृगमोंपि । अथ वा ऋतशब्देन रेत उच्यते । तद्वि **अङ्गादङ्गात्** संभूतं सर्वगात्रेभ्यो हृदयानुस्मरणनिमित्तेन गर्भजनने **मातरि** प्रत्यृतं-प्रवृत्तं भवति रेत. । तस्य **रेतसो विधानमविशेषेण पूजयन्** स बोटा दौहित्रं पौत्रो ममायमित्येवमुपागच्छति चेतसा । येनैव हि विधानेन पुत्रजनने रेत उत्सृज्यते तेनैव हि दुहितृजननेपि तत्रैव सति रेतउत्सर्गविध्यविशेषात् प्रजननयज्ञा- 5
विशेषाद्वा **अविशेषेण मिथुनाः** पुत्राः स्त्रियश्च उभयेपि **दायादा** इत्येवमेके धर्मविदो मन्यन्ते । **तदेतदृक्श्लोकाभ्याम् अभि** आभिमुख्येन **उक्तं-मिथुनाः पुत्रा दायादा इति । "अङ्गादङ्गात्संभवसि", "अविशेषेण पुत्राणाम्"-** इत्येताभ्याम् ।

शाखद्वहिः—इत्येतस्या ऋचः प्रथमोर्धर्चो व्याख्यात. । 'पिता यत्ते दुहितुः—10
इत्ययं द्वितीय उपरिष्टादस्य पादस्य व्याख्यास्यते अनयोरर्धर्चयोरन्तरा तदेतदृक्श्लोकाभ्यामभ्युक्तमित्यत आरभ्य प्रसक्तानुप्रसक्तं दायाद्यधर्मोथितमेव पूर्वोत्तरपक्षसंबन्धादाचारगतं बहु व्याख्यायते मन्त्रविषयख्यापनाय ईदृशोपि मन्त्राणां विषयो भवतीति धर्मसंविज्ञानाय च । सर्व एवायमेवंप्रकारो धर्मो मन्त्रेभ्य एव निर्वर्तिष्यतेदंतेन न्यायितं भवति ॥ 15

"अङ्गादङ्गात् संभवसि"—इत्येतामृचं प्रवासादेत्य पुत्रस्य मूर्धनि जपन् जिघ्रति । अनुष्टुबेषा । स पुत्र उच्यते—हे पुत्र । अङ्गात् अङ्गात् संभवसि त्वं

---

2. *b d. m* add हि after तत् and before अङ्गात्, *b.* omits it; *a b d. m* omit यत् before सम्भव and तत् after it read by *b*; *m*, however, has the latter, *a b. d* गर्भजन्मने 3 *b.* विधान न विशेषेण for विधानमविशेषेण 4. *b.* उपग-च्छति for उपागच्छति of *a b d m.* 4–5 *a b d* read पुत्रजन्मने and दुहितृजन्मने for पुत्रजननने and दुहितृजनने. 5. *m.* omits हि after नैनैव; ' यज्ञाविशेषा° for ेयज्ञविशेषा° 11. *b d. m* add प्रकारेण after एतेन

---

11. व्याख्यास्यते : *c.* in the next section, after the interpretation of this line in this section.

17. जिघ्रति, *Cf.* ' विप्रोष्य ज्येष्ठस्य पुत्रस्योमाभ्यां पाणिभ्यां मूर्धानं परिगृह्य जपेद् यदा वा पिता म इति विद्वानेनस्य वाङ्गादङ्गात्सम्भवसीति । (Gobhila Gr. Sû. II 8 '21.) or ' प्रवासादेत्य पुत्रस्य शिरो मुखं नयनि अङ्गादङ्गात्.....शतमिनि मूर्नि जिघ्रेत्' (Âśv. Gṛ. Sû. I. 15. 11.)

हृदयादधिजायसे यदनुक्तम्—अङ्गादङ्गात्संभूतस्य हृदयादधिजातस्य-इति । तदनेनापि स्पष्टयितरेण मन्त्रेणोच्यत इति पूर्वस्यास्पष्टार्थतायां स्पष्टीकरणार्थोयं मन्त्रः । तत्र हि **ऋतस्य दीधितिं सपर्यन्**-इत्यत्र ऋतस्य प्रजननयज्ञस्य रेतसो वा **विधानमविशेषेण पूजयन्**नित्युक्तम् । तत्पुनरेतदस्पष्टम् । इह पुनरङ्गादङ्गात्संभवसि हृदयादधिजायसे इत्येवमुच्यते । तत्रैवं सति यथैव पुमानङ्गादङ्गात्संभवति हृदयाच्चाधिजायते तथैव दुहितापीत्यविशेष उपपद्यते । तस्मात्साधूक्तम्-" अविशेषेण मिथुनाः पुत्रा दायादा इति ।" **आत्मा वै पुत्रनामासि** । यस्मादङ्गादङ्गात्संभूतस्त्वं हृदयादधिजातस्तस्मादात्मैव त्वं ममैवावयवभूत इत्यभिप्रायः । केवलं तु पुत्रनामा त्वमहं पितृनाम्ना एतावानावयोर्विशेषो नाममात्रं भिन्नमित्यभिप्रायः । **स त्वं जीव शरदः शतम्**-इत्याशीः । सर्वस्मिन्नपि संवत्सरे शरदेव दुर्जीवा प्रचुररोगत्वाच्छरदः तस्माच्छरदेवोपलक्ष्य संवत्सरशतमेतदायुरुपास्यते ॥

अविशेषेण पुत्राणां दायो भवति धर्मतः मिथुनानाम् । क एवमाह । **मनुः स्वायंभुवः** । स्वयंभुवोपत्यं स्वायंभुवः । कस्मिन् काले स एवमाह । **विसर्गादौ** सृष्ट्यादावित्यर्थः । पूर्वमर्धं श्लोकस्य ऋज्वेव । एवमेताभ्यामृक्श्लोकाभ्यामुक्तमविशेषेण पुत्रस्य दुहितुश्च दायादत्वम् ॥

न दुहितर इत्येके न दुहितरो दायायमर्हन्तीत्येवमेके धर्मविदो मन्यन्ते । ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति-**तस्मात् पुमान् दायादः स्त्री अदायादा इति विज्ञायते**-एतस्मिन् ब्राह्मणे विचार्यमाणे ज्ञायते । न दुहितरो दायाद्यमर्हन्ति पुमाने-

---

1. *a b. d.* add पनत् after तत्. 2. *d* पूर्वस्यास्पष्टार्थतायाम् ! ; *b* स्पष्टार्थीकरणार्थं for °करणार्थोय. 9. *m* adds तु after अहम् ; *a. b.* read शत जीव for स त्व जीव 10 *a. b d. m.* सर्वस्मिन्नपि सवत्सरे शरदेव [*m.* शरदेव] दुर्जीव्य [*m* दुर्जीवा] प्रचुररोगत्वाच्छरद. ; *b.* सर्वस्मिन्नपिसवत्सरे शरद बहुजीवा प्रचुररोगा भवन्ति । तस्माच्छरद । 11. *a. b. d* शरदेवो³ for शरदेवो 14 *b. d m* add अपि after पनाम्या. 16. *m.* दायाद्यत्वं for दायाद्यम् 17. *a. b. d* दर्शयन्ति for दर्शयति; *a. b d. m* add इ after इति. 18. *d. m.* read after विज्ञायते, -यदुच्यते स्पाली न दास्यथ तस्मात्पुमान्दायादोदायादा स्त्रीति विज्ञायते पतस्मिन् ब्राह्मणे etc.

---

13 मनुः - *Cf* यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा । Manu IX 130; also compare 133 and 139 of the same chapter. The above verse however is not to be found in the present Manusmriti.

वार्हतीति । तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसमिति च । एतदपरं दर्शनं दुहितुरदायादत्वं लिङ्गतो दर्शयति—

"अथ यत् स्थाल्यां परास्यन्ति हवनकर्मणो न तया जुह्वति न दारुमयं परास्यन्ति हवनकर्मणः दारुमयेनैव जुह्वति तस्मात् स्त्रियं जातां परास्यन्ति परस्मै प्रयच्छन्ति न पुमांसम् ।"

तस्मात्पुमानेव पैतृकस्य वित्तस्येष्टे न दुहिता । किं च स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः । प्रदीयते हि परस्मै स्त्री विक्रीयते च वैवाहिकेन शुल्केन ।

"विक्रयं चाप्यपत्यस्य मतिमान् कोनुमंस्यते ।
स्वल्पो वाप बहुर्वापि विक्रयस्तावदेव सः ॥"

इति भगवता वासुदेवेनोक्तं सुमद्राहरणे । तथा च ब्राह्मणमपि दर्शयति—

"चातुर्मास्येष्वनृतं वा एषा करोति या पत्युः क्रीता सती अन्ययान्येश्वरति"

इति । तस्माच्छुल्केन प्रदानं विक्रयः कन्याया इत्युपपद्यते । अतिसर्गः परित्यागः परित्यज्यते हि कन्या स्वबन्धुभिः स्वयंवरे यो बलिष्ठः स गृह्णात्विति । यो वा तुभ्यं रोचते तं वृणीष्वेति । स एष क्षत्रियाणामेव स्वयंवरधर्मो नेतरेषां वर्णानामिति । स पुनरयमितरेषामपि वर्णानामदायार्हत्वे कन्याया लिङ्गं भवति । तस्मान्न दायमर्हति कन्येति ॥

3–4. *a. b. d.* omit यत् before स्थाल्यां, *d.* omits न तया जुह्वति न दारुमयं परास्यन्ति हवनकर्मणः. 4. *a. b. d. m* add कारणात् after तस्मात् 5. *a b. d. m.* omit न पुमांसम् 8. *a. b. d. m.* विक्रयं चाप्यपत्यस्य, *a. b.,* however, विक्रयं वाप्यपत्यस्य; *a d.* appear to read कोनु मन्यते. *bi.* विक्रयमादमपत्यस्य मतिमान् को न मन्यते 9. *a. b. d.* read स्वल्पो वाप्यबहुर्वापि 13. *bi.* योऽतिसः स गृह्णातु. 15. *d* अदायादार्हत्वे, *m* अदायादार्हते for अदायार्हत्वे of others; *j.* omits न after तस्मात् read by all others.

3–5. अथ यत्स्थाल्यां etc. Two Brāhmaṇa texts are here referred to in the Nirukta. The exact references however are not yet found.

8. विक्रयं चापि etc.–*the quot. is not traced.*

11. ब्राह्मणमपि etc.–the quot. is not traced.

12. उपपद्यते–*Cf.* शुल्कयतेन मूल्येन यत्र दुहितृविक्रय Manu. IX. 100.

पुंसोपीत्येके शौनःशेपे दर्शनात् । यदुक्तं दानविक्रयातिसर्गैर्हेतुभिरदायादत्वं स्त्रिया इति । अनेकान्त एषः । पुंसोपि दानविक्रयातिसर्गौ विद्यन्त एव । पुरुषोपि हि परस्मै दीयते । एवं लुक्तम्-

"दत्तक्रीतकृत्रिमक्षेत्रजौरसाः पुत्राः"

इति । तथा च शौनःशेपे दर्शनात् । शौनःशेप आख्याने बह्वृचानां भारते च शुनःशेपस्य विक्रयो दृष्टः-

'विक्रीतं मध्यमं मन्ये'

इत्येवमादि । तथा च परित्यागोपि दृष्टः—यथा विश्वामित्रेण मधुच्छन्दआदीनाम् । तस्मादनैकान्तिकत्वादेवैषां हेतूनामुभयोरपि दायादत्वमित्येके मन्यन्ते ॥

अभ्रातृमतीवाद इत्यपरम् । आचार्यमतमिति वाक्यशेषः । यैवाभ्रातृका भवति कन्या सैव पित्र्यं धनमर्हति नेतरा सभ्रातृका । पुरुषेषु हि पितुः पिण्डदातृषु निष्ठासु न स्त्री धनमर्हति सा हि परकीयं वंशं वर्धयति न स्वम् । तस्मादस्त्री नार्थभागिनी । अभ्रातृकायां पुनरयं विशेषः—अभ्रातृकायाः पितुरन्यः पुत्री नास्तीति दौहित्रः पिण्डदानादिषु कार्येष्ववतिष्ठते इति भवत्यर्थभागिनी अभ्रातृका दुहिता । तदुक्तम्—

'पितोत्सृजेत् पुत्रिकामनपत्योमि प्रजापतिं चेत्यस्मदर्थमपत्यमिति संवाद्याभिसन्धानमात्रं पुत्रिका'

इत्येकेषामिति ।

---

2 *m* adds हि after पुंसोऽपि 9 *a. b d* omit एव after अनैकान्तिकत्वात्, *a b. d m* add एव after दायादत्वमिति 11 *m.* adds न before पुरुषेषु। 13 *a b, d* अभ्रातृका पितु 13. *g* अस्मादर्थं for अस्मदर्थं.

---

5 उक्तम्-*cade* Mann IX. 158, 159, 160.

6 बह्वृचानां-Ait. Br XXXIII 3.

7 The quot is not traced.

8 मधुच्छन्दआदीनां-*cade* Ait Br. XXXIII. 6. Here, however, मधुच्छन्द and the younger brothers appear to be favoured and those older than मधुच्छन्द cursed by विश्वामित्र.

13 The quot. is not traced.

निगममप्येतस्मिन्नर्थे उदाहरन्ति—अभ्रातरं इव योषास्तिष्ठन्ति हतवर्त्मन

इति । निगमस्य समाप्तेरर्थमाह—**अभ्रातृका इव योषास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय हतवर्त्मन इति** । अस्यामृचि अभ्रातृकायाः कन्यायाः **अनिर्वाढः**—अनिर्वहणं-विवाहनिषेध इत्यर्थः । **औपमिकः**—उपमया दर्शितः । अभ्रातर इवेति । **अमूर्या यन्ति जामयः सर्वा लोहितवाससः । अभ्रातरं इव योषास्तिष्ठन्ति हतवर्त्मनः ॥** इयमर्चेण प्रसवमार्गवहनरोगिणी या स्त्री भवति तस्यास्तत्प्रतिकारकर्मणि विनियुज्यते । **अमूर्या यन्ति**—स्रवन्ति नाड्यो रक्तमजस्रमविरताः स्त्रिय इवातिलोहितवस्त्राः **सर्वाः** एतास्तिष्ठन्तु उपरमन्तु हतलोहितवहनमार्गा अस्य मन्त्रस्य वीर्येण । कथं पुनस्तिष्ठन्तु । **अभ्रातर इव योषाः** यथा काश्चिदभ्रातृका योषा हतभर्तृवंशमार्गास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय एवमेता नाड्यस्तिष्ठन्त्विति । एवमस्यामृचि अभ्रातृकाया अनिर्वाह उपमया लिङ्गतो दर्शितः ॥

तस्य—अनिर्वाहस्य **उत्तरा ऋक् भूयसे**—बहुतराय **निः**-निर्विचिन्त्य **वच-नाय ॥ ४ ॥**

" अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः ॥"

अभ्रातृकेव पुंसः पितृनेत्यभिमुखी संतानकर्मणे पिण्डदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणाजी । गर्तः सभास्थाणुर्गृणातेः सत्यसंगरो भवति तं तत्र यापुत्रा यापतिका सारोहति तां

---

1. *b* omits अपि after निगमम् 6. *m.* adds हि after सर्वा. 11. *b. d. m.* संतानकर्मणे, *bi.* °नकर्मेणि; *m.* अभ्रातृकानिर्वाह 13. *a. b d m.* omit नि-. 18. Bl. नयति for न पतिं of A. B. C. D. E; Br. gives the variant as दाक्षिणायानी

---

5. For अमूर्या etc. *vide* Ath. Sam. I 17. 1.

16. The quot. is RS. I. 124. 7.

तत्राक्षैरामन्ति ला रिक्थं लभते । श्मशानसंचयोपि गर्त उच्यते गुरतेरपगूर्णो भवति । श्मशानं श्मशायनं श्म शरीरं शरीरं शृणातेः शम्नातेर्वा । श्मश्रु लोम श्मनि श्रितं भवति । लोम लुनातेर्वा लीयतेर्वा ।

"नोपरस्याविष्कुर्याद्यदुपरस्याविष्कुर्याद्गर्तेष्ठाः स्यात्प्रमायुको यजमान"

इत्यपि निगमो भवति । रथोपि गर्त उच्यते गृणातेः स्तुतिकर्मणः । स्तुततमं यानम् ।

"आ रोहथो वरुण मित्र गर्तम्"

इत्यपि निगमो भवति । जायेव पत्ये कामयमाना सुवासा ऋतुकालेपूषा हसनेव दन्तान् विवृणुते रूपाणीति च्यतस्य उपमाः ।

"नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद्भवति ।"

इत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षः ।

पितुश्च पुत्रभावः ॥ पिता यत्र दुहितुरप्रत्तायाः रेतःसेकं प्राजंयति संदधात्यात्मानं संगमेन मनसेति ॥ अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति ज्येष्ठं पुत्रिकाया इत्येके ॥ ५ ॥

---

1. A and the variant given by Bi. तत्राक्षेण मन्ति. 2. B गुरुते. 3. Bi. gives variant as शून for श्रित. 4. C. D. read आवि कुर्यात् 11. Bi. gives the variant as नाभ्रातृका for नाभ्रात्री of all our mss 15. A. Bi conclude III. i. 5. after इत्येके.

---

4. The quot. is not traced.

9. The quot is RS. V. 62. 6.

11. The quot. is not traced.

अभ्रातेव पुंस इति । दीर्घतमःपुत्रस्य कक्षीवत आर्षम् । त्रिष्टुप् । औपसी । प्रातरनुवाकाश्विनयोः शस्यते । **अभ्रातेव पुंसः** । यथा अभ्रातृका कन्या दत्तापि सती पित्रा स्वीकृतापि भर्त्रा पुनः **प्रतीची पितॄन्** एव पितृवंशमेव **अभिमुखी एति संतानकर्मणे पिण्डदानाय न पतिं** पतिवंशमित्यर्थः । सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्धयति न भर्तृवंशमिति तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते । **गर्तारुगिव सनये धनानाम्** । **गर्तारोहिणी इव** काचिन् दाक्षिणात्या स्त्री सा यथा **गर्तः** सभास्थाणुस्तमारोहति **सनये** लब्धये **धनानाम्** । एवम् **उषाः** अपरकाले राज्ञी नभ आरोहति । किंच । **जायेव पत्य उशती सुवासाः** । यथा जाया पत्ये भर्त्रे सुवासा भूत्वा ऋतुकाले आत्मानं दर्शयत्येवमुषा आत्मानं दर्शयति जनानाम् । किंच **उषा हसेव निरिणीते अप्सः** । यथा हसना हसन-स्वभावा दन्तानात्मनो दर्शयति एवमुषा अपि आत्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विवृणुते शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि प्रकाशोदकेन धौतानीव करोति ।

चतस्रः एता **उपमाः** अस्यामृचि ।—अभ्रातेव पुंस इत्येका । गर्तारोहिणीवेति द्वितीया । जायेव पत्य इति तृतीया । हसेवेति चतुर्थी । अत्र प्रथमयोपमया अभ्रातेव पुंस इत्यनया अभ्रातृकाया अनिर्वाहो दिदृक्षते । यथा अभ्रातृका पितृनेव प्रत्येति न पतिमेवमुषा आदित्यमेव प्रत्येति । एवमभ्रातृका कन्या यस्मिन्नेव वंशे उत्पन्ना भवति तमेव प्रकाशयति वर्धयति न भर्तृवंशम् । इत्येवमुपमया नासौ वोढव्येतदुपप्रदर्शितं

---

1. *d. m.* पति for इति, *a b. d.* read गौतमपुत्रस्य, *m* दीर्घतमस पुत्रस्य for दीर्घतमः पुत्रस्य. 3 *a. b. d. m.* read उढा for स्वीकृता; *a. b. d.* add पुमः after पुनः. 4. *a b. d m.* सन्तानकर्मणे पिण्डदानार्थं न पतिवंशमित्यर्थः; *b* सन्तानकर्मणं पिण्डदानाय नयति पतिवंशमित्यर्थं. We read in accordance with the text of the *Nirukta* given above. 7 *d* दाक्षिणा for दाक्षिणात्या; *a. b. d m.* add after आरोहति,—अस्मिन्निवपनपीठमुपवेशयतीत्यर्थः । तत्र गता सती असुरा रिक्थं स्वस्मै क्लिनत्ता दापयन्ति रिक्थमिति दाक्षिणात्येषु देशेषीति ; and then proceed to read सनये लब्धये etc. 8 *a. b. d. m* राज्ञी for राज्ञ्या of *b*. 9. *a b. d. m* ऋतुकालेषु for ऋतुकाले. 10–11. *a. b. d.* add स्त्री after हसनस्वभावा ; *b. d.* omit हसना ; *m.* adds स्त्री after हसना ; *d.* adds हसनस्वभावा again before दन्तान. 12. *a. b. d. m.* add स्वेन before प्रकाशोदकेन. 14. *b.* प्रथमोपमा for प्रथमयोपमया 17. *a. b. d. m* नासावुद्वोढव्येतयेनदुपदर्शितम्

भवति पुत्रार्थत्वाद्विवाहस्य । तस्मादवर्धयितृत्वाद्भर्तृवंशस्य नर्धयितृत्वाच्च पितृवंशस्य अभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते ।

निगमप्रसक्तस्य तत्त्वमाचष्टे—**गर्तः सभास्थाणुः** इति अक्षनिवपनपीठमित्यर्थः । **गृणातेः** स हि **सत्यसंगरो भवति** सगीर्यते हि तत्र सत्यमिदमत्र पतितमिदमत्र पतितमित्येवं प्रायेण । कितवास्तत्रानृतं ब्रुवते । **तमेवंलक्षणं गर्तमारोहति** या स्त्री सा गर्तावगित्युच्यते । तदेतद्भर्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुर्दीक्षिणात्येषु अपुत्रायाः अपतिकायाः स्त्रियाः प्रसिद्धम् । तयैव प्रसिद्धया निरुच्यते । देशसमाचारस्यवस्थापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति । **तं तत्र या अपुत्रा या अपतिका सा आरोहति** तं सभास्थाणुं तत्र कितवमध्ये अवस्थितं या अपुत्रा स्त्री या अपतिका सा आरोहति तस्मिन्नुपविशतीत्यर्थः । ततः **सा भर्तृबन्धुभ्यः सकाशात् रिक्थं लभते** यत्तस्या भर्तृसत्तो धनांशस्तम् । एवमसौ सनये लब्धये धनानां गर्तमारोहति ।

गर्तशब्दप्रसक्तमुच्यते—**श्मशानसंचयोपि गर्त उच्यते** । गुरतेरध्यनार्थस्य । स हि लोकविनाशायाभ्युद्यत इव भवति । यानि हि तत्र पिशाचादीनि सत्त्वान्याश्रितानि भवन्ति तानि जनमरणमाशासते म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति । **श्मशानं श्मशयनम्** इत्याख्यानप्रसक्तमुच्यते । तत्र हि श्म शेते-शेते श्मशयनं सत् तत् श्मशानमित्युच्यते । श्मशब्दार्थमाह—**श्म शरीरम्** इति । तद्धि तत्र शेते तत्र हि तन्निक्षिप्यते मृतस्य सतः । **शरीरं शृणातेः शम्नातेर्वा** । कृतव्याख्यानमपि पुनराह मुख्यत्वादस्य । तत्र औपमिकं घृत्रसंबन्धात् न हि घृत्रस्य

---

1. *d* omits च before पितृवंशस्य. 3. *b* अक्षनिर्वपणपीठ for अक्षनिवपनपीठम् 4 *d* गर्हीयते for सगीर्यते 8. *a. m.* read त before तत्र in the प्रतीक, others do not. 9. *a. l. d. m.* add या before अपतिका, *b*, omits it. 11. *b* धनांशस्तम् । एवमसौ etc., *a d.* read धनांश. । तमेतमसौ. 13 *b* गर्तप्रसक्त for गर्तशब्दप्रसक्तम् of *a. b d. m.* 14. *d.* omits म before हि; *a, d* read शिवादीनि for पिशाचादीनि, *m.* reads पिशाचशिवादीनि. 15 *a. b d* read जनमरणकामाश्या-शासते, *d.* जानेषु for जनेषु. 16. *d, m.* omit अत्र after शेते 18. *b. d m* add शरीरं शृणातेः before शम्नातेर्वा, *b*, शम्नातेर्वा only.

---

18 मृतस्य मन —*Cf* "श्मशाने वा निधत्तनु" Ath. Sam. V 31. 8.

19. For कृतव्याख्यान° *vide* Supra Nir. II 16.

मुख्यं शरीरम्। श्मशब्दप्रसक्तं निराह-श्मश्रु लोम इति तद्धि श्मनि शरीरे श्रितं भवति। पर्यायप्रसक्तं निराह-लोम लुनातेः। तद्धि छ्यते। लीयतेर्वा। तद्धि शरीरे लीयते।

तत्र निगममपि चोदाहरन्ति-श्मशानसंचर्योपि गर्त इति।

"नोपरस्याग्विष्कुर्याद् यदुपरस्याग्विष्कुर्याद्गर्तेष्ठाः स्यात् प्रमायुको यजमानः" इति।

उपर इति यूपस्यानष्प्रदेश उच्यते

"पञ्चभागोपरा यूपाः"—

इति युक्तम्। तदनष्टं यूपस्य नाविष्कुर्यादित्यर्थः। पाशुभिस्तदवच्छादनीयं बर्हिषा च। यदि पुनरुपरस्य कंचिदप्यवयवमाविष्कुर्यात् **गर्तेष्ठाः** गर्तप्रतिष्टः श्मशानप्रतिष्ठः **प्रमायुकः**-प्रमरणधर्मायुरेव यथाविहितादायुषो यजमानः स्यात्। **इत्यपि निगमो भवति** अप्ययमप्यन्ये बहव इत्यपिशब्दः॥

रथोपि गर्त उच्यते। गृणातेः स्तुत्यर्थस्य। तद्धि **स्तुततमं यानम**-श्वादिभ्यो यानेभ्यः सुखतरं हि तेन गम्यते। रथोपि गर्त इत्यस्मिन्नर्थे **आरोहथो वरुण मित्र गर्तमित्यपि निगमो भवति**।

"हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥"—

इति श्रुतविदान्नेय एतया त्रिष्टुभा मित्रावरुणावस्तौत्। राजसूयेभिषेचनीयो नाम क्रतुस्तत्र यजमानस्य रथमारुरुक्षतः गृहीतेषुधनुष्कौ बाहू अनया अभिमन्त्र्येते। तावेवात्र मित्रावरुणावधिदेवताभिप्रायेण। एवं ह्याह—

---

2 *a. b. d. m.* आह for निराह. 4, *a, b. m.* add अत्र after च and उच्यते after गर्तः 7. *a b d.* read अनष्टः प्रदेश; *b. d.* omit उपर इति. 8. *b.* पञ्चमभागोपरा. All our Mss. read पञ्चभागोपरा. 9. *d.* आविः कुर्यात्; *m.* पंसुभिः. 10. *m* किंचित् for कचित् 13 *a. d. m.* omit यान after स्तुततम. 16. *d.* reads हिरण्यरूप उषसो व्युष्टौ only for the verse. 19 *b.* reads सः after ऋतु. 20 *a. b. d. m.* add अभिप्रेतौ after मित्रावरुणौ.

---

17. The quot. is RS V. 62 8.

18. अभिमन्त्र्येते *Cf.* 'बाहू उद्गृह्णति हिरण्यरूपा इति' Kâty. Śr. XV. 5. 28.

19. आह—Ait. Br. III 1 4 The word रूप is technically used in the sense of अन्न and देवता.

"मित्रोसीतीममभिमन्त्रयते मित्रस्य चेतद्रूपम् वरूणोसीतीमं वरुणस्य चेतद्रूपमिति"।

तानुच्येते । हे मित्र हे वरुण हिरण्यरूपं-हिरण्यसदृशवर्णं उषसो व्युटौ-उषसो व्युच्छेदनकाले उदिता च-उदयकाले सूर्यस्य यौ युवामेतस्मिन् काले एवंरूपमयःस्थूणमयोमयस्थूणं स्वं गर्तं रथमारोहथस्तौ युवां ब्रवीमि ममाप्येवं रथं गर्तमेतस्मिन् विधावद्भूतं तत्स्वरूपमेव साम्प्रतमारोहतम् । अत एनमाहत्य चक्षाथे वुरुंतमित्यर्थः । अदितिं दितिं च अदीनमनुपक्षीणमात्मपक्षं दीनं चोपक्षीणमभिप्रपक्षमित्यर्थः ।

गर्तः सभास्थाणुरित्यत आरभ्य प्रसक्तानुप्रसक्तमुक्तम् । जायेव पत्यै उशती सुवासा उषा इयेव निरिणीते अप्सः-इत्ययमप्यर्थैः पूर्वमेव व्याख्यातो भाष्यकार-व्याख्यानुक्रमे भित्त्वारमाभिस्तथाह्युग्वाक्यस्यास्यैकवाक्यता न विच्छिन्ना भवेदिति । चतस्र उपमा इति यदुक्तं भाष्यकारेण तदपि परिसंख्याय ता उपपादिता अस्माभिः । एवम् अभ्रातेव पुंस एति प्रतीची-इत्यनेन पादेनास्यामृच्यनिर्वाहो दर्शितः ।

अन्यत्रापि चोक्तम्-**नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद् भवति**-इति । अयमस्मिन् वाक्ये नाभ्रातृकामुपयच्छेतेति प्रत्यक्ष एवोपयमनप्रतिषेधो विवाहार्थे पाणिग्रहणप्रतिषेध इत्यर्थः । पूर्वयोर्हि मन्त्रयोरुपमया लिङ्गतो विवाहप्रतिषेधो दर्शितः एतस्मिंस्तु वाक्ये साक्षादेव प्रतिषेधः आहृत्य विधानेनैव नाभ्रातृकामुपयच्छेतेति । अत इदमुक्तम्-**उपयमनप्रतिषेधः प्रत्यक्षः**-इति । आह-**किमुपयमनप्रतिषेध एव** ।

---

1. *bi.* reads इय for इम and अभिमन्त्रयति for °मन्त्रयते of *a. b. d. m.* and omits हि after वरुणस्य read by *a b. d. m.* 2 *bi.* omits हे before वरुण and reads हिरण्यवर्ण for हिरण्यरूप हिरण्यसदृशवर्णम् 3 *a. b. d. m.* व्युच्छेदकाले for व्युच्छेदन-काले of *bi* 4. *a. b d. m* omit गर्तं in both places and read अयोमय स्थूण for अयोमयस्थूण, *m* ममैत रथ for ममाप्येव रथ. 5. *bi.* तत्स्वरूपमेव for तत्सदृपमेव of *a b d. m*; *a b d m* तत पत्र for अत पत of *bi.* 6. *bi.* अभिप्रपक्ष for अभिप्रपक्ष 9 *a b. d* ऋग्वाक्यस्यास्यैकता, *bi.* ऋग्वाक्यस्याप्येकवाक्यता, *m.* ऋग्वा-क्यास्यैकवाक्यता, *a. b d m* अनवच्छिन्ना for न विच्छिन्ना of *bi.* 10. *a. b. d. m.* add उपमा after ता. 12. *bi.* नाभ्रातृका for नाभ्रात्री, *m.* omits इति. 16 *a, b d m.* पतत् for इद

---

16. The word प्रत्यक्ष would show that the text is from some Brâhmana. *Cf.*

पत्न्यास्तु न भवेद्भ्राता न विभार्येत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाममधर्मतः ॥

* Manu [II. 11.

नेत्युच्यते-पितुश्च पुत्रभावः प्रत्यक्षः श्रूयते । कथम्। लोकं श्रस्य तद् भवति-इति । लोकमित्यपत्यनाम । यदपत्यमभ्रातृकायास्तत् पितुर्भवति नेतरस्य योनुरित्येतमितरस्य विवादप्रतिषेध एव नेत्युच्यते पुत्रभावादितरस्य च दुहितृपितुरपत्यप्राप्तिरिति। तस्मादुपपन्नं भवति-यत्राभ्रातृमती सैव पैतृकं धनमर्हति नेतरेति ॥

अधुना योनौ यावद्धितित्वेत्या ऋचः उत्तरार्धेन उत्तरः स एताभ्रातृकावाद- 5
पक्षेणैव निरुच्यते । पूर्वोपि च शासद्धितित्वेयमभ्रातृमतीवादपक्षेणैव योजयितव्यः ।
एष एव हि स्थितः पक्षः । तस्मा एव ह्यभ्रातृमत्या यः पुत्रो भवति तमेव पुत्रिका-
विधानेन कृताभिसंधित्वात् पौत्रो ममायमिति अपुत्रः सन् मातामह उपगच्छति
नेतरान् भ्रातृमतीपुत्रान् अन्यथा सर्व एव हि योजारोपुत्राः स्युः ततो विवाह-
परिश्रमो व्यर्थ एव स्यात् । अथवा सर्व एव स्त्रीको दृथानुज्ञायग एव स्यात् । 10
किं च पुत्रिकापितुरपि या भार्या सान्वस्य दुहितेति तस्यामपि या जायते
सा मातामहस्यैव नेतरस्य पुत्रिकापितुः स्यात् । अनिष्टं चैतत् सर्वम् ।
तस्माद् येनाभिसंधिपूर्वकं धर्मेण पुत्रिका क्रियते तस्या एव पुत्रो मातामहस्य भवति
न सर्वस्या इति सैव च दायाद्यार्हा नेतरा भ्रातृमती । अत इदमुच्यते-' पिता यत्र
दुहितुः ' इति पिता यत्र यस्मिन् काले दुहितुरप्रदत्तायाः प्राक् 15
प्रदानादित्यर्थः । रेतःसेकं-रेतसः सेकारे यो दुहितरि रेतः सिंचति तं जामातरं
प्रार्जयति-प्रगाधयति प्रकल्पयति उपावर्तयतीत्यर्थः तदा तस्मै तां दुहितरं ददत्
किं करोति । ' संशाग्म्येन मनसा दधन्वे ' संदधाति अभिसंदधाति आत्मानं
यस्मात्पत्यपुत्रत्वमस्यते तन्ममेति । कथं पुनरभिसंदधात्यात्मानमिति ' संशाग्म्येन

---

1. a. b. d. read प्रत्यक्ष for प्रत्यक्षः. 2. a b. d. m. omit इति; bi. (multa) वत् before पितुः. 3. a. b. d ॰पत्यप्राप्तेरिति 4 d. सैवभ्रातृमती; 5. a. b. d. m. अवृणुः for अवृणुत. 9. a. b. d. m. add हि after अप्रदत्ता and omit it after सर्व एव. 10. a b. d omit एव 11. a b d m omit वा and read सान्वदत्त for सान्वस्य; a. b. omit वा before जायते and m. सापि for सा after it. 12. a. b. read पितामहस्य for मातामहस्य. 14. a. b. d. m. सैव च दायाद्यार्हा नेतरा भ्रातृमती; b. सैव च दायाद्यार्हा भ्रातृमती We read with bi. 15. a. b. d. m. अप्रदत्तायाः for अप्रदानादिति. 17. b. उपावर्तयति for उपावर्तयतीति. 18. a. b. d. m. add इति after करोति 19. d. m. शाग्म्येन for संशाग्म्येन

---

5. अवृणुः, i. e., in the explanation of the last section.

मनसा'-संगमेन मनसा-विगतापुत्रत्वसंतापेन चेतसा नाहमपुत्रः इयमेव पुत्रिका मम पुत्रो यो ह्यस्यामुत्पद्यते स पौत्रो मम भविष्यति इत्येवं सुखेन मनसा संदधात्यात्मानं तस्यां पुत्रिकायाम् । तत्रैवं सति यस्तस्यामेव कृतपुत्रिकाधर्मिण्यामुत्पद्यते दौहित्रस्तमेव नप्तारं ममायमित्येवमुपगच्छति मातामहो न सर्वानेव दौहित्रान् भ्रातृमत्या अपि । स तस्या एव पुत्रो मातामहस्य भवति न सर्वस्या इति सैव च दायार्हा नेतरा । स एवं च मुख्यया वृत्त्या मातामहस्य पौत्रो भवति नेतरे भ्रातृमतीपुत्राः । ते हि गौण्या वृत्त्या जनयितुः पितुः पुत्राः सन्तो मातामहस्य पौत्रा इत्युच्यन्ते कदाचिल्लोके शास्त्रे वा ।

तत्रैवं सति '**अङ्गादङ्गात् संभवसि**' '**आत्मा वै पुत्रनामासि**' इत्येवमादिषु गौणं दुहितुः पुत्रत्वमुच्यते । किंच यदि दुहिता पुत्रेण अविशिष्टैव स्यात्ततो दुहितेति विशेषसमाख्या नैव स्यादस्ति चेयं तस्माद्विशिष्टतरः पुत्रो दुहितुः सकाशादित्युपपद्यते ।

यदपि चोक्तम्—'**अविशेषेण पुत्राणां दायो भवति**' इति तदप्यभ्रातृमतीविषये द्रष्टव्यम् । अथवा वेदस्मृत्योर्विरोधे वेददृष्ट एव धर्मो ज्यायान् न स्मृतिदृष्टः । तस्मिंश्च वेदे अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति धर्मविदः येयमुग् वक्ष्यमाणा

"न जामये तान्वे"—

इति । अथशब्दो विशेषाधिकारार्थः । **ज्येष्ठं पुत्रिकाया इत्येके** इति । यदोत्सृष्टायां पुत्रिकापितुरन्ये पुत्रा जायेरंस्तदा विभागकाले ज्येष्ठं भागं पुत्रिकायै च दद्यायः

---

1. *m.* मनसापिगतापुत्रत्वं मनसापेन ! 2. *a. b. d. m.* उत्पत्स्यते for उत्पद्यते. 3. *m.* यस्यामेव for यस्तस्यामेव, *a b.* उत्पाद्यते for उत्पद्यते 4–6 *a b d. m.* read भ्रातृमत्या अपि संतानकाम् । स एव च मुख्यया वृत्त्या मातामहस्य पौत्रो भवति. This reading is probably simpler and better The reading of *bi.* is however retained as it makes sense. 11. यस्मात् for तस्मात्. 17. *a. b d. m* read after ज्येष्ठं पुत्रिकाया इत्येके as follows –ज्येष्ठमपत्यं यत्पुत्रिकायास्तदेव मातामहस्य नेतराणि जनयितुरेवेत्येवमेके मन्यन्ते अथवा ज्येष्ठं पुत्रिकाया इत्येके इति । यदोत्सृष्टायां etc.

---

6. भ्रातृमतीपुत्रा –*Cf.* Manu IX. 131. 'दौहित्र एव च हरेत्पुत्रवत्सर्वमेव धनम् ।'

14. न स्मृतिदृष्टः–This remark shows that *Durga* understands 'अविशेषेण' etc. as a verse from *Smriti*. *Vedila* also seems to do the same as he calls it a *Sloka* as distinguished from *Rik*. The concensus of the Smritis is towards giving the right in the property of the maternal grand-father only when he is sonless. *Cf.* Manu IX. 131. *et seq*

यामागमितरान् पुत्रान् विभजेत् अभागा एव त्वितरा दुहितर इति। तदेतदनर्थकं निरुच्यते यथा दुहितुर्भागो नास्तीति—

"न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम्।
यदीं मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन्॥"

न जामये भगिन्यै जामिरन्येभ्यां जनयन्ति जामपत्यं जामतेर्वा ऽ स्याद्गतिकर्मणो निर्गमनमापा भवति। तान्व आत्मजः पुत्रो रिक्थं प्रारिचत् पादाग्रकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य। यदि ह मातरोजनयन्त वह्निं पुत्रमवाहिं च स्त्रियमन्यतरः संतानकर्ता भवति पुमान् दायादोन्यतरोर्धयित्वा जामिः प्रदायते परस्मै॥ ६॥

न जामये इति। न जामये-भगिन्यै तान्व-आत्मजः आत्मनो धियो10 जातः स आत्मजः किं करोतीति रिक्थम् आरैक्। रिक्थं पैतृकं धनं न प्रादात्-न प्रदत्तो। किं तर्हि तस्याः करोतीति। उच्यते—चकार गर्भं सनितुर्निधानम्। सनितुः-हस्तग्राहस्य भगिनीभर्तुः प्रसवसमर्थां करोति-पुष्णातीत्यर्थः। किंच यदिह मातरः यत् पुत्रप्रदयं मातरो जनयन्ति वह्निं च वोढारं पुत्रम् अवहिं च स्त्रियम् तयोर्द्वयोरपि वोढ्रोढ्रोः पुत्रयोः अन्यतरः-एकतरः कर्ता—15

---

2. *m.* adds अतृप्तीना before पुत्रिकृताम् 5. *A* जनयन्त्यनेनमपत्य 7. *b. C. D. E.* read यदि ह for यदी मा° of *Bi* 9 *A. Bi.* conclude III. i. 6. after परस्मै. 10. *d. m.* omit न जामये इति; *a b. d.* add स again after आत्मज.. 11. *d.* रिक्क for रैक्क; *m* omits न after धने 12. *a b. d. m.* add इति after प्रदत्तो 13 *d* प्रसवसमर्थां करोतित्यर्थः 14. *Bi* reads यदी for यदिह of *a. b. d*; *m.* adds ह्ह after पुत्रप्रदयं and *a. b d. m* कर्ता before वोढ्रोः. 15. *a b. d. m* वोढ्वोढ्रोः; *Bi.* वोढ्वोढ्वो

---

1. विभजेत् *Cf.* Manu IX. 134.

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तत्र विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥

4. The quot. is RS. III, 31 2.

संतानकर्ता भवति । कतमः यः पुमान् । स एव दायादः-दायार्हः नेतरः कन्याख्य. । किंच तयोरुभयोरपि सुकृतोः-सुकृतयोः सुतरामेकेनापि प्रयत्नेन कृतयोरुत्पादितयोरन्य ऋन्धन्-अन्यतरोर्द्धयित्वा सुकृतोपि सन् जामिः-जाम्याख्यो भगिन्याख्यः प्रदीयते परस्मै न कस्याचिदप्यवस्थायामसावात्मीयो भवतीत्यभिप्रायः । एवमस्यामृचि न जामये तान्वौ रिक्थमारैक् इति न दुहितरो रिक्थभागिन्यो भवन्ति नेताः संतानकर्मणि पितुरुपतिष्ठन्ते वर्धयित्वा होताः परस्मै दीयन्ते तस्मादभागा एता इति ।

यत् पुनरुक्तं पुंसोपि दानातिसर्गविक्रया विद्यन्त इति तत् कदाचित् केनचिन्निमित्तेन भवति स्त्री तु निसर्गेणैव दीयते विक्रीयते विसृज्यते वा सा हि परार्थमेवोत्पद्यते तस्मादभागा इति ॥ ६ ॥

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः कस्मान्मत्वा कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मनस्यतिः पुनर्मनस्वीभावे मनोरपत्यं मनुर्वा । तत्र पञ्चजना इत्येतस्य निगमा भवन्ति ॥ ७ ॥

प्रसक्तानुप्रसक्तमुक्तम् तद्यथा जनयितुः प्रजाः इत्येवमादि प्रकृतमिदानीमुच्यते-

मनुष्यनामान्युत्तराणि पञ्चविंशतिः । मनुष्याणां नामानि मनुष्यनामानि । उत्तराणि प्रकृतेभ्योपत्यनामभ्यः । अपत्यान्येव हि विवृद्धानि सन्ति मनुष्या इत्युच्यन्ते । कियन्ति पुनस्तानि । पञ्चविंशतिः । पञ्च च विंशतिश्च पञ्चविंशतिः । कतमानि पुनस्तानि । " मनुष्याः नरः "—इत्येवमादीनि ।

---

1. *a b d. m* omit सन्तानकर्ता and add सन्तानकर्मण after भवति ; *a. b. d. m.* add च after स एव 2. *m.* adds च after सुकृतो, *a b. d.* omit सुकृतो· 3 *m.* reads ऋन्धत् for ऋन्धन् ; *a. b d m.* add सुपुष्टोपि after सुकृतोपि and omit जामि· 8 *a. b d m* add पतत् after यत्पुन 9. *bi* निसर्गेणेन for निसर्गेनैव, *m* omits विक्रीयते and *a, b. d* read अतिसृज्यते for विसृज्यते ; *m.* परमार्थ for परार्थ ? 10 *a. b d m.* तस्मादसममिति. 13. *A. B₁.* conclude III. ii 1, after भवन्ति 14. *a b d. m.* add इद after °प्रसक्त. 18. *d m* after इत्येवमादीनि add:-नृत्यन्ति कर्मंस्विति नरा इत्येवमादि ।

---

18. For मनुष्याः नरः etc. *vide* Nigh II. 3.

आह-मनुष्याः कस्मात् । उच्यते-मत्वा-ज्ञात्वा तत एते कर्माणि सीव्यन्ति-तक्षन्तीत्यर्थः । अथवा मनस्यमानेन प्रजापतिना सृष्टाः । मनस्यतिः पुनः अयं धातुः मनस्वीभावे । मनस्वीभावो नाम प्रहृष्टता । प्रहृष्यता प्रजापतिनैते सृष्टाः । अथवा मनोरपत्यं मनुष्याः मनुषो वापत्यं मनुष्याः ।

तत्र पञ्चजना इत्येतस्य निगमा भवन्ति संदिग्धाः । तत्रेयमृगुदाहरणम् । तथा-॥ ७ ॥

"तदद्य वाचः प्रथमं मंसीय येनासुराँ अभि देवा असाम ।
ऊर्जाद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥"

तदद्य वाचः परमं मंसीय येनासुरानभिभवेम देवाः । असुरा असुरता स्थानेष्वस्ता स्थानेभ्य इति वा । अपि वासुरिति प्राणना-10 मास्तः शरीरे भवति तेन तद्वन्तः । सोदैवानसृजत तत् सुराणां सुरत्वमसोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते । ऊर्जाद उत यज्ञियासः । अन्नादाश्च यज्ञियाश्च । ऊर्गित्यन्ननामोर्जयतीति सतः पक्षं सुमृक्णमिति वा । पञ्चजना मम होत्रं जुषध्वम् । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके । चत्वारो वर्णा निषादः पञ्चम इत्यौपम-15 न्यवः । निषादः कस्मान्निषदनो भवति निषण्णमस्मिन् पापकमिति नैरुक्ताः ।

---

7. *a. b. d.* read सतश्चनि, *m.* सतन्वति, *b.* तक्षन्ति. 8. *b.* प्रहृष्टेन प्रहृष्यना &c., *a. b. d.* प्रहृष्टता । हृष्यना &c., *m.* प्रहृष्टना । प्रहृष्यता &c. 4 *a. b. d. m.* मनुषो वापत्य मनुष्याः । *b.* मनुषो वा । 6. *m.* omits तदपा. 9. C. D. read प्रथमं for परमं 16. B. C. R. add निषदनो भवति after निषादः कस्मात्, *b* omits it.

---

8. For the quot. *vide* RS X. 53. 4.

12. विज्ञापते ।

यतपाश्चजन्यया विशा । पञ्च पृक्ता स एव दायादः—दायार्हः पञ्चजनीनया विशा । पञ्च पृक्ता —मुक्तयोः सुतरामेकेनापि प्रयत्नेन बाहुनामान्युत्तराणि द्वादश । बाह्व कर्म । त्यक्त्वा सुकृतोऽपि स्वर्ग्यादिः— अङ्गुलिनामान्युत्तराणि द्वाविंशतेः । अङ्गुलयः [illegible] रेक इति न दुहितरो भवन्तीति वाग्रगालिन्यो भवन्तीति वाग्रकारिण्यो [illegible] त्वा होतः परमे सारिण्यो भवन्तीति बाहुना भवन्तीति बाह्यना भ[illegible]व् केनचित्- पदार्थमेवो- बाभ्यञ्जनादेव स्युः । तासामेषा भवति ॥ ८ ॥

तदस्य वाच ०—°जुषध्वम् सौत्रीकृत्याभेरर्पम् । तस्य विश्वेदेवः स[illegible] तन्नेयं होतृजने विनियुक्ता । तद्व वीर्यं वाचः परममुत्कृष्टमहमस्य संसदि[illegible]णि ज्ञाने इत्यर्थः । तेन वीर्येण कामिनि । येन असुरानभिभवेम वयम् । ऊर्ज[illegible] अन्नमदयितारः । अपिच हे यज्ञियासः यज्ञसंपादिनो देवा यूयम् । अपि हे पञ्चजनाः मनुष्या निषादपञ्चमा वर्णाः प्रथम इदं होत्रं जुषध्वम-अनुगृह्णीध्वम इति समस्तार्थः ।

अथैकपदनिरुक्तम् । असुरा असुरता स्थानेषु ते हि स्म सुप्तु रताः स्थानेषु चपला इत्यर्थः । अथ वा अस्ताः स्थानेभ्यः इति प्रच्याविता देवैरित्यर्थः ।

---

5 R. after अग्रकारिण्यो भवन्तीति वा adds -अग्रसारिण्यो भवन्तीति वाग्रसादिन्यो भवन्तीति वाग्रसानिन्यो भवन्तीति वा. C D R. add अग्रसारिण्यो भवन्तीति वा omit. 6–7. B1 (variants) gives अञ्जना for अभ्यञ्जना, and अभ्यञ्जना for अभ्यञ्जना². Our mss almost all show to be corrections of this reading as A. reads अभ्यञ्जना², B does so but marginally corrects by अभ्यञ्जना, C reads as our text but notes अभ्यञ्जना in the margin It would appear that the weight of tradition favours reading अञ्जना and अभ्यञ्जना respectively. 7. A B1 conclude III ii 2. after भवति 8. d. reads the Pratika as, तदस्य वाच प्रथम मसीयेति, a b. d omit सह 9 m reads उत्कृष्ट महदस्य 10 a. b. d. m. read येन for तेन. a b d m. after वयम् add [m हे] देवा.; m. ऊर्जादा 12 a b d m. after जुषध्वम् add आमेवध्वम्, b1 omits it, b1 reads अनुगृह्णीध्वम् for अनुगृह्णीध्वम्. 15 a. d. m omit इति after स्थानेभ्य.

---

1 For the quot. vide RS VIII. 63 7, and see the commentary there-on,

अपि वा असुरिति प्राणनाम। स हि अस्तः-क्षिप्त इव शरीरे भवति तस्य हि तत्र नित्यमवस्थानमित्यभिप्रायः। तेन हि तद्वन्तः भवन्ति। रो मत्वर्थे। अथवा इदमन्यद् ब्राह्मणोक्तं निर्वचनं स्यात् सोऽदैवानसृजत सुरिति प्रशस्तनाम। प्रशस्तादात्मनः प्रदेशात्प्रजापतिः सुरानसृजदूर्ध्वेभ्यः प्राणेभ्यः। तदुक्तम्—

'ऊर्ध्वमुदस्तृणत् पूर्वपक्षः पञ्चदशः तेन सोऽदैवानसृजत तत् सुराणां सुरत्वम्।'— 5

इति विज्ञायते। एवमेव प्रातिलोम्येन असोरसुरानसृजत। असुरिति प्रशस्त-प्रतिषेधः। अप्रशस्तादात्मनः प्रदेशात्प्रजापतिरसुरानसृजत। तदुक्तम्—

'अर्वाङ् वा तिरदपरपक्षः तेन असुरानसृजत'—

इति। ऊर्जाद उत यज्ञियासः-अन्नादाश्च यज्ञियाश्च। ऊर्गित्यन्ननाम तद्धि ऊर्जयति-बलिष्ठं करोतीत्यर्थः। अथ वा पक्वमेतत् सुप्रवृक्णं भवति।।10 इति ककाररेफसामान्यात् पचेर्व्रश्चनेर्वा स्यात्। द्वयोरपि वा। तद्धि पक्वं सन्मृदुत्वात्सु-च्छेद्यं भवति।

पञ्चजना मम होत्रं जुषध्वम्। एतदत्र सदेहपदमेकमुद्धृत्य प्रदर्शितम्। गन्धर्वाः पितरो देवा असुरा रक्षांस्येके मन्यन्ते। चत्वारो वर्णाः निषादः पञ्चमः-इत्यौपमन्यवः। निषद्य हन्तीति निषादः प्राणिवधजीवनः।15

---

1 *b* reads क्षिप्र for क्षिप्त 5 *a d. m.* omit मो before देवान. 8 *a. d m.* read अवाड् for अवाड् of *b* 10 *a* reads ऊर्जनि for ऊर्जयति; *a. d* सुप्रवृक्त for सुप्रवृक्ण 15. *a d m* add निषद्य again after निषद्य, *d* प्राणिगधजीवन।

---

9 यज्ञियाश्च -Our ms. *b.* ends with यज्ञियाश्च here It appears to be independent of *a.* in the 1*st* and the 2*nd* adhyâyas, but the portion of the third it possesses looks like a later copy of *a*, as here it shows no differences of readings, though in the previous portion it has shown many variants from _

14. मन्यन्ते-*cf.* Ait. Br. III. 3 7. "पाञ्चजन्य वा एतदुक्थ यदैषदेव। सर्वेषा वा एतत्पञ्चजनानामुक्थ देवमनुष्याणा गन्धर्वाप्सरसा सर्पाणा च पितृणा चैनेषा वा एतत्पञ्चजनाना-मुक्थ सर्वे एन पञ्चजना विदु."

15. प्राणिवधजीवन-*cf.* Manu X. 48.

अथवा निषण्णमस्मिन् पापकमिति निषादः ॥ सौधन्वन इत्येके मन्यन्ते ।
स च रथकारः । तस्य भिन्नकालमाधानं श्रूयते—

"वर्धन्तु रथकारः"।

"ऋभूणां त्वा इति रथकारस्य।"

इति च मन्त्रभेदः—

"सौधन्वना ऋभवः।"

इति च मन्त्रलिङ्गात् ।

यथा तु पञ्चजनशब्देन मनुष्या एव निषादपञ्चमा वर्णा उच्यन्ते तथैव निगमः—

"यत्साधन्यया विदथेषु घोषा अस्तृण्वत ।
अस्तृणाद् बर्हिषा इन्द्रो ऽ यो मानुष्य स क्षयः ॥"

---

1 *b.* सौधन्वना for सौधन्वनः of *a d. m.* 2. *j.* adds after रथकारः *a* कः namely एष वै चक्रं *etc.* See foot-note below. *a. d* add इति after मन्त्र 8. *a. d. l.* तथैव निगम, *m.* तथैव निगमः, *b.* तथैव निगदः

---

1. सौधन्वन-The passage beginning from सौधन्वनः to the end of the para appears to be quite out of its place The only possible defence of its occurrence here is that it may be an additional explanation of पञ्चजनाः attempted by *Durga*; this would make the plu. सौधन्वनाः preferable but we have given the singular here as it is supported by our mss. and besides is consistent with स च रथकारः following immediately. *cf.* Nir. XI. 16. "कथं त्रिभ्यो वाजा इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः" &c It would appear that these three produced the horses, the chariot, and the cow for इन्द्र, अश्विनौ, and बृहस्पति- *Vide* RS. I. 161. 6, and hence got the honour of participating in the soma sacrifice.

2 रथकारः : *j.* here adds, and *b.* gives in a *foot-note* the following text—

एष ये चक्रे मुहुर्मुहुर्नोऽभिक्षरन्ति मनसस्परि ध्यया ।
नाँ ऊ न्व १ स्य मनसस्य पोषं वा वाजा ऋभवो वेदयामसि ॥

RS IV. 36. 2

There are other verses and hymns also speaking of this feat of the Ribhus or perhaps of Ribhu the eldest of the three brothers e. g. RS. I. 111.

5. इति च मन्त्रलिङ्गात्-The quot. is not traced.

7. The quot. is RS. I. 110. 4. *Vide* Nir. XI. 16.

10 The quot. is RS VIII. 63. 7.

इति । प्रथमेन दृश्य । इयमनुष्टुप् । ऐन्द्री । शुनुयस्य पयसेहनि महत्व-तीयशस्त्रस्य प्रतिपदेषा । यत्-यदा पञ्चजनीनया विशा-पञ्चजनसमुदाय-लक्षणया सहितैः स्तोतृभिः ऋत्विग्भिः अवर्षति इन्द्रे वर्षार्थिभिः घोषाः-स्तुतीः अगृह्णत-अगृज्यन्त । निषादपञ्चमा वर्णा आर्ताः सन्तो वर्षाभावे अस्तुवतेवेन्द्रम्-वर्षं भगवन् ! -इत्येवमर्थयन्तः । अत इदमुक्तम्-यदा पाञ्चजन्यया विशा सह ऽ घोषा ऋत्विग्भिः अगृह्यन्तेति । तदा किमिति । तदाकर्ण्य स इन्द्रस्ताभिः प्रह्लादितचेता अस्तृणात्-अहन् वर्षार्थं मेघान् । बर्हणा-परिवृढेन वज्रेण परिवृढानि वा मेघजालानि विपः-विपाटयिता मेघानां मेधावी वा अयं.- ईश्वरः कृत्स्नस्य जगतः । कस्मात् पुनरस्तृणात् । यस्मान् मानस्य स क्षय· मानस्य दर्पस्य बलस्य वीर्यस्य स क्षयः निवासः तस्मात् अस्तृणात् । अर्थार्थो हि स्तूयमान· किं कुर्यात् परितुष्येपि । 10 अथवा मानस्य सत्कारस्य पूजायाः स इन्द्र· क्षयो निवासो भाजनमिति मन्वानैः स्तोतृभिः वर्षार्थिभिः सत्कृतस्तान वर्षप्रदानेन प्रतिसत्कारयिष्यन्नस्तृणात् मेघान् । अपि वा अस्य जगन्निर्माणस्य देवादे. स्थावरान्तस्य स इन्द्रः क्षयो निवास आश्रयो यस्मात् ततो मेघानस्तृणात । अनार्ष्टिद्वारेणास्य जगतो विनाशो मा भूत् कथन्नामे-त्यभिप्रायः । 15

पञ्च पुक्ता संख्या । सा हि **स्त्रीपुंनपुंसकेष्वविशिष्टा** एव भवति । तद्यथा-पञ्च स्त्रियः पञ्च पुरुषाः पञ्च कुलानि इति । एवं पञ्चशब्दे स्त्रीपुंनपुंसकेषु विशेषो नास्ति ।

बाहुनामान्युत्तराणि द्वादश । बाह्वोर्नामानि बाहुनामानि । उत्तराणि पट्-तेभ्यो मनुष्यनामभ्यः । मनुष्याणामेव हि बाहवो भवन्तीति मनुष्यनामभ्य उत्तराणि 20 बाहुनामानि । कियन्ति पुनस्तानि । द्वादश-द्वौ च दश च द्वादश । कतमानि पुनस्तानि । "आयती च्यवाना अभीशू"-इत्येवमादीनि । आभिर्भीभवतः कर्मभिः-

---

1. a. d. m. पृक्षस्य; b. पृक्षस्य. 2. a. d. m. omit यत् before यदा. 7. a. d. m. बर्हेन; b. बर्हेण for बर्धेण. 8. a विपाटयिता य मेघानां, d m. विपाटयिता मेघानां, b. विपाट यिता मेघानां. 9. a. d. वीर्यस्य बलस्य 10 a. d. परितुष्योपि किं कुर्यात 11. m. मत्वा नै. for मन्वानैः. 15. a. d, °भिप्रायेण, m. b. °भिप्राय·. 20. a. d. m. read बाहवो after हि as above, b. omits it. 21. a. d. m. द्वौ; b. द्वे; a. d. कानि.

---

20 For आयती च्यवाना · vide N 11. 1.

तावितिं आयती । च्यावयितारौ कर्मणा च्यवाना । अभीशू अभ्यश्नुवाते कर्माणि । इत्येवमादि योज्यम् ।

आह-**बाहू कस्मात्** । उच्यते **प्रवाधत आभ्यां कर्माणि**-प्रक्षेपेण बाधते प्रक्षपयत्याभ्या कर्माणि ॥

अङ्गुलिनामान्युत्तराणि द्वाविंशतिः । अङ्गुलीना नामानि अङ्गुलिनामानि । उत्तराणि प्रकृतेभ्यो बाहुनामभ्यः । बाह्वोरेव ह्यङ्गुलयो भवन्तीति बाहुनामभ्य उत्तराणि अङ्गुलिनामानि । कियन्ति पुनस्तानि । द्वाविंशतिः-द्वे च विंशतिश्च द्वाविंशतिः । कतमानि पुनस्तानि । "अङ्गुवः अभ्व्यः क्षिपः"-इत्येवमादीनि । बाह्वग्रे अवस्थिता अवन्त्येताः कर्माणीति अङ्गुवः । अभ्व्यः परिमाणात् एताः । क्षिप्यते आभिः क्षेतव्यं द्रव्यमिति क्षिपः । इत्येवमादि ।

आह **अङ्गुलयः कस्मात्** । उच्यते **अग्रगामिन्यो भवन्ति** अग्रे ह्येताः कर्मसु गच्छन्ति । अथ वा **अग्रगालिन्यो भवन्ति** अग्रे ह्येता गलन्ति उदकानि । **अग्रकारिण्यो वा भवन्ति** अग्रे ह्येताः कर्माणि कुर्वन्ति । **अङ्कना भवन्ति** वा तथाहि-यो ह्येताभिरभिहन्यतेऽवाञ्चित इव भवति । **अपि वा अभ्यञ्चनादेव** स्युः एता हि त तमर्थमाभिमुख्येनाञ्चन्ति गच्छन्ति । ये तु अभ्यञ्जनाः इत्यभिधीयन्ते तेषामभ्यज्यत आभिरिति ॥

तासाम्-अङ्गुलीनाम् **एषा**-निर्वाचिका ऋक् **भवति**-

"दशांवनिभ्यो दशांकक्षेभ्यो दशांयोक्त्रेभ्यो दशांयोजनेभ्यः ।
दशांभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहन्त्यः ॥"

1-2. *d m.* कर्माणीत्येव योज्यम् 3. *a. d.* omit कर्माणि, *a d. m.* प्रक्षपयति, *bi.* प्रक्षिपयति 8-9. *bi* अभ्युव . 9. *a. d. m* परिमाणत् . 14. *a. d m.* तथाहि, *d m* °रभिहन्यते and °भवति, *bi* °रभिहन्यन्ते and °भवन्ति 15 *a. d. m.* अभिधीयते for अभिधीयन्ते of *bi*. 16. *a. d.* add अङ्गुलय after आभिरिति ।

---

8. For अभ्युवः अभ्व्यः etc. *vide* Nigh. II. 5.

19. For the quot. *vide* RS. X. 94. 7.

अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि। कस्याः प्रकाशयन्ति कर्माणि। योक्त्राणि योजनानीति व्याख्यातम्। अभीशवोऽभ्यश्नुवते कर्माणि। दश धुरो दशं युक्ता वहंद्वयः। धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं धारयतेर्वा ॥ कान्तिकर्माण उत्तरे धातवो-ष्टादश ॥ अन्ननामान्युत्तराण्यष्टाविंशतिः। अन्नं कस्मादानतं भूतेभ्यो- 5 चेर्वा ॥ अत्तिकर्माण उत्तरे धातवो दश ॥ बलनामान्युत्तराण्यष्टा-विंशतिः। बलं कस्माद्बलं भरं भवति बिभर्तेः ॥ धननामान्युत्तराण्य-ष्टाविंशतिरेव। धनं कस्माद्धिनोतीति सतः ॥ गोनामान्युत्तराणि नव ॥ क्रुध्यतिकर्माण उत्तरे धातवो दश ॥ क्रोधनामान्युत्तराण्येकादश ॥ गतिकर्माण उत्तरे धातवो द्वाविंशशतम् ॥ क्षिप्रनामान्युत्तराणि षड्- 1 विंशतिः। क्षिप्रं कस्मात् संक्षिप्तो विकर्षः ॥ अन्तिकनामान्युत्तराण्ये-कादश। अन्तिकं कस्मादानीतं भवेति ॥ संग्रामनामान्युत्तराणि षट्चत्वारिंशत्। संग्रामः कस्मात् संगमनाद्वा संगरणाद्वा संगतौ ग्रामाविति वा। तत्र श्लोकः इत्येतस्य निगमा भवन्ति ॥ ९ ॥

दशावनिभ्य इति। अवनय इत्येवमादीनि नद्यादिनामभिः संदिश्यन्ते तदर्थ- 1 मिदमुदाहियते। त्रिष्टुबेषा। अर्बुदस्य वादवेयस्य सर्पस्यार्षम्। अवस्तुतौ विनियुक्ता। दशभिरवनिभिः ये उपचर्यन्ते ऋषाणः सोमाभिषवकर्माणि प्रवृत्ते ते दशावनयः तेभ्यो **दशावनिभ्यः** हे ऋत्विजो यूयमपि **अर्चत**-स्तुतीः प्रोच्चारयतेत्यर्थः। एवमेव दशभिः कक्ष्याभिर्ये उपचर्यन्ते ते दशकक्ष्याः तेभ्यः **दशकक्ष्येभ्यः अर्चत**। दशभिर्योक्त्रैर्ये उपचर्यन्ते ते दशयोक्त्राः तेभ्यो **दशयोक्त्रेभ्यः** अर्चत। दशभिर्यो- 2 जनैर्ये उपचर्यन्ते ते दशयोजनाः तेभ्यो **दशयोजनेभ्यः** अर्चत। दशभिरभीशु-भिर्ये उपचर्यन्ते ते दशाभीशवः तेभ्यो **दशाभीशुभ्यः** अर्चत। **अजरेभ्यः**-

---

14. A. Bı. conclude III. 11. 3 after भवन्ति 15. *a. d. m.* नादिहन्ते, *b.* नदिहते. 16. *a. d.* इयं for इद of *b. m.* 18. *a d. m* अर्चत for अर्चय of *b.* 19. *a. d.* ये after उपचर्यन्ते. 21–22. *a. m* दायनिरभी°...अर्चत, *d.* ये after उपचर्यन्ते.

अजरणधर्मभ्यः । दृश्न घुरः य एते प्रावाणः तेभ्यः अर्चत । दशभिर्दशभिरङ्गुलीभिर्ये एते युक्ता वहन्ति प्रावाणः तेभ्य एभ्यः दृशं युक्ता चर्वद्भ्यः अर्चत इति समस्तार्थः ॥

अर्थकपदनिरुक्तम् । अवनयोऽङ्गुलयो भवन्ति ता हि अवन्ति कर्माणि रक्षन्ति भक्षयन्ति वा क्षपयन्तीत्यर्थः । कक्ष्याः अभ्यङ्गुल्य एव ता हि प्रकाशयन्ति कर्माणि प्रकटीकुर्वन्तीत्यर्थः । योक्त्राणि इत्येतत्पदं योजनानि इति अनेन पदेन व्याख्यातम् । योजनानीत्येतत् निगदसिद्धमेव । अभीशवः अपि अङ्गुल्य एव ता हि अभ्यश्नुवते कर्माणि व्याप्नुवन्तीत्यर्थः । अनेकैर्नामभिरङ्गुल्य एवोक्ताः अनेकक्रियायुक्त्युपप्रदर्शनाय । एते प्रावाण एवमनेकक्रियायोगिनीभिरङ्गुलीभिर्गृहीतास्तदर्थमर्चतेति । घूर्घूर्वतेः वधकर्मणः । "घरति घूर्वति" इति वधकर्मसु पठितम् । इयमपीतरा घूः अनड्वाहादिसंवन्धिनी एतस्मादेव धातोः वधकर्मणः । सापि विहन्ति वहम् अनड्वाहस्य वा धारयतेर्वा सा हि धारयत्यध्वमनड्वाहं वा ॥

कान्तिकर्माण उत्तरे घातवोऽष्टादश । स खल्वयं पुरुषो व्याख्यातः सबाहुः साङ्गुलः तं खलु काम एव प्रथममुपदिशति उत्तरे कान्त्यर्था इत्यर्थः । यदपि व्याख्यातं भवति तदप्यङ्गुलीनिरेव कान्तं क्रियत इत्यतोऽङ्गुलिनामभ्यः उत्तरे कान्तिकर्माणः समाम्नाताः । कियन्तः पुनस्त इति । अष्टादश अष्टौ च दश च अष्टादश कतमे पुनस्त इति । "वसि उत्समि अवदेति"-इत्येवमादयः ॥

अन्ननामान्युत्तराणि अष्टाविंशतिः । अन्नस्य नामानि अन्ननामानि । उत्तराणि प्रकृतेभ्यः कान्तिकर्मभ्यः । अन्नमेव हि कान्त सर्वभावेभ्यो भवतीति कान्ति-

---

1. *m.* adds marginally जपवर्जितानि after अजरणधर्मभ्य . 5. *a. d. m.* read क्षपयन्ति for क्षिपयन्ति of *b*, *b m.* omit अपि after कक्ष्या . 7–8. *a. d.* omit अपि अङ्गुल्य एव after अभीशव 11. *a d.* read पठ्ति for पठितम्; *d* अनड्वादिसंवन्धिनी. 13. *b. m.* च for वा 14. *b.* omits स before खल्वय, *a d. m* read सपाद for सबाहु- 17. *a. d.* omit कियन्त पुनस्त इति । अष्टादश । and अष्टादश after दश च. 18. *b.* नाः for ते

---

11. पठितम्-*vide* Nigh. II. 19.

18. For वसि etc. *vide* Nigh. II. 6.

कर्मभ्य उत्तराणि अन्ननामानि । कियन्ति पुनस्तानि । अष्टाविंशतिः अष्टौ च विंशतिश्च अष्टाविंशतिः कतमानि पुनस्तानि । "अन्धः वाजः पाजः पयः पृक्षः"—इत्येवमादीनि । अन्धः इत्ययं निर्वक्ष्यति । वाजयितव्यं पूजयितव्यमेतद् भोजनायोपस्थितं भवतीति वाजः । पीयत इति पाजः । पयः पानादेव ।

आह—**अन्नं कस्मात्** । उच्यते—आ—आभिमुख्येन ह्येतत् नतं प्रह्वीभूतं भवति भोजनाय भूतानाम् अत्तेर्वा

"अद्यते अत्ति च भूतानि तस्मादन्नं तदुच्यते"

इत्युक्तम् ॥

अत्तिकर्माण उत्तरे घानवो दश । अन्नमेव ह्यद्यत इत्यन्ननामभ्य उत्तरेत्तिकर्माणः समाम्नाताः । कियन्नस्त इति । दश । कतमे पुनस्ते । "आवयति भवति वमति"—इत्येवमादयः ॥

बलनामान्युत्तराण्यष्टाविंशतिः । बलस्य नामानि बलनामानि । उत्तराणि प्रकृतेभ्योत्तिकर्मभ्यः । य एव ह्यदन्ति त एव बलवन्तो भवन्तीत्यत्तिकर्मभ्य उत्तराणि बलनामानि समाम्नातानि । कियन्ति पुनस्तानि । अष्टाविंशतिः—अष्टौ च विंशतिश्च अष्टाविंशतिः । कतमानि पुनस्तानि । "ओजः पाजः शवः"—इत्येवमादीनि । ओजः ओजतेर्वोज्जतेर्वा । इत्येवमादि ।

आह **बलं कस्मात्** । उच्यते—तद्धि **भरं भवति** भ्रियते हि सः यो बलिष्ठो भवति । **बिभर्तेः** वा । स ह्यन्येषां भर्ता भवति ॥

---

2. *a. d.* omit अष्टाविंशति ; *bi.* प्रयः for पयः. 4. *m* omits पाजः. *bi.* प्रयः for पयः. 5. *a d m.* omit आ. 8. *a d* add हि after इति. 10. *a. d* omit कियन्नस्ते इति दश. 11. *d.* विमसि for वमसि. 15. *a. d.* omit अष्टाविंशति. after विंशतिश्च. 16. *a* ओजतेर्वोज्जतेर्वा. 17. *bi.* बलिष्ठो for बलिष्ठो. 18. *a. d m.* स ह्यन्येषां भर्ता भवति । *bi.* स पति

---

2. For अन्नः etc. *vide* Nigh. II. 7. where however we have पयः in the place of प्रयः here as read by *bi.*

3. निर्वक्ष्यति *i. e.* in Nir. V. 1.

7. The quot. is not traced.

10. For आवयति etc. *vide* Nigh. II. 8.

15. For ओजः etc. *vide* Nigh II. 9.

धननामान्युत्तराण्यष्टाविंशतिरेव । य एव बलवन्तो भवन्ति त एव धन प्राप्नुवन्ति इति बलनामभ्यः उत्तराणि धननामानि । कियन्ति पुनस्तानि । अष्टाविंशतिरेव । बलनामान्युत्तराण्यष्टाविंशतिः इमान्यप्यष्टाविंशतिरेवेत्येवशब्दः । कतमानि पुनस्तानि । "सघम् रेक्णः रिक्थम् वेदः"-इत्येवप्रभृतीनि । रिच्यत इति रेक्णः । अतिरिच्यमानमेतदिहैव तिष्ठति म्रियमाणस्येति रिक्थम् । विद्यते लभ्यते एतदिति वेदः । इत्येवमादीनि ।

आह धनं कस्मात् । उच्यते धिनोतीति सतः । सत इति कारकावधारणम् धिनोतिस्तर्पणार्थः ॥

गोनामान्युत्तराणि नव । गवा नामानि गोनामानि । उत्तराणि प्रकृतेभ्यो धननामभ्यः । गाव एव हि प्रकृष्टं धनमिति धननामभ्य उत्तराणि गोनामानि । कियन्ति पुनस्तानि । नव । कतमानि पुनस्तानि । "अघ्न्या उक्षा उक्षिया"-इत्येवमादीनि । अघ्न्या अहन्तव्या भवति इत्येवमादि निर्वचनम् । उक्षनिर्वचने हि गोशब्दः अतो गौः कस्मात् क्षति न त्रवीति ॥

कुध्यतिकर्मणः उत्तरे घातवो दश । धनार्थमेव हि गवार्थं च कोधो भवतीति गोनामभ्यः उत्तरे कुध्यर्थाः समाम्नाताः । कतमे पुनस्त इति । "हेळते हेड्ते"-इत्येवमादयः ॥

कुध्यर्थसंबन्धेनैव क्रोधनामान्युत्तराणि । कियन्ति पुनस्तानि । एकादश । कतमानि पुनस्तानि । "हेळः हरः हृणिः त्यजः" इत्येवमादीनि । हे अरे इत्येते-

---

1 *m* adds हि after य एव, *a.* सत एव for त एव. 2 *d.* omits इति before बलनामभ्य. 3 *bc* om. अपि after इमानि 5-6 *bc* एव for एतत् and *a. d.* इत्येवमादि. 7. *a. d m* add एव before सत and शब्दस्य कर्तरि कारके after it 9. *a m bc* om उत्तराणि. 10. *m* om सप्त. 11. *a d* omit कियन्ति to न 12 *a. d.* omit इति after भवति 16. *a d.* read हेळते (*d* omits) डते इत्येवमादयः for हेड्ते etc. 18. *a d* हेल, *b.* हेड:, *d.* हेल. for हर.

---

5. For सघ etc *vide* Nigh. II 10,
11. For अघ्न्या, उक्षा etc. *vide* Nigh. II 11.
12. For उक्षनिर्वचनो *vide* Nir. I, 5.
15. कुध्यर्थो – Is it कुध्यत्यर्थो ?
16 For हेळते, हेड्ते etc. *vide* Nigh. II. 12.
18. For हेल., हर: etc. *vide* Nigh. II. 13

नाविश्ये अवीतीति हेळः । नीचैरनेन नरकं प्रति ह्रियते इति हरः । नीचैरनेन ह्रियते नरक प्रतीति हृणिः । त्यजत्यनेनाविशो धर्मं जहातीति त्यजः । इत्येवमादि ॥

गतिकर्माण उत्तरे धातवो द्वाविंशशतम् । क्षुद्रा एव सन्तः द्रुतरं गच्छन्तीति क्षोधनामभ्यः उत्तरे गतिकर्माणः समाम्नाताः ॥

क्षिप्रनामान्युत्तराणि षड्विंशतिः । गतिसंबन्धादेव क्षिप्रनामानि उत्तराणि समाम्नातानि । कियन्ति पुनस्तानि । षड्विंशतिः-षट् च विंशतिश्च षड्विंशतिः । कतमानि पुनस्तानि । " नु मधु द्रवत् "-इत्येवमादीनि । नुन इव क्षिप्रं गच्छतीति नु । मां क्षिणोति मा क्षिणोतीति सर्व एव हि क्षिप्रगामिनं मन्यन्ते इति मधु । द्रवत् द्रवते । इत्येवमादि ।

आह **क्षिप्रं कस्मात्** । उच्यते **विकर्षः** विकृष्टो विक्षिप्तोर्थः **संक्षिप्तः** यत्10 क्षिप्रमुच्यते ॥

अन्तिकनामान्युत्तराण्येकादश । य एव हि क्षिप्रं गच्छति स एवाभिप्रेतार्थस्य अन्तिके समीपे भवतीति क्षिप्रनामभ्यः उत्तराणि अन्तिकनामानि । कियन्ति । एकादश । कतमानि पुनस्तानि । ' तच्चित् आसात् "-इत्येवमादीनि । तादृतेस्मिन् प्रदेशेवस्थित इति तच्चित् इत्युच्यते । अन्तिकप्रदेशो य आसन्नः स आसात् । इत्येवमादि योज्यम् ।

आह **अन्तिकं कस्मात्** । उच्यते तद्धि **आनतं भवति संनिकृष्टत्वात्** ॥

संग्रामनामान्युत्तराणि षट्चत्वारिंशत् । संग्रामस्य नामानि संग्रामनामानि । उत्तराणि प्रकृतेभ्योन्तिकनामभ्यः । अन्तिकीभूतानामेव हि संग्रामो

---

1 *b.* मवति for अवीति. *a d. m.* om. 'नीचैः to हृ'; *a. d m.* नीचैरनेन नरक प्रति ह्रियते प्राणिन इति हृणि । 3. *a d m* द्वाविंश शतम्, *m.* adds after शतम्-वर्तते अदस इत्येवमादय- 6. *d.* om. षड्विंशति after विंशतिश्च. 7. *a. d.* add हि after इव ; *a. d.* यच्छन्तीति 8–9. *a. d. m.* om. हि after नु, and add वा after द्रवते:. 10 *a d. m.* om. विकृष्टः; *b.* om. सन 12–13. *a, d.* अभिप्रेतस्यार्थस्य, *b.* मवतीति 13–14. *a. d. m.* om. क्रियन्ति । एकादश. 14. *d.* आसा 15. *b.* °देशोसन्न°; *d.* आसा 18. *a d.* om. संग्रामनामानि.

---

3. द्वाविंशशतम्-*cf.* Nigh. II. 14.

7. For नु, मधु etc. *vide* Nigh. II. 15.

14. For तच्चित्, आसात् etc. *vide* Nigh. II. 16.

भवतीत्यन्तिकनामभ्य उत्तराणि संग्रामनामानि । कियन्ति पुनस्तानि । षट्चत्वारिंशत् षट् च चत्वारिंशच्च षट्चत्वारिंशत् । कतमानि पुनस्तानि । "रणः विवाक् नदनुः" इत्येवमादीनि । रणन्त्यस्मिन् शूरा इति रणः । विविधा शूराणामत्र वाग् भवतीति विवाक् । नदन्त्यस्मिन् शूरा इति नदनुः । इत्येवमादि योज्यम् ।

5 आह संग्रामः कस्मात् । उच्यते संगमनाद्वा संगच्छन्ते हि परस्परेण तत्र योधाः । संगरणाद् वा संगृणन्ति संशब्दायन्ते शूरास्तत्र परस्परेण । संगतौ ग्रामाविति वा । ग्राम इति संघात इत्युच्यते । तौ हि परस्परविजिगीषया समागतौ तत्र भवतः ।

तत्र षट्चत्वारिंशत्के संग्रामनामगणे खले इत्येतस्य नाम्नः निगमाः संदिग्धाः 10 भवन्ति । इतरोपि धान्यखलः खल इत्युच्यते संग्रामोपि च । तत्रैवं सति अस्यामृचि वक्ष्यमाणायां खले न पर्वान् इति व्यपदेशाद् विभागो दृश्यते शस्यखल-संग्रामखलयोः—॥ ९ ॥

"अभीदे दमेकमेको अस्मि निष्षाळभी ह्या किमु त्रयः करन्ति ।
खले न पर्वान् प्रति हन्मि मूरिं किं मा निन्दन्ति शत्रवोनिन्द्याः ॥"

15 अभिभवामीदमेकमेकोस्मि निःसहायः सपत्नानभिभवामि ह्यहं किं मा त्रयः कुर्वन्ति । एक इता संख्या द्वौ इतरा संख्या त्रयस्त्रीणि नव संख्या चत्वारश्चालिंतमा संख्याष्टावश्नोतेर्नव न वननीया नव दश दस्ता दृणार्या वा विंशतिर्द्विर्दशतः शतं दशदशतः सहस्रं सह

---

2. *b* om षट् च चत्वारिंशच्च षट्चत्वारिंशत् ॥; *a d.* नदनु, *m* नदन°. 4. *a. d* नदन, *m.* नदन. 5. *b* सगच्छन्ति. 6. *a. d* सशब्दयन्ति, *b*. पत्र. 7. *m*, om इति after संघात, *b* om तौ हि, and reads परस्पर जिगीषया. 9. *a. d m* read षट्चत्वारिंशके. 10. *b* om. खल after धान्यखल° and च after अपि. 11. *d.* सस्यखल°.

---

2. For रणः, विवाक् etc. *vide* Nigh II. 17. The text of निघण्टु adds विस्राद् before नदनु°.

14. For the quot *vide* RS. X. 48. 7.

तं प्रयुतं तत्तदभ्यस्तमम्बुदो मेघो भवत्यरणमम्बु तद्दोम्बुदोम्बु-मद्भवतीति वा मद्भवतीति वा स यथा महान् बहुर्भवति वर्षस्तादिवा-र्बुदम्। खले न पर्वान् प्रति हन्मि भूरि। खल इव पर्वान् प्रतिहन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्खलतेर्वायमपीतरः खल एत-स्मादेव समास्कन्नो भवति। किं मां निन्दन्ति शत्रवोनिन्द्राः। य इन्द्रं न विविदुरिन्द्रो ह्यहमस्म्यनिन्द्रा इतर इति वा॥

व्याप्तिकर्माण उत्तरे धातवो दश। तत्र द्वे नामनी आशाण आशुवान आपान आप्नुवानः॥

वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत्। तत्र वियात इत्येतद् वियात-यत इति वा वियातयेति वा॥ 10

"आखण्डल प्रहृयसे"।

आखण्डयितः। खण्डं खण्डयतेः॥ तळिदित्यन्तिकवधयोः संसृष्ट-कर्म ताडयतीति सतः॥ १०॥

अभीरे दमेक०-०निन्द्राः। वैकुण्ठस्येन्द्रपुत्रस्येयमार्षम्। जगती। दश-रात्रस्य नवमेऽहनि निष्केवल्ये शस्यते। आध्यात्मिको मन्त्रः। इदं तावज्जगत् एकः 15
संग्रम् अभि अस्मि-अभिभवामि अभिभूय च भवामि। अस्य सर्वस्या-मानि

B. C. D. R. read अम्बुदो for अर्बुदो of Bi. 6. B. C. E. विविदुः, D. विदुः. 12. B. C. D. R as text; B. D. however खण्डः; Bi. om. खण्डं खण्डयतेः. 13 B ताड्यतीति, A. Bi conclude III. ii. 4. after सतः 15. a. m. अध्यात्मिको. 16. a. d. यतें after च

---

1. अम्बुदो.—We are reading अम्बुदो here in preference to अर्बुदो of Bi. and J., as the former is supported by tradition and is read by our mss. as also by R. It must be admitted however that the word अर्बुद, not अम्बुद is usually used in the table of numeration and the derivation next given by यास्क as अरणमम्बु suggests that the word derived is अर्बुद. This is neuter sing. and is derived from अम्बुद etc. as here.

14. वैकुण्ठस्य etc. The anukramanî *loc. cit.* gives वैकुण्ठ as the name of इन्द्र and the meter of this verse to be त्रिष्टुप्.

हमेकोधिपतिरित्यभिप्रायः। कथं पुनरभिभवाम्यहमेतत्। **एकम्** एकः **निःपाट्-निःषहमाणः सपत्नान्**-शत्रून् निश्चयेनाधिकं वाभिभवामीत्यर्थः। सहतिरभिभवार्थेच्छन्दसि। कथं पुनरभिभवन् सपत्नानहमस्य जगत आधिपत्ये वर्ते। यावदेकं तावदागतं सन्तमेक एवाभिभवामि सपत्नम्। **अभी द्वा**-द्वौ अप्यागतौ एक एव **अभिभवामि। किम् उ त्रयः करन्ति**-त्रयोपि युगपदागताः सन्तः एकाकिनोपि मम किं कुर्वन्ति। न किंचिदपीत्यभिप्रायः। किंच **खले न पर्षान्** गाह्यमाने हन्यमाने। गम्यमानोत्र एकः खलशब्दः उपमानम् उपमासंबन्धात्। यथा खले खलस्थाने कर्षणेन **पर्षान्**-बहूनपि संचितान्धूलानप्रतिबन्धेन क्षुन्दीरन् एवमहमपि भूरीनपि शत्रूनागतान् क्षणादेव तैरप्रतिबध्यमानः **हन्मि**। तमेवप्रभावं सन्तं मा **किं निन्दन्ति शत्रवः**। नाहं निन्दार्हः स्तव्योहमित्यभिप्रायः। अपि च **अनिन्द्राः** ये **माम् इन्द्रं न विदुः** याथात्म्यतः ते कथमविज्ञायैव मां निन्दन्ति। नैतन्याय्यमित्यभिप्रायः। **अनिन्द्रा इतर इति वा** अथवा अनिन्द्राः सन्तः आत्मना कथमिन्द्रं सन्त मां निन्दन्ति। न तु नामेन्द्रत्वेनैवाहमतिरिक्तस्तेभ्यः अथ कथमितरे मां निन्दन्त्यनिन्द्राः सन्तो न लज्जन्तीत्यभिप्रायः। इति समस्तार्थः।

अथैकपदनिरुक्तम्। **एक इता संख्या** गता संख्यात्वं प्राप्तेत्यर्थः। द्व्यादिकं वर्षीयं गता। **द्वौ इततरा संख्या** एकस्याः सकाशात्। **त्रयस्तीर्णतमा संख्या** द्वयोः सकाशात्। प्रसक्तानुप्रसक्तमुच्यते **चत्वारश्चलितमा संख्या** त्रिभ्यः

---

3 *a. d.* यत for यावत्. 4. *a. d. m.* सन्तौ after आगतौ 7. *a. d.* om. गाह्यमाने; *a. d.* om. हन्यमाने and read गम्यमानोऽत्र for गम्यमानेऽत्र of *b*, and खलशब्द. उपमानसंबन्धात् etc. 8. *d* वर्षकेण, *m.* कर्षणेन for कर्षणेन of *b*, *a. d. m.* appear to read संचितान्धूलानप्रतिबन्धेन क्षुद्येरन् *b*. संचितान् अप्रतिबन्धेन क्षुद्येरन 11.) याथार्थ्यत° 13. *b*. omits मा निन्दन्ति, *a.* om निन्दन्ति. 15 *b* गता संख्या अतो प्राप्तेत्यर्थ. 16. *b*. गन्ता; *a*. चापर, *d*. वापर for वर्षीय.

---

7 हन्यमाने –The passage here is much tampered with. The readings are fully given. We have adopted an eclectic reading above so as to render some sense. But it is impossible to make out क्षुद्येरन् of *b*., or क्षुद्येरन् or क्षुद्येरन् of *a d. m.* Both these are likely to be mistaken for each other. But क्षुद्येरन् is passive and is unsuited in the sentence, and क्षुद्येरन् is ungrammatical. Hence I have taken the liberty of adopting a suitable grammatically correct form from क्षुद् 7 A.

कामान्। **अष्टावश्नोतेः** ते हि सप्त संख्या व्याप्य वर्तन्ते। **नव** इति या संख्या सा **न वनतीया** न सभजनीया भवति नवसंख्यायुक्तायां हि तिथौ न कश्चिदप्यारम्भः क्रियते। **दश** इति या संख्या सा **दस्ता** दस्यन्तीव हि संख्या भवति। **दृष्टार्था वा** दृश्यैव हि दशानामुपरि पुनः पुनर्दृश्यते संख्या। तद्यथा-एकादशेत्येवमादि। तस्माद् दृष्टार्थदर्शनाद् दशेत्युच्यते। **विंशतिर्द्विर्दशतः** द्विः दश विंशतिरित्युच्यते। **शतं दशादशतः**-दशकृत्वोऽभ्यस्ता या दश ताः समुदिताः शतमित्युच्यन्ते। **सहस्रं सहस्वत्।** सह इति बलनाम तेन तद्वत्। दुर्बलानामपि सहसे समुदितं बलवदेव भवति संघातबलीयस्त्वात्। **अयुतं नियुतं प्रयुतं तत्तदभ्यस्तम्।** सहस्रं दशकृत्वोऽभ्यस्तमयुतमामिश्रीभूतमयुतमित्युच्यते। अयुतमपि दशकृत्वोऽभ्यस्तं नियुतमित्युच्यते। नियुतमपि दशकृत्वोऽभ्यस्तं प्रयुतमित्युच्यते। अथार्बुदशब्दनिर्विवक्षया अम्बुशब्दं निर्वक्ति अरणशीलम्-गमनशीलं **अम्बु तद्दः**-तस्य दाता मेघः **सः अम्बुदः** इत्युच्यते। **स यथा** उदकभावमापद्यमानः **महान् बहुर्भवति वर्षन् तदिवार्बुदम्** तदपि वर्षदिव यद् बहु द्रव्यजातं भवति तदर्बुदमित्युच्यते। **खल इति संग्रामनाम।** खलेर्वा भ्रियत्यर्थस्य भ्रियन्ति हि तत्र योधाः। **स्खलतेर्वा** हिंसार्थस्य हिंस्यन्ते हि तत्र परस्परेण। **अयमपीतरः खलः**-धान्यखलः **पतस्मादेव** तत्रापि हि भ्रियन्ति चूर्ण्यमानानि धान्यानि हिंस्यन्ते वा चूर्ण्यन्त इत्यर्थः। अथवा **समाहतः** असौ **भवति** विप्रकीर्णैः धान्यैः॥

---

1. *bi*. *a*. *d* सप्त संख्या, *m*. सप्तसंख्यां, *d* वाप्य for व्याप्य 2 *d*. सन् for सा न 5 *bi*. द्विदशतः 6. *a d* दशादशत समुदिता तमुच्यन्ते, *bi* उच्यते 11. *bi* °शब्दविवक्षया and *bi* (*m*. गमनशील after अरणशील and तद् after अम्बु. 12. *bi*. तस्य for इत्युच्यते 13. *a*. *d* तदपि वर्षदिव, *bi m*. तदिव वर्षन् 14. *a d*, खलतेर्वा for खल्तेर्वा; *bi*. reads भ्रियत्यर्थस्य, and om तत्र after हि 15. *a*. *d*. खलतेर्वा for खलतेर्वा; *a d* omit खलः after इतरः. 16 *d* भ्रियन्ति for भ्रियन्ति 17. *a*. *d*. विपकीर्णो for विप्रकीर्णैः of *bi*.

---

14. खल्तेर्वा-The reading of *a*. *d*. is preferable so far as the sense of the roots goes. But the reading given here is supported by *bi* and *m*. and is according to the order of the words in the निरुक्त.

व्याप्तिकर्माण उत्तरे धातवो दश । संग्रामे हीतरेतरं व्याप्नुवन्ति योधा इति संग्रामनामभ्यः उत्तरे व्याप्तिकर्मणः । कतमे पुनस्त इति । "इन्वति नक्षति"—इत्येवमादयः । तत्र दशके व्याप्तिकर्मधातुगणे एते द्वे नामनी भवतः आक्षाणः इति च आपानः इति च । तत्र आक्षाण आभुवानः यो हि अश्नोति व्याप्नोति स आक्षाण इत्युच्यते । तथा च य आप्नोति सः आभुवानः सन् आपानः इत्युच्यते ॥

वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् । संग्रामे हीतरेतरं व्याप्य ततो घ्नन्तीति व्याप्तिकर्मभ्यः उत्तरे वधकर्मणः समाम्नाताः । कियन्तः । त्रयस्त्रिंशत् । कतमे पुनस्ते । इति । "दम्भोति भयति घ्वरति धूर्वति"—इत्येवमादयः । तत्र वधकर्मधातुमध्ये वियात इत्येतत् नाम । तत्पुनरेवं निर्वक्तव्यम् । वियातयते—नानाप्रकारं यातयते यः शत्रून् स वियातः । अथ वा एवमन्यया स्यात् वियातयेत्येवमुच्यते यः स्तोतृभिः स वियातः । आखण्डल इत्येतदपि नामैव । निगममपि चात्र दर्शयति आखंण्डल प्रहूंयसे । आभिमुख्येनावस्थितो यः खण्डयति मेघान् स आखण्डयिता तस्य संबोधनम् । इे आखण्डयितः ॥

इरिम्बिठिर्नाम काण्वो मन्त्रदृक् । तस्येयमार्षम् । गायत्री । ऐन्द्री । रात्रिपर्यायेषु मध्यमरात्रिपर्याये होतुरियं शस्त्रे विनियुक्ता ।

" शाचिंगो शाचिंपूजनायं रणाय ते सुतः ।
आखंण्डल प्रहूंयसे ॥ "

शाचिगो इति चैक पदम् । शचीति कर्मनाम । तस्य शच्याख्यस्य कर्मणो योग्यमिष्टिपशुसोमादिलक्षणा सन्ततिः सा शाचिः । अथवा स्वार्थिक एव तद्धितः स्यात् ।

---

4. *bi* om. च before आपान· 9 *a. d.* omit अपति. 11. *bi.* वियातय पनमुच्यते &c 12 *m* adds शत्रून् after स्तोतृभि 15. *bi* कण्वो. 16 *a d* read महाराधिके पर्याये for मध्यम° &c

---

2 For इन्वति, नक्षति etc. *vide* Nigh. II. 18. We read नक्षति with the text of the निघण्टु and as it is read by *m*. This word however is read by *a d bi* and j as ननक्षे It will be seen that the variant for नक्षति is न्व and not ननक्षे

9 For दम्भोति, भयति, etc. *vide* Nigh. II. 18.

17. The quot. is RV. VIII. 17. 12.

शब्येव शाचिः । तां प्रत्याह्वयमानो यो गच्छति स शाचिपुरिन्द्रः तस्य संबोधने हे शाचिगो इति । तथैव शाच्यो य आगतः सन् पूज्यते स शाचिपूजनः तस्य संबोधने हे शाचिपूजन । हे आखण्डल-आखण्डयितः । शक्रगो मेघनो वा । इयमस्माभिः प्रस्तुता शची यां प्रति ते नित्यमिष्टमागन्तुं यथा च पूज्यसे स्वमायतः सन् ठि च एतयो च शब्दयोरस्मिन् कर्मणि अयं रणाय-रमणाय ते-तव हरिः-अभिहरिः सोमो यतोऽस्माभिस्त्वं स्तूयसे प्रकर्षेणाभिदूयसे आह्वयसे । स एवमेतज् ज्ञात्वा अस्मदुपकाराय अनतीतकालमागन्तुमर्हसीत्यभिप्रायः ।

आखण्डलशब्देऽपतरं वक्तव्ये बहुतरे तडिच्छब्दे इति कस्मादुतो निरुच्यते-तडिदित्यान्तिकवधयोः संघातकर्मे । तडिदित्येतच्छब्दरूपमन्तिकाभिधायि वधाभिधायि च इत्येकमेव हेतुभाभ्यामर्थभिदा संप्रयुज्यते । विद्युदपि च तडिदित्युच्यते । या पुनः कर्तरि कारके ताडयतीति सतः ॥ १० ॥

"त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि ।
या नो दूरे तळितो या अरातयोऽभि सन्ति जम्भया ता अनप्नसः ॥"

त्वया वयं सुवर्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो याश्चान्तिकेऽरातयोदानकर्माणो ११ वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप इति रूपनामाप्नोतीति सतः । विद्युत्तडिद्भवतीति शाकपूणिः सा ह्यवताडयति दूरेऽपि दृश्यतेऽपि त्विदन्तिकनामैवाभिप्रेतं स्यात् ।

---

1. *bd.* त *for* ता 1–2. *a.* only reads सबोधने ! and *a. d.* read तयोश्च शब्दयः अपतरः सन् *&c. for* तयोश्च *&c.* 4. *a. d.* read आगतु त . *m.* नित्यमिष्टमागन्तुं ; *bd.* आगत. 5 *a. d.* omit दृश्यते 8. *a. d.* read कस्मादेतौ निरुच्यते 13. A. तळितो. B. D. तळितो 15. A. तालितो. B. D. तळितो. 16. A. तळिद्भवति. B. D. तळिद्भवति ; A. अवाक्षदपि. B. D. अवाग्दपि.

---

12. The quot. is RS. II. 23 9.

"दूरे चित् सन्तळिदिवातिं रोचसे ।"

दूरेऽपि सन्नन्तिक इव संदृश्यस इति ॥

वज्रनामान्युत्तराण्यष्टादश । वज्रः कस्माद् वर्जयतीति सतस्तश्च कुत्स इत्येतत् कृन्ततेर्वापिः कुत्सो भवति कर्ता स्तोमानामित्यौपमन्यवोऽप्याप्यस्य वधकर्मैव भवति तत्सख इन्द्रः शुष्णं जघानेति ॥

ऐश्वर्यकर्माण उत्तरे धातवश्चत्वारः ॥

ईश्वरनामान्युत्तराणि चत्वारि । तन्नेन इत्येतत् सनित ऐश्वर्येणेति वा सनितमनेनैश्वर्येमिति वा ॥ ११ ॥

यथा त्वन्तिकनामेदं तथेयमृगुदाहरणम् त्वया वयं०-० अंनुप्रसः इति । गतमदस्यार्षम् । जगती । अक्षरैः विनियुक्ता । हे ब्रह्मणस्पते त्वया वयं सुकृषा-सुवर्धयित्रा सुष्ठु वर्धिताः अनुगृहीता सन्तः वसु-वसूनि यानि यानि स्पाहाँ-स्पाहाँणि-स्पृहणीयानि तानि तानि मनुष्या-मनुष्येभ्यः तानभिभूय आदद्मसि । किं च याश्च नो दूरे तळिदिवः-या नो दूरे अध्वन्यवस्थिताः अरातयः याश्चान्तिके । तळिच्छब्दस्यान्तिकाभिधायित्वम् । दूरे च अन्तिके च या अरातयः । अरातिः सेना । अदानकर्माणः । रातिर्दानार्थः । अस्माकमभिमतानर्थान् ददतो ये निवारयन्ति ते अरातयः अदानप्रज्ञाः न दातव्यमस्माभिरेभ्य इत्येवं येषां प्रज्ञा ते अदानप्रज्ञाः । द्विविधा हि शत्रवः दुःखसंज्ञाश्याः सुखसंज्ञाश्याश्च तत्र ये दुःखसंज्ञाश्याः ते अदानप्रज्ञाः ये अदानकर्माणस्ते सुखसंज्ञाश्याः । ते चोभयेऽपि दूरे चान्तिके चावस्थिता भवन्ति । ताः दूरान्तिकावस्थितानुभयानपि जम्भय-स्तम्भय निरेष्टान्

---

1 A तळिदिव, B D तळिदिव 3 A वज्रयतीति for वर्जयतीति 4–5. A. औपमन्यवोथाप्यस्य for °ऽप्यस्य 8. A B_1. concludo III ii. 5 after वेश्वर्यमिति वा 11. *a d m*. वय सुष्ठु वर्धयित्रा वर्धिता अनुगृहीताः &c. 12. *a d m* omit स्पाहाँणि, *a. d* read तानि अभिभूय for तानभिभूय 13. *a d m* किं च या नो दूरे तळित याश्च दूरे अध्वन्यवस्थिताः &c 15 *a. d m* omit अदानकर्माण 16 *a d* add वा before न दातव्ये &c.; *d.* omits एव 17 *a d* read सुखसनाश्या दुःखसनाश्याश्च 18. *a. d.* omit ये अदानकर्माणस्ते सुखसनाश्याः, *b*. अदानकर्मा. 19. *a. d m.* read तान् for ता and *b*. om सम्भय

कुरु त्वं ब्रह्मणस्पते किं च अनप्रसः अरुणांश्चैतान् कुरु । अप्र इति रूपनाम । तद्धि आप्नोति । आश्रयम् ।

विद्युत्तडिद्वतीति शाकपूणिराचार्यो मन्यते । किं कारणम् । सा ह्यव-ताडयति अशनिरूपेण । दूरात् एव च दृश्यते । तस्मान्न तस्या अन्तिकनामाभि-संबन्धोस्ति । अपि त्विदम् अपरेणोदाहरणेन अन्तिकनामैवाभिप्रेतं स्यात् दूरे चित् सन्तळिदिवातिं रोचसे-दूरेपि सन्नन्तिक इव अवस्थितो दृश्यसे इति । अत्र दूरेपि सन्नन्तिक इवेति स्फुटतरमन्तिकाभिधानत्वम् । न तथा पूर्वस्मिन् मन्त्रे या नो दूरे तळिदः इति ॥

एवमन्तिकनामत्वेन वा विद्युन्नामत्वेन वा वधनामत्वेन वा प्रकरणोपपदे अवेक्ष्य यथासंभवं निर्वक्तव्यम् ।

" यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित् सन् तळिदिवातिं रोचसे ।
रात्र्याश्चिदन्धो अतिं देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ "

एषा जगती । आग्नेयी । कुत्सेन दृष्टा । महाव्रते आग्निमारुते शस्त्रे अभिप्लवस्य च षष्ठेहनि आग्निमारुते एव च शस्यते । यः त्वं हे अग्ने विश्वतः-सर्वतः सुप्रतीकः-सुदर्शनः शोभनदर्शनः असि च सदृङ्-यतो यतो दृश्यसे ततस्ततः समानदर्शन-स्तुल्य एव दृश्यसे । असि च दूरे अपि सन् अतिभ्राजिष्णुत्वात् तळिदिव-अन्तिक इवावस्थितः अतिरोचसे-अतिरोचिष्णुर्दृश्यसे । असि च यदेतत् रात्र्या-श्चित्-रात्र्या अपि संततमन्धः-अध्यानलक्षणं तमः यत्र ध्यातुमपि दुःखं शक्यते किमुत द्रष्टुम् । एतदपि अति-अतीत्य हे देव-सर्वभूतदीपयितः पश्यसि एव त्वम् न तेऽस्माकमिव तेनान्धेनापि तमसा प्रतिबध्यते दर्शनम् । तस्य तवैवंगुणयुक्तस्य हे अग्ने वयं सख्ये-सखिभावे परिचरणकर्मणि आ दत्तादुच्छ्वासात्कृताध्यवसायाः सन्तो मा केनचिद्व्याधिना शत्रुणा वा रिषाम-मास्मान् कश्चिद्धिंसीत्त्वदनुध्यानादेवेत्यभिप्रायः ॥

---

1. *bi. m.* अस्मपाश्च 2 *a d.* तद्व्याप्नोत्याश्रय 3. *bi.* om विद्युत्-तडिद्वतीति शाकपूणिराचार्यो मन्यते । किं कारणं । 14 *d* पुत्रे for पत्रे 17. *d. j* °रोचिष्णु दृश्यसे 18. *a. d* सन्नं and *bi* सन् तन् for सन्नन् of *m.*; *a d. m.* पश्च for पत्र of *bi.*; *bi.* om दुःख 19. *a. d.* om. असि; *a, d. m.* °दीपयितव्य for °दीपयितः of *bi*; *d* पश्यसेव त्व 22. *a. d. bi.* (ms.) व्याधिना. *bi. m.* विधिना; *bi.* किंचित्

---

12. The quot. is RS. I. 94. 7.

वज्रनामान्युत्तराण्यष्टादश। यो हि हन्यते स वज्रेणैवेति वधकर्मभ्य उत्तराणि वज्रनामानि। कियन्ति पुनस्तानि। अष्टादश—अष्टौ च दश च। कतमानि पुनस्तानि। "दिद्युत् नेमिः हेतिः"—इत्येवमादीनि। दिद्युत् द्यतेर्वा द्योततेर्वा पुनः पुनरतिशयेन वा द्यति अवखण्डयति द्योतते दीप्यते वा सा दिद्युत्। अवनामयति खण्डयति प्रहारेणेति नेमिः। हेतिर्हन्तेः। इत्येवमादि॥

आह **वज्रः कस्मात्**। उच्यते। **वर्जयति**—विजोजयति प्राणैः प्राणिनः **तत्र कुत्स इत्येतत् संदेहपदम्**। ऋषिरपि कुत्स इत्युच्यते। तत्पुनरेतद्यदा वज्रनाम तदा कृन्ततेः कृत्यतेनेनेति कुत्सः। यदा पुनरेतदृष्यभिधानं तदा **कर्तारं स्तोमानामिति औपमन्यव** आचार्यो **मन्यते। अत्राप्यस्य वधकर्मैव** अभिप्रेतं स्यात्। अत्रापि एतदृषेर्वर्तमानमभिधानमस्य ऋषेर्वधकर्मैव वधार्थेसंयुक्तमेव स्यात्। किं कारणम्। **तत्सख इन्द्रः शुष्णं जघान इति**। तेन स्तूयमानो विवृद्धबलः शुष्णं शोषयितारं रसानामसुरं मेघं वा जघान। मेघो हि शुष्णः। तदुदये हि धान्यानि उदकग्राहिनिमित्तेन शुष्यन्ति॥

ऐश्वर्यकर्माण उत्तरे घातवश्चत्वारः। घातमेव हि वज्रेणायुधेनैवंदर्शयं भवतीति वज्रनामभ्य उत्तरे ऐश्वर्यकर्माणः कतमे पुनस्ते। "इरज्यति पत्यते क्षियति राजति"—इति॥

ईश्वरनामान्युत्तराणि चत्वारि। ऐश्वर्यसंबन्धेनैवोच्यते। कतमानि पुनस्तानि। "राष्ट्री अर्य नियुत्वान् इन"। **तत्र इन इत्येतत्** अभिधानमेवं व्युत्पाद्यम्। **सनितः**—संभक्तः **ऐश्वर्येणेति वा अथ वा सनितं**—संभक्तम् **अनेनैश्वर्यमिति**॥ ११॥

---

1 *d.* om स. 3–4 *a d.* omit पुनः पुनः &c to दिद्युत् 9. *a d.* औपमन्यव आचार्यो मन्यते 11. *a d.* omit इति after जघान 15. *a. d.* add इति after ते 17. *a d.* read उच्यन्ते for उच्यते

---

3. For दिद्युत्, नेमि etc *vide* Nigh II. 20.

11 तत्सख जघान इति *Cf* RS. I. 11. 7. and the comt of सायण on it, *Cf* also I 103 8, IV. 16. 11–13

16 For इरज्यति पत्यते etc. *vide* Nigh. II. 21. Where however we have क्षयति and not क्षियति as here read by all.

18 For राष्ट्री, अर्य. etc. *vide* Nigh. II. 22.

" यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।

इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥ "

यत्र सुपर्णाः सुपतना आदित्यरश्मयोमृतस्य भागमुदकस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स मा धीरः पाकमत्राविवेशेति धीरो धीमान् पाकः पक्वो भवति विपक्वस्य आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवतम् । अथाध्यात्मं यत्र सुपर्णाः सुपतनानीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा स मा धीरः पाकमत्राविवेशेति धीरो धीमान् पाकः पक्वो भवति विपक्वस्य आत्मेत्यात्मगतिमाचष्टे ॥१२॥

अधुना मन्त्रमपि व्याचष्टे यस्मिन्नेतदीश्वरनामेन इति । यत्रा सुपर्णा• इति । निदुषेा वैश्वदेवे सूक्ते दीर्घतमसा दृष्टा । महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते । वैश्वदेवेषु हि सूक्तेष्वेकदेवता बहुदेवताश्च मन्त्रा भवन्ति तदप्युपेक्षितव्यम् । यत्र-अस्मिन् मण्डलेवस्थिताः सुपर्णाः-सुपतनाः आदित्यरश्मयः ते हि शोभनमर्थमुदिस्य समोदिपातलक्षणं पतन्ति । अथवा शोभमानाः पतन्तीति सुपर्णाः । ते किं कुर्वन्ति । उच्यते । अमृतस्य भागम्-उदकस्य अमरणधर्मणः भागं भजनीयमंशमादाय पृथिवीलोकस्तेनान्विताः सन्तः सर्वभूतानि अभिस्वरन्ति । ' स्वृ शब्दोपतापयोः ' अभितपन्तीत्यर्थः । अथवा अभिस्वरन्त्यादित्यमण्डलमाभिमुख्येन रसान् एहीत्वा

---

10. A. Bi. conclude III. ii. 6 after आचष्टे. 12. Bi. वैश्वदेवीये; a. d. omit महाव्रते. 13. d. omits हि. 14 a. d. m. omit सुपर्णाः. 15. a d. read समोपपातलक्षणं. 16. d. m. अमरणधर्मिणो. 18. m. अभिपतन्तीत्यर्थः; a आदित्यमण्डलेन.

---

1. The quot. is RS. I 164. 21.

6. इत्युपनिषद्वर्णो भवतीति etc. The reference is not traced.

17. स्व-अवयवे

प्रयान्ति । कथं पुनः प्रयान्ति । अनिमेषं-अनिमिषन्तः-अनिमिषमाणा इव आदरवन्त इत्यर्थः । विद्यया-वेदनेन विज्ञानेन स्वकर्मविशेषयुक्तेनान्विताः सन्तः इदमेवास्माभिः कर्तव्यं रथादानादिलक्षणं कर्मेति अभिस्वरन्ति । यत्रैतदेवंलक्षणं कर्म कुर्वन्त्यादित्यरश्मयः तत्र किमिति । उच्यते । इनो विश्वस्य भुवनस्य गोपाः । इनः-ईश्वरः इनो असावादित्यः ऐश्वर्येण भवति विश्वस्य भुवनस्य-भूतस्य सर्वेषां भूतानां गोपाः-गोपायिता भवति आदित्यः मण्डलान्तरुपयो यत्तन मण्डलेवस्थितः । स मा धीरः-धीमान् प्रति विशिष्टया बुद्ध्यन्वितः बुद्धिरेव हि तस्य शरीरम् । पाकं पाकः पक्तव्यः पक्तव्यवत्तं विपक्वप्रज्ञः सम्यग्दर्शनोत्पादनतया आविवेश आदित्यः ।

इति शब्दः प्रकरणप्रदर्शनार्थः एवमयम् उपनिषद्वर्णो भवतीति । यद्वा ज्ञानसुपगतस्य सतो गर्भजन्मजरामृत्यवो निर्वर्तेन वीदन्ति सा रहस्यं विद्या उपनिषदित्युच्यते । उपनिषद्भावेन वर्ण्यत इति उपनिषद्वर्णः । अधिदैवतम् उक्तम् । अथाध्यात्मम् उच्यते । अधिदैवतमध्यात्ममित्येतौ । शब्दौ व्याख्यातौ । यत्र यस्मिन् शरीरे सुपतनानि इन्द्रियाणि अवस्थितानि स्वेषु स्वेषु आयतनेषु कृष्णसारेषु ।

---

1 *b* om कथ पुन प्रयान्ति । अनिमेष 2. *bi*, om विज्ञानेन 3. *bi* कर्तव्यमादानां. 5–6 *a. d m.* add भवति after भुवनस्य, and read क्रिच for सर्वेषां भूतानां, and om भवति after गोपायिता 8, *a. d.* read पाक for पाक', and *b* proceed पक्तव्यः प्रज्ञ । विपक्वप्रज्ञ (ज्ञः *d.*) सम्यग्दर्शनोत्पादनया &c.; *bi m.* पक्व पक्तव्य पक्तव्यप्रज्ञ विपक्वप्रज्ञ &c 10 *a. d m* इतिकरण., *bi.* इतिशब्द, *a d d* om. प्रकरण² before 'प्रदर्शनार्थं, *a d* शब्दौ before भवतीति, *a d* यद्विज्ञान for यद्वा ज्ञान 11. *a d.* विनिश्चेतुं; *a. d. m* रहस्या 12–13. *a. d.* अधिदैवमुच्यते, *m* 'दैवतमाध्यात्म.

---

8. None of the readings is satisfactory by itself I adopt a conjectural reading derived from the readings here and in l. 10–11, next page.

11. Is it रहस्यविद्या? *bi* reads रहस्यं विद्या, *a. d m.* रहस्या विद्या The first can be construed. The second looks to be wrong as रहस्य is a noun and not an adj In all probability the true reading should be the one suggested.

13 व्याख्यातौ-*vide* the com. on Nir. I 4.

14. कृष्णसारेषु²-Is it कृष्णतारेषु? All however read text as above.